

BIBLIOTHECA INDICA;


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

No. 193



रत्नप्रभाभासितशाङ्करब्रह्मसूत्रभाष्यं ।

THE APHORISMS OF THE VEDÁNTA,

By BÁDARÁYAṆA,

WITH

THE COMMENTARY OF S'ANKARA ÁCHÁRYA AND THE GLOSS OF GOVINDA ÁNANDA.

EDITED BY PANDITA RÁMA NÁRÁYANA VIDYÁRATNA.

FASCICULUS VII.

CALCUTTA:

PRINTED BY C. B. LEWIS, AT THE BAPTIST MISSION PRESS.

1863.



SANSKRIT WORKS PUBLISHED,

IN THE NEW SERIES.

The Vais'eshika Sútras, with Commentaries, by Pandita Jaya Náráyaṇa Tarkapanchánana. Complete in five Fasc. Nos. 4, 5, 6, 8 and 10.

The Sáṇḍilya Sútras with S'wapnes'wara's Commentary. Edited by Dr. J. R. Ballantyne, LL. D. Complete in one Fasc. No. 11.

The Kaushítaki-Bráhmaṇa Upanishad with S'ankaránanda's Commentary, edited with a translation by E. B. Cowell, M. A. Complete in two Fasciculi, Nos. 19 and 20.

A translation of the Súrya Siddhánta and Siddhánta S'iromaṇi, by Pandita Bápú Deva S'ástri, under the superintendence of Archdeacon Pratt. Nos. 1, 13 and 28.

SANSKRIT WORKS IN PROGRESS.

The Das'a Rúpa with the exposition of Dhanika. Edited by F. E. Hall, D. C. L. Fasc. I., II. Nos. 12, and 24.

The Nárada Pancharátra. Edited by Rev. K. M. Banerjea. Fasc. I. II. III., Nos. 17, 25 and 34.

The Kávyádars'a of S'rí Daṇḍin, edited, with a commentary, by Pandita Premachandra Tarkabágísha, Fasc. I. II., Nos. 30 and 33.

The Maitri Upanishad, with the commentary of Rámatírtha, edited, with an English Translation By E. B. Cowell, Esq. M. A. fasc. I. No. 35.



ॐ परमात्मने नमः।

(N° 193, Fasciculus 7)

न वियदश्रुतेः ॥ १ ॥

वेदान्तेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यन्ते। केचिदाकाशस्योत्पत्तिमामनन्ति केचिन्न। तथा केचिद्वायोरुत्पत्तिमामनन्ति केचिन्न। एवं जीवस्य प्राणानाञ्च। एवमेव क्रमादिद्वारकोऽपि विप्रतिषेधः श्रुत्यन्तरेषूपलक्ष्यते। विप्रतिषेधाच्च परपक्षाणामनपेक्षितत्वं स्थापितं तद्वत् स्वपक्षस्यापि विप्रतिषेधादेवानपेक्षितत्वमाशङ्क्येतेत्यतः सर्ववेदान्तगतसृष्टिश्रुत्यर्थनिर्मलत्वाय परः प्रपञ्च आरभ्यते। तदर्थनिर्मलत्वे च फलं यथोक्ताशङ्कानिवृत्तिरेव, तत्र प्रथमं तावदाकाशमाश्रित्य

ॐ ब्रह्मणे नमः।

वियदादिविधातारं सीतास्याब्जमधुव्रतं।
नित्यचिद्विश्वकर्त्तात्माभिन्नं सर्वेश्वरं भजे ॥ १ ॥

जीवस्यानुत्पत्तिप्रसङ्गेनाकाशस्याप्युत्पत्त्यसम्भवमाशङ्क्य परिहरन्नादावेकदेशिमतमाह। न वियदश्रुतेः। वियत्प्राणपादयोरर्थं सङ्क्षिपन् पूर्वपादेन सङ्गतिमाह। वेदान्तेष्विति। भिन्नोपक्रमत्वमेवाह। केचिदित्यादिना। भूतभोक्तृश्रुतीनां मिथोविरोधशङ्कानिरासो वियत्पादार्थः। लिङ्गशरीरश्रुतीनां तन्निरासः प्राणपादार्थः। यथा मिथोविरोधात् पूर्वापरविरोधाच्च परपक्षा उपेक्ष्याः तथा श्रुतिपक्षोऽ[illegible]प उपेक्ष्य इति शङ्कोत्थाने पादद्वयस्यारम्भात् पूर्वपादेन दृष्टान्तसङ्गतिरिति समुदायार्थः। आकाशवाय्वोरुत्पत्तिमामनन्ति तैत्तिरी

चिन्त्यते किमस्याकाशस्योत्पत्तिरस्त्युत नास्तीति। तत्र तावत् प्रतिपद्यते। न वियदश्रुतेरिति। न खल्वाकाशमुत्पद्यते। कस्मात् अश्रुतेः, न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति। छान्दोग्ये हि 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' इति सच्छब्दवाच्यं ब्रह्म प्रकृत्य 'तदैक्षत तत्तेजोऽसृजत' इति च पञ्चानां महाभूतानां मध्यमं तेज आदिं कृत्वा त्रयाणां तेजोऽबन्नानामुत्पत्तिः श्राव्यते। श्रुतिश्च नः प्रमाणमतीन्द्रियार्थविज्ञानोत्पत्तौ न चात्र श्रुतिरस्त्याकाशस्योत्पत्तिप्रतिपादिनी तस्मान्नाकाशस्योत्पत्तिरिति॥

अस्ति तु॥२॥

तुशब्दः पक्षान्तरपरिग्रहे। मा नामाकाशस्य छान्दोग्येऽभूदुत्पत्तिः श्रुत्यन्तरे त्वस्ति। तैत्तिरीयकाः समामनन्ति

यकाः, नामनन्ति छन्दोगाः, जीवस्य प्राणानाञ्चोत्पत्तिं सर्व एत आत्मनो व्युच्चरन्तीति वाजिनः, एतस्माज्जायते प्राण इत्याथर्वणिकास्समामनन्ति। नन्वेवमाकाशपूर्विका क्वचित् सृष्टिः क्वचित्तेजःपूर्विकेति क्रमविरोधः। आदिपदात् 'स इमाँल्लोकानसृजतेत्यक्रमः' क्वचित् सप्त प्राणाः क्वचिदष्टावित्यादिसङ्ख्याद्वारकस्य विरोधो ग्राह्यः, प्रपञ्चः पादद्वयं, तथा च पादद्वयस्य श्रुतीनां मिथोविरोधनिरासार्थत्वाच्छ्रुतिशास्त्राध्यायसङ्गतयः सिद्धाः। अत्राकाशस्योत्पत्त्यनुपपत्तिश्रुत्योर्मिथोविरोधोऽस्ति न वेति वाक्यभेदैकवाक्यत्वाभ्यां सन्देहे यद्युत्पत्तिस्तदा वाक्यभेदेन विरोधादप्रामाण्यं अनयोः श्रुत्योरिति पूर्वपक्षयिष्यन् आदावनुत्पत्तिपक्षमेकदेशी गृह्णातीत्याह तत्र तावदिति॥

उत्पत्तिश्रुतिर्मुख्या नास्तीति गूढाभिसन्धिः सम्प्रति पूर्वपक्षयति सूत्रकारः। अस्ति त्विति। एकवाक्यत्वेन प्रामाण्यसम्भवे किमिति श्रुत्यो-

'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रकृत्य 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः' इति। ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजः-प्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति। नन्वेकवाक्यताऽनयोः श्रुत्योर्युक्ता। सत्यं सा युक्ता न तु सावगन्तुं शक्यते, कुतः तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन सम्बन्धानुपपत्तेः 'तत्तेजोऽसृजत तदाकाशमसृजत' इति। ननु सकृच्छ्रुतस्यापि कर्तुः कर्तव्यद्वयेन सम्बन्धो दृश्यते *यथा स सूपं पक्त्वौदनं पचतीति। एवं तदाकाशं सृष्ट्वा तत्तेजोऽसृजतेति योजयिष्यामः। नैवं युज्यते, प्रथमजत्वं हि छान्दोग्ये तेजसोऽवगम्यते, तैत्तिरीयके चाकाशस्य, न चोभयोः प्रथमजत्वं सम्भवति। एतेनेतरश्रुत्यन्तरविरोधोऽपि व्याख्यातः। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यत्रापि तस्मात् आकाशः सम्भूतस्तस्मात्तेजः सम्भूतमिति सकृच्छ्रुतस्यापादानस्य सम्भवनस्य च वियत्तेजोभ्यां यु-

रप्रामाण्यमिति शङ्कते। नन्वेकवाक्यतेति। एकवाक्यत्वासम्भवादप्रामाण्यं युक्तमित्याह। सत्यमित्यादिना। एकस्य युगपत् कार्यद्वयासम्बन्धेऽपि क्रमेण सम्बन्धसम्भवादेकवाक्यतेति मुख्यसिद्धान्ती शङ्कते। ननु सकृदिति। अप्रामाण्यवादी दूषयति। नैवमिति। क्रमो न युज्यते द्वयोः श्रुतप्राथम्यभङ्गापत्तेरित्यर्थः। एकस्माद्विदलवीजाद्दलद्वयवद्वस्तूभयं प्रथममित्यत आह। न चेति। वायोरग्निरिति क्रमश्रुतिभङ्गादिति शेषः। छान्दोग्यश्रुतेस्तित्तिरिश्रुतिविरुद्धार्थत्वमुक्त्वा तित्तिरिश्रुतेस्तद्विरुद्धार्थत्वमाह। एतेनेति। एतत्पदार्थमाह। तस्मादिति। छान्दोग्ये श्रुतं तेजसः प्राथम्यं अत्र दुर्योज्यमित्यर्थः। किञ्च सत्पदार्थः आत्मा छान्दोग्ये तेजस उपादानं श्रूयते अत्र तु वायुरिति नैकवाक्यते-

* यथेति वर्ध० का० पु० नास्ति।

गपत् सम्बन्धानुपपत्तेः, वायोरग्निरिति च पृथगाम्नानात्। अस्मिन् विप्रतिषेधे कश्चिदाह॥

गौण्यसम्भवात्॥ ३॥

नास्ति वियदुत्पत्तिः अश्रुतेरेव। या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति। कस्मात् असम्भवात्। न ह्याकाशस्योत्पत्तिः सम्भावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु। ते हि कारणसामग्र्यसम्भवादाकाशस्योत्पत्तिं वारयन्ति। समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वमुत्पद्यमानं समुत्पद्यते। द्रव्यस्य चैकजातीयकमनेकञ्च द्रव्यं समवायिकारणं भवति। न चाकाशस्यैकजातीयकमनेकञ्च द्रव्यमारम्भकमस्ति यस्मिन् समवायिकारणे सति. असमवायिकारणे च तत्संयोगे आकाश उत्पद्येत। तदभावात्तु

त्याह। वायोरिति। एवं श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे प्राप्ते स एव वियदनुत्पत्तिवादी स्वमतेन प्रामाण्यं ब्रूत इत्याह। अस्मिन्निति॥

एवमध्यायसमाप्तेरधिकरणेषु प्रथमं विरोधात् श्रुत्यप्रामाण्यमिति पूर्वपक्षफलं तत एकदेशिसिद्धान्तः पश्चान्मुख्यसिद्धान्ते श्रुतीनामविरोधेनैकवाक्यतया ब्रह्मणि समन्वयसिद्धिरिति फलं क्रमस्तेत्यवगन्तव्यं तत्र श्रुत्योर्विरोधे सत्यध्ययनविध्युपात्तयोरप्रामाण्यायोगाद्वियदुत्पत्त्यसम्भवरूपतर्कानुगृहीतछान्दोग्यश्रुतिर्मुख्यार्था इतरा गौणीत्यविरोध इत्येकदेशिमतं विवृणोति। नास्तीत्यादिना। आकाशो नोत्पद्यते सामग्रीशून्यत्वादात्मवत्, न चाविद्याब्रह्मणोः सत्त्वाद्वेतुसिद्धिः विजातीयत्वेनानयोरारम्भकत्वायोगादसंयुक्तत्वाच्च संयोग एव

तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति। उत्पत्तिमताञ्च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः सम्भाव्यते प्रागुत्पत्तेः *आकाशादिकार्य्यं न बभूव पश्चाच्च भवतीति। आकाशस्य पुनर्न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यते। किं हि प्रागुत्पत्तेरनवकाशमसुषिरमच्छिद्रं बभूवेति शक्यतेऽध्यवसातुं। पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः। तस्माद् यथा लोके आकाशं कुरु आकाशो जात इत्येवंजातीयको गौणः प्रयोगो भवति, यथा च घटाकाशः करकाकाशो गृहाकाश इत्येकस्याप्याकाशस्यैवंजातीयको भेदव्यपदेशो भवति। वेदेऽपि 'आरण्यानाकाशेष्वालभेरन्' इत्येवमुत्पत्तिश्रुतिरपि गौणी द्रष्टव्या॥

हि द्रव्यस्यासमवायिकारणमतः समवाय्यसमवायिनोरभावान्न हेतुसिद्धिरित्यर्थः। प्रागभावशून्यत्वाच्चात्मवदाकाशो नोत्पद्यत इत्याह। उत्पत्तिमताञ्चेति। प्रकाशस्याद्युपानुभवः आदिपदात्तमोध्वंसपाकयोर्ग्रहणं। मूर्तद्रव्याश्रयत्वं ह्याकाशस्य कार्यं, तच्च प्रलयेऽप्यस्ति परमाण्वाश्रयत्वात् अतो न प्रागभाव इत्यर्थः। प्रागभावासत्त्वं स्फुटयति। किं हीति। स्थूलाश्रयोऽवकाशः सूक्ष्माश्रयः छिद्रमणुवाश्रयः सुषिरमिति भेदः। किञ्चात्मवदाकाशो न जायते विभुत्वादस्पर्शद्रव्यत्वाच्चेत्याह। पृथिव्यादीति। तस्मादुक्ततर्कबलाद्गौणी द्रष्टव्येत्यन्वयः। भेदोक्तेर्गौणत्वे वैदिकोदाहरणमाह। वेदेऽप्यारण्यानिति। आकाशेष्विति भेदव्यपदेशो गौण इति सम्बन्धः॥

---

* प्रकाशेति टी॰ सम्मतः पाठः।

शब्दाच्च ॥ ४ ॥

शब्दः खल्वप्याकाशस्याजत्वं ख्यापयति। यत आह 'वायुश्चान्तरिक्षञ्चैतदमृतम्' इति न ह्यमृतस्योत्पत्तिरुपपद्यते। 'आकाशवत् सर्वगतश्च नित्यः' इति च। आकाशेन ब्रह्मसर्वगतत्वनित्यत्वाभ्यां धर्माभ्यामुपमिमान आकाशस्यापि तौ धर्मौ सूचयति, न च तादृशस्योत्पत्तिरुपपद्यते। स यथानन्तोऽयमाकाश एवमनन्त आत्मा वेदितव्य इति चोदाहरणं, आकाशशरीरं ब्रह्म आकाश आत्मेति च। न ह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मणस्तेन विशेषणं सम्भवति नीलेनेवोत्पलस्य। तस्मान्नित्यमेवाकाशेन साधारणं ब्रह्मेति गम्यते ॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

इदं परोत्तरं सूत्रं। स्यादेतत् कथं पुनरेकस्य सम्भूतशब्दस्य 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्तमानस्य मुख्यत्वं सम्भवति आ-

---

न केवलं तर्कादाकाशस्यानुत्पत्तिः किन्तु श्रुतितोऽपीत्याह सूत्रकारः। शब्दाच्चेति। नित्यभावस्यानादित्वादिति भावः। आत्मेति च शब्द इत्योदाहरणमित्यन्वयः। आकाशः शरीरमस्येति बहुव्रीहिणा त्यन्तसाम्यमानात् ब्रह्मवदाकाशस्यानादित्वमित्यर्थः ॥

परोत्तरमिति। शङ्कोत्तरमिति यावत्। तान्येव शङ्कापदानि पठति। स्यादेतदिति। अधिकारे प्रकरणे, यथैकस्मिन् ब्रह्मप्रकरणे अन्नं ब्रह्मानन्दो ब्रह्मेति वाक्ययोर्ब्रह्मशब्दस्यान्ने गौणत्वमानन्दे मुख्यता तथैकवा-

कार्ये च गौणत्वमिति। अत उत्तरमुच्यते। स्याच्चैकस्यापि सम्भूतशब्दस्य विषयविशेषवशाद्गौणो मुख्यश्च प्रयोगो ब्रह्मशब्दवत्। यथैकस्यापि ब्रह्मशब्दस्य 'तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्म' इत्यस्मिन्नधिकारेऽन्नादिषु गौणः प्रयोगः आनन्दे च मुख्यः, यथा च तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दो भक्त्या प्रयुज्यते अञ्जसा तु विज्ञेये ब्रह्मणि तद्वत्। कथं पुनरनुत्पत्तौ नभसः 'एकमेवाद्वितीयम्' इतीयं प्रतिज्ञा समर्थ्यते। ननु नभसा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति कथञ्च ब्रह्मणि विदिते सर्वं विदितं स्यादिति। तदुच्यते। एकमेवेति तावत् स्वकार्यापेक्षयोपपद्यते। यथा लोके कश्चित् कुम्भकारकुले पूर्वेद्युर्मृद्दण्डचक्रादीनि चोपलभ्यापरेद्युश्च नानाविधान्यमत्राणि प्रसारितान्युपलभ्य ब्रूयात् मृदेवैकाकिनी पूर्वेद्युरासीदिति। स च तयावधारणया मृत्कार्य्यजातमेव पूर्वेद्युर्नासीदित्यभिप्रेयात् न दण्डचक्रादि तद्वत्। अद्वितीयश्रुतिरधिष्ठात्रन्तरं वारयति यथा मृदोऽमत्रप्रकृतेः कुम्भकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणो जगत्प्रकृतेरन्योऽधिष्ठातास्तीति। न च नभसाऽपि द्वितीयेन सद्वितीयं ब्रह्म प्रसज्यते। लक्षणान्यत्वनिमित्तं हि

कथमस्यैकस्याऽपि सम्भूतशब्दस्य गुणमुख्यार्थभेदो योग्यताबलादित्याह। स्याच्चेति। उदाहरणान्तरमाह। यथा चेति। अभेदोपचारो भक्तिः। मुख्यसिद्धान्त्याक्षिपति। कथं पुनरिति। स एवाक्षेपद्वयं स्फुटयति। नन्विति। अद्वितीयत्वश्रुतिबाधः सर्वविज्ञानप्रतिज्ञाबाधश्चेत्यर्थः। प्रथमाक्षेपं दृष्टान्तेन परिहरति। एकमेवेति। कार्यरूपद्वितीय-

नानात्वं, न च प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति। क्षीरोदकयोरिव संसृष्टयोर्व्यापित्वामूर्त्तत्वादिधर्मसामान्यात्। सर्गकाले तु ब्रह्म जगदुत्पादयितुं यतते स्तिमितमितरत्तिष्ठति तेनान्यत्वमवसीयते। तथाचाकाशशरीरं ब्रह्मेत्यादिश्रुतिभ्योऽपि ब्रह्माकाशयोरभेदोपचारसिद्धिः। अत एव च ब्रह्मविज्ञानेन सर्वविज्ञानसिद्धिः। अपि च सर्वं कार्यमुत्पद्यमानमाकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा चाव्यतिरिक्तदेशकालमेवाकाशं भवति इत्यतो ब्रह्मणा तत्कार्येण च विज्ञातेन सह विज्ञातमेवाकाशं भवति। यथा क्षीरपूर्णे घटे कतिचिदब्बिन्दवः प्रक्षिप्ताः सन्तः क्षीरग्रहणेनैव गृहीता भवन्ति। न हि क्षीरग्रहणादब्बिन्दुग्रहणं परिशिष्यते। एवं ब्रह्मणा तत्कार्यैश्चाव्यतिरिक्तदेशकालत्वात् गृहीतमेव ब्रह्मग्रहणेन नभो भवति तस्माद्भाक्तं नभसः सम्भवश्रवणमित्येवं प्राप्त इदमाह ॥

शून्यत्वं प्रागवस्थायामवधारणश्रुत्यर्थः। कुले गृहे, अमत्राणि घटादीनि पात्राणि। एकमेवेत्यवधारणव्यावर्त्यं कार्यमिति व्याख्याय द्वितीयपदव्यावर्त्यमाह। अद्वितीयश्रुतिरिति। आकाशस्य द्वितीयत्वमङ्गीकृत्याद्वितीयादिपदसङ्कोचः कृतस्तदपि नास्तीत्याह। न च नभसापीति। धर्मसाम्ये ब्रह्मनभसोः कथं भेदस्तत्राह। सर्गकाले त्विति। धर्मसाम्याददद्वितीयत्वोपचार इत्यर्थे श्रुतिमाह। तथा चाकाशेति। द्वितीयमाक्षेपं परिहरति। अत एवेति। अभेदोपचारादेवेत्यर्थः। नभसो ब्रह्मतत्कार्याभ्यामभिन्नदेशकालत्वाच्च तज्ज्ञाने ज्ञानमित्याह। अपि चेति ॥

प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति' 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्' इति 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति च काचन *सद्दृष्टिर्धा विद्यास्तीति चैवंरूपा प्रति वेदान्तं प्रतिज्ञा विज्ञायते। तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात् यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात्। व्यतिरेके हि सति एकविज्ञानेन सर्वं विज्ञायत इतीयं प्रतीज्ञा हीयेत। स चाव्यतिरेक एवमुपपद्यते यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण उत्पद्येत। शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रतिज्ञासिद्धिरवगम्यते। तथा हि येनाश्रुतं श्रुतं भवतीति प्रतिज्ञाय

एवमाकाशस्यानुत्पत्तौ सर्वश्रुतीनामविरोध इत्येकदेशिसिद्धान्तः प्राप्तः, तं मुख्यसिद्धान्ती दूषयति। प्रतिज्ञेति। अहानिरबाधः सामयजुराथर्वणशाखाभेदस्थानशब्दार्था इति शब्दाः। न काचनेति। आत्मभिन्नं ज्ञेयं नास्तीत्यर्थः। ननु सर्वस्य ब्रह्माव्यतिरेकात् प्रतिज्ञाया अहानिरित्यस्तु तथापि जीवादिवदनुत्पन्नस्याऽपि नभसो ब्रह्मणि कल्पितत्वेनाव्यतिरेकात् प्रतिज्ञासिद्धिः किं न स्यात् किमुत्पत्त्येत्यत आह। शब्देभ्यश्चेति। अव्यतिरेक एव न्यायस्तेनेत्यर्थः। अयं भावः जीवस्य तावदात्मत्वात् ब्रह्माव्यतिरेकः अज्ञानतत्सम्बन्धयोः कल्पितत्वेनाव्यतिरेकः स्वतन्त्राज्ञानायोगादज्ञानान्यजडस्यस्य तु कार्यत्वेनैवाव्यतिरेकसिद्धिस्तस्याकार्यत्वे प्रधानवत् स्वातन्त्र्यादव्यतिरेकायोगात्। तथाऽऽन्यायविदः 'नित्यद्रव्याणि स्वतन्त्राणि भिन्नान्यनाश्रितानि' इति, तस्मात् प्रतिज्ञासिद्धये आकाशस्य कार्यत्वेनैवाव्यतिरेको वाच्य इति

* सद्दृष्टिर्धेति नास्ति पा० का०।

मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते तत्साधनायैव चोत्तरे शब्दाः 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजत' इति, एवं कार्यजातं ब्रह्मणः प्रदर्श्याव्यतिरेकं प्रदर्शयन्ति 'ऐतदात्म्यमिदं सर्वम्' इत्यारभ्याप्रपाठकसमाप्तेः, तद्यद्याकाशं न ब्रह्मकार्यं स्यात् न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत ततश्च प्रतिज्ञाहानिः स्यात्, न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्तुं। तथा च प्रति वेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां ज्ञापयन्ति 'इदं सर्वं यदयमात्मा' 'ब्रह्मैवेदममृतं पुरस्ताद्' इत्येवमादयः, तस्मात् ज्वलनादिवदेव गगणमप्युत्पद्यते। यदुक्तं अश्रुतेर्न वियदुत्पद्यते इति तदयुक्तं वियदुत्पत्तिविषयश्रुत्यन्तरस्य दर्शितत्वात् 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति, सत्यं दर्शितं, विरुद्धन्तु 'तत्तेजोऽसृजत' इत्यनेन श्रुत्यन्तरेण नैकवाक्यत्वात् सर्वश्रुतीनां भवति, एकवाक्यत्वमविरुद्धानामिह तु विरोध उक्तः। सकृच्छ्रुतस्य

दृष्टान्तहृष्टिसार्वात्म्यशब्दानाह। तथा चेति। तेन तेन दृष्टान्तेनेति यजुषि दुन्दुभ्यादिदृष्टान्तेनाथर्वणे ऊर्णनाभ्यादिदृष्टान्तेनेत्यर्थः। यजुषि प्रतिज्ञासाधका इदं सर्वमितिशब्दाः आथर्वणे ब्रह्मैवेदमिति शब्दा इति भावः। एवमाकाशोत्पत्तिकथनादेकदेशिमते दूषिते श्रुत्यप्रामाण्यवादिनोक्तं स्मारयति। सत्यं दर्शितमिति। मुख्यसिद्धान्त्याह। नैकेति। तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुराकाशतेजोभ्यां युगपत् सम्बन्धे तित्तिरिक्रमबाधात् क्रमेणाकाशं सृष्ट्वा तेजोऽसृजतेति सम्बन्धे तेजःप्राथम्यभङ्गप्रसङ्गाद्वस्तुनि विकल्पासम्भवेन तयोः

स्रष्टुः स्रष्टव्यद्वयसम्बन्धासम्भवात् द्वयोश्च प्रथमजत्वासम्भवाद्विकल्पासम्भवाच्चेति। नैष दोषः। तेजःसर्गस्य तैत्तिरीयके तृतीयत्वश्रवणात् 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत आकाशाद्वायुः वायोरग्निः' इति। अशक्या हीयं श्रुतिरन्यथा परिणेतुं, शक्या परिणेतुं छान्दोग्यश्रुतिः तदा आकाशं वायुञ्च सृष्ट्वा तत्तेजोऽसृजतेति। न हीयं श्रुतिः तेजोजनिप्रधाना सती श्रुत्यन्तरप्रसिद्धामाकाशस्योत्पत्तिं वारयितुं शक्नोति। एकस्य वाक्यस्य व्यापारद्वयासम्भवात्। स्रष्टा त्वेकोऽपि क्रमेणानेकं स्रष्टव्यं सृजेत् इत्येकवाक्यत्वकल्पनायां सम्भवन्त्यां न विरुद्धार्थत्वेन श्रुतिर्हा-

---

शाखाभेदेन प्राथम्यव्यवस्थाया अयोगान्नैकवाक्यतेति प्राप्ते मुख्य एव दूषयति। नैष दोष इति। अप्रामाण्यकल्पनाद्वरं अपौरुषेयश्रुतीनामेकवाक्यत्वेन प्रामाण्यकल्पनं तच्चैकवाक्यत्वं बलवच्छ्रुत्या दुर्बलश्रुतेः कल्प्यं, बलवती च तित्तिरिश्रुतिः प्रकृतिपञ्चम्या पौर्वापर्याख्यक्रमस्य श्रुतत्वात्, छान्दोग्यश्रुतिस्तु दुर्बला। तेजःप्राथम्यश्रुत्यभावात् तेजःसर्गमात्रन्तु श्रुतं तृतीयत्वेन परिणेयमित्येकवाक्यतेत्यर्थः। यदुक्तं एकदेशिना छान्दोग्यश्रुत्याकाशोत्पत्तिर्वार्यत इति तन्निरस्तं। किञ्च सा श्रुतिः किं तेजोजन्मपरा तत्तेजोजन्म वियदनुत्पत्तिश्चेत्युभयपरा, आद्ये न तद्वारणमित्याह। न हीति। अविरोधादित्यर्थः। न द्वितीयः श्रुत्यन्तरविरोधेनोभयपरत्वकल्पनायोगाद्वाक्यभेदापत्तेश्चेत्याह। एकस्येति। नन्वेकस्य स्रष्टुरनेकार्थसम्बन्धवद्वाक्यस्याप्यनेकार्थता किं न स्यादित्यत आह। स्रष्टा त्विति। एकस्य कर्तुरनेकार्थसम्बन्धो दृष्टः। न त्वेकस्य वाक्यस्य नानार्थत्वं दृष्टं नानार्थकप्रयोगे तु पय आनयेत्यादावावृत्त्या वाक्यभेद एव। आनयनस्य जलक्षीराभ्यां पृथक्सम्बन्धादित्यर्थः। फलितमाह। इत्येकेति। एकस्य शब्दस्यावृत्तिं विनाऽनेकार्थत्वं नास्ति इदमसृजतेति शब्दस्य छान्दोग्य उपसंहृताकाशादिसम्बन्धार्थमाह

तव्या। न चास्माभिः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसम्बन्धोऽभिप्रेयते, श्रुत्यन्तरवशेन स्रष्टव्यान्तरोपसंग्रहात्। यथा च 'सर्वं खल्विदं ब्रह्म तज्जलान्' इत्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशान्तरविहितं तेजःप्रमुखमुत्पत्तिक्रमं वारयति। एवं तेजसोऽपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यन्तरविहितं नभःप्रमुखमुत्पत्तिक्रमं वारयितुमर्हति। ननु शमविधानार्थमेतद्वाक्यं 'तज्जलानिति शान्त उपासीत' इति श्रुतेर्नैतत् सृष्टिवाक्यं, न तस्मादेतत्प्रदेशान्तरप्रसिद्धं क्रममनुरोद्धुमर्हति, तत्तेजोऽसृजतेत्येतत्सृष्टिवाक्यं तस्मादत्र यथा श्रुतिक्रमो ग्रहीतव्य इति, नेत्युच्यते। न हि तेजःप्राथम्यानुरोधेन श्रुत्यन्तरप्रसिद्धो वियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात् क्र-

---

त्तिदोषः स्यादित्यत आह। न चेति। छान्दोग्यस्थतेजोजन्म आकाशादिजन्मपूर्वकं तेजोजन्यत्वात् तैत्तिरीयस्थतेजोजन्मवदित्याकाशादिजन्मोपसंहारे सदाकाशमसृजतेति वाक्यान्तरस्यैव कल्पनान्नावृत्तिदोष इत्यर्थः। श्रुत्यन्तरस्थः क्रमः श्रुत्यन्तरे ग्राह्य इत्यत्र दृष्टान्तमाह। यथा चेति। सृष्टौ तात्पर्यातात्पर्याभ्यां दृष्टान्तश्रुतिवैषम्यं शङ्कते। नन्वित्यादिना। तेजःप्राथम्यस्वीकारे आकाशसर्गो धर्मी तद्धर्मं प्राथम्यं चेति द्वयं श्रुतं बाधनीयमिति गौरवमाकाशप्राथम्यस्वार्थिकतेजःसर्गप्राथम्यमात्रबाध इति लाघवमिति मत्वाह। नेत्युच्यत इति। किञ्च प्रधानधर्मित्यागादरं गुणभूतस्य तेजःप्राथम्यस्य धर्मस्य त्याग इत्याह। न हीति। किञ्च किं सृष्टिपरश्रुतिसिद्धत्वात् तेजःप्राथम्यं गृह्यते उत प्रथमस्थाने तेजसः सर्गश्रुत्याऽर्थात् प्राथम्यभानान्नाद्य इत्याह। अपि चेति। द्वितीयमनूद्य दूषयति। अर्थात्त्विति। यदुक्तं वस्तुनि विकल्पासम्भवादुभयोः प्राथम्यं शाखाभेदेन व्यवस्थितं न भवति

मस्य। अपि च तस्मात्तेजोऽसृजतेति नात्र क्रमस्य वाचकः कश्चिच्छब्दोऽस्ति अर्थात्तु क्रमो गम्यते, स च वायोरग्निरित्यनेन श्रुत्यन्तरप्रसिद्धेन क्रमेण निवार्यते। विकल्पसमुच्चयौ तु वियत्तेजसोः प्रथमजत्वविषयावसम्भवानभ्युपगमाभ्यां निवारितौ, तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः। अपि च छान्दोग्ये 'येनाश्रुतं श्रुतं भवति' इत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमाम्नातमपि वियदुत्पत्तावुपसंख्यातव्यं किमङ्ग पुनस्तैत्तिरीयके समाम्नातं नभो न संगृह्यते। यच्चोक्तमाकाशस्य सर्वेणानन्यदेशत्वाद्ब्रह्मणा तत्कार्यैश्च सह विदितमेव तद्भवति, अतो न प्रतिज्ञा हीयते न चैकमेवाद्वितीयमिति श्रुतिकोपो भवति क्षीरोदकवद्ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति। अत्रोच्यते। न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्वविज्ञानं नेतव्यं। मृदादिदृष्टान्तप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते। क्षीरोदकन्यायेन च सर्वविज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यात्। न हि क्षीरज्ञानगृहीतस्योदकस्य सम्यग्विज्ञानगृहीतत्वमस्ति।

नाप्युभययोर्द्विदलाङ्कुरवत् समुच्चयोत्पत्त्या प्राथम्यं वायोरग्निरिति क्रमबाधापातादिति। तदिति तदिष्टमेवेत्याह। विकल्पेति। न केवलं श्रुतिद्वयोरविरोधः सौहार्द्दमप्यस्तीत्याह। अपि चेति। वियदुपसंग्राह्यमित्यन्वयः। वियदनुत्पत्तिवादिनोऽक्रममनूद्य प्रतिज्ञाया अद्वितीयश्रुतेश्च मुख्यार्थतात्पर्यावगमान्न गौणार्थतेति दूषयति। यच्चोक्तमित्यादिना। प्रकृतिविकारन्यायः तदनन्यत्वन्यायः, उदकं क्षीरस्थमपि क्षीरज्ञानान्न गृह्यते भेदादिति भावः। मास्तु सम्यग्ज्ञानं श्रुतेर्भ्रान्तिमूलत्वसम्भवादित्यत आह अपौरुषेयत्वान्नैवमित्याह। न च

न च वेदस्य पुरुषाणामिव मायालीकवञ्चनादिभिरर्थावधारण-मुपपद्यते। सावधारणा चेयमेकमेवाद्वितीयमिति श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत। न च स्वकार्यापेक्षयेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाद्वितीयतावधारणञ्चेति न्याय्यं। मृदादिष्वपि हि तत्सम्भवात् न तदपूर्ववदुपन्यसितव्यं भवति 'श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवति' इत्यादिना। तस्मादशेष-वस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यतापेक्षयोपन्यस्यत इति द्रष्टव्यं। यत्पुनरेतदुक्तमसम्भवाद्गौणी गगणस्योत्पत्तिश्रुति-रिति तत्र ब्रूमः॥ ६॥

यावद्विकारन्तु विभागो लोकवत्॥ ७॥

तुशब्दोऽसम्भवाशङ्काया व्यावृत्त्यर्थः। न खल्वाकाशोत्पत्त्या-वसम्भवाशङ्का कर्तव्या, यतो यावत् किञ्चिद्विकारजातं दृश्यते

वदस्येति। माया भ्रान्तिः तयाऽलीकं मिथ्याभाषणं तेन वञ्चनमयथा-र्थबोधनं आदिपदाद्विप्रलिप्साप्रमादकरणापाटवानि गृह्यन्ते। प्रति-ज्ञामुख्यत्वमभिधायाद्वितीयश्रुतिमुख्यत्वमाह। सावधारणेति। सर्व-द्वैतनिषेधपरेत्यर्थः। उभयगौणत्वेऽद्भुतवदुपन्यासो मृदादिदृष्टान्तैस्त-त्साधनं च स्यादिति दोषान्तरमाह। न चेत्यादिना। कार्यमेव वस्त्वे-कदेश आकाशो नोत्पद्यते सामग्रीशून्यत्वादित्यत्राकाशो विकारः विभ-क्तत्वाद्घटादिवदिति सत्प्रतिपक्षमाह। यत्पुनरित्यादिना।

यो विभक्तः स विकार इत्यन्वयमुक्त्वा यस्त्वविकारः स न विभक्तः यथात्मेति व्यतिरेकव्याप्तिमाह। न त्वविकृतमिति। दिगादिषु व्यभि-

घटघटिकोदञ्चनादि वा कटककेयूरकुण्डलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागो लोके लक्ष्यते, न त्वविकृतं किञ्चित् कुतश्चिद्विभक्तमुपलभ्यते। विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते, तस्मात् सोऽपि विकारो भवितुमर्हति। एतेन दिक्कालमनःपरमाण्वादीनां कार्यत्वं व्याख्यातं। नन्वात्माप्याकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत् प्राप्नोति, न आत्मन आकाशः सम्भूत इति श्रुतेः। यदि ह्यात्मापि विकारः स्यात् तस्मात् परमन्यन्न श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात्, तथा च शून्यवादः प्रसज्येत। आत्मत्वादेवात्मनो निराकरणशङ्कानुपप-

---

चारमाशङ्क्य पक्षसमत्वान्मैवमित्याह। एतेनेति। विभक्तत्वेनेत्यर्थः। आत्मनि व्यभिचारं शङ्कते। नन्विति। धर्मिसमानसत्ताकविभागस्य हेतुत्वात् परमार्थात्मनि विभागस्य कल्पितत्वेन भिन्नसत्ताकत्वान्न व्यभिचार इत्याह। नेति। अत्र चाज्ञानान्यद्रव्यत्वं विशेषणं अतो नाज्ञानतत्सम्बन्धादौ व्यभिचारः। नन्वात्मा कार्यः विभक्तत्वात् वस्तुत्वाद्वा घटवदित्याभासतुल्यमिदं अनुमानमित्याशङ्क्यात्मनः परमकारणत्वेन श्रुतस्य कार्यत्वे शून्यताप्रसङ्ग इति बाधकसत्त्वात् तस्याभासत्वं नात्र किञ्चिद्बाधकमस्ति प्रत्युत आकाशस्याकार्यत्वे नित्यानेकद्रव्यकल्पना श्रौतप्रतिज्ञाहान्यादयो बाधकाः सन्तीति नाभासतुल्यतेत्याह। आत्मन इति। दुष्टप्रसङ्ग इति वदन्तं प्रत्याह। आत्मत्वादिति। आत्माभावः केनचित् ज्ञायते न वा, आद्ये यो ज्ञाता स परिशिष्यत इति न शून्यता, द्वितीयेऽपि न शून्यता मानाभावादित्यर्थः। किञ्च यद्धि कार्यं सत्तास्फूर्त्योरन्यापेक्षं तन्निराकार्यमात्मा त्वकार्यो निरपेक्षत्वान्न बाधयोग्य इत्याह। न ह्यात्मेत्यादिना। कस्यचित्कारणस्यागन्तुकः कार्यो न हि सत्ता स्फूर्त्योरनन्या यस्त्वादि-

त्तिः। न ह्यात्माऽऽगन्तुकः कस्यचित् स्वयं सिद्धत्वात्। न ह्यात्माऽऽत्मनः प्रमाणमपेक्ष्य सिध्यति। तस्य हि प्रत्यक्षादीनि प्रमाणान्यसिद्धप्रमेयसिद्धये उपादीयन्ते। न ह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयं सिद्धाः केनचिदभ्युपगम्यन्ते। आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणादिव्यवहारात् सिध्यति। न चेदृशस्य निराकरणं सम्भवति। आगन्तुकं हि वस्तु निराक्रियते न स्वरूपं। य एव हि निराकर्ता तदेव तस्य स्वरूपं। न ह्यग्नेरौष्ण्यं अग्निना निराक्रियते, तथाहमेवेदानीं जानामि वर्तमानं वस्त्वहमेवातीतमतीततरञ्चाज्ञासिषमहमेवानागतमनागततरञ्च ज्ञास्यामीत्यतीतानागतवर्तमानभावेनान्यथा



त्वक्षरार्थः। तत्र स्फुरतेरनन्यायत्तत्वं विवृणोति। न हीति। तदुक्तं सुरेश्वराचार्यैः॥

"प्रमाता च प्रमाणञ्च प्रमेयं प्रमितिस्तथा।
यस्य प्रसादात् सिध्यन्ति तत्सिद्धौ किमपेक्ष्यते"॥ इति॥

तथा श्रुतिराह 'पुरुषः स्वयं ज्योतिस्तस्य भासा सर्वमिदं विभाति' इति च। नन्वात्मनः स्वतः सिद्धौ प्रमाणवैयर्थ्यं तत्राह। तस्येति। ननु प्रमेयस्यापि स्वप्रकाशत्वं किं न स्यादित्यत आह। न हीति। अतो न प्रमाणवैयर्थ्यमिति भावः। आत्माऽपि मानाधीनसिद्धिकः किं न स्यादित्यत आह। आत्मा त्विति। अयमर्थः निश्चितसत्ताकं हि ज्ञानं प्रमेयसत्तानिश्चायकं गेहे घटो दृष्टो न वेति ज्ञानसंशयेन दृष्टः इति व्यतिरेकनिश्चये चार्थस्वरूपानिश्चयात् ज्ञानसत्तानिश्चयश्च न स्वतः कार्यस्य स्वप्रकाशत्वायोगान्नापि ज्ञानान्तरादनवस्थानादतः साक्षिणैव ज्ञानसत्तानिश्चयो वाच्यः। तत्र साक्षिणश्चेत् ज्ञानाधीनसत्तानिश्चयः अन्योन्याश्रयः स्यादतः सर्वसाधकत्वादात्मा स्वतः सिद्ध इति।

भवत्यपि ज्ञातव्ये न ज्ञातुरन्यथाभावोऽस्ति सर्वदा वर्तमानस्वभावत्वात्, तथा भस्मीभवत्यपि देहे नात्मन उच्छेदो वर्तमानस्वभावत्वादन्यथास्वभावत्वं वा न सम्भावयितुं शक्यं। एवमप्रत्याख्येयस्वभावत्वादेवाकार्य्यत्वमात्मनः कार्य्यत्वञ्चाकाशस्य। यत्तूक्तं समानजातीयमनेककारणद्रव्यं व्योम्नो नास्तीति तत् प्रत्युच्यते, न तावत् समानजातीयमेवारभते न भिन्नजातीयमिति नियमोऽस्ति। न हि तन्तूनां तत्संयोगानाञ्च समानजातीयत्वमस्ति द्रव्यगुणत्वाभ्युपगमात्। न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति। स्यादेतत् समवायिकारणविषय एव समानजातीयत्वाभ्युपगमो न

स्वप्रकाशस्यापि बाधः किं न स्यादित्यत आह। न चेति। जडं हि परायत्तप्रकाशत्वादागन्तुकं बाधयोग्यं न प्रकाशात्मस्वरूपं, तस्य सर्वबाधसाक्षिस्वरूपस्य निराकर्त्रन्तराभावात् स्वस्य च स्वनिराकर्तृत्वायोगात्। न हि सुनिपुणेनापि स्वाभावो द्रष्टुं शक्यत इत्यर्थः। एवं स्वतः स्फूर्तित्वादात्माऽबाध्यः इत्युक्त्वा स्वतःसत्ताकत्वाच्च न बाध्य इत्याह। तथाहमेवेति। ज्ञानज्ञेययोः सत्ताव्यभिचारेऽपि ज्ञातुः सदैकरूपत्वान्न सत्ताव्यभिचार इत्यर्थः। मास्तु जीवतो ज्ञातुरन्यथाभावः मृतस्य तु स्यादित्यत आह। तथेति। उच्छेदो विनाशोऽन्यथास्वभावत्वं मिथ्यात्वं वा सम्भावयितुमपि न शक्यं, अहमस्मीत्यनुभवसिद्धसत्स्वभावस्य बाधकाभावादित्यर्थः। एवमात्मनः शून्यत्वनिरासेन शून्यताप्रसङ्गस्यानिष्टत्वं उक्तं, ततश्चात्मनः कार्यत्वानुमानं आभास इत्याह। एवमिति। अकार्यात्मनः सिद्धौ तस्याविद्यासचितस्योपादानस्यादृष्टादिनिमित्तस्य च सत्त्वादाकाशानुत्पत्तिहेतोः सामग्रीशून्यत्वस्य स्वरूपासिद्धेरुक्तसत्प्रतिपक्षबाधाच्चाकाशस्य कार्य्यत्वं निरवद्यमित्याह। कार्यत्वञ्चेति। आत्माविद्ययोर्विजातीयत्वान्नाका-

कारणान्तरविषय इति, तदप्यनैकान्तिकं। सूत्रगोवालैर्ह्यनेकजातीयैरेका रज्जुः सृज्यमाना दृश्यते। तथा सूत्रैरूर्णादिभिश्च विचित्रान् कम्बलान् वितन्वते। सत्त्वद्रव्यत्वाद्यपेक्षया वा समानजातीयत्वे कल्प्यमाने नियमानर्थक्यं सर्वस्य सर्वेण समानजातीयकत्वात्, नाप्यनेकमेवारभते नैकमिति नियमोऽस्ति। अणुमनसोराद्यकर्मारम्भाभ्युपगमात्। एकैको हि परमाणुः मनश्चाद्यं स्वकर्मारभते न द्रव्यान्तरैः संहत्येत्यभ्युपगम्यते। द्रव्यारम्भे एवानेकारम्भकत्वनियम इति चेन्न, परिणामाभ्युपगमात्। भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यान्तरस्यारम्भकमभ्युपगम्येत। तदेव तु द्रव्यं विशेषवदवस्थान्तरमापद्यमानं कार्यं नामाभ्युपगम्यते तच्च क्वचिदनेकं परिणमते मृद्वीजा-

---

रम्भकत्वमित्युक्तमनूद्य निरस्यति। यत्त्वित्यादिना। किं कारणमात्रस्य साजात्यनियमः उत समवायिनः तत्राद्यं निरस्य द्वितीयं शङ्कते। स्यादेतदिति। किं समवायितावच्छेदकधर्म्मेण साजात्यं उत सत्तादिना, नाद्य इत्याह। तदपीति। न च रज्ज्वादि न द्रव्यान्तरमिति वाच्यं, पटादेरपि तथात्वापाताद्द्वितीयोऽस्मदिष्टः, आत्माविद्ययोर्वस्तुत्वेन साजात्यादित्याह। सत्त्वेति। उपादानस्य साजात्यनियमं निरस्य संयुक्तानेकत्वनियमाद्द्वितीयस्यासङ्गस्याप्यात्मन उपादानत्वसिद्धये निरस्यति। नापीत्यादिना। किमारम्भकमात्रस्यायं नियमः उत द्रव्यारम्भकस्य नाद्य इत्याह। अणुविति। द्व्यणुकस्य मनसश्चासमवायिकारणसंयोगजनकमाद्यं कर्म्म, यद्यप्यदृष्टवदात्मसंयुक्ते अणुमनसी आद्यकर्मारम्भके तथापि कर्मसमवायिन एकत्वादनेकत्वनियमभङ्ग इत्याह। एकैको हीति। द्रव्यान्तरैः समवायिभिरित्यर्थः। द्वितीयमुत्थाप्यारम्भवादानङ्गीकारेण दूषयति। द्रव्येत्यादिना। न त्व-

यङ्कुरादिभावेन क्वचिदेकं परिणमते क्षीरादिदध्यादिभावेन। नेश्वरशासनमस्त्यनेकमेव कारणं कार्य्यं जनयतीति, अतः श्रुतिप्रामाण्यादेकस्माद्ब्रह्मण आकाशादिमहाभूतोत्पत्तिक्रमेण जगज्जातमिति निश्चीयते। तथाचोक्तं 'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि' [शा० सू०२।१।२४] इति। यच्चोक्तमाकाशस्योत्पत्तौ न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यत इति, तदयुक्तं, येनैव हि विशेषेण पृथिव्यादिभ्यो व्यतिरिच्यमानं नभःस्वरूपवदिदानीमध्यवसीयते स एव विशेषः प्रागुत्पत्तेर्नासीदिति गम्यते। यथाच ब्रह्म न स्थूलादिभिः पृथिव्यादिस्वभावैः स्वभाववत् 'अस्थूलमनण्वित्यादिश्रुतिभ्यः, एवमाकाशस्वभावेनापि न स्वभाववदनाकाशमिति श्रुतेरवगम्यते, तस्मात् प्रागुत्पत्तेरनाकाश*मच्छिद्रमिति स्थितं। यदप्युक्तं पृथिव्यादिवैधर्म्या-

---

भ्युपगम्यते तस्मान्नैष नियम इति शेषः। यत्तु क्षीरपरमाणुषु रसान्तरोत्पत्तौ तैरेव दध्यारम्भ इति तन्न, क्षीरनाशे मानाभावात् रसवद्भ्योऽप्येकद्रव्यारभ्यत्वसम्भवाच्च द्रव्यगुणसङ्केतस्य पौरुषेयस्य श्रुत्यर्थनिर्णयाहेतुत्वादिति भावः। लोके कर्तुः सहायदर्शनात् असहायाद्ब्रह्मणः कथं सर्ग इति तत्राह। तथा चोक्तमिति। प्रागभावशून्यत्वं हेतुरप्यसिद्ध इत्याह। यच्चोक्तमित्यादिना। शब्दाश्रयत्वं विशेषः शब्दादिमानाकाशः प्रलये नास्ति 'नासीद्रजो नो व्योम' इति श्रुतेः। नन्वाकाशाभावे काठिन्यं स्यादिति चेत्, सुशिक्षितोऽयं नैयायिकतनयः। न ह्याकाशाभावस्तद्धर्मो वा काठिन्यं किन्तु मूर्तद्रव्यविशेषः तत्संयोगविशेषो वा काठिन्यं, तच्च प्रलये नास्तीति भावः। 'आकाशशरीरं ब्रह्म' इति श्रुतेरन्यौष्ण्यवद्ब्रह्मस्वभावस्याकाशस्य सति ब्रह्मणि कथमभावस्तत्राह। यथा चेति। विभुत्वादाकाशसमं ब्रह्मेति श्रुत्यर्थः। विभुत्वास्पर्श-

---

* अनाकाशत्वमुचितमिति वर्ध० का०।

दाकाशस्याजत्वमिति, तदप्यसत्, श्रुतिविरोधे सत्युत्पत्त्यसम्भावानुमानस्याभासत्वोपपत्तेः, उत्पत्त्यनुमानस्य च दर्शितत्वात्, अनित्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादि*प्रयोगसम्भवाच्च। आत्मनानैकान्तिकमिति चेत् न, तस्योपनिषदं प्रत्यनित्यगुणाश्रयत्वासिद्धेः। विभुत्वादीनाञ्चाकाशस्योत्पत्तिवादिनं प्रत्यसिद्धत्वात्। यच्चोक्तमेतच्छब्दाच्चेति तत्रामृतत्वश्रुतिस्तावदियत्यमृता दिवौकस इतिवद्द्रष्टव्याः। उत्पत्तिप्रलययोरुपपादितत्वात् 'आकाशवत् सर्वगतश्च नित्यः' इत्यपि प्रसिद्धमहत्त्वेनाकाशेनोपमानं क्रियते, निरतिशयमहत्त्वाय नाकाशसमत्वाय यथेषुरिव सविता धावतीति क्षिप्रगतित्वायोच्यते

द्रव्यत्वनिरवयवत्वलिङ्गानां विभक्तत्वादिलिङ्गसहितागमबाधमाह। यदपीत्यादिना। धर्मिविकाराभावे गुणनाशो न स्यादिति तर्कार्थमनित्यपदं गुणाश्रयत्वमेव हेतुः, तच्च स्वसमानसत्ताकगुणवत्त्वमतो निर्गुणात्मनि न व्यभिचारः। भूतत्वमादिशब्दार्थः। स्वरूपासिद्धिमप्याह। विभुत्वादीनाञ्चेति। सर्वमूर्तसंयोगः परिमाणविशेषो वा विभुत्वं निर्गुणात्मनि दृष्टान्तेनास्ति संयोगस्य सावयवत्वनियतस्याजत्वसाध्यविरुद्धता च, स्वरूपोपचयरूपं तु विभुत्वमात्माकाशयोर्न समं, 'ज्यायानाकाशात्' इति श्रुतेः। क्वचिदाकाशसाम्यन्तु ब्रह्मणा यत्किञ्चित्सर्वसम्बन्धेन व्यपदिश्यते असक्तत्वेन वा पञ्चीकरणादस्पर्शत्वमसिद्धं कार्यद्रव्यत्वान्निरवयवत्वमप्यसिद्धं, द्रव्यत्वजातिश्चात्मन्यसिद्धेत्यर्थः। नित्य इत्यंशेन साम्यं न विवक्षितं। ननु स यथाऽनन्तोऽयमाकाश एवमनन्त आत्मेति श्रुतिर्नित्यत्वेनैव साम्यं ब्रूते नेत्याह। एतेनेति। आकाशस्य कार्यत्वेनानित्यत्वादित्यर्थः। श्रुतिस्त्वापेक्षिकाऽऽनन्त्यद्वारा मुख्याऽऽनन्त्यं बोधयतीति भावः। न्यूनत्वाच्चाकाशस्य न मुख्योपमानत्वमित्याह। ज्या-

* प्रतिप्रयोगेति वर्ध० का०।

नेषुतुल्यगतित्वाय तद्वत्। एतेनानन्त्वोपमानश्रुतिर्व्याख्याता। ज्यायानाकाशादित्यादिश्रुतिभ्यश्च ब्रह्मणः *सकाशात् आकाशस्योनपरिमाणत्वसिद्धिः न तस्य प्रतिमास्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयति, अतोऽन्यदार्त्तम्' इति च ब्रह्मणोऽन्येषामाकाशादीनामार्त्तत्वं दर्शयति। तपसि ब्रह्मशब्दवत् आकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसम्भवश्रुत्यनुमानाभ्यां परिहृतं, तस्माद्ब्रह्मकार्य्यं वियदिति सिद्धं॥

एतेन मातरिश्वा व्याख्यातः॥ ८॥

अतिदेशोऽयं एतेन वियद्व्याख्यानेन मातरिश्वापि वियदाश्रयो वायुर्व्याख्यातः। तत्राप्येते यथायोगं पक्षा रचयितव्याः। न 'वायुरुत्पद्यते, छन्दोगानामुत्पत्तिप्रकरणेऽनाम्नानादित्येकः पक्षः, अस्ति तु तैत्तिरीयाणामुत्पत्तिप्रकरणे आम्नानं 'आकाशा-

---

यानिति। मुख्योपमानासत्त्वे श्रुतिर्न तस्येति तस्मादाकाशस्योपमानमात्रेण नित्यत्वं नास्तीति भावः। अनित्यत्वेनासत्त्वे श्रुतिमाह। अतोऽन्यदिति। यत्तु एकस्यैव सम्भूतशब्दस्य गौणत्वं मुख्यत्वञ्चेति तन्न, आकाशेऽपि तस्य मुख्यत्वसम्भवादित्याह। तपसीति। बलवत्तित्तिरिश्रुत्या छान्दोग्यश्रुतेर्नयनादेकवाक्यतया खादि ब्रह्मात्मनि समन्वय इत्युपसंहरति। तस्मादिति॥

एतेन मातरिश्वा व्याख्यातः। अतिदेशत्वान्न पृथक् सङ्गत्याद्यपेक्षा, तत्तेजोऽसृजतेति श्रुतेः। आकाशाद्वायुरिति श्रुत्या विरोधोऽस्ति न वेति एकवाक्यभावाभावाभ्यां संशये गौणपक्षपूर्व्वपक्षसिद्धान्तपक्षानतिदि-

---

* सकाशादिति वर्ध० का० नास्ति।

द्वायुरिति पक्षान्तरं। ततश्च श्रुत्योर्विप्रतिषेधे सति गौणी वायोरुत्पत्तिश्रुतिः असम्भवादित्यपरोऽभिप्रायः, असम्भवश्च दर्शितः। 'सैषाऽनस्तमिता देवता यद्वायुः' इत्यस्तमयप्रतिषेधादमृतत्वादिश्रवणाच्च प्रतिज्ञानुपरोधाद्यावद्विकारञ्च विभागाभ्युपगमादुत्पद्यते वायुरिति सिद्धान्तः। अस्तमयप्रतिषेधो अपरविद्याविषय आपेक्षिकः, अग्न्यादीनामिव वायोरस्तमयाभावात्। कृतं प्रतिविधानञ्चामृतत्वादिश्रवणं। ननु वायोराकाशस्य च तुल्ययोरुत्पत्तिप्रकरणे श्रवणाश्रवणयोरेकमेवाधिकरणमुभयविषयमस्तु किमतिदेशेनासति विशेषे इति, उच्यते, सत्यमेवमेतत्, तथापि मन्दधियां शब्दमात्रकृताशङ्कानिवृत्त्यर्थोऽयमतिदेशः

शृति। तत्रापीत्यादिना। पूर्वत्र ह्याकाशानन्तर्यं तेजसः स्थापितं तत्र वायुतेजसोस्तुल्यवदानन्तर्यं वायोरग्निरिति क्रमश्रुतिबाधात् पौर्वापर्ये तेजः प्राथम्यभङ्गान्नैकवाक्यतेति पूर्वपक्षे गौणविद्याभिप्रायमाह। ततश्चेति। अस्तमयप्रतिषेधो मुख्योत्पत्त्यसम्भवे लिङ्गं, वायुश्चान्तरिक्षं चैतदमृतमिति। तस्यैव लिङ्गस्याभ्यासः वायुरेव व्यष्टिः समष्टिश्चेति सर्वात्मत्वलिङ्गान्तरमादिपदार्थः। तथा संवर्गविद्यायां वायुर्ह्येवैतान् सर्वानग्न्यादीन् संहरतीति शब्दमात्रेणैश्वर्यश्रवणं लिङ्गान्तरं ग्राह्यं। एतैर्लिङ्गैर्वायुरनाद्यनन्त इति प्रतीतेरुत्पत्तिर्गौणीत्यविरोधः। श्रुत्योरिति प्राप्ते प्रतिपिपादयिषितप्रतिज्ञाश्रुतेर्बलीयस्त्वात् तत्साधकानां तत्र तत्र वायूत्पत्तिवाक्यानां भूयस्त्वादुक्तविभक्तत्वादिलिङ्गानुग्रहाच्च मुख्यैव वायोरुत्पत्तिः, तथाचाकाशं वायुञ्च सृष्ट्वा तेजोऽसृजतेति श्रुत्योरेकवाक्यतया ब्रह्मणि समन्वयः। लिङ्गानि तूपास्यवायुस्तावकत्वादापेक्षिकतया व्याख्येयानीति मुख्यसिद्धान्तमाह। प्रतिज्ञेत्यादिना। कृतं प्रतिविधानं आपेक्षिकत्वेन समाधानं यस्य तत्तथा। अधिकरणारम्भमाक्षिप्योक्तामधिकाशङ्कामाह। नन्वित्यादिना। वायुर्ह्येवे-

क्रियते। संवर्गविद्यादिषु ह्युपास्यतया वायोर्महाभागत्वश्रवणात्, अस्तमयप्रतिषेधादिभ्यश्च भवति नित्यत्वाशङ्का कस्यचिदिति॥ ८॥

असम्भवस्तु सतोऽनुपपत्तेः॥ ९॥

वियत्पवनयोरसम्भाव्यमानजन्मनोरप्युत्पत्तिमुपश्रुत्य ब्रह्मणोऽपि भवेत् कुतश्चिदुत्पत्तिरिति स्यात् कस्यचिन्मतिः। तथा विकारेभ्य एवाकाशादिभ्य उत्तरेषां विकाराणामुत्पत्तिमुपश्रुत्याकाशस्यापि विकारादेव ब्रह्मण उत्पत्तिरिति कश्चिन्मन्येत, तामाशङ्कामपनेतुमिदं सूत्रं। असम्भवस्त्विति। न खलु ब्रह्मणः सदात्मकस्य कुतश्चिदन्यतः सम्भव उत्पत्तिराशङ्कितव्या, कस्मात् अनुपपत्तेः, सन्मात्रं हि ब्रह्म न तस्य सन्मा-

---

तान् सर्वान् संवर्क्ते इत्यादिशब्दमात्रं शङ्कामूलं नार्थ इति द्योतनार्थं मात्रपदं। तामेव शङ्कामाह। संवर्गेति। वह्निसमष्ट्युपास्तिर्वायुं दिशां वत्स वेदेत्युपास्तिस्तादिशब्दार्थः॥

असम्भवस्तु सतोऽनुपपत्तेः। 'अनाद्यनन्तं महतः परं ध्रुवं न चास्य कश्चिज्जनिता' इत्यादि ब्रह्मानादित्वश्रुतीनां त्वं जातो भवसि विश्वतोमुख इत्युत्पत्तिश्रुत्या विरोधोऽस्ति नवेत्येकवाक्यभावाभावाभ्यां सन्देहे अस्ति विरोध इति पूर्वपक्षे यथा वाय्वादेरमृतत्वादिकमुत्पत्तिश्रुतिबलादापेक्षिकं तथा ब्रह्मानादित्वं आपेक्षिकमिति दृष्टान्तसङ्गत्या एकदेशिपक्षं प्रापयति। वियदिति। ब्रह्म कुतश्चिज्जायते कारणत्वादाकाशवदिति अनुमानानुग्रहाज्जन्मश्रुतिर्बलीयसीत्याह। तथेति। न चानादिकारणाभावेनानवस्था बीजाङ्कुरवदनादित्वोपपत्तेः। तथा च दीपाद्दीपवद्ब्र-

चादेवोत्पत्तिः सम्भवति, असत्यतिशये प्रकृतिविकारभावानुपपत्तेः। नापि सद्विशेषात् दृष्टविपर्ययात् सामान्याद्विशेषा उत्पद्यमाना दृश्यन्ते। मृदादेर्घटादयो न तु विशेषेभ्यः सामान्यं नाप्यसतो निरात्मकत्वात्, कथं 'असतः सज्जायेत' इति चाक्षेपश्रवणात् 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' इति च ब्रह्मणो जनयितारं वारयति। वियत्पवनयोः पुनरुत्पत्तिः प्रदर्शिता न तु ब्रह्मणः साऽस्तीति वैषम्यं। न च विकारेभ्यो विकारान्तरोत्पत्तिदर्शनाद्ब्रह्मणोऽपि विकारत्वं भवितुमर्हतीति मूलप्रकृत्यनभ्युपगमेऽनवस्थाप्रसङ्गात्। या मूलप्रकृतिरभ्युपगम्यते तदेव च नो ब्रह्मेत्यविरोधः॥

ह्मान्तराद्ब्रह्मान्तरोत्पत्तिः, उत्पत्तिश्रुत्या चानादित्वश्रुतिर्नेयेत्यनाद्यनन्तब्रह्मसमन्वयासिद्धिरिति प्राप्ते सत्यसिद्धान्तमाह। तामिति। ब्रह्म न जायते कारणशून्यत्वान्नरविषाणवद्व्यतिरेकेण घटवच्चेत्यनुमानानुग्रहादिपक्षे चाकारणककार्यवादप्रसङ्गाद्ब्रह्मानादित्वश्रुतये बलीयस्य इति कारणत्वलिङ्गबाधाज्जन्मश्रुतिः कार्यभेदेन व्याख्येयेत्यनाद्यनन्तब्रह्मसमन्वयसिद्धिरिति सिद्धान्तफलं। न च हेत्वसिद्धिः कारणस्यानिरूपणात्। तथा हि किं सन्मात्रस्य ब्रह्मणः सन्मात्रमेव सामान्यं कारणं सद्विशेषो वा असद्वा न त्रेधापीत्याह। सन्मात्रं हीत्यादिना। दीपस्तु दीपान्तरे निमित्तमित्यनुदाहरणं। वियत्पवनयोर्ब्रह्मणश्च विभक्तत्वाविभक्तत्वाभ्यां कारणभावाभावाभ्याञ्च वैषम्यं। कारणत्वलिङ्गस्याप्रामाणिकानवस्था। तर्केणापि बाधमाह। न च विकारेभ्य इत्यादिना। कारणस्यानभ्युपगमे यदृच्छावादप्रसङ्गः, अनादिकारणानभ्युपगमेऽनवस्थाप्रसङ्गः, तदभ्युपगमे ब्रह्मवादप्रसङ्गः, कारणान्तरस्य प्रधानादेर्निरासादिति भावः॥

तेजोऽतस्तथाह्याह॥१०॥

छान्दोग्ये सन्मूलत्वं तेजसः श्रावितं, तैत्तिरीयके तु वायुमूलत्वं, तत्र तेजोयोनिं प्रति श्रुतिविप्रतिपत्तौ सत्यां प्राप्तं तावत् ब्रह्मयोनि तेजः इति। कुतः, सदेवेत्युपक्रम्य तत्तेजोऽसृजतेत्युपदेशात्, सर्वविज्ञानप्रतिज्ञायाश्च ब्रह्मप्रभवत्वे सर्वस्य सम्भवात्, तज्जलानिति चाविशेषश्रुतेः, एतस्माज्जायते प्राण इति चोपक्रम्य श्रुत्यन्तरे सर्वस्याविशेषेण ब्रह्मजत्वोपदेशात्, तैत्तिरीयके च 'स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्च' इत्यविशेषश्रवणात्। तस्माद्वायोरग्निरिति क्रमोपदेशो द्रष्टव्यः, वायोरनन्तरमग्निः सम्भूत इति, एवं प्राप्ते उच्यते। तेजोऽतो मातरिश्वनो जायत इति। कस्मात् तथाह्याह 'वायोरग्निः' इति। अव्यवहिते हि तेजसो ब्रह्मजत्वे सत्यसति वायुजत्वे वायोरग्निरितीयं श्रुतिः कदर्थिता

तेजोऽतस्तथाह्याह। 'तत्तेजोऽसृजत' इति 'वायोरग्नि' इति च श्रुत्योर्विरोधोऽस्ति न वेति सन्देहे सामान्यात् सामान्योत्पत्त्यसम्भवेऽपि ब्रह्मवाय्वोः सामान्ययोस्तेजोरूपविशेषोपादानत्वसम्भवात्तुल्यबलतयास्ति विरोध इति प्रत्युदाहरणेन पूर्वपक्षः सर्वत्राध्यायसमाप्तेरेकवाक्यत्वासम्भवासम्भवौ संशयबीजं। पूर्वपक्षे श्रुतीनां विरोधादप्रामाण्यं फलं सिद्धान्ते प्रामाण्यमित्युक्तं न विस्मर्तव्यं। एवं पूर्वपक्षे कार्यमात्रस्य विवर्तत्वात् कल्पितस्य वायोस्तेजःकल्पनाधिष्ठानत्वायोगात् ब्रह्मैव तेजस उपादानं सर्वकार्याणां ब्रह्मैवोपादानमित्यर्थं श्रुतीनां भूयस्त्वाच्च तदनुरोधाद्वायोरिति क्रमार्था पञ्चमीत्यविरोध इत्येकदेशिसिद्धान्तं प्रापयति। प्राप्तं तावद्ब्रह्मयोनि तेज इत्यादिना। श्रुतीनां विरोधमात्रोपन्यासेन पूर्वपक्षः अपसिद्धान्तेनाविरोधात् तावदेकदेशिपक्ष इति ज्ञेयं। तदुभयमपि मुख्यसिद्धान्तापेक्षया पूर्वपक्षत्वेन व्यवह्रियते। सिद्धान्त-

स्यात्। ननु क्रमार्थैषा भविष्यतीत्युक्तं नेति ब्रूमः। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति परस्तात् सम्भवति अपादानस्यात्मनः पञ्चमीनिर्देशात्, तस्यैव च सम्भवतेरिहाधिकारात् परस्तादपि तदधिकारे पृथिव्या ओषधयः इत्यपादाने पञ्चमीदर्शनाद्वायोरग्निरित्यपादानपञ्चम्येवैषेति गम्यते। अपि च वायोरूर्द्ध्वमग्निः सम्भूत इति कल्प्य उपपदार्थयोगः, कॢप्तस्तु कारकार्थयोगः वायोरग्निः सम्भूत इति। तस्मादेषा श्रुतिर्वायुयोनित्वं तेजसोऽवगमयति। नन्वितरापि श्रुतिर्ब्रह्मयोनित्वं तेजसोऽवगमयति तत्तेजोऽसृजतेति। न तस्याः पारम्पर्यजत्वेऽप्यविरोधात्। यदापि ह्याकाशं वायुञ्च सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसृजतेति

यति। एवं प्राप्त इति। कदर्थिता बाधितार्थैति यावत्। वायोस्तेजःप्रकृतित्वं पञ्चमीश्रुत्या निर्धारितं, न च कल्पितस्योपादानत्वासम्भवः, अधिष्ठानत्वासम्भवेऽपि मृदादिवत्परिणामित्वसम्भवात्, सतस्तु ब्रह्मणः छान्दोग्ये स्रष्टृत्वमात्रं श्रुतं नोपादानत्वं। न च बहु स्यामिति कार्याभेदेच्छालिङ्गादुपादानत्वसिद्धिर्लिङ्गात् श्रुतेर्बलीयस्त्वेन श्रुत्यविरोधेन लिङ्गस्य नेयत्वात्। नयनञ्चेत्थं वायोर्ब्रह्मानन्यत्वाद्वायुजस्यापि तेजसो ब्रह्मप्रकृतिकत्वमविरुद्धमिति सिद्धान्तग्रन्थाशयः। इहाधिकारादिति वायोरग्निः सम्भूत इति वाक्ये सम्बन्धादित्यर्थः। तदधिकारे सम्भूत्यधिकारे निरपेक्षकारकविभक्तेरुपपदसापेक्षविभक्त्यपेक्षया प्रबलत्वाच्च न क्रमार्था पञ्चमीत्याह। अपि चेति। ऊर्द्ध्वमनन्तरमिति चोपपदं विना पञ्चमीमात्रात् क्रमो न भातीति कल्प्य उपपदार्थप्रयोगः प्रकृत्यार्थोपादानकारकन्तु निरपेक्ष्यपञ्चम्या भाति विशेषनोऽच प्रकरणादपादानार्थत्वं पञ्चम्याः कॢप्तं* सति विरोधे बाध्यमिति स्थितिरित्यर्थः। पारम्पर्यजत्वमेवाह। यदापीति। तस्या धेनोः सृतं तप्तं क्षीरं साक्षात्

---

* कॢप्तेन च कल्प्यमिति से० टी०।

कल्प्यते तदापि ब्रह्मजत्वं तेजसो न विरुध्यते, यथा तस्याः शृतं तस्या दधि तस्या आमिक्षेत्यादि। दर्शयति च ब्रह्मणो विकारात्मनावस्थानं 'तदात्मानं स्वयमकुरुत' इति। तथा चेश्वरस्मरणं भवति। बुद्धिर्ज्ञानमसंमोह इत्याद्यनुक्रम्य 'भवन्ति भावा भूतानां मत्त एव पृथग्विधाः' इति। यद्यपि बुद्ध्यादयः स्वकारणेभ्यः प्रत्यक्षं भवन्तो दृश्यन्ते तथापि सर्वस्य भावजातस्य साक्षात् प्रनाड्या वा ईश्वरवंश्यत्वात्। एतेनाक्रमसृष्टिवादिन्यः श्रुतयो व्याख्याताः तासां सर्वथोपपत्तेः क्रमवत्सृष्टिवादिनीनान्त्वन्यथानुपपत्तेः प्रतिज्ञापि सद्वंश्यत्वमात्रमपेक्षते नाव्यवहितजन्यत्वमित्यविरोधः॥

आपः॥ ११॥

अतस्तथा ह्याहेत्यनुवर्तते। आपोऽतस्तेजसो जायन्ते, कस्मात्

कार्यं दध्यादिकन्तु पारम्पर्यजमित्यर्थः। दध्नि संसृष्टं कठिनक्षीरमामिक्षा। ब्रह्मणो वायुभावे मानमाह। दर्शयति चेति। पारम्पर्यजस्यापि तज्जत्वव्यपदेशे स्मृतिमाह। तथा चेति। अन्तःकरणादिभ्यो जायमानबुद्ध्यादीनां मत्त एवेत्यवधारणं कथमित्याशङ्क्याह। यद्यपीत्यादिना। प्रनाड्या परम्परया ईश्वरवंश्यत्वात् तज्जत्वात् परमकारणान्तरनिरासार्थं अवधारणं युक्तमिति शेषः। एतत्पदार्थमाह। तासामिति। तज्जलानित्याद्युक्तश्रुतीनां साक्षात् प्रनाड्या वा ब्रह्मजत्वमात्रेणोपपत्तेरित्यर्थः। अक्रमश्रुतीनां बलवत्क्रमश्रुत्यनुसारेणैकवाक्यत्वाद्वियद्वायुद्वारा तेजःकारणे ब्रह्मणि समन्वय इति सिद्धं॥

आपः। अतिदेशोऽयं तथा ह्याथर्वणे मुण्डकग्रन्थे 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धा-

तथाह्याह 'तदपोऽसृजत' इति 'अग्नेरापः' इति च। सति वचने नास्ति संशयः। तेजसस्तु सृष्टिं व्याख्याय पृथिव्या व्याख्यास्यन्नपोऽन्तरयामीत्याप इति सूत्रयाम्बभूव॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यः॥१२॥

'ता आप ऐक्षन्त बह्व्यः स्यामः प्रजायेमहीति ता अन्नमसृजन्त' इति श्रूयते। तत्र संशयः। किमनेनान्नशब्देन व्रीहियवाद्यभ्यवहार्यं वौदनाद्युच्यते किं वा पृथिवीति। तत्र प्राप्तं तावत् व्रीहियवाद्योदनादि वा परिग्रहीतव्यमिति, तत्र ह्यन्नशब्दः प्रसिद्धो लोके वाक्यशेषोपितमर्थमुपोद्बलयति, तस्माद्यत्र क्वचन वर्षति

रिणी' इति मन्त्रे अपां ब्रह्मजत्वं श्रुतं। अग्नेराप इति श्रुत्या तस्य विरोधोऽस्ति न वेति सन्देहे तुल्यत्वादस्ति विरोध इति पूर्वपक्षे अपामग्निदाह्यत्वेन विरोधादग्निजत्वासम्भवात् क्रमार्था पञ्चमीत्यविरोध इत्यधिकाशङ्कायामुक्ततेजोन्यायमतिदिश्य व्याचष्टे। अत इति। प्रत्यक्षविरोधे कथमपामग्निजत्वनिर्णयस्तत्राह। सति वचन इति। त्रिवृत्कृतयोरग्निजलयोर्विरोधेऽप्यग्नेराप इति वचनादतीन्द्रिययोस्तयोर्नास्ति विरोध इति निर्णीयत इत्यर्थः। न केवलं श्रुत्यविरोधज्ञानायायमतिदेशः किन्तु पञ्चभूतोत्पत्तिक्रमनिर्णयार्थश्चेत्याह। तेजसस्त्विति। तस्मात्तेजोभावापन्ने ब्रह्मणि श्रुतिसमन्वय इति सिद्धं॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यो विषयमुक्त्वान्नशब्दमहाभूतप्रकरणाभ्यां संशयमाह। ता इति। अभ्यवहार्यं भक्ष्यं, यात्र श्रुतौ यद्यन्नमोदनादिकं तदा अद्भ्यः पृथिवीति श्रुत्या विरोधः, यदि पृथिवी तदा न विरोध इति फलं बोध्यं। अप्पृथिव्योः कार्यकारणभावादधिकरणसङ्गतिः। अन्नश्रुतिरपि भवत्वलिङ्गाभ्यां पूर्वपक्षः। तदेव तत्रैवेति श्रुत्यर्थः। तथाच क्वचिदन्नं क्वचिदद्भ्यः पृथिवी ततोऽन्नमिति विरोधान्नैकवाक्यतेति

तदेव भूयिष्ठमन्नं भवतीति व्रीहियवाद्येव हि सति वर्षणे बहु भवति न पृथिवीति, एवं प्राप्ते ब्रूमः। पृथिव्येवेयमन्नशब्देनाद्भ्यो जायमाना विवक्ष्यत इति। कस्मात् अधिकारात् रूपात् शब्दान्तराच्च। अधिकारस्तावत् तत्तेजोऽसृजत, तदपोऽसृजतेति च महाभूतविषयो वर्तते। तत्र क्रमप्राप्तां पृथिवीं महाभूतं विलङ्घ्य नाकस्माद्व्रीह्यादिपरिग्रहो न्याय्यः, तथा रूपमपि वाक्यशेषे पृथिव्यनुगुणं दृश्यते यत्कृष्णं तदन्नस्येति। न ह्योदनादेरभ्यवहार्यस्य कृष्णत्वनियमोऽस्ति नापि व्रीह्यादीनां। ननु पृथिव्या अपि नैव कृष्णत्वनियमोऽस्ति, पयःपाण्डरस्याङ्गाररोहितस्य च क्षेत्रस्य दर्शनात्। नायं दोषो बाहुल्यापेक्षत्वात्। भूयिष्ठं हि पृथिव्याः कृष्णं रूपं न तथा श्वेतरोहिते। पौराणिका अपि पृथिवीच्छायां शर्वरीमुपदिशन्ति, सा च कृष्णाभेत्यतः कृष्णं रूपं पृथिव्या इति

प्राप्ते सिद्धान्तयति। एवं प्राप्त इति। अधिकारः प्रकरणं, रूपं लिङ्गं पयः क्षीरं तद्वत् पाण्डरं श्वेतं,अङ्गारवत् रोहितं रक्तं। शब्दान्तरशब्दितं स्थानं व्याचष्टे। श्रुत्यन्तरमपीति। *अथवानन्तर्यं पृथिव्याः स्थानं श्रुत्यन्तरसिद्धान्तेनाप्यन्नस्य पृथिवीत्वमित्यर्थः। तत्तत्र सृष्टिकाले यदपां शरः यो मण्डवद्घनीभाव आसीत् स एव समहन्यत कठिनः सङ्घातोऽभूत् सा अपां कठिना परिणतिः पृथिव्यभवदिति श्रुत्यर्थः। व्रीह्याद्यन्नसर्गः कस्मिन् स्थान इति विवक्षायामाह। पृथिव्यास्त्विति। पञ्चमीयं सृष्टिभवत्वलिङ्गसहिताश्रुतेः कथं प्रकरणलिङ्गस्थानैर्बाध इत्याशङ्क्याह। वाक्यशेषोऽपीति। प्रबलदुर्बलप्रमाणसन्निपाते बहूनां दुर्बलानामत्यन्तबाधाद्वरं प्रबलप्रमाणस्याल्पबाधेन कथञ्चिन्नयनमिति न्यायेन श्रुतिलिङ्गयोरन्नमात्रनिष्ठत्वं बाधित्वान्नाम्नात्मकपृथिवीनिष्ठत्वं नीयते ताभ्यामन्नमात्रग्रहे प्रकाशादीनां पृथिवीमात्रविषयाणा-

---

* अथवानन्तर्यमिति पो०।

स्मिर्यते। श्रुत्यन्तरमपि समानाधिकारमद्भ्यः पृथिवीति भवति तद्यदपां शर आसीत् तत्समहन्यत सा पृथिव्यभवदिति च। पृथिव्यास्तु व्रीह्यादेरुत्पत्तिं दर्शयति पृथिव्या ओषधयः ओषधीभ्योऽन्नमिति च। एवमधिकारादिषु पृथिव्याः प्रतिपादकेषु सत्सु कुतो व्रीह्यादिप्रतिपत्तिः। प्रसिद्धिरप्यधिकारादिभिरेव बाध्यते। वाक्यशेषोऽपि पार्थिवत्वादन्नाद्यस्य तद्द्वारेण पृथिव्या एवाद्भ्यः प्रभवत्वं सूचयतीति द्रष्टव्यं, तस्मात् पृथिवीयमन्नशब्देति॥ २०,४ ३१

तदभिध्यानादेव तु तल्लिङ्गात् सः॥१३॥

किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान् सृजन्ति आहोस्वित् परमेश्वर एव तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति सन्देहे सति प्राप्तं तावत् स्वयमेव सृजन्तीति। कुतः आकाशाद्वायुर्वायोरग्निरित्यादि स्वातन्त्र्य-

---

मत्यन्तबाधापत्तेरिति भावः। अन्नस्य वृष्टिजलोक्तिद्वारा पृथिव्या अन्नजन्यत्वं सूच्यते। पृथिव्यन्ना पृथिवीत्वादन्नवदित्यनुमानादित्यक्षरार्थः। एवं तित्तिरिश्रुत्यनुसारेण छन्दोगश्रुतेर्नयनादविरुद्धो भूतसृष्टिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं॥

सम्प्रति तानि भूतान्याश्रित्याश्रयाश्रयिभावसङ्गत्या तेषां स्वातन्त्र्यमाशङ्क्य निषेधति। तदभिध्यानादेव तु तल्लिङ्गात् सः। उक्तभूतान्याश्रित्य संशयपूर्वपक्षौ दर्शयति। किमिमानीत्यादिना। संशयबीजानुक्तौ पर्वोत्तरपक्षयुक्त्योर्बीजमिति ज्ञेयं। नन्वत्र भूतानां किं स्वातन्त्र्येणोपादानत्वमाशङ्क्यते कर्तृत्वं वा, नाद्यः, वचनानुपपत्तेरित्यादिन्यायविरोधादिति शङ्कते। नन्विति। न द्वितीयः अचेतनत्वादिति भावः॥

श्रवणात्। नन्वचेतनानां स्वतन्त्राणां प्रवृत्तिः प्रतिषिद्धा, नैष दोषः, तत्तेज ऐक्षत ता आप ऐक्षन्तेति च भूतानामपि चेतनत्व-श्रवणादित्येवं प्राप्तेऽभिधीयते। स्वयमेव परमेश्वरः तेन तेना-त्मनावतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति। कुतस्तल्लि-ङ्गात्। तथा हि शास्त्रं यः पृथिव्यां तिष्ठन् यः पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयती-त्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति। तथा

यथा मनुष्यादिशब्दैस्तत्तद्देहाभिमानिनो जीवा उच्यन्ते तथाका-शाद्वायुरित्यादिश्रुतौ आकाशादिशब्दैस्तत्तद्भूताभिमानिदेवता उच्य-न्ते, तासां स्वकार्ये वाय्वादौ कर्तृत्वसम्भवान्निरपेक्षनिमित्तत्वं पञ्च-म्यर्थः। एवं तदात्मानं स्वयमकुरुतेति श्रुतौ स्वयमिति विशेषणाद्ब्रह्म-णोऽन्यानपेक्षं सर्वकर्तृत्वं श्रुतं। तथा च मिथोनिरपेक्षेश्वरभूतकर्तृत्व-श्रुत्योर्विरोधान्न ब्रह्मणि समन्वय इति सफलं पूर्वपक्षमाह। नैष दोष इति। भूतानां तदभिमानिदेवतानामित्यर्थः। यथा आकाशादि-भावापन्नब्रह्मणः सर्वोपादानत्वं तथा तदभिमानिदेवताजीवभावमाप-न्नब्रह्मणः कर्तृत्वमिति परम्परया ईश्वरकर्तृत्वश्रुत्यविरोधः। स्वयमिति विशेषणं ईश्वरान्तरनिरासार्थं न जीवभावापेक्षानिरासार्थमित्येक-देशिसिद्धान्त ऊहनीयः। मुख्यसिद्धान्तमाह। एवं प्राप्त इति। आका-शादिशब्दैर्न देवतालक्षणा मुख्यार्थे बाधकाभावात्, पञ्चम्यस्य प्रकृतित्वा-र्थोत्तत्र रूढतरत्वात्, तथा चाचेतनानां भूतानां कर्तृत्वमेव नास्ति, कुतः ईश्वरानपेक्षकर्तृत्वं यद्यपि देवतानां कर्तृत्वं सम्भवति तथापीश्वरनि-यम्यत्वश्रवणाच्चेतनानामपि न स्वातन्त्र्यं किमु वाच्यमचेतनानां भूतानां न स्वातन्त्र्यमिति मत्वोक्तं। तल्लिङ्गादिति। तत्तदचेतनात्मनावस्थितस्य ब्रह्मणः उपादानत्वेऽपि जीवद्वारकेश्वरत्वाकारेणैव साक्षात् सर्वकर्तृत्वं न जीवत्वद्वारा तस्य सर्वनियन्तृत्वाल्लिङ्गादित्यर्थः। प्रकरणाच्च साक्षात्

'सोऽकामयत बहु स्यां प्रजायेय' इति प्रस्तुत्य 'सच्च त्यच्चाभवत्' 'तदात्मानं स्वयमकुरुत' इति तस्यैव सर्वात्मभावं दर्शयति। यत्त्वीक्षणश्रवणमप्तेजसोस्तत् परमेश्वरावेशवशादेव द्रष्टव्यं 'नान्योऽतोऽस्ति द्रष्टा' इतीक्षित्रन्तरप्रतिषेधात् प्रकृतत्वाच्च सत ईक्षितुः तदैक्षत बहु स्यां प्रजायेयेत्यत्र॥

विपर्ययेण तु क्रमोऽत उपपद्यते च॥ १४॥

भूतानामुत्पत्तिक्रमश्चिन्तितः, अथेदानीमप्ययं क्रमश्चिन्त्यते किमनियतेन क्रमेणाप्यय उतोत्पत्तिक्रमेणाथ वा तद्विपरीतेनेति। त्रयोऽपि चोत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयन्ते, 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति

सर्वकर्तृत्वमित्याह। तथेति। पूर्वोक्तमनूद्य निरस्यति। यत्त्विति। परमेश्वरस्यान्तर्यामिभावेनावेशः सम्बन्धः। तद्वशाद्भूतेष्वीक्षणश्रवणं नैतावता तेषां चेतनत्वं स्वातन्त्र्यं वेत्यर्थः। अनेन तदभिध्यानादिति पदं व्याख्यातं, इत्थं सूत्रयोजना। स ईश्वरस्तत्तदात्मना स्थितोऽपि साक्षादेव सर्वकर्ता तस्यान्तर्यामित्वलिङ्गाज्जीवत्वद्वारा कर्तृत्वं नाम जीवस्यैव कर्तृत्वमित्यन्तर्यामिणः कर्तृत्वासिद्धेरन्तर्यामित्वायोगात् तदभिध्यानादीश्वरेक्षणादेव भूतेषु श्रुतेक्षणोपपत्तेश्चेति तत्तेज ऐक्षतेति श्रुत ईक्षिता परमात्मैवेत्यत्र श्रुत्यन्तरं प्रकरणञ्चाह। नान्य इति। तस्मादीश्वरपदार्थलोपप्रसङ्गेनेश्वरादन्यस्य स्वातन्त्र्याभावान्नेश्वरकर्तृत्वश्रुतेर्भूतश्रुत्या विरोध इति सिद्धं॥

विपर्ययेण तु। यद्यप्यत्र श्रुतिविरोधो न परिह्रियत इत्यसङ्गतिस्तथाप्युत्पत्तिक्रमे निरूपिते लयक्रमो बुद्धिस्थो विचार्यत इति प्रासङ्गिकावेव पादाववान्तरसङ्गतिमिति मत्वाह। भूतनामिति। अत्रोत्पत्तिक्रमाद्विपरीतक्रमनिर्णयात् सिद्धान्ते भूतानां प्रातिलोम्येन लयध्यानपूर्वकं

यत्प्रयन्त्यभिसंविशन्ति' इति, तत्रानियमोऽविशेषादिति प्राप्तं, अथवोत्पत्तेः क्रमस्य श्रुतत्वात् प्रलयस्यापि क्रमाकाङ्क्षिणः स एव क्रमः स्यादित्येवं प्राप्तं ततो ब्रूमः विपर्ययेण तु प्रलयक्रमोऽत उत्पत्तिक्रमाद्भवितुमर्हति, तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतक्रमेणावरोहतीति, अपि च दृश्यते मृदो जातं घटशरावाद्यप्ययकाले मृद्भावमप्येति, अद्भ्यश्च जातं हिमकरकाद्यब्भावमप्येतीति। अतश्चोपपद्यत एतद्यत् पृथिव्यद्भ्यो जाता सती स्थितिकालव्यतिक्रान्तावपोऽपीयात्, आपश्च तेजसो जाताः सत्यस्तेज अपीयुः, एवं क्रमेण सूक्ष्मं सूक्ष्मतरं चानन्तरमनन्तरतरं कारणमपीत्य सर्वं कार्यजातं परमकारणं परमसूक्ष्मञ्च ब्रह्माप्येतीति वेदितव्यं। नहि स्वकारणव्यतिक्रमेण कारणकारणे कार्याप्ययो न्याय्यः। स्मृतावप्युत्पत्तिक्रमविपर्ययेणैवाप्ययक्रमस्तत्र तत्र दर्शितः,

---

प्रत्यग्ब्रह्मणि मनःसमाधानं फलं, पूर्वपक्षे तु कारणनाशे सति कार्यनाश इति सर्वलयाधारब्रह्मासिद्धेरुक्तसमाध्यसिद्धिरिति भेदः। सति भूतानां लये क्रमचिन्ता स एव नास्तीति केचित्तान् प्रत्याह। त्रयोऽपीति। अनियम इत्यनास्थयोक्तं श्रौतस्य प्रलयस्य क्रमाकाङ्क्षायां श्रौत उत्पत्तिक्रम एव ग्राह्यः, श्रौतत्वेनान्तरङ्गत्वादित्येव पूर्वपक्षः, सति कारणे कार्यं नश्यतीति लोके दृश्यते। तथा च श्रौतोऽप्युत्पत्तिक्रमो लयेन गृह्यते किन्तु लौकिकक्रम एव गृह्यते श्रुतेर्लोकदृष्टपदार्थबोधाधीनत्वेन श्रौतादपि लौकिकस्यान्तरङ्गत्वाद्योग्यत्वाच्च, कारणमेव हि कार्यस्य रूपमिति तदनन्यत्वन्यायेन स्थापितं। न हि स्वरूपनाशे कार्यस्य क्षणमपि स्थितिर्युक्ता, तस्मादयोग्य उत्पत्तिक्रमो लयस्य न ग्राह्यः

'जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते।
ज्योतिष्याप: प्रलीयन्ते ज्योतिर्वायौ प्रलीयते' ॥

इत्येवमादौ। उत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वात् नाप्यये भवितुमर्हति, नचासावयोग्यत्वादप्ययेनाकाङ्क्ष्यते, न हि कार्ये ध्रियमाणे कारणस्याप्ययो युक्तः कारणाप्यये कार्यस्यावस्थानानुपपत्तेः। कार्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात्॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्॥ १५॥

भूतानामुत्पत्तिप्रलयावनुलोमप्रतिलोमक्रमाभ्यां भवत इत्युक्तं, आत्मादिरुत्पत्तिः प्रलयश्चात्मान्त इत्यप्युक्तं, सेन्द्रियस्य तु मनसो बुद्धेश्च सद्भावः प्रसिद्धः श्रुतिस्मृत्योः। 'बुद्धिं तु सारथिं

लौकिकक्रमाविरोधेन निराकाङ्क्षत्वादिति सिद्धान्तयति। ततो ब्रूम इत्यादिना। क्रमेण परम्परया सर्वकार्यलयाधारत्वं ब्रह्मणः किमित्याश्रीयते साक्षादेव तत् किं न स्यादित्यत आह। न हि स्वकारणव्यतिक्रमेणेति। घटनाशे मृदनुपलब्धिप्रसङ्गादित्यर्थः। 'वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते' इति स्मृतिशेषः आदिपदार्थः। योग्यताधीनं सम्बन्ध इति न्यायादयोग्यक्रमबाध इति सिद्धं॥

अन्तराविशेषात्। उक्तभूतोत्पत्तिलयक्रममुपजीव्य स किं करणोत्पत्तिक्रमेण विरुध्यते न वेति करणानामभौतिकत्वभौतिकत्वाभ्यां सन्देहे वृत्तानुवादपूर्वकपूर्वपक्षमाह। भूतानामित्यादिना। करणान्येव न सन्तीति वदन्तं प्रत्याह। सेन्द्रियस्येति। 'मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः। श्रोत्रादीनीन्द्रियाण्यन्ये' इति स्मृतिर्द्रष्टव्या। अन्यपराः

विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुः' इत्यादिलिङ्गेभ्यः। तयोरपि कस्मिंश्चिदन्तराले क्रमेणोत्पत्तिप्रलयावुपसंग्राह्यौ, सर्वस्य वस्तुजातस्य ब्रह्मजत्वाभ्युपगमात्। अपि चाथर्वणे उत्पत्तिप्रकरणे भूतानामात्मनश्चान्तराले करणान्यनुक्रम्यन्ते 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इति, तस्मात् पूर्वोक्तोत्पत्तिप्रलयक्रमभङ्गप्रसङ्गो भूतानामिति चेन्न, अविशेषात्। यदि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति नैतयोः क्रमान्तरं मृग्यं। भवति च भौतिकत्वे लिङ्गं

शब्दाः लिङ्गानीत्युच्यन्ते। करणानां क्रमाकाङ्क्षामाह। तयोरिति। आकाङ्क्षायां श्रुतिसिद्धः क्रमो ग्राह्य इत्याह। अपि चेति। विज्ञायतेऽनेनेति विज्ञानं सेन्द्रिया बुद्धिः। आत्मनो भूतानां चान्तरा मध्ये तल्लिङ्गात् ऋष्टिवाक्यात् 'एतस्माज्जायते प्राणो मनः' इत्यादिरूपाद्विज्ञानमनसी अनुक्रम्येते। तथा च करणक्रमेण पूर्वोक्तक्रमभङ्ग इति शङ्कासूत्रार्थः। न च करणानां भौतिकत्वाद्भूतानन्तर्यमिति वाच्यं, तेषां भौतिकत्वे मानाभावात्। तथा चात्मनः प्रथममाकाशस्य जन्म पश्चाद्वायोरित्युपक्रमस्यात्मनः करणानि ततो भूतानीति क्रमेण विरोध इति तित्तिर्यथर्वश्रुत्योर्विरोधान्न ब्रह्मणि समन्वय इति पूर्वपक्षफलं सिद्धान्तयति। नेति। 'आत्मन आकाशः' इत्यादि तित्तिरिश्रुतौ पञ्चम्याः कार्यकारणभावेनार्थतः क्रमो भवति न तस्याथर्वणपाठेन बाधः अर्थक्रमविरोधिक्रमविशेषस्याश्रुतेः पाठक्रमस्यार्थक्रमधीशेषस्य शेषिबाधकत्वायोगादिति श्रुत्यर्थक्रमाविरोधेन पाठस्य नेयत्वाद्भूतानन्तर्यं करणानामित्यर्थः। किञ्च भौतिकत्वात् तेषां तदानन्तर्यमित्याह। यदीति। न च प्राणस्याधिकारत्वायोगादन्नमयमित्यादि मयटो न विकारार्थतेति

करणानां, 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इत्येवं जातीयकं। व्यपदेशोऽपि क्वचिद्भूतानां करणानाञ्च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः। अथ त्वभौतिकानि करणानि तथापि भूतोत्पत्तिक्रमो न करणैर्विशेष्यते, प्रथमं करणान्युत्पद्यन्ते चरमं भूतानि प्रथमं वा भूतानि उत्पद्यन्ते चरमं करणानीति। आथर्वणे तु समाम्नाय क्रममात्रं करणानां भूतानाञ्च न तत्रोत्पत्तिक्रम उच्यते। तथान्यत्रापि पृथगेव भूतक्रमात् करणक्रम आम्नायते 'प्रजापतिर्वा इदमग्र आसीत् स आत्मानमैक्षत स मनोऽसृजत तन्मन एवासीत् तदा-

---

वाच्यं करणानां विभक्तत्वेन कार्यतया कारणाकाङ्क्षायामन्नमयमित्यादिश्रुतेराकाङ्क्षितोक्त्यर्थमसति बाधके मयटो विकारार्थताया युक्तत्वात्। प्राचुर्यार्थत्वे त्वनाकाङ्क्षितोक्तिप्रसङ्गाच्छ्रुत्यैव तेजोऽबन्नप्राशने वाक्प्राणमनसां वृद्धिस्तदभावे तन्नाश इति विकारत्वस्य दर्शितत्वान्न विवादावसरः। यद्वा स्थूलभूताधीना तेषां वृद्धिर्विकारो मयडर्थः श्रूयमाणो भौतिकत्वे लिङ्गं प्राणेन्द्रियमनांसि भौतिकानि भूताधानवृद्धिमत्त्वाद्देहवदिति भावः। ननु तेषां भौतिकत्वे कथमाथर्वणे पृथक्जन्मकथनं भूतजन्मोक्त्यैव तज्जन्मसिद्धेरित्यत आह। व्यपदेशोऽपीति। प्रौढवादेन तेषामभौतिकत्वमुपेत्यापि श्रुत्यविरोधमाह। अथ त्विति। करणानां भूतानाञ्च पूर्वापरत्वे मानाभावात् नोक्तभूतक्रमभङ्गः। न चाथर्वणवाक्यं मानं पाठमात्रत्वादित्यर्थः। तर्हि कथं क्रमनिर्णयस्तत्राह। तथेति। इदंस्थूल उत्पत्तेः प्राक् प्रजापतिः सूत्रात्मासीत्। ननु लिङ्गदेहस्य मनोघटितत्वात् प्रजापतेश्च लिङ्गसमष्टिरूपत्वात् कथं प्रजापतिसृष्ट्यनन्तरं मनःसृष्टिरिति विचारणीयं। अथ सूक्ष्मभूतात्मकप्रजापतिसर्गः प्रथम ततो मनआदिसर्गः इति क्रमो भवतीति भावः। एवञ्च भूत-

त्मानमैक्षत तद्वाचमसृजत' इत्यादिना। तस्मान्नास्ति भूतोत्पत्तिक्रमस्य भङ्गः॥

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्॥ १६॥

स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवंजातीयकाल्लौकिकव्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात् कस्यचिद्भ्रान्तिः, तामपनुदामः, न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसम्बन्धोपपत्तेः। शरीरानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्याताम्। श्रूयते च 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते' इति। ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः सत्यं दर्शितः, भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः, किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त

करणोत्पत्तिश्रुत्योरविरोधात् ब्रह्मणि समन्वयसिद्धिरिति सिद्धान्तफलं गमयति। तस्मादिति॥

चराचरभावित्वात्। एवं तावत् तत्पदवाच्यकारणनिर्णयाय भूतश्रुतीनां विरोधो निरस्त इदानीमापादसमाप्तेस्त्वंपदार्थशुद्ध्यै जीवश्रुतीनां विरोधो निरस्यते इह जीवो न जायते म्रियते इत्यादिश्रुतेः जातेष्टिश्राद्धशास्त्रेण विरोधोऽस्ति न वेति सन्देहे विरोधोऽस्तीति प्राप्ते लौकिकजन्मादिव्यपदेशसहायाज्जातेष्ट्यादिशास्त्रेण जीवाजत्वादिश्रुतिबाध इति पूर्वपक्षयति। स्त इति। तथा च करणोत्पत्तिक्रमेण भूतक्रमस्य बाधाभावेऽपि जीवोत्पत्तिक्रमेण बाधः स्यादिति प्रत्युदाहरणसङ्गतिः। पूर्वपक्षे जीवब्रह्मैक्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति

इति, उच्यते। चराचरव्यपाश्रयः। स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ, स्थावरजङ्गमानि हि भूतानि जायन्ते च म्रियन्ते चातस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्य्येते। तद्भावभावित्वात्। शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतः नासतोः। नहि शरीरसम्बन्धादन्यत्र जीवो जातो मृतो वा केनचिदुपलक्ष्यते। 'स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन् म्रियमाणः' इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति। जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यं, अभावाज्जीवप्रादुर्भावस्य। जीवस्य परस्मादात्मनः उत्पत्तिर्वियदादीनामिवास्ति नास्ति वेत्येतदुत्तरेण सूत्रेण वक्ष्यति। देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्तः इत्येतदनेन सूत्रेणावोचत्॥

भेदः। चेतनजन्माद्युद्देशेन चेतनस्य तस्य जन्मान्तरीयफलसाधनं जातकर्मादि संस्कारो विधीयते तथा चोद्देश्यविधेययोर्मिथोविरोधे सति विधेयाविरोधेनोद्देश्यं नेयमिति न्यायात् जन्मादिकं देहोपाधिकं न स्वत इति सिद्धान्तयति। तामित्यादिना। जीवापेतं जीवेन त्यक्तं इदं शरीरं जन्मादिव्यपदेशश्चराचरदेहविषयो मुख्यः जीवे तु भाक्तो गौणः औपाधिकजन्मादिविषयः स्यादुपाधिजन्माभावे भावादसत्यभावादिति सूत्रार्थः। जीवस्यौपाधिकजन्ममृत्योः श्रुतिमप्याह। स वा इति। जायमानपदार्थमाह। शरीरमिति। म्रियमाणत्वं व्याचष्टे। उत्क्रामन्निति। ननूत्तरत्र जीवस्य जन्मादि निरस्यते अत्रापि तन्निरासे पुनरुक्तिरित्याशङ्क्याह। जीवस्येति। तदेवं जातेष्ट्यादिशास्त्रस्यौपाधिकजन्मादिविषयत्वान्न जीवनाद्यजन्यत्वश्रुतिविरोध इति सिद्धं॥

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

अस्यात्मा जीवाख्यः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलसम्बन्धी, स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्विद्ब्रह्मवदेव नोत्पद्यते इति श्रुतिविप्रतिपत्तेर्विषयः कासुचिच्छ्रुतिष्वग्निविस्फुलिङ्गादिनिदर्शनैर्जीवात्मनः परस्मात् ब्रह्मण उत्पत्तिराम्नायते, कासुचित्त्वविकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते नचोत्पत्तिराम्नायत इति। तत्र प्राप्तं तावदुत्पद्यते जीव इति, कुतः प्रतिज्ञानुपरोधात्। 'एकस्मिन् विदिते सर्वमिदं विदितम्' इतीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्रभवत्वे सति नोपरुध्येत, तत्त्वान्तरत्वे तु जीवस्य प्रतिज्ञेयमुपरुध्येत। न चाविकृतः परमात्मैव जीव इति शक्यते विज्ञातुं, लक्षणभेदात्। अपहतपाप्मत्वादिधर्मको हि परमात्मा, तद्विपरीतो हि जीवः, विभागाच्चास्य विकारत्वसिद्धिः। यावान् हि आकाशादिः प्रविभक्तः स सर्वो विकारः, तस्य चाकाशादेरुत्पत्तिः समधिगता जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखभाक् प्रति शरीरं विभक्त इति तस्यापि प्रपञ्चोत्पत्त्यवसरे उत्पत्तिर्भवितुमर्हति।

नात्माश्रुतर्नित्यत्वाच्च ताभ्यः। 'अग्नेर्विस्फुलिङ्गवदेतस्मात् परमात्मनः सर्वे जीवात्मानो व्युच्चरन्ति' इत्यादिजीवोत्पत्तिश्रुतीनां 'स एष इह प्रविष्ट आनखाग्रेभ्यः अज आत्मा'इत्याद्यनुत्पत्तिश्रुतीनाञ्च मिथोविरोधात् संशये माभूतां देहजन्मनाशयोर्जीवजन्मनाशौ, देहान्तरभोग्यस्वर्गादिहेतुविध्याद्यसम्भवात्। कल्पाद्यन्तयोर्नभस इव जीवस्य तौ किं न स्यातां तत्-

अपि च 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः' इति प्राणादेर्भोग्यजातस्य सृष्टिं शिष्ट्वा सर्वे एते आत्मानो व्युच्चरन्तीति भोक्तृणामात्मनां पृथक् सृष्टिं शास्ति । 'यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ति सरूपास्तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' इति च जीवात्मनामुत्पत्तिप्रलयावुच्येते सरूपवचनात् । जीवात्मानो हि परमात्मना सरूपा भवन्ति चैतन्ययोगात् । न च क्वचिदश्रवणमन्यत्र श्रुतं वारयितुमर्हति, श्रुत्यन्तरगतस्यापि अविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्त्तव्यत्वात् । प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्यैव व्याख्यातव्या 'तदात्मानं स्वयमकुरुत' इत्यादिवत् तस्मादुत्पद्यते जीव इत्येवं प्राप्ते ब्रूमः, नात्मा जीव उत्पद्यत इति । कस्मादश्रुतेः, न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयःसु प्रदेशेषु । ननु क्वचिदश्रवणमन्यत्र श्रुतं न वारयतीत्युक्तं, सत्यमुक्तं उत्पत्तिरेव त्वस्य न सम्भवतीति वदामः । कस्मात् नित्यत्वाच्च ताभ्यः । चशब्दादजत्वादिभ्यश्च । नित्यत्वं ह्यस्य श्रुतिभ्योऽवगम्यते, तथाजत्वमविकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मता चेति । न चैवंरूपस्योत्पत्तिरुपप-

---

सम्भवादिति प्रत्युदाहरणेन पूर्वपक्षमाह । तत्र प्राप्तं तावदिति । फलं पूर्ववत्,उपरोधो बाधः । नन्वविकृतब्रह्मैवात्र प्रविष्टं जीवो न तत्त्वान्तरमिति प्रतिज्ञासिद्धिस्तत्राह । न चेति । जीवः परस्माद्भिन्नः विरुद्धधर्मवत्त्वाद्भिन्नस्याविकारत्वे प्रतिज्ञाबाध इति तर्कोपेतविभक्तत्वलिङ्गानुगृहीतोत्पत्तिश्रुतेर्बलीयस्त्वात् प्रवेशश्रुतिर्जीवरूपविकारात्मना प्रतिष्ठित

यते, ताः काः श्रुतयः, 'न जीवो म्रियते' 'स वा एष महानज आत्माऽजरो*ऽमृतोऽभयो ब्रह्म' 'न जायते म्रियते वा विपश्चित्' 'अजो नित्यः शाश्वतोऽयं पुराणः' 'तत् सृष्ट्वा तदेवानुप्राविशत्' 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' 'स एष इह प्रविष्ट आनखाग्रेभ्यः' 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'अयमात्मा ब्रह्म सर्वानुभूः' इत्येवमाद्या नित्यत्ववादिन्यः सत्यो जीवस्योत्पत्तिं प्रतिबध्नन्ति। ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यत इत्युक्तं, अत्रोच्यते, नास्य प्रविभागः स्वतोऽस्ति, 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' इति श्रुतेः, बुद्ध्याद्युपाधिनिमित्तं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसम्बन्धनिमित्तं। तथा च शास्त्रं 'स वा

ईश्वर इति व्याख्येयमिति समुदायार्थः, स्वरूपा इति दृष्टान्तश्रुतेर्भावो जीव इति निश्चीयते। ननु आत्मन आकाशः सम्भूत इत्यादौ जीवस्योत्पत्त्यश्रवणादनुत्पत्तिस्तत्राह। न चेति। एवं विकारत्वे सति विकारप्रपञ्चात्मना स्वात्मानमकुरुतेति वद्विकारजीवात्मना प्रवेश इत्यर्थः। अजत्वादिति श्रुतिः कल्पमध्ये जीवस्यानुत्पत्त्यादिविषया तत्त्वमसीति श्रुतिश्च मत्कृट इत्यभेदवाक्यवद्व्याख्येयेति प्राप्ते सिद्धान्तयति। एवमिति। धर्मिवत् सत्यो विभागो हेतुरौपाधिको वा नाद्यः असिद्धेरित्याह। अत्रोच्यते नास्येति। द्वितीये जीवस्य न स्वतो विकारत्वसिद्धिः अप्रयोजकत्वादित्याह। बुद्ध्यादाविति। औपाधिकभेदे मानमाह। तथा चेति। मयटो विकारार्थत्वमाशङ्क्याह। तन्मयत्वश्चेति। आस्मः कामजडः स्त्रीपरतन्त्रः। स्त्रीमय इतिवज्जीवस्य स्वरूपाज्ञानाद्बुद्ध्यादिपरतन्त्रत्वेन भेदकर्तृत्वादिभाक्त्वात् प्राचुर्यार्थमयट्प्रयोग इत्यर्थः। लिङ्गं निरस्य तदनुग्राह्यश्रुतेर्गतिमाह। यद-

---

* अमरोऽमृत इति वर्ध० का०।

अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः' इत्येवमादि ब्रह्मण एवाविकृतस्य सतोऽस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति। तन्मयत्वञ्चास्य तद्विविक्तस्वरूपानभिव्यक्त्या तदुपरक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यं। यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसम्बन्धान्नेतव्यं, उपाध्युत्पत्त्यौ चास्योत्पत्तिस्तत्प्रलये च प्रलय इति। तथा च दर्शयति 'प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति' इति। तथोपाधिप्रलय एवायं नात्मप्रलय इत्येतदपि, अत्रैव 'मा भगवान्मोहान्तमापीपदन्न वा *अहमिमं विजानामि न प्रेत्य संज्ञास्ति' इति प्रश्नपूर्वकं प्रतिपादयति, 'न वा अरे अहं मोऽहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्ति-

पीति। जीवस्यौपाधिकजन्मनाशयोः श्रुतिमाह। तथेति। एतेभ्यो देहात्मना परिणतेभ्यो भूतेभ्यः समुत्थाय जनित्वा तान्येव लीयमानान्यनु पश्चाद्विनश्यति प्रेत्यौपाधिकमरणानन्तरं सञ्ज्ञा नास्तीत्यर्थः। ननु प्रज्ञानघनः सञ्ज्ञा नास्तीति च विरुद्धमित्यत आह। तथेति। उपाधिलयाद्विशेषज्ञानाभावः। एवं सञ्ज्ञाभावो नात्मस्वरूपविज्ञानाभाव इत्युत्तरं प्रतिपादयति श्रुतिरित्यन्वयः। अत्रैवात्मविज्ञानघने प्रेत्य सञ्ज्ञा नास्तीत्युक्त्या मां मोहान्तं मोहमध्यं भ्रान्तिमापीपददपोदितवानिममर्थं न जानामि ब्रूहि त्वदुक्तेरर्थमिति मैत्रियीप्रश्नार्थः। मुनिराह। न वा इति। मोहकरं वाक्यमुच्छित्तिः पूर्वावस्थानाशो धर्मोऽस्येत्युच्छित्तिधर्मा परिणामी, तस्मादविनाशीत्यर्थः, तर्हि न प्रेत्य सञ्ज्ञेति कथमुक्तं तत्राह। मात्रेति। मात्राभिर्विषयैरसंसर्गात् तयोक्तमित्यर्थः। विम्बप्रतिविम्बयोरिव विरुद्धधर्मभेदोऽध्यस्त इत्यत्र हेतुमाह। अत ऊर्द्धमिति। जीवस्य विकारित्वे मुक्त्ययोगात् तत्त्वमसीति वाक्यमखण्डार्थ-

* अहमिदमिति वर्ध० का०।

धर्मा मात्रासंसर्गस्त्वस्य भवति' इति। प्रतिज्ञानुपरोधोऽप्यविकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात्। लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव। अत ऊर्ध्वं विमोक्षायैव ब्रूहीति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात्। तस्मान्नैवात्मोत्पद्यते प्रविलीयते वेति ॥

ज्ञोऽत एव ॥ १८ ॥

स किं काणभुजानामिवागन्तुकचैतन्यः स्वतोऽचेतनः आहोस्वित् साङ्ख्यानामिव नित्यचैतन्यस्वरूप एवेति वादिविप्रतिपत्तेः संशयः। किं तावत् प्राप्तं आगन्तुकमात्मनश्चैतन्यमात्ममनःसंयोगजमग्निघटसंयोगजरोहितादिगुणवदिति प्राप्तं। नित्यचैतन्यत्वे हि *सुप्तमूर्छितग्रहाविष्टानामपि चैतन्यं स्यात्, ते पृष्टाः सन्तो न किञ्चिद्वयमचेतयामहीति जल्पन्ति। स्वस्था-

मिति वक्तव्यं, तथा च फलवत्प्रधानवाक्यापेक्षितजीवनित्यत्वश्रुतीनां बलवत्त्वादुत्पत्त्यादिकमध्यस्तमनुवदन्त्युत्पत्त्यादिश्रुतय इत्यविरोध इति सिद्धम् ॥

ज्ञोऽत एव। 'आत्मैव स्यात् ज्योतिः' इत्याद्यात्मस्वप्रकाशत्वश्रुतीनां 'पश्यंश्चक्षुः शृण्वन् श्रोत्रम्' इत्यनित्यज्ञानवत्त्वश्रुतिभिर्विरोधोऽत्र निरस्यते अस्य लोकस्य चक्षुर्द्रष्टा श्रोत्रं श्रोतेत्यर्थः। प्रागुक्तजीवानुत्पत्तिहेतुमादाय स्वप्रकाशत्वसाधनाद्धेतुसाध्यभावः सङ्गतिः। अनुत्पत्तौ हि स्वप्रकाशं ब्रह्मैवोपहितं जीव इति जीवस्य स्वप्रकाशता सिध्यति। न चैवं गतार्थता अनुत्पन्नस्यापि जीवस्य स्वप्रकाशत्वे ज्ञानसाधनवैयर्थ्यमिति तर्कसहितानित्यज्ञानश्रुतिबलेन स्वप्रकाशत्वश्रुतेर्बाध्यतया ब्रह्मण्यत्वशङ्कायां तदैक्ययोग्यतायै स्वप्रकाशत्वस्यात्र साधनात्, तथा च पूर्वपक्षे जीवस्य ब्रह्मैक्यायोग्यता सिद्धान्ते तद्योग्यतेत्यापादसमाप्तेः फलं अव-

* सुषुप्तेत्यादि वर्ध० का०।

श्च चेतयमाना दृश्यन्ते, अतः कादाचित्कचैतन्यत्वादागन्तुकचैतन्य आत्मेत्येवं प्राप्तेऽभिधीयते। ज्ञः, नित्यचैतन्योऽयमात्मा, अत एव यस्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसम्पर्काज्जीवभावेनावतिष्ठते। परस्य हि ब्रह्मणः चैतन्यस्वरूपत्वमाम्नातं 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इत्यादिषु श्रुतिषु। तदेव चेत् परं ब्रह्म जीवस्तस्माज्जीवस्याऽपि नित्यचैतन्यस्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते। विज्ञानमयप्रक्रियायाञ्च श्रुतयो भवन्ति 'असुप्तः सुप्तानभिचाकशीति' इत्यत्र 'अयं पुरुषः स्वयंज्योतिर्भवति' 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते'

गन्तव्यं। इष्टापत्तिं निराचष्टे। ते एष्टा इति। साधनाधीनज्ञानत्वान्न स्वप्रकाशो जीवो व्यतिरेकेनेश्वरवदित्याह। अतः कादाचित्केति। यथाश्रुते भाष्ये हेतोः साध्याविशेष इति मन्तव्यं अतो जीवस्य स्वप्रकाशत्वश्रुतिर्बाध्येति प्राप्ते सिद्धान्तयति। एवमिति। चेच्छब्दो निश्चयार्थः। न केवलं स्वप्रकाशब्रह्माभेदाज्जीवस्य स्वप्रकाशता किन्तु श्रुतितोऽपीत्याह। विज्ञानमयेति। योऽयं विज्ञानमय इति प्रकरणमित्यर्थः। असुप्तः स्वयं भासमान एवात्मा सुप्तान् लुप्तव्यापारान् वागादीनभिलक्ष्य चाकशीति सुप्तार्थान् पश्यतीति यावत्। अत्र स्वप्ने विज्ञातुर्बुद्धिसत्त्वस्य साक्षिणो विज्ञातेर्विनाशो नास्तीत्यर्थः। घ्राणादिजन्यगन्धादिज्ञानानुसन्धानसिद्धये आत्मनो ज्ञानरूपत्वं वाच्यमिति श्रुत्यन्तरेणाह। अथेति। आत्मनो नित्यचिद्रूपत्वेऽपि स्वतोऽसङ्गतया गन्धाद्यसम्बन्धात् तत्सम्बन्धघटनात्मकवृत्त्यर्थानि ज्ञानसाधनानि इति न तेषां वैयर्थ्यमित्याह। न गन्धेति। परिच्छेदो वृत्तिः गन्धाय तद्गोचरान्तःकरणवृत्तये इत्यर्थः। सुप्ताद्यवस्थास्वात्मसत्त्वेऽपि चैतन्याभावान्नात्मा चिद्रूप इत्युक्तं दूषयति। यत्त्विति। तत् तदा सुप्तो न पश्यतीति यत् तत्पश्यन्नेवालुप्तज्ञान एव

इत्येवं रूपाः। अथ 'यो वेदेदं जिघ्राणि' इति 'स आत्मा' इति च सर्वैः करणद्वारैरिदं वेदेदं वेदेति विज्ञानेनानुसन्धानात् तद्रूपत्वसिद्धिः, नित्यस्वरूपचैतन्यत्वे घ्राणाद्यानर्थक्यमिति चेन्न, गन्धादिविषयविशेषपरिच्छेदार्थत्वात्। तथा हि दर्शयति गन्धाय घ्राणमित्यादि। यत् तु *सुप्तादयो न चेतयन्त इति तस्य श्रुत्यैव परिहारोऽभिहितः। सुषुप्तं प्रकृत्य 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्' इत्यादिना। एतदुक्तं भवति विषयाभावादियमचेतयमानता न चैतन्याभावादिति। यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न स्वरूपाभावात् तद्वत्। वैशेषिकादितर्कश्च श्रुतिविरोधे आभासोभवति तस्मान्नित्यचैतन्यस्वरूप एवात्मेति निश्चिनुमः॥

सन्न पश्यतीत्यत्र हेतुः। नहीति। नाशायोग्यत्वादित्यर्थः। किमिति न पश्यतीत्यत आह। न त्विति। वृत्तेः साधनाधीनत्वोक्त्या स्वरूपज्ञानस्य साधनाधीनत्वं हेतुरसिद्ध इत्युक्तं, साधनवैयर्थ्यतर्कोऽपि निरस्तः, मृत्स्नमित्याद्यनित्यज्ञानश्रुतीनां वृत्तिविषयत्वं व्याख्यातं, आत्मा न ज्ञानं द्रव्यत्वादित्यादितर्कास्त्वागमबाधिताः फलवत्प्रधानवाक्यापेक्षितस्वप्रकाशत्वागमस्य बलवत्त्वात्। किञ्च निरवयवात्मनो मनःसंयोगायोगान्नानित्यज्ञानगुणता समवायाभावाच्च न स्वसमवेतज्ञानवेद्यता कर्मकर्तृत्वविरोधाच्च। किञ्च ज्ञानत्वस्यैकवृत्तित्वे लाघवादात्मैव ज्ञानं वृत्तेश्च मनःपरिणामत्वश्रुत्या कामः संकल्प इत्याद्यया जडत्वान्नास्माकं ज्ञानद्वैविध्यगौरवमित्यनवद्यमात्मनः स्वप्रकाशत्वमिति सिद्धं॥

---

* सुषुप्ताद्य इति वर्ध० का०।

उत्क्रान्तिगत्यागतीनां ॥ १९ ॥

इदानीन्तु किंपरिमाणो जीव इति चिन्त्यते, किमणुपरिमाण उत मध्यमपरिमाण आहोस्विन्महत्परिमाण इति। ननु नात्मोत्पद्यते नित्यचैतन्यश्चायमित्युक्तं, अतश्च पर एवात्मा जीव इत्यापतति, परस्य चात्मनोऽनन्तत्वमाम्नातं, तत्र कुतो जीवस्य परिमाणचिन्तावतार इति, उच्यते सत्यमेतत्, उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयन्ति, स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते, तस्य सर्वस्यानाकुलत्वोपपादनायायमारम्भः। तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणात् परिच्छिन्नोऽणुपरिमाणो जीव इति, उत्क्रान्तिस्तावत् 'स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति' इति। गतिरपि, 'ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति, आगतिरपि 'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणः' इति, आसामुत्क्रान्तिगत्यागतीनां श्रवणात्

स्वप्रकाशत्वादात्मस्वरूपादीषद्बहिष्ठं परिमाणमेवाश्रिताश्रयत्वेनान्तर्बहिर्भावेनैवासङ्गत्या विचारयति। उत्क्रान्तिगत्यागतीनां। विषयसंशयौ दर्शयति। इदानीमिति। नात्माश्रुतेरित्यादिना गतार्थत्वमस्याशङ्क्यात्माणुत्वश्रुतीनां महत्त्वश्रुतीनाञ्च विरोधकथनार्थमस्याधिकरणस्यारम्भ इत्याह। नन्वित्यादिना। न केवलं श्रुतोत्क्रान्त्याद्यनुपपत्त्याऽऽत्मनोऽणुत्वं किन्त्वेषोऽणुरात्मेति श्रुत्यापीत्याह। स्वशब्देनेति। पूर्वपक्षे जीवस्याणुत्वात् ब्रह्मैक्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति मत्वा सूत्रं व्याकुर्वन् पूर्वपक्षमाह। तत्र प्राप्तमित्यादिना। श्रुतेरणुरिति

परिच्छिन्नस्तावज्जीव इति प्राप्नोति, न हि विभोश्चलनमवकल्पत इति। सति च परिच्छेदे शारीरपरिमाणत्वस्यार्हतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते॥

स्वात्मना चोत्तरयोः॥ २०॥

उत्क्रान्तिः कदाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देहस्वाम्यनिवृत्त्या कर्मक्षयेणावकल्पेत, उत्तरे तु गत्यागती नाचलतः सम्भवतः, स्वात्मना हि तयोः सम्बन्धो भवति, गमेः कर्तृस्थक्रियात्वात्। अमध्यमपरिमाणस्य च गत्यागती अणुत्व एव सम्भवतः। सत्योश्च गत्यागत्योरुत्क्रान्तिरप्यपसृप्तिरेव देहादिति प्रतीयते, न ह्यनपसृप्तस्य देहाद्गत्यागती स्याताम् देहप्रदेशानामुत्क्रान्तावपादानत्ववचनाच्चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरी-

---

उत्तरसूत्रादात्मस्य सूत्रं पूरितं, उत्क्रान्तिः श्रूयत इति शेषः। स मुमूर्षुः जीव एतैर्बुद्ध्यादिभिस्तस्माच्चन्द्रलोकादिमं लोकं प्रति कर्म कर्तुमायातीत्यर्थः॥

उत्क्रान्तिरात्मनो देहान्निर्गमो न भवति येनाणुत्वं स्यात् किन्तु स्वामित्वनिवृत्तिरिति केचित्। तदङ्गीकृत्याप्यणुत्वमावश्यकमित्याह। स्वात्मनेति। उत्क्रान्तेरुत्तरयोर्गत्यागत्योः स्वात्मना कर्त्रा सम्बन्धादणुत्वमिति सूत्रयोजना, पाकानाश्रयस्य पक्तृत्ववद्गमनानाश्रयस्यापि गन्तृत्वोक्तिः किं न स्यादित्यत आह। गमेरिति। गमनस्य कर्तरि संयोगविभागरूपातिशयहेतुत्वात् कर्त्राश्रितत्वं लोकसिद्धमित्यर्थः। जीवोऽणुरमध्यपरिमाणत्वे सति गतिमत्त्वात् परमाणुवदित्याह। अमध्यमेति। अङ्गीकारं त्यजति। सत्योश्चेति। न स्वाम्यनिवृत्तिमात्रं उत्क्रान्तिरित्यर्थः। देहान्निर्गम एवोत्क्रान्तिरित्यत्र लिङ्गान्तरमाह। देहप्रदेशा-

रदेशेभ्य इति। स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति शुक्रमादाय पुनरेति स्थानमिति चान्तरेऽपि शरीरे शारीरस्य गत्यागती भवतस्तस्मादप्यस्याणुत्वसिद्धिः ॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥

अथापि स्यान्नाणुरयमात्मा, कस्मादतच्छ्रुतेः अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः। 'स वा एष महानज आत्मा, योऽयं विज्ञानमयः प्राणेषु, आकाशवत् सर्वगतश्च नित्यः, सत्यं ज्ञानमनन्तं ब्रह्म' इत्येवंजातीयका हि श्रुतिरात्मनोऽणुत्वे विप्रतिषिध्येतेति चेन्नैष दोषः। कस्मादितराधिकारात्। परस्य हि आत्मनः प्रक्रियायामेषा परिमाणान्तरश्रुतिः, परस्यैवात्मनः प्राधान्येन वेदान्तेषु वेदितव्यत्वेन प्रकृतत्वात्, विरजः पर आकाशादित्येवंविधाच्च परस्यैवात्मनः तत्र तत्र विशेषाधिकारात्। ननु 'योऽयं विज्ञानमयः प्राणेषु' इति शारीर एव महत्त्वसम्बन्धित्वेन प्रति-

---

नामिति। अपादानत्वं अवधित्वं अन्येभ्यो वा मुखादिभ्य एष आत्मा निष्क्रामतीति शेषः। किञ्च देहमध्येऽपि जीवस्य गत्यागतिश्रुतेरणुत्वमित्याह। स इति। इन्द्रियाणि गृह्णन् स्वापादौ हृदयं स जीवो गच्छति शुक्रं प्रकाशकं इन्द्रियग्राममादाय पुनर्जागरितस्थानमागच्छतीत्यर्थः ॥

इतराधिकाराद्ब्रह्मप्रकरणात्। ननु महत्त्वश्रुतेः कथं परप्रकरणस्थत्वमित्यत आह। परस्यैवेति। या वेदान्तश्रुतिः सा परप्रकरणस्थेत्युत्सर्गात् तस्यास्तत्स्थत्वं ब्रह्मारभ्याधीतत्वाच्चेत्याह। विरज इति। निर्दोष इत्यर्थः। विज्ञानमयश्रुत्या प्रकरणं बाध्यमिति शङ्कते। नन्विति।

निर्दिश्यते। शास्त्रदृष्ट्या त्वेष निर्देशो वामदेववद्द्रष्टव्यः, तस्मात् प्राज्ञविषयत्वात् परिमाणान्तरश्रवणस्य न जीवस्याणुत्वं विरुध्यते॥

स्वशब्दोन्मानाभ्याञ्च॥ २२॥

इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववाची शब्दः श्रूयते, 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश' इति, प्राणसम्बन्धाच्च जीव एवायमणुरभिहित इति गम्यते। *तथा चोन्मानमपि जीवस्याणिमानं गमयति 'बालाग्रशतभागस्य शतधा कल्पितस्य तु। भागो जीवः स विज्ञेयः' इति 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इति चोन्मानान्तरं। नन्वणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्यते, दृश्यते च जाह्नवीह्रदनिमग्नानां सर्वाङ्गशैत्योपलब्धिर्निदाघसमये च सकलशरीरपरितापोपलब्धिरित्यत उत्तरं पठति॥

अणोर्जीवस्य ब्रह्मणा भेदाभेदाङ्गीकाराच्छास्त्रीयाभेददृष्ट्या महत्त्वोक्तिर्यथा वामदेवस्याहं मनुरिति सर्वात्मत्वोक्तिरित्यविरोधमाह। शास्त्रेति॥

एवमुत्क्रान्त्यादिश्रुत्याणुत्वमनुमितं, तत्र श्रुतिमप्याह। स्वशब्देति। बालाग्रादुद्धृतः शततमो भागस्तस्मादप्युद्धृतः शततमो भागो जीव इति उद्धृत्य मानमुन्मानमत्यन्ताल्पत्वमित्यर्थः। बालः केशः, तोत्रप्रोतायःशलाकाग्रमाराग्रं, तस्मादुद्धृता मात्रा मानं यस्य स जीवस्तथा॥

---

* तथोन्मानमिति सर्व० का०।

अविरोधश्चन्दनवत्॥ २३॥

यथाहि हरिचन्दनबिन्दुः शरीरैकदेशसम्बन्धोऽपि सन् सकलदेहव्यापिनमाह्लादं करोति, एवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करिष्यति, त्वक्सम्बन्धाच्चास्य सकलशरीरगता वेदना न विरुध्यते, त्वगात्मनोर्हि सम्बन्धः कृत्स्नायां त्वचि वर्त्तते, त्वक् च कृत्स्नशरीरव्यापिनीति॥

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि॥ २४॥

अत्राह यदुक्तमविरोधश्चन्दनवदिति तदयुक्तं, दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात्, सिद्धे ह्यात्मनो देहैकदेशस्थत्वे चन्दनदृष्टान्तो भवति, प्रत्यक्षन्तु चन्दनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनं च आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्त्तित्वं। अनुमेयन्तु तदिति यदप्युच्येत, न चात्रानुमानं सम्भवति। किमात्मनः सकलशरीरगता वेदना त्वगिन्द्रियस्येव सकलदेहव्यापिनः सतः किं वा विभोर्नभस इव आ-

---

चात्मसंयुक्तायास्त्वचो देहव्यापिस्पर्शोपलब्धिकरत्वास्य महिम्नाऽऽत्मनोऽव्यापिकार्य्यकारित्वमविरुद्धं। त्वगात्मनोरिति सम्बन्धस्य त्वगवयविनिष्ठत्वादवयविनस्त्वैकत्वादात्मसंयोगस्य कृत्स्नत्वङ्निष्ठतेत्यर्थः॥

सिद्धे हीति। न तु सिद्धमित्यतुल्यतेत्यर्थः। विशेष एव वैशेष्यं, चन्दनबिन्दोरल्पत्वस्य प्रत्यक्षत्वात् त्वग्व्याप्यव्यापिकार्य्यकारित्वकल्पना युक्ता, जीवस्य त्वणुत्वे सन्देहाद्व्यापिकार्यदृष्ट्या व्यापित्वकल्पनमेव युक्तं। व्या-

देशस्थचन्दनबिन्दोरिवाणोरेकदेशस्थस्येति संशयानिवृत्तेरिति। अत्रोच्यते नायं दोषः। कस्मात् अभ्युपगमात्। अभ्युपगम्यते ह्यात्मनोऽपि चन्दनस्येव देहैकदेशवृत्तित्वमवस्थितिवैशेष्यं कथमिति उच्यते। हृदि हि। एष आत्मा पठ्यते वेदान्तेषु 'हृदि ह्येष आत्मा' 'स वा एष आत्मा' 'हृदि कतम आत्मा' इति 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' इत्याद्युपदेशेभ्यः। तस्माद्दृष्टान्तदार्ष्टान्तिकयोरवैषम्याद्युक्तमेवैतदविरोधश्चन्दनवदिति॥

गुणाद्वा लोकवत्॥२५॥

चैतन्यगुणव्याप्तेर्वाणोरपि सतो जीवस्य सकलदेहव्यापि कार्य्यं न विरुध्यते। यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्त्तिनामपि प्रभाऽपवरकव्यापिनी सती कृत्स्नेऽपवरके कार्य्यं करोति तद्वत्। स्यात् कदाचिच्चन्दनस्य सावयवत्वात् सूक्ष्मावयवविसर्पणेनापि सकलदेहे आह्लादयितृत्वं न त्वणोर्जीव-

---

पिकार्य्याश्रयो व्यापीत्युत्सर्गादिति सूत्रशङ्काभागार्थः। आत्माल्पः व्यापिकार्य्यकारित्वाच्चन्दनबिन्दुवदित्यनुमानमयुक्तं, त्वगादौ व्यभिचारादित्याह। न चात्रानुमानमिति। पूर्व्वोक्तश्रुतिभिर्जीवस्याणुत्वनिश्चयाद्हृदिस्थत्वश्रुतिभिरेकदेशस्थत्वनिश्चयाच्च न दृष्टान्तवैषम्यमिति परिहारभागार्थमाह। अत्रोच्यत इति॥

आत्मवत्तद्धर्म्मज्ञानस्याप्यणुत्वं स्वतः, कादाचित्कन्तु देहपरिमाणत्वमित्युक्त्वा स्वत एव व्यापित्वमिति मतान्तरमाह। गुणाद्वेति। वाशब्देन चन्दनदृष्टान्तापरितोषः सूचितस्तमाह। स्यादिति। उत्तरसूत्र-

स्यावयवाः सन्ति यैरयं सकलं देहं विप्रसर्पेदित्याशङ्क्य गुणाद्वा लोकवदित्युक्तं, कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्त्तेत, नहि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्त्तमानो दृश्यते। प्रदीपप्रभावद्भवेदिति चेन्न, तस्या अपि द्रव्यत्वाभ्युपगमात्। निबिडावयवं हि तेजोद्रव्यं प्रदीपः, प्रविरलावयवन्तु तेजोद्रव्यमेव प्रभेति अत उत्तरं पठति॥

व्यतिरेको गन्धवत्॥ २६॥

यथा गुणस्याऽपि सतो गन्धस्य गन्धवद्द्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गन्धवत्सु गन्धोपलब्धेः, एवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भविष्यति, अतश्चानैकान्तिकमेतद्गुणत्वाद्रूपादिवत् आश्रयविश्लेषानुपपत्तिरिति गुणस्यैव सतो गन्धस्याश्रयविश्लेषदर्शनात्, गन्धस्याऽपि सहैवाश्रयेण विश्लेष इति चेन्न, यस्मान्मूलद्रव्याद्विश्लेषस्तस्य

व्यावर्त्त्यं शङ्कते। कथमिति। ज्ञानं न गुणिव्यतिरिक्तदेशव्यापि गुणत्वाद्रूपवत्, न च प्रभायां व्यभिचारस्तस्या अपि द्रव्यत्वादिति प्राप्ते गन्धव्यभिचारमाह। अत उत्तरमिति॥

गुणस्य द्रव्यव्यतिरेक आश्रयविश्लेषः। ननु विश्लिष्टावयवानामल्पत्वाद्द्रव्यक्षयो न भातीत्यत आह। अक्षीयमाणमपीति। अपिरवधारणे, पूर्व्वावस्थालिङ्गेनाक्षीयमाणमेव तद्द्रव्यमनुमीयत इत्यर्थः। विमतं अविश्लिष्टावयवं पूर्व्वावस्थातो गुरुत्वाद्यपचयहीनत्वात् सम्मतवदिति भावः। शङ्कते। स्यादेतदिति। विश्लिष्टानामल्पत्वादित्युपलक्षणं, अवयवान्तराणां प्रवेशादित्यपि द्रष्टव्यं। विशेषोऽवयवानां विश्लेषप्रवेशरूपः

क्षयप्रसङ्गात्। अक्षीयमाणमपि तत्पूर्वावस्थातो गम्यते, अन्यथा तत्पूर्वावस्थैर्गुरुत्वादिभिर्हीयेत। स्यादेतत् गन्धाश्रयाणां विश्लिष्टानामवयवानामल्पत्वात् सन्नपि विशेषो नोपलक्ष्यते, सूक्ष्मा हि गन्धपरमाणवः सर्वतो विप्रसृता गन्धबुद्धिमुत्पादयन्ति नासिकापुटमनुप्रविशन्त इति चेत्, न अतीन्द्रियत्वात् परमाणूनां, स्फुटगन्धोपलब्धेश्च नागकेशरादिषु। न च लोके प्रतीतिर्गन्धवद्द्रव्यमाघ्रातं इति,गन्ध एवाघ्रात इति तु लौकिकाः प्रतीयन्ति। रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गन्धस्याप्ययुक्त आश्रयव्यतिरेक इति चेत्, न प्रत्यक्षत्वादनुमानाप्रवृत्तेः, तस्माद्यद्यथा लोके दृष्टं तत् तथैवानुमन्तव्यं निरूपकैर्नान्यथा। न हि रसो गुणो जिह्वयोपलभ्यत इति अतो रूपादयोऽपि गुणा जिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते॥

तथा च दर्शयति॥ २७॥

हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय तस्यैव

सन्नपि न ज्ञायते, तथा च गुरुत्वापचयो न भवतीति हेतोरन्यथासिद्धिरिति शङ्कार्थः। आगच्छन्तोऽवयवाः परमाणवस्त्रसरेणवो वा, नाद्यस्तद्गतरूपवद्गन्धस्याप्यनुपलब्धिप्रसङ्गादिति परिहरति। नेति। द्वितीयं प्रत्याह। स्फुटेति। त्रसरेणुगन्धश्चेत् स्फुटो न स्यादित्यर्थः। अतो गन्धस्य पुष्पादिष्वस्येव गुणिव्यतिरेको वाच्य इति भावः। गन्धो न गुणिविश्लिष्टः गुणत्वात् रूपवदिति शङ्कते। रूपेति। विश्लेषस्य प्रत्यक्षत्वाद्बाध इत्याह। नेति॥

आत्मनश्चैतन्यगुणेनैव देहव्याप्तिरित्यत्र श्रुतिमाह सूत्रकारः। तथा च दर्शयतीति। तद्व्याचष्टे। हृदयेति॥

'आलोमभ्य आनखाग्रेभ्यः' इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति ॥

पृथगुपदेशात् ॥ २८ ॥

'प्रज्ञया शरीरं समारुह्य' इति चात्मप्रज्ञयोः कर्तृकरणभावेन पृथगुपदेशात् चैतन्यगुणेनैवास्य शरीरव्यापिताऽवगम्यते, तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति च कर्तुः शरीरात् पृथग्विज्ञानस्योपदेशः, एतमेवाभिप्रायमुपोद्बलयति, तस्मादणुरात्मेत्येवं प्राप्ते ब्रूमः ॥

तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

तुशब्दः पक्षं व्यावर्तयति । नैतदस्त्यणुरात्मेति, उत्पत्त्यश्रवणात्, परस्यैव तु ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं । परमेव चेद्ब्रह्म जीवः तस्माद्यावत् परं ब्रह्म तावानेव जीवो भवितुमर्हति, परस्य च ब्रह्मणो विभुत्वमाम्नातं, तस्माद्विभुर्जीवः । तथा च 'स वा एष महानज

तत्रैव श्रुत्यन्तरार्थं सूत्रं । पृथगिति । विज्ञानमिन्द्रियाणां ज्ञानशक्तिं विज्ञानेन चैतन्यगुणेनादाय शेत इत्यर्थः । एतं चैतन्यगुणव्याप्तिगोचरमभिप्रायं ॥

तत्रात्माणुत्वविभुत्वश्रुतीनां विरोधादप्रामाण्यप्राप्तावणुत्वं जीवस्य विभुत्वमीश्वरस्येत्यविरोध इत्येकदेशिपक्षो दर्शितस्तं दूषयन् सिद्धान्तसूत्रं व्याचष्टे । तुशब्द इत्यादिना । तस्माद् ब्रह्माभिन्नत्वात् विभुर्जीवः ब्रह्मवदित्यनुमानानुग्राहीते श्रुतिस्मृती आह । तथा च

आत्मा योऽयं विज्ञानमयः प्राणेषु' इत्येवंजातीयका जीवविषया विभुत्ववादाः श्रौताः स्मार्ताश्च समर्थिता भवन्ति। न चाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते। त्वक्सम्बन्धात् स्यादिति चेत्, न, त्वक्कण्टकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत, त्वक्कण्टकयोर्हि संयोगः कृत्स्नायां त्वचि वर्तते, त्वक् च कृत्स्नशरीरव्यापिनीति पादतल एव तु कण्टकतुन्ना वेदनां प्रतिलभन्ते। न चाणोर्गुणव्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात्, गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत। प्रदीपप्रभायाश्च द्रव्यान्तरत्वं व्याख्यातं, गन्धोऽपि गुणत्वाभ्युपगमात् साश्रय एव सञ्चरितुमर्हति, अन्यथा गुणत्वहानिप्रसङ्गात्। तथा

स वा एष इति। नित्यः सर्व्वगतः स्थाणुरित्याद्याः स्मार्त्तवादाः। एतेन जीवस्य ब्रह्माभेदज्ञानेऽणुत्वाभावधीस्तस्यां तदित्यन्योन्याश्रय इति निरस्तं। प्रधानमहद्वाक्यानुगुणश्रुतिस्मृतिभिरणुत्वाभावनिश्चयानन्तरमभेदज्ञानात् प्रधानवाक्यविरोधे गुणभूताणुत्वश्रुतीनामौपाधिकाणुत्वविषयकल्पनादगुणे त्वन्याय्यकल्पनेति न्यायादिति भावः। किञ्च सर्वदेहव्यापिशैत्यानुभवान्यथानुपपत्त्याऽणुत्वविषयत्वेन कथञ्चिदर्थवादा नेयाः लौकिकन्यायादपि तेषां दूर्बलत्वादिति न्यायादिति मत्वाह। न चाणोरिति। शङ्कते। त्वगिति। यद्येवात्मसम्बन्धस्य त्वग्व्याप्त्या देहव्यापिनी वेदना स्यात् तर्ह्यतिप्रसङ्ग इति दूषयति। नेति। प्रसङ्गस्येष्टत्वं निरस्यति। पादतल एवेति। तस्मादल्पमहतोः संयोगो न महद्व्यापी कण्टकसंयोगस्य देहव्याप्त्यदर्शनात्, तथा च आत्मसंयोगस्त्वगेकदेशस्य एवेति देहव्यापिवेदनानुपपत्तिः। न च सिद्धान्ते त्वगात्मसम्बन्धस्य व्यापित्वात् कण्टकसम्बन्धे देहव्यापिवेदनाप्रसङ्ग इति वाच्यं। यावती विषयसम्बन्धा त्वक् ताव-

चोक्तं भगवता द्वैपायनेन 'उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणाः। पृथिव्यामेव तं विद्यादपो वायुञ्च संश्रितमिति। यदि चैतन्यं जीवस्य समस्तशरीरं व्याप्नुयान्नाणुर्जीवः स्यात्, चैतन्यमेव ह्यस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ, नात्र गुणगुणिविभागो विद्यत इति। शरीरपरिमाणत्वञ्च प्रत्याख्यातं, पारिशेष्याद्विभुर्जीवः। कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह। तद्गुणसारत्वात् तु तद्व्यपदेश इति। तस्या बुद्धेर्गुणास्तद्गुणा इच्छा द्वेषः सुखं दुःखं इत्येवमादयस्तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे सम्भवति स तद्गुणसारस्तस्य भावस्तद्गुणसारत्वं। न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारिणो

ह्यात्मसम्बन्धस्तावद्व्यापिवेदनाहेतुरिति नियमात्। न चैवं विषयत्वक्सम्बन्ध एव तद्धेतुरस्तु किमात्मव्याप्त्येति वाच्यं। वेदना हि सुखं दुःखं तदनुभवश्च, न चैषां व्यापकानां कार्याणामल्पमुपादानं सम्भवति कार्यस्योपादानाद्विश्लेषानुपपत्तेः। न चैषां व्यापकत्वमसिद्धं सूर्य्यतप्तस्य गङ्गानिमग्नस्य सर्वाङ्गव्यापिदुःखसुखानुभवस्य दुरपह्नवत्वात्। यदुक्तं गुणस्यापि गुणिविश्लेषो गन्धवदिति तन्नेत्याह। न चाणोरिति। गन्धो नाश्रयाद्विश्लिष्टः गुणत्वाद्रूपवदित्यागममाह। तथा चोक्तमिति। न च प्रत्यक्षबाधः गन्धस्य प्रत्यक्षत्वेऽपि निराश्रयत्वस्याप्रत्यक्षत्वान्महतां त्रसरेणूनामनुद्भूतस्पर्शानामुद्भूतगन्धानामागमनात् स्फुटगन्धोपलम्भसम्भवः, अवयवान्तरप्रवेशान्न सहसा मूलद्रव्यक्षय इति भावः। पूर्वं चैतन्यस्य गुणत्वमुपेत्य तद्व्याप्त्या गुण्यात्मागुत्वं निरस्तं, सम्प्रति तस्य गुणत्वमसिद्धमित्याह। यदि चैतन्यमिति। उत्सूत्रं सूत्रं विना विभुत्वं प्रसाध्याणुत्वाद्युक्तेर्गतिप्रदर्शनार्थं सूत्रं व्याचष्टे। कथमित्यादिना।

नित्यमुक्तस्य सत आत्मनस्तस्मात् तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः, तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो न स्वतः, तथा च,

"बालाग्रशतभागस्य शतधा कल्पितस्य तु।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते" ॥

इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह। तच्चैवमेव समञ्जसं स्यात् यद्यौपचारिकमणुत्वं जीवस्य भवेत् पारमार्थिकञ्चानन्त्यं। न ह्युभयं मुख्यमवकल्पेत। न चानन्त्यमौपचारिकमिति शक्यं विज्ञातुं सर्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्।*तथेतरस्मिन्नप्युन्माने बुद्धेर्गुणेनात्मगुणेन चैव 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इति बुद्धिगुणसम्बन्धेनैवाराग्रमात्रतां शास्ति न स्वेनैवात्मना। 'एषोऽणुरात्मा चेतसा वेदितव्यः' इत्यत्राऽपि न जीवस्याणुपरिमाणत्वं शिष्यते परस्यैवात्मनश्चक्षुराद्यनवगा-

---

अन्तरा विज्ञानमनसी हृदि ह्येति च प्रकृता बुद्धिर्योग्यत्वात् तच्छब्देन परामृश्यते। बुद्धिगुणानामात्मन्यध्यासादगुणत्वाद्युक्तिर्न स्वतः चानन्त्यश्रुतिविरोधादित्याह। तथा चेति! अकार्यकारणद्रव्यसमानाधिकरणतया तत्त्वमसीति वाक्यस्य सोऽयमिति वाक्यवदखण्डाभेदार्थत्वादानन्त्यं सत्यमणुत्वमध्यस्तमित्यर्थः। उक्तञ्चैतदङ्गुष्ठाधिकरणे 'प्रतिपाद्यविरुद्धमुद्देश्यगतविशेषणमविवक्षितं' इति बालाग्रवाक्यमाराग्रवाक्यञ्चेत्युन्मानद्वयमुक्तं तत्राद्यं निरस्य द्वितीयं निरस्यति। तथेतरस्मिन्नपीति। बुद्धेर्गुणनिमित्तेनात्मन्यध्यस्तो गुणो भवति तेनात्मगुणेनाध्यस्तेनैवाराग्रपरिमाणोऽपकृष्टश्च जीवो दृष्टः स्वतस्त्वनन्त एवेत्यर्थः।

---

* तथोत्तरस्मिन्निति वर्ध० का०।

स्थत्वेन ज्ञानप्रसादावगम्यत्वेन च प्रकृतत्वात्, जीवस्याऽपि च मुख्याणुपरिमाणत्वानुपपत्तेः, तस्माद्दुर्ज्ञानत्वाभिप्रायमिदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यं। तथा प्रज्ञया शरीरं समारुह्येत्येवंजातीयकेष्वपि भेदोपदेशेषु बुद्ध्यैवोपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यं व्यपदेशमात्रं वा शिलापुत्रकस्य शरीरमित्यादिवत्। न ह्यत्र गुणगुणिविभागो विद्यत इत्युक्तं। हृदयायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात्। तथोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयति 'कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि' इति, 'स प्राणमसृजत' इति। उत्क्रान्त्यभावे हि गत्यागत्योरप्यभावो विज्ञायते, न ह्यनपसृप्तस्य देहाद्गत्यागती स्यातां। एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वादिव्यपदेशः प्राज्ञवत्, यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशोऽणीयान् व्रीहेर्वा यवाद्वा मनोमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसङ्कल्प इत्येवंप्रकारस्तद्वत्।

'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' इत्युक्त्वा एषोऽणुरात्मेत्युक्तः पर एव यदि जीवः तथाप्यध्यस्ताणुत्वं ह्यणुशब्दार्थ इत्याह। जीवस्यापीति। यदुक्तं पृथगुपदेशाच्चैतन्यगुणेनैवात्मनो देहव्याप्तिरिति तत्राह। तथा प्रज्ञयेति। बुद्धिप्रज्ञयेत्यर्थः। यदि चैतन्यं प्रज्ञा तदा भेदोपचार इत्याह। व्यपदेशमात्रं वेति। ननु चैतन्यं गुण इति भेदो मुख्योऽस्तु नेत्याह। न ह्यत्रेति। निर्गुणत्वश्रुते-

स्यादेतद् यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोगावसानमवश्यं भावीत्यतो बुद्धिवियोगे सत्यात्मनो विभक्तस्यानालक्ष्यत्वादसत्त्वमसंसारित्वं वा प्रसज्येतेत्यत उत्तरं पठति ॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

नेयमनन्तरनिर्दिष्टदोषप्राप्तिराशङ्कनीया, कस्मात् यावदात्मभावित्वात्। बुद्धिसंयोगस्य यावदयमात्मा संसारी भवति यावदस्य सम्यग्दर्शनेन संसारित्वं न निवर्तते तावदस्य बुद्ध्या संयोगो न शाम्यति। यावदेव चायं बुद्ध्युपाधिसम्बन्धस्तावदेवास्य जीवस्य जीवत्वं संसारित्वञ्च, परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्ति। न हि नित्यमुक्तस्वरूपात् सर्वज्ञादीश्वरादन्यश्चेतनधातुर्द्वितीयो वेदान्तार्थनिरूपणायामुपलभ्यते 'नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता' 'नान्यदतोऽस्ति द्रष्टृ श्रोतृ मन्तृ विज्ञातृ' 'तत्त्वमसि' 'अहं ब्रह्मास्मि'

रित्यर्थः। अन्यदपि पूर्वोक्तं बुद्ध्याद्युपाधिकमित्याह। हृदयेत्यादिना। सौत्रं दृष्टान्तं विवृणोति। यथेति। असत्त्वमित्यापाततः असंसारित्वमापाद्यं। शेषं सुबोधं।

ननु स्वतः संसारित्वमस्तु किं बुद्ध्युपाधिनेत्यत आह। यावदेव चायमिति। समानो बुद्धितादात्म्यापन्नः सन् विज्ञानं ब्रह्म तन्मयो विकारोऽणुरित्यर्थः किं न स्यादित्यत आह। प्रदेशान्तर इति। विज्ञानमयो बुद्धिप्रचुर इत्यर्थः। केन समान इत्याकाङ्क्षायामिति

इत्यादिश्रुतिशतेभ्यः। कथं पुनरवगम्यते यावदात्मभावी बुद्धिसंयोग इति तद्दर्शनादित्याह। तथा हि शास्त्रं दर्शयति 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव' इत्यादि। तत्र विज्ञानमय इति बुद्धिमय इत्येतदुक्तं भवति। प्रदेशान्तरे 'विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः' इति विज्ञानस्य मनआदिभिः सह पाठात् बुद्धिमयत्वञ्च तद्गुणसारत्वमेवाभिप्रेयते, यथा लोके स्त्रीमयो देवदत्तः इति स्त्रीरागादिप्रधानोऽभिधीयते तद्वत्। स समानः सन्नुभौ लोकावनुसञ्चरति इति च लोकान्तरगमनेऽप्यवियोगं बुद्ध्यादेर्दर्शयति, केन समानस्तयैव बुद्ध्या इति गम्यते सन्निधानाच्च। तच्च दर्शयति 'ध्यायतीव लेलायतीव' इति, एतदुक्तं भवति नायं स्वतो ध्यायति नापि चलति ध्यायन्त्यां बुद्धौ ध्यायतीव चलन्त्यां चलतीवेति। अपि च मिथ्याज्ञानपुरःसरोऽयमात्मनो बुद्ध्युपाधिसम्बन्धः, न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत्यतो यावत् ब्रह्मात्मतानवबोधस्तावदयं बुद्ध्याद्युपाधिसम्बन्धो न शाम्यति। दर्शयति च,

---

शेषः। श्रुतिबलाद्बुद्धेर्यावत्संसार्यात्मभावित्वमुक्तं सति मूले कार्यस्य वियोगासम्भवाच्चेति युक्त्याप्याह। अपि च मिथ्येति। सम्यग्ज्ञानादेव बुद्ध्यादिसम्बन्धध्वंस इत्यत्र श्रुतिमाह। दर्शयतीति। म्रत्यमत्येतीत्यन्वयः। आदित्यवर्णं स्वप्रकाशं। तमसः परस्तादज्ञानास्पृष्टमि-

'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति। ननु सुषुप्तप्रलययोर्न शक्यते बुद्धिसम्बन्धः आत्मनोऽभ्युपगन्तुं 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' इति वचनात् कृत्स्नविकारप्रलयाभ्युपगमाच्च तत्कथं यावदात्मभावित्वं बुद्धि-सम्बन्धस्येत्यत्रोच्यते॥

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्॥ ३१॥

यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिष्वनुपलभ्यमानानि अविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवन्ति, नाविद्यमानान्युत्पद्यन्ते षण्ढादीनामपि तदुत्पत्तिप्रसङ्गात्, एवमयमपि बुद्धिसम्बन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति। एवं ह्येतद्युज्यते, न ह्याकस्मिकी कस्यचिदुत्पत्तिः सम्भवति अतिप्रसङ्गात्। दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितं सति सम्पद्य न विदुः सति सम्पद्यामह इति

त्यर्थः। यावदात्मभावित्वस्यासिद्धिं शङ्कते। नन्विति। सुषुप्तौ बुद्धि-सत्त्वे ब्रह्मसम्पत्तिर्न स्यात् प्रलये तत्सत्त्वे प्रलयव्याहतिरित्यर्थः॥

स्थूलसूक्ष्मात्मना बुद्धेर्यावदात्मभावित्वमस्ति इत्याह। पुंस्त्वेति। पुंस्त्वं रेतः, आदिपदेन श्मश्र्वादिग्रहः, अस्य बुद्धिसम्बन्धस्येत्यर्थः। स्वापे बीजात्मना सतो बुद्ध्यादेः प्रबोधेऽभिव्यक्तिरित्यत्र श्रुतिमाह।

'न इह व्याघ्रो वा सिंहो वा' इत्यादिना। तस्मात् सिद्धमेत-द्यावदात्मभावो बुद्ध्याद्युपाधिसम्बन्ध इति ॥

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ ३२ ॥

तच्चात्मन उपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यते। क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते, निश्चयादिवृत्तिकं बुद्धिरिति। तच्चैवम्भूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यं। अन्यथा ह्यनभ्युपगम्यमाने तस्मिन्नित्योपलब्ध्यनुपलब्धिप्रसङ्गः स्यात् आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नि-

---

दर्शयतीति। न विदुरित्यविद्यात्मकबीजसद्भावोक्तिः। ते व्याघ्रादयः पुनराभवन्ति इत्यभिव्यक्तिनिर्देशः ॥

बुद्धिसद्भावे मानमाह सूत्रकारः। नित्येति। मनसा ह्येव पश्यति, बुद्धिश्च न विचेष्टति, विज्ञानं यज्ञं तनुते, चेतसा वेदितव्यः, चित्तञ्च चेतयितव्यञ्चेति तत्र तत्र श्रुतिषु मनआदिपदवाच्यं तावद्बुद्धिद्रव्यं प्रसिद्धमित्यर्थः। कथमेकस्यानेकोक्तिस्तत्राह। क्वचिच्चेति। गर्ववृत्तिकोऽहङ्कारो विज्ञानं चित्प्रधानं स्मृतिप्रधानं वा चित्तमित्यपि द्रष्टव्यं। यद्यपि साक्षिप्रत्यक्षसिद्धमन्तःकरणं श्रुत्यनूदितञ्च तथापि प्रत्यक्षश्रुत्योर्विवदमानं प्रति व्यासङ्गानुपपत्त्या तत्साधयति। तच्चेत्यादिना। सूत्रं योजयति। अन्यथेति। पञ्चेन्द्रियाणां पञ्चविषयसम्बन्धे सति नित्यं युगपत् पञ्चोपलब्धयः स्युः, मनोऽतिरिक्तसामग्र्याः सत्त्वात् यदि सत्यामपि सामग्र्यां उपलब्ध्यभावस्तर्हि सदैवानुपलब्धिप्रसङ्गादित्यर्थः। अतः कादाचित्कोपलब्धिनियामकं मन एष्टव्यमिति

त्यमेवोपलब्धिः प्रसज्येत। अथ सत्यपि हेतुसमवधाने फलाभावस्ततोऽपि नित्यमेवानुपलब्धिः प्रसज्येत, न चैवं दृश्यते। अथ वान्यतरस्यात्मन इन्द्रियस्य वा शक्तिप्रतिबन्धोऽभ्युपगन्तव्यः। न चात्मनः शक्तिप्रतिबन्धः सम्भवति अविक्रियत्वात्,-नापीन्द्रियस्य, न हि तस्य पूर्वोत्तरयोः चणयोरप्रतिबद्धशक्तिकस्य ततोऽकस्माच्छक्तिः प्रतिबध्येत, तस्मात् यस्यावधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतस्तन्मनः। तथा च श्रुतिः, 'अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषम्' इति 'मनसा ह्येव पश्यति मनसा शृणोति' इति च। कामादयश्चास्य वृत्तय इति दर्शयति 'कामः

भावः। ननु सत्यपि करामिसंयोगे दाहकादाचित्कत्ववदुपलब्धिकादाचित्कत्वमस्तु किं मनसेत्याशङ्क्यान्यतरनियमो वेत्येतद्व्याचष्टे। अथवेति। सत्यां सामग्र्यां नित्योपलब्धिर्वाङ्गीकार्या अन्यतरस्य कारणस्य केनचिच्छक्तिप्रतिबन्धनियमो वाङ्गीकार्यः, यथा मणिनाऽग्निशक्तिप्रतिबन्ध इति वाक्यार्थः। अस्तु प्रतिबन्ध इत्यत आह। न चेति। न चेन्द्रियस्यैवास्तु शक्तिप्रतिबन्धकत्वं प्रतिबन्धकाभावात्, न च दृष्टसामग्र्यां सत्यां अदृष्टं प्रतिबन्धकमिति युक्तं अतिप्रसङ्गात्। न च व्यासङ्गः प्रतिबन्धकमनोऽसत्त्वे तस्यासम्भवात्, तथा हि रसादीनां सहोपलब्धिप्राप्तौ रसबुभुत्सारूपो व्यासङ्गो रूपाद्युपलब्धिप्रतिबन्धको वाच्यः, स च गुणत्वाद्रूपवद्द्रव्याश्रयः, तत्रात्मनोऽसङ्गनिर्गुणाकूटस्थस्य गुणित्वायोगान्मन एव गुणित्वेनैष्टव्यमिति व्यासङ्गानुपपत्त्या मनःसिद्धिः। एतदभिप्रेत्योपसंहरति। तस्मादिति। अवधानं बुभुत्सा, न चानिच्छतोऽपि दुर्गन्धाद्युपलम्भान्न बुभुत्सोपलब्धिर्नियामिकेति वाच्यं, अनेकविषयसन्निधौ क्वचिदेव तस्यानियामकत्वाङ्गीकारात्। येषां मते पुनरिच्छादीनामात्मधर्मत्वं तेषां मनो दुर्लभमिति मन्तव्यं। इच्छा-

सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति, तस्माद्युक्तमेतत् तद्गुणसारत्वात् तद्व्यपदेश इति ॥

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मः प्रपञ्च्यते। कर्ता चायं जीवः स्यात्, कस्मात् शास्त्रार्थवत्त्वात्। एवञ्च यजेत जुहुयात् दद्यादित्येवंविधं विधिशास्त्रमर्थवद्भवति, अन्यथा तदनर्थकं स्यात्। तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति, न चा-

---

दिधर्मिणैवात्मना व्यासङ्गोपपत्तेः। सम्प्रति व्यासङ्गस्य मानसत्वे श्रुतिमाह। तथा चेति। न केवलं व्यासङ्गात्मनः सिद्धिः किन्तु कामाद्याश्रयत्वेनापीत्याह। कामादयश्चेति। बुद्धेः प्रामाणिकत्वोक्तिफलमाह। तस्मादिति ॥

एवमात्मन्यणुत्वाध्यासोक्त्या स्वाभाविकं महत्त्वं स्थापितं सम्प्रति ततो बहिरङ्गं कर्तृत्वं साधयति। कर्ता शास्त्रार्थवत्त्वात्। स नित्यचिद्रूपो महानात्मा कर्ता न वेत्यसङ्गत्वश्रुतीनां विध्यादिश्रुतीनाञ्च विप्रतिपत्त्या संशये बुद्धिकर्तृत्वेनैव विध्यादिशास्त्रोपपत्तेरकर्तात्मेति साङ्ख्यपक्षप्राप्तौ सिद्धान्तयन्नेव तद्गुणसारत्वोक्त्यात्मनि कर्तृत्वाध्यासस्याऽपि सिद्धत्वात् पुनरुक्तिमाशङ्क्य साङ्ख्यपक्षनिरासार्थमात्मनि कर्तृत्वाध्यासप्रपञ्चनान्न पुनरुक्तिरित्याह। तद्गुणेति। अधिकारः प्रसङ्गः, वस्तुतोऽसङ्गत्वमविघातः, कर्तृत्वमित्यसङ्गत्वकर्तृत्वश्रुतीनां अविरोधोक्तेः कर्तृत्वविचारात्मकाधिकरणद्वयस्य पादसङ्गतिः, श्रुतीनां मिथोविरोधाविरोधौ पूर्वोत्तरपक्षयोः फलं, यद्वात्र पूर्वपक्षे बन्धाभावाच्छास्त्रवैयर्थ्यं फलं सिद्धान्ते कर्तृत्वादिसम्बन्धसत्त्वाच्छास्त्रार्थवत्तेति भेदः। ननु बुद्धिकर्तृत्वेन शास्त्रार्थवत्ताऽस्तु किं जीवकर्तृ-

सति कर्तृत्वे तदुपपद्यते तथेदमपि शास्त्रमर्थवद्भवति, 'एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति॥

विहारोपदेशात्॥ ३४॥

इतश्च जीवस्य कर्तृत्वं यज्जीवप्रक्रियायां सन्ध्ये स्थाने विहारमुपदिशति 'स ईयते मृतो यत्र कामम्' इति 'स्वे शरीरे यथाकामं परिवर्तते' इति च॥

उपादानात्॥ ३५॥

इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं सङ्कीर्तयति 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति 'प्राणान् गृहीत्वा' इति च॥

त्वेन तत्राह। तद्धि कर्तुः सत इति। मयेदं कर्तव्यमिति बोधसमर्थस्य चेतनस्यैव कर्तृत्वं वाच्यं न त्वचेतनाया बुद्धेः। किञ्च भोक्तुरात्मन एव कर्तृता वाच्या शास्त्रफलं प्रयोक्तरीति न्यायादिति भावः। सन्ध्यं स्थानं स्वप्नः अमृतः स आत्मा यथेष्टमीयते गच्छतीति॥

विहारोपदेशात्। आत्मा कर्ता प्राणानां मध्येऽपि ज्ञानेन बुद्ध्या विज्ञानसमर्थमिन्द्रियजातं आदाय शेते इति प्राणान् गृहीत्वा परिवर्तत इति॥

उपादानकर्तृत्वमात्मनः, अकर्तृत्वे उपादानानुपपत्तेरिति भावः। विज्ञानशब्दो जीवस्य निर्देशो न चेत् तदा प्रथमानिर्देशादिपर्ययः करणयोतितृतीयया निर्देशः स्यात्, तस्मादिह श्रुतौ तनुत इत्याख्यातेन कर्तृवाचिना विज्ञानपदस्य सामानाधिकरण्यनिर्देशात् क्रियायामात्मनः कर्तृत्वं सूच्यत इति सूत्रभाष्ययोरर्थः॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्य्ययः ॥ ३६ ॥

इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति शास्त्रं 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' इति। ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यते इति नेत्युच्यते जीवस्यैवैष निर्देशो न बुद्धेर्न चेज्जीवस्य स्यान्निर्देशविपर्य्ययः स्याद्विज्ञानेनेत्येवं निरदेक्ष्यत्। तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति। इह तु विज्ञानं यज्ञं तनुत इति कर्तृसामानाधिकरण्यनिर्देशाद्बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यत इत्यदोषः। अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात् स स्वतन्त्रः सन् प्रियं हितञ्चैवात्मनो नियमेन सम्पादयेन्न विपरीतं, विपरीतमपि तु सम्पादयन्नुपलभ्यते, न च स्वतन्त्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यत इत्यत उत्तरं पठति ॥

उपलब्धिवदनियमः ॥ ३७ ॥

यथायमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टञ्चोपलभते एवमनियमेनैवेष्टमनिष्टञ्च सम्पादयिष्यति, उपलब्धा-

---

सूत्रान्तरमवतारयति। अत्राहेति। जीवः स्वतन्त्रश्चेदिष्टमेव कुर्यादस्वतन्त्रश्चेन्न कर्त्ता स्वतन्त्रः कर्त्तेति न्यायादित्यर्थः॥

सत्यपि स्वातन्त्र्ये कारकवैचित्र्यादनियता प्रवृत्तिरिति सूत्रेण परि-

वयस्वातन्त्र्यं उपलब्धिहेतूपादानोपलम्भादिति चेत्, न विषयप्रकल्पनामात्रप्रयोजनत्वादुपलब्धिहेतूनां। उपलब्धौ त्वनन्यापेक्षत्वमात्मनश्चैतन्ययोगात्। अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात्। न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्तते। भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वं, सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते॥

शक्तिविपर्य्ययात्॥ ३८॥

इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात् ततः शक्तिविपर्ययः स्यात् करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत।

हरति। यथेति। दृष्टान्तासम्मतिपत्त्या शङ्कते। उपलब्धावपीति। चक्षुरादीनां चैतन्येन विषयसम्बन्धार्थत्वात् स्वसम्बन्धोपलब्धौ चात्मनश्चैतन्यस्वभावत्वेन स्वातन्त्र्यात् दृष्टान्तसिद्धिरित्याह। नेति। नन्वात्मा विषयसम्बन्धाय करणान्यपेक्षते चेत् कथं स्वतन्त्र इत्याशङ्क्याह। अपि चेति। स्वातन्त्र्यं नाम न स्वान्यानपेक्षत्वं ईश्वरस्यापि प्राणिकर्मापेक्षत्वेनास्वातन्त्र्यप्रसङ्गात्। किन्तु स्वेतरकारकप्रयोक्तृत्वे सति कारकाप्रेर्यत्वं स्वातन्त्र्यं इति न स्वतन्त्रोऽपि जीवः इष्टसाधनत्वभ्रान्त्यानिष्टसाधनमप्यनुतिष्ठतीत्यनियता प्रवृत्तिः। स्वातन्त्र्यं चेत्यविरुद्धमित्यर्थः॥

जीवस्य कर्तृत्वे हेत्वन्तरार्थं सूत्रं। शक्तीति। बुद्धेः करणशक्तिविपरीता कर्तृशक्तिः स्यादित्यर्थः। ततः किं तत्राह। सत्याश्च बुद्धेरिति।

सत्याश्च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यं, अहङ्कारपूर्विकाया एव प्रवृत्तेः सर्वत्र दर्शनात्, अहं गच्छाम्यहं आगच्छाम्यहं भुञ्जेऽहं पिबामीति च। तस्याश्च कर्तृशक्तियुक्तायाः सर्वार्थकारिण्याः सर्वार्थकारि करणमन्यत् कल्पयितव्यं, शक्तोऽपि हि सन् कर्ता करणमुपादाय क्रियासु प्रवर्तमानो दृश्यते। ततश्च सञ्ज्ञामात्रे विसंवादः स्यात् न वस्तुभेदः कश्चित्, करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात्॥

समाध्यभावाच्च ॥ ३९ ॥

योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदान्तेषु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ओमित्येवं ध्यायथ आत्मानम्' इत्येवंलक्षणः सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत तस्मादप्यस्य कर्तृत्वसिद्धिः॥

यथा च तक्षोभयथा ॥ ४० ॥

एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य

योऽहंधीगम्यः स कर्ता स एव जीवो यत् तदपेक्षितं करणं तन्मन इति जीवकर्तृत्वसिद्धिरिति भावः॥

ज्ञानसाधनविध्यन्यथानुपपत्त्याप्यात्मनः कर्तृत्वं वाच्यमित्याह। समाधीति। मुक्तिफलभोक्तुरेव तदुपायसमाधिकर्तृत्वं युक्तं अन्यथात्मनोऽकर्तृत्वे बुद्धेरपि अभोक्तुः कर्तृत्वायोगात् समाध्यभावप्रसङ्ग इत्यर्थः॥

यथा च तक्षोभयथा। उक्तमात्मनः कर्तृत्वमुपजीव्य संशयपूर्वपक्षा-

प्रदर्शितं तत्पुनः स्वाभाविकं वा स्यादुपाधिनिमित्तं वेति चिन्त्यते। तत्र तैरेव शास्त्रार्थवत्त्वादिभिः हेतुभिः स्वाभाविकं कर्तृत्वं अपवादहेत्वभावादित्येवं प्राप्ते ब्रूमः, न स्वाभाविकं कर्तृत्वमात्मनः सम्भवत्यनिर्मोक्षप्रसङ्गात् कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः सम्भवति अग्नेरिवौष्ण्यान्न च कर्तृत्वादनिर्मुक्तस्यास्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात्। ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्वकार्यपरिहारात् पुरुषार्थः सेत्स्यति, तत्परिहारस्य निमित्तपरिहाराद्यथाग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभावस्तद्वत् निमित्तानामपि शक्तिलक्षणेन सम्बन्धेन सम्बद्धानामत्यन्तपरिहारासम्भवात्। ननु मोक्षसाधनविधानान्मोक्षः सेत्स्यति न साधनायत्तस्यानित्यत्वात्। अपि च नित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षसिद्धिः *अभिहिता तादृगात्मप्रतिपादनस्य न स्वाभाविके

वाह। एवं तावदित्यादिना। साङ्ख्यनिरासेनात्मनः कर्तृत्वे साधिते बाधकाभावात् तत्सत्यमिति मीमांसकादिपक्षः प्राप्तः। न चासङ्गत्वागमेन बाधः अहं कर्त्तेत्यनुभवसहितकर्तृत्वश्रुतिबलेन तस्यागमस्य स्तावकत्वादिति प्राप्ते उत्सूत्रमेव सिद्धान्तयति। न स्वाभाविकमिति। यदुक्तं बाधकाभावादिति तदसिद्धमित्याह। अनिर्मोक्ष इति। ननु कर्तृत्वं नाम क्रियाशक्तिर्मुक्तावप्यस्ति तत्रापि शक्तिकार्यस्य क्रियारूपशक्यस्याभावान्मुक्तेः पुरुषार्थत्वं सिद्धिरिति शङ्कते। ननु स्थितायामिति। सत्यां शक्तौ कथं कार्यपरिहारस्तत्राह। तत् परिहारस्येति। मुक्तौ शक्तिसत्त्वे कार्यमपि स्यात् शक्यभावे शक्त्य-

---

* अभिमतेति वर्ध० का०।

कर्तृत्वेऽवकल्पते, तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकं। तथा च श्रुतिः 'ध्यायतीव लेलायतीव' इति। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति चोपाधिसंयुक्तस्यैवात्मनो भोक्तृत्वादिविशेषलाभं दर्शयति। न हि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते, 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रवणात्, पर एव तर्हि संसारी कर्ता भोक्ता च प्रसज्येत परस्मादन्यश्चेच्चितिमान् जीवो बुद्ध्यादिसङ्घातव्यतिरिक्तो न स्यान्नाविद्याप्रत्युपस्थापितत्वात् कर्तृभोक्तृत्वयोः। तथा च शास्त्रं 'यत्र हि द्वैतमिव भवति तदितर

योगात्। अस्ति हि प्रलयेऽपि कार्यं पुनरुद्भवयोग्यं सूक्ष्मं शक्यं, तथा च शक्त्या धर्मादिनिमित्तैः सहितकार्याक्षेपान्मुक्तिलोप इति परिहरति। न निमित्तानामपीति। सनिमित्तस्य कार्यस्य शक्त्या शक्यत्वेन सम्बन्धान्निमित्तानामपि परम्परया शक्तिसम्बन्धत्वमुक्तं मन्तव्यं सम्बन्धेनेत्यर्थः। यद्वा शक्तिर्लक्षणमाक्षेपकं यस्य कार्यस्य तेन कार्येण यः सम्बन्धस्तेनेति अधिकरणे तृतीया। ननु नरस्य कर्मणा देवत्ववच्छास्त्रबलात् कर्तुरेवाकर्तृतासिद्धिरिति शङ्कते। नन्विति। ज्ञानादकर्तृत्वाख्यमोक्षश्चेत् कर्तृत्वमाविद्यकं स्याद्यतो ज्ञानमज्ञानस्यैव निवर्तकं। यदि कर्मणा मोक्षस्तत्राह। नेति। आत्मनः स्वाभाविकं कर्तृत्वमभ्युपगम्यानिर्मोक्ष उक्तः सम्प्रत्यसङ्गनिर्विकारत्वानेकश्रुतिव्याकोपात् तत्स्वाभाविकमित्याह। अपि चेति। नचाभ्यस्तानेकश्रुतीनां स्तावकत्वकल्पनं न युक्तं, न चाहं कर्तेत्यनुभवो विरुध्यते तस्य सत्यमिथ्योदासीनकर्तृत्वावगाहिनोऽध्यासत्वेनाप्युपपत्तेरित्यर्थः। कर्तृत्वसाध्यस्तत्वे श्रुतिमाह। तथा चेति। विद्वदनुभवबाधितश्च कर्तृत्वमित्याह। न हीति। बुद्ध्यादिसङ्घाताद्व्यतिरिक्तो यदि परस्मादन्यश्चेतनो न स्यात् तदा पर एव संसारी प्रसज्येत तच्चानिष्टं परस्य

इतरं पश्यति' इत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां ते एव कर्तृत्वभोक्तृत्वे निवारयति। यत्र त्वस्य 'सर्वमात्मैवाभूत्तत् केन कम्पश्येत्' इति तथा स्वप्नजागरितयोरात्मन उपाधिसम्पर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपततः श्रावयित्वा तदभावं सुषुप्ते प्राज्ञेनात्मना सम्परिष्वक्तस्य श्रावयति 'तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम्' इत्यारभ्य 'एषास्य परमा गतिरेषास्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्दः' इत्युपसंहारात्। तदेतदाहाचार्यः। 'यथा च तक्षोभयथा' इति त्वर्थे चायं चः पठितः। नैवं मन्तव्यं स्वाभाविकमेवात्मनः कर्तृत्वमग्नेरिवौष्ण्यमिति। यथा तु तक्षा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति, स एव स्वगृहं प्राप्तः विमुक्तवास्यादिकरणः स्वस्थो *निर्वृत्तो निर्व्यापारः सुखी भवति, एवमविद्याप्रत्युपस्थापितद्वैतसंयुक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति, स तच्छ्रमापनुत्तये स्वमात्मानं परं प्रविश्य विमुक्तकार्यकरणसङ्घातोऽकर्ता सुखी भवति, सम्प्र-

नित्यमुक्तत्वव्याघातादिति शङ्कते। पर एवेति। न वयं शुद्धस्य चिद्धातोः परस्य बन्धं वदामः किन्तु तस्यैवाविद्याबुद्ध्यादिप्रतिबिम्बितस्याविद्यया भिन्नस्य जीवत्वं प्राप्तस्य बन्धमोक्षाविति ब्रूमः। कल्पितभेदोऽपि लोके बिम्बप्रतिबिम्बयोर्धर्मव्यवस्थापको दृष्ट इति परिहरति। नाविद्येति। अविद्योपस्थिते बन्धो न शुद्धात्मनीत्यत्र श्रुतिमाह। तथा चेति। कर्तृत्वस्य बुद्ध्युपाध्यन्वयव्यतिरेकानुविधायित्वाच्छ्रुतेश्च न स्वाभाविकत्वमित्याह। तथा स्वप्नेति। आत्मैव काम्यते आनन्दत्वादि-

* निवृत्तव्यापार इति वर्ध०।

सादावस्थायां तथा मुक्त्यवस्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयात्मैव केवलो निर्वृतः सुखी भवति। तक्षदृष्टान्तश्चैतावतांशेन द्रष्टव्यः, तक्षा हि विशिष्टेषु तक्षणादिव्यापारेष्वपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्ता भवति स्वशरीरेण त्वकर्तैव, एवमयमात्मा सर्वव्यापारेष्वपेक्ष्यैव मनआदीनि करणानि कर्ता भवति स्वात्मना त्वकर्तैवेति न त्वात्मनस्तक्ष्ण इवावयवाः सन्ति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यस्येद्वा। यत्तूक्तं शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकमात्मनः कर्तृत्वमिति तत्र विधिशास्त्रं तावद्यथा प्राप्तं कर्तृत्वमुपादाय कर्तव्यविशेषमुपदिशति न कर्तृत्वमात्मनः प्रतिपादयति। न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मत्वोपदेशादित्यवोचाम, तस्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते। 'कर्ता विज्ञानात्मा पुरुषः' इत्येवंजातीयकमपि शास्त्रमनुवादरूपत्वाद्यथा प्राप्तमेवाविद्याकृतं कर्तृत्वमनुवदिष्यति। एतेन विहा-

---

त्यात्मकामं स्वरूपं स्वातिरिक्तकाम्यासत्त्वादकामं आत्मकामत्वादकामत्वाच्चाप्तकामं विशोकत्वाच्चेत्याह। शोकेति। शोकान्तरं दुःखास्पृष्टमित्यर्थः। तस्यैव सुषुप्तात्मरूपस्य परमपुरुषार्थमाह। एष इति। गतिः प्राप्यं सम्पदैश्वर्यं लोको भोग्यसुखं चैतस्मादन्यन्नास्तीत्यर्थः। आत्मा स्वतोऽकर्ता बुद्ध्याद्युपाधिना तु कर्तेत्युभयथाभाव उक्तस्तत्रार्थे सूत्रं योजयति। तदेतदाहेत्यादिना। संप्रसादः सुषुप्तिः। यथा स्फटिकस्य लौहित्यं कुसुमाद्युपाधिकं तथात्मनः कर्तृत्वं बुद्ध्याद्युपाधिकं अन्वय-

रोपादाने परिहृते, तयोरप्यनुवादरूपत्वात्। ननु सन्ध्ये स्थाने प्रसुप्तेषु करणेषु स्वे शरीरे यथाकामं परिवर्तत इति विहार उपदिश्यमानः केवलस्यात्मनः कर्तृत्वमावहति, तथोपादानेऽपि 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति करणेषु कर्मकरणविभक्ती श्रूयमाणे केवलस्यैवात्मनः कर्तृत्वङ्गमयत इति। अत्रोच्यते, न तावत् सन्ध्ये स्थानेऽत्यन्तमात्मनः करणविरमणमस्ति 'सधीः स्वप्नो भूत्वा इमं लोकमतिक्रामति' इति, तत्रापि धीसम्बन्धश्रवणात्। तथा च स्मरन्ति,

'इन्द्रियाणामुपरमे मनोऽनुपरतं यदि।
सेवते विषयानेव तद्विद्यात् स्वप्नदर्शनम्'॥ इति।

'कामादयश्च मनसो वृत्तयः' इति श्रुतिः, ताश्च स्वप्ने

व्यतिरेकाभ्यां सिद्धं। न च तौ बुद्धेरात्मकर्तृत्वे करणत्वविषयौ नोपादानत्वविषयाविति युक्तं, करणत्वात् कार्यान्वय्युपादानत्वस्यान्तरङ्गतया चित्सम्वलितबुद्धेस्ताभ्यामुपादानत्वस्यैव सिद्धेः, एवं बुद्ध्यभेदेनाध्यस्तचिदहङ्कारस्य कर्तृत्वोपादानत्वे महावाक्यसम्मतिश्चेति भावः। ननु तक्षा स्वहस्तादिना वास्यादिप्रेरणशक्तत्वात् स्वतः कर्ता आत्मा तु निरवयवत्वादशक्त इति दृष्टान्तवैषम्यमाशङ्क्यौपाधिककर्तृत्वांशेन विवक्षितेन साम्यमाह। तद्वद्दृष्टान्तश्चेति। शास्त्रेणानूद्यमानं कर्तृत्वं स्वाभाविकमेव किं न स्यादित्यत आह। न च स्वाभाविकमिति। उपाध्यभावकाले श्रुतं कर्तृत्वं स्वाभाविकमेवेति शङ्कते। ननु सन्ध्य इति। किञ्च करणैर्विशिष्टस्य कर्तृत्वे तेषां कर्त्रन्तर्भावात्तेष्वपि कर्तृविभक्तिः स्यात् न चैवमस्ति, ततः केवलात्मनः कर्तृत्वमित्याह। तथेति। स्वप्नविहारे तावदुपाध्यभावोऽसिद्ध इत्याह। न तावत् सन्ध्य इति। विहारस्य मिथ्यात्वात् तत्कर्तृत्वमपि मिथ्येत्याह। विहारोऽपीति। जक्षत् भुञ्जान इव। करणविशिष्टस्य कर्तृ-

दृश्यन्ते, तस्मात् समना एव स्वप्ने विहरति, विहारोऽपि च तत्रत्यो वासनामय एव न तु पारमार्थिकोऽस्ति। तथा च श्रुतिरविकारानुबद्धमेव स्वप्नव्यापारं वर्णयति 'उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवाऽपि भयानि पश्यन्' इति। लौकिका अपि तथैव स्वप्नं कथयन्ति आरुक्षमिव गिरिशृङ्गमद्राक्षमिव वनराजिमिति। तथोपादाने यद्यपि करणेषु कर्मकरण-विभक्तिनिर्देशः तथापि तत्संयुक्तस्यैवात्मनः कर्तृत्वं द्रष्टव्यं, केवले कर्तृत्वासम्भवस्य दर्शितत्वात्। भवति च लोकेऽनेकप्रकारा विवक्षा योधा युध्यन्ते योधै राजा युध्यत इति। अपि

त्वे करणेषु कर्तृविभक्तिः स्यात् न करणविभक्तिरित्युक्तं प्रत्याह। भवति च लोक इति। कर्तृष्वपि करणविभक्तिर्न विरुध्यते दृष्टत्वात्, अस्ति च कर्तृप्रयोगः, विज्ञानं यज्ञं तनुत इत्यादाविति भावः। उपादानस्य सकर्तृकत्वमङ्गीकृत्य केवलात्मनः कर्तृत्वं निरस्तं इदानीं तस्याक्रियत्वात् तत्कर्त्रपेक्षेत्याह। अपि चेति। पूर्वं विज्ञानं जीव इत्यङ्गीकृत्य जीवस्य कर्तृत्वे तनुत इति श्रुतिरुक्ता, सम्प्रति तया श्रुत्याऽनुपस्थितात्मनः कर्तृत्वमिति प्राप्तौ विज्ञानं बुद्धिरेव तस्या एवात्र कर्तृत्वमुच्यते। तदुपस्थितात्मनः कर्तृत्वसिद्धयः इत्यभिप्रेत्याह। यस्त्विति। योऽयं विज्ञानमय इत्यादिश्रुतिषु विज्ञानशब्दस्य बुद्धौ प्रसिद्धत्वादत्र च मनोमयकोशानन्तरं पठितत्वात् श्रद्धादिलिङ्गाच्च बुद्धिरेव विज्ञानमित्यर्थः। तत्रैव लिङ्गान्तरमाह। विज्ञानं देवा इति। महद्यक्षं प्रथमजं इत्यादिश्रुतौ हिरण्यगर्भब्रह्मात्मकबुद्धेर्ज्येष्ठत्वोक्तेः अत्र देवैरिन्द्रियैरुपास्यमानं ज्येष्ठं ब्रह्मविज्ञानं बुद्धिरेवेत्यर्थः। यक्षं पूज्यं। किञ्च श्रुत्यन्तरे यज्ञस्य बुद्धिकार्यत्वोक्तेः अत्रापि यज्ञकर्तृ विज्ञानं बुद्धिरित्याह। स एष इति। चित्तेन ध्यात्वा वाचा मन्त्रोक्त्या यज्ञो

चास्मिन्नुपादाने करणव्यापारोपरममात्रं विवक्ष्यते न स्वातन्त्र्यं कस्यचिदबुद्धिपूर्वकस्याऽपि स्वापेक्षकरणव्यापारोपरमस्य दृष्टत्वात्। यस्त्वयं व्यपदेशो दर्शितो 'विज्ञानं यज्ञं तनुते' इति स बुद्धेरेव कर्तृत्वं प्रापयति विज्ञानशब्दस्य तत्र प्रसिद्धत्वान्मनोऽनन्तरपाठाच्च, तस्य श्रद्धैव शिर इति च विज्ञानमयस्यात्मनः श्रद्धाद्यवयवत्वसङ्कीर्तनात् श्रद्धादीनाञ्च बुद्धिधर्मत्वप्रसिद्धेः 'विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते' इति च वाक्यशेषात् ज्येष्ठत्वस्य च प्रथमजत्वस्य बुद्धौ प्रसिद्धत्वात् 'स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञः' इति च श्रुत्यन्तरे

·जायते ततश्चित्तस्य वाचः पूर्वोत्तरभावो यज्ञ इत्यर्थः। यच्चोक्तं बुद्धेः कर्तृत्वे शक्तिवैपरीत्यप्रसङ्ग इति तन्न, विक्लिद्यन्ते तण्डुलाः, ज्वलन्ति काष्ठानि, बिभर्ति स्थालीति स्वस्वव्यापारेषु सर्वकारकाणां कर्तृत्वस्वीकारादित्याह। न चेति। तर्हि बुद्ध्यादीनां कर्तृत्वे करणत्ववार्ता तेषु न स्यादित्यत आह। उपलब्धीति। यथा काष्ठानां स्वव्यापारे कर्तृत्वेऽपि पाकापेक्षया करणत्वं तथा बुद्ध्यादीनां अध्यवसायसङ्कल्पादिक्रियाकर्तृत्वेऽप्युपलब्ध्यपेक्षया करणत्वमित्यर्थः। ननु तर्ह्युपलब्धिः कस्य व्यापार इत्याह। सा चेति। तर्हि तस्यामात्मा केवलः कर्ता स्यात् यस्य यो व्यापारः स तस्य कर्तेति स्थितिरित्यत आह। न चेति। उपलब्धेः नित्यत्वे बुद्ध्यादीनां कथं करणत्वमुक्तमिति चेत्, उच्यते अखण्डसाक्षिचैतन्यं बुद्धिवृत्तिभिर्भिन्नं सद्विषयावच्छिन्नत्वेन जायते, तथा च विषयावच्छिन्नचैतन्यस्योपलब्धौ बुद्ध्यादीनां करणत्वं बुद्ध्याद्युपहितात्मनः कर्तृत्वं न केवलस्य, न च बुद्धेरेव तत्कर्तृत्वं चैतन्यस्य व्यापारत्वायोगादिति भावः। यच्चोक्तं बुद्धेः कर्तृत्वे स एवाहंधीगम्यो जीव इति तस्य करणान्तरं कल्पनीयं तथा च नाममात्रे विवाद इति तत्र केवलात्मनः कर्तृत्वमुक्तमिति भ्रान्तिं निरस्यति। अपरा-

यशास्य शास्त्रबुद्धिसाध्यत्वावधारणात्। न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति सर्वकारकाणामेव स्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वात्। उपलब्ध्यपेक्षन्त्वेषां करणानां करणत्वं, सा चात्मनः। न च तस्यामप्यस्य कर्तृत्वमस्ति नित्योपलब्धिस्वरूपत्वात्। अहङ्कारपूर्वकमपि कर्तृत्वं नोपलब्धिर्भवितुमर्हति अहङ्कारस्याप्युपलभ्यमानत्वात्। न चैवं सति करणान्तरकल्पनाप्रसङ्गः, बुद्धेः करणत्वाभ्युपगमात्। समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः, यथाप्राप्तमेव कर्तृत्वं उपादाय समाधिविधानात्, तस्मात् कर्तृत्वमप्यात्मन उपाधिनिमित्तमेवेति स्थितं॥

परात्तु तच्छ्रुतेः॥ ४१॥

यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्तृत्वं जीवस्याभिहितं तत् किमनपेक्षेश्वरं भवति आहोखित् ईश्वरापेक्ष-

---

रेति। साङ्ख्यनिरासार्थं बुद्ध्यभेदेनाध्यस्तचिदात्मकाहङ्कारगतं कर्तृत्वं यदुक्तं तदहंधीगम्यस्य बुद्धिविशिष्टात्मन एव न केवलस्य साक्षिणो भवितुमर्हति, दृश्यधर्मस्य साक्षिस्वभावत्वायोगात्। एवं विशिष्टात्मनः कर्तृत्वे विशेषणीभूताया जड़बुद्धेरेव कारणत्वोपपत्तेर्न करणान्तरकल्पनाप्रसङ्गः। अध्यासं विना केवलबुद्धिकर्तृत्ववादिनस्तु करणान्तरप्रसङ्गो दुर्वार इत्यर्थः। एवं शास्त्रार्थवत्त्वादिहेतूनामात्मनः कर्तृत्वमात्रसाधकत्वेऽपि स्वाभाविककर्तृत्वसाधनसामर्थ्याभावादध्यस्तमेव कर्तृत्वं विध्यादिकर्तृत्वश्रुतीनामुपजीव्यं। तस्मादसङ्गत्वविध्यादिकर्तृत्वश्रुतीनामविरोध इति सिद्धं॥

परात्तु तच्छ्रुतेः। यथा स्फटिको लौहित्याध्यासे लोहितद्रव्यं कारणं

मिति भवति विचारणा। तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्वे इति। कस्मादपेक्षाप्रयोजनाभावात्। अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारकान्तरसामग्रीसम्पन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति। न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियासु अनडुहादिवदीश्वरोऽपरोऽपेक्षितव्य इति। क्लेशात्मकेन च कर्तृत्वेन जन्तून् संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत। विषमफलश्चैषां कर्तृत्वं विदधतो वैषम्यं। ननु वैषम्यनैर्घृण्येन सापेक्षत्वादित्युक्तं। सत्यमुक्तं सति त्वीश्वरस्य सापेक्षत्वसम्भवे, सापेक्षत्वञ्च नेश्वरस्य सम्भवति सतोर्जन्तूनां धर्माधर्मयोस्तयोश्च सद्भावः सति जीवस्य कर्तृत्वे तदेव चेत् कर्तृत्वं ईश्वरापेक्षं स्यात् किं विषयमीश्वरस्य सापेक्षत्वमुच्येत। अकृता-

---

तेनायं स्फटिको लोहित इत्यनुभवात् तथा कामादिपरिणामिबुद्धिरात्मनि कर्तृत्वाद्यध्यासे कारणमित्युक्तं तदध्यस्तं कर्तृत्वमुपजीव्य जीवस्य कारकसम्पन्नत्वादीश्वरस्य कारयितृत्वश्रुतेश्च संशयमाह। यदिदमिति। अत्रैष ह्येवेत्यादिश्रुतीनां कर्तृत्वस्वातन्त्र्यद्योतकविध्यादिश्रुतिभिर्विरोधसमाधानात् पादसङ्गतिः। कर्ममीमांसकमतेन पूर्वपक्षयति। तत्रेत्यादिना। बुद्ध्यादिकारकसम्पत्तावीश्वरव्यतिरेके कर्तृत्वव्यतिरेकानुपलब्धेर्नेश्वरः प्रयोजकः। किञ्च प्रयोजकत्वे नैर्घृण्यादिप्रसङ्ग इत्याह। क्लेशात्मकेन चेति। दत्तोत्तरमिदं चोद्यमिति शङ्कते। नन्विति। पूर्वं जीवस्य धर्माधर्मवत्त्वं सिद्धवत्कृत्य तत्सापेक्षत्वात् विषमजगत्कर्तृत्वमविरुद्धमित्युक्तं सम्प्रति ईश्वराधीनत्वे जीवस्य कर्तृत्वे सिद्धे धर्माधर्मवत्त्वसिद्धिः तद्वत् तत्सिद्धौ तत्सापेक्षकारयितृत्वसिद्धिः ईश्वरस्य कारयितृत्वे सिद्धे जीवस्य कर्तृत्वसिद्धिरिति चक्रकापत्तेः कर्मसापेक्षत्वं न सम्भवतीत्युच्यत इत्याह। सत्यमिति।

भ्यागमश्चैवं जीवस्य प्रसज्येत। तस्मात् स्वत एव जीवस्य कर्तृत्वमिति। एतां प्राप्तिं तुशब्देन व्यावर्त्य प्रतिजानीते। परादिति। अविद्यावस्थायां कार्यकरणसङ्घाताविवेकदर्शिनो जीवस्याविद्यातिमिरान्धस्य सतः परस्मादात्मनः कर्माध्यचात् सर्वभूताधिवासात् साचिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलचणस्य संसारस्य सिद्धिस्तदनुग्रहहेतुकेनैव च विज्ञानेन मोचसिद्धिर्भवितुमर्हति। कुतस्तच्छ्रुतेः। यद्यपि रागादिदोषप्रयुक्तः सामग्रीसम्पन्नश्च जीवः, यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं, तथापि सर्वास्वेव प्रवृत्तिषु ईश्वरो हेतुकर्तेति श्रुतेरवसीयते। तथा हि श्रुतिर्भवति 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' इति 'य आत्मनि तिष्ठन् आत्मानमन्तरो यमयति' इति चैवंजातीयका। नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्यातां अकृताभ्यागमश्च जीवस्येति, नेत्युच्यते॥

अस्तु कर्मानपेचस्य प्रवर्तकत्वं तत्राह। कृतेति। अनपेचस्य प्रवर्तकत्वे धर्मवतो नरान् दुःखेनाधर्मवतः सुखेन योजयेत्, कारुणिकत्वे वा सर्वे सुखेन एकरूपाः स्युरिति जगद्वैचित्र्यं विध्यादिशास्त्रञ्च न स्यात्। तस्माद्विध्यादिशास्त्रार्थवत्त्वाय रागद्वेषापन्नं स्वत एव जीवस्य कर्तृत्वं वाच्यं, तथा च कारयितृत्वश्रुतिविरोधः। ईश्वरस्तावका वा सा श्रुतिरिति प्राप्ते सिद्धान्तयति। एतामिति। यथा चन्दनादिसामग्र्यां सत्यां धर्मव्यतिरेके सुखव्यतिरेकग्रहाभावेऽपि 'पुण्यो वै पुण्येन कर्मणा भवति' इत्यादिशास्त्रप्रामाण्यादेव धर्मस्य हेतुत्वसिद्धिः, एवमीश्वरस्यापि शास्त्रबलात् कारयितृत्वसिद्धिरिति भावः॥

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥

तुशब्दश्चोदितदोषव्यावर्तनार्थः। कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणः तदपेक्ष एवैनमीश्वरः कारयति, ततश्चैते *चोदिता दोषा न प्रसज्यन्ते। जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्तत्फलानि विषमं विभजते पर्जन्यवदीश्वरो निमित्तत्वमात्रेण। यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां चाऽसाधारणेभ्यः स्वस्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः, न ह्यसति पर्जन्ये रसपुष्पफलपलाशादिवैषम्यं तेषां जायते नाप्यसत्सु स्वस्वबीजेषु, एवं जीवकृतप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं विदध्यादिति श्लिष्यते। ननु कृतप्रयत्नापेक्षत्वमेव जीवस्य परायत्ते कर्तृत्वे नोपपद्यते। नैष दोषः, परायत्तेऽपि हि कर्तृत्वे करोत्येव जीवः, कुर्वन्तं हि तमीश्वरः कारयति। अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरञ्च प्रयत्न-

धर्माधर्माभ्यामेव फलवैषम्यसिद्धेरलमीश्वरेणेत्याशङ्क्य बीजैरेवाङ्कुरवैषम्यसिद्धेः पर्ज्जन्यवैयर्थ्यं स्यात्। यदि विशेषहेतूनां साधारणहेत्वपेक्षत्वान्न वैयर्थ्यं तर्हि ईश्वरस्याऽपि साधारणहेतुत्वान्न वैयर्थ्यमित्याह। पर्जन्यवदिति। दृष्टान्तं विवृणोति। यथेति। अतिदीर्घवल्लीग्रन्थयो गुच्छाः पुष्पस्तवका वा, गुल्मास्तु ऋस्ववल्य इति भेदः। किमीश्वरस्य कारयितृत्वे जीवस्य कर्तृत्वं न स्यात् इत्यापाद्यते उत चक्रकापत्तिर्वा नाद्य इत्याह। नैष दोष इति। अध्यापकाधीनस्य वटोर्मुख्याध्ययनकर्तृत्वदर्शनादिति भावः। चक्रकं निरस्यति। अपि चेति। अनवद्यं जीवस्य कर्तृत्वं ईश्वरस्य कारयितृत्वञ्चेति शेषः।

* चोदिता इति वर्ध० नास्ति।

मपेक्ष्य पूर्वप्रकारवदित्यनादित्वात् संसारस्यानवद्यं। कथं पुनरवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति। विहितप्रतिषिद्धावैयर्थ्यादिभ्य इत्याह। एवं हि स्वर्गकामो यजेत, ब्राह्मणो न हन्तव्य इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति, अन्यथा तदनर्थकं स्यात्, ईश्वर एव विधिप्रतिषेधयोर्नियुज्येत अत्यन्तपरतन्त्रत्वात् जीवस्य। तथा विहितकारिणमप्यनर्थेन संसृजेत् प्रतिषिद्धकारिणमप्यर्थेन, ततश्च प्रामाण्यं वेदस्यास्तमियात्। ईश्वरस्य चात्यन्तानपेक्षत्वे लौकिकस्याऽपि पुरुषकारस्य वैयर्थ्यं, तथा देशकालनिमित्तानां पूर्वोक्तदोषप्रसङ्गश्चेत्येवंजातीयकं दोषजातमादिग्रहणेन दर्शयति॥

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके॥ ४३॥

जीवेश्वरयोरुपकार्योपकारकभाव उक्तः, स च सम्बन्ध-

ईश्वरस्य सापेक्षत्वे विध्यादिशास्त्रप्रमाण्यान्यथानुपपत्तिं प्रमाणयति। कथमित्यादिना। एवं सापेक्षत्वे सत्यवैयर्थ्यं भवति अन्यथानपेक्षत्वे वैयर्थ्यं प्रपञ्चयति। ईश्वर इति। तयोः स्थाने स एव नियुज्येत इत्यभिषिच्येत तयोः कार्यं स एव कुर्यादिति यावत्। तथा च जीवस्य निरपेक्षेश्वरपरतन्त्रत्वाद्विध्यादिशास्त्रमकिंचित्करमनर्थकं स्यात् इति सम्बन्धः। आदिशब्दार्थमाह। तथेति। पुरुषकारः प्रयत्नः। पूर्वोक्तदोषोऽकृताभ्यागमादिः, तस्मात् कर्मसापेक्षेश्वरस्य कारयितृत्वादेष ह्येवेत्यादिश्रुतेर्विध्यादिश्रुत्यविरोध इति सिद्धं॥

अंशः 'एको नित्यः स्वप्रकाशो नाणुरकर्ता जीव' इति शोधिततत्त्वं-

योरेव लोके दृष्टः, यथा स्वामिभृत्ययोर्यथावाऽग्निस्फुलिङ्गयोः। ततश्च जीवेश्वरयोरप्युपकार्योपकारकभावाभ्युपगमात् किं स्वामिभृत्यवत् सम्बन्धः आहोस्वित् विस्फुलिङ्गवदित्यस्यां विचिकित्सायामनियमो वा प्राप्नोति, अथवा स्वामिभृत्यप्रकारेष्वेवेशित्रीशितव्यभावस्य प्रसिद्धत्वात् तद्विध एव सम्बन्ध इति प्राप्नोति। अतो ब्रवीति अंश इति। जीव ईश्वरस्यांशो भवितुमर्हति यथाऽग्नेर्विस्फुलिङ्गः। अंश इवांशः, न हि निरवयवस्य मुख्योऽंशः सम्भवति। कस्मात् पुनर्निरवयवत्वात् स एव न भवति नानाव्यपदेशात्। 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' एतमेव विदित्वा मुनिर्भवति 'य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति' इति चैवंजातीयको भेदनिर्देशो नासति भेदे युज्यते। ननु चायं नानाव्यपदेशः सुतरां स्वामिभृत्यसारूप्ये युज्यत इति, अत आह, अन्यथा चापीति। न च नानाव्यपदेशादेव केवलादंशत्वप्रतिपत्तिः किं तर्ह्यन्यथा चापि व्यपदेशो भवत्यनानात्वस्य प्रतिपादकः। तथा

पदार्थस्यात्र ब्रह्मैक्यसाधनेन भेदाभेदश्रुतीनां विरोधसमाधानात् पादसङ्गतिः। पूर्वपक्षे प्रत्यगभिन्नब्रह्मासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः। पूर्वोक्तोपकार्योपकारकभावाक्षिप्तं जीवांशयोः सम्बन्धं विषयीकृत्य द्विविधदृष्टान्तदर्शनात् संशयमाह। ततश्चेति। प्रसिद्धस्वस्वामित्वसम्बन्धसम्भवाद्यः कश्चित् सम्बन्ध इत्यनियमो न युक्त इत्यरुचेराह। अथ वेति। अनेन य आत्मनि तिष्ठन्नित्यादिश्रुतिप्रसिद्धभेदकोटिर्दर्शिता। एवं तत्त्वमसीत्यादिश्रुतिसिद्धा अभेदकोटिर्द्रष्टव्या, तथा च भेदाभेदश्रुतीनां समबलत्वाद्विरोधे सति सम्बन्धानिश्चयात् सम्बन्धा-

हि एके शाखिनो दाशकितवादिभावं ब्रह्मण आमनन्ति 'आथर्वणिका ब्रह्मसूक्ते ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत' इत्यादिना। दाशा य एते कैवर्ता प्रसिद्धाः ये चामी दासाः स्वामिन्यात्मानमुपक्षिपन्ति ये चान्ये कितवा द्यूतकृत्तास्ते सर्वे ब्रह्मैवेति हीनजन्तूदाहरणेन सर्वेषामेव नामरूपकृतकार्यकरणसङ्घातप्रविष्टानां जीवानां ब्रह्मत्वमाह। तथा अन्यत्रापि ब्रह्मप्रक्रियायामेव अयमर्थः प्रपञ्च्यते 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः' इति, "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते" इति च। 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतिभ्यश्चास्यार्थस्य सिद्धिः। चैतन्यञ्चाविशिष्टं जीवेश्वरयोर्यथाऽग्निविस्फुलिङ्गयोरौष्ण्यं। अतो भेदाभेदावगमाभ्यामंशत्वावगमः। कुतश्चांशत्वावगमः॥

पेक्षस्य पूर्वोक्तोपकार्योपकारकभावस्यासिद्धिरित्याक्षेपात् सङ्गतिः। लोकसिद्धानर्थात्मकभेदानुवादित्वेन भेदश्रुतीनां दुर्बलत्वादज्ञातफलवदभेदश्रुत्यनुसारेण प्रकल्पितभेदनिबन्धनोऽंशांशिभावः सम्बन्ध इति सिद्धान्तयति। अत इत्यादिना। अग्नेः सांशत्वेऽपि निष्कलेश्वरस्य कथं सांशत्वमत आह। अंश इवेति। जीव इत्यनुषङ्गः। भेद एव चेत् स्वस्वामिभावो युक्तो नांशांशिभाव इति शङ्कते। ननु चेति। अभेदस्याऽपि सत्त्वादंशांशिभाव इत्याह। अत इति। वञ्चसि गच्छसि, यदास्ते यो नामरूपे निर्माय प्रविश्य व्यवहरन् वर्तते तं विद्वानमृतो भवतीति श्रुत्यर्थः। श्रुतिसिद्धाभेदे युक्तिमाह। चैतन्यञ्चेति। जीवो ब्रह्मैव चेतनत्वाद्ब्रह्मवदित्यर्थः॥

मन्त्रवर्णाच्च ॥ ४४ ॥

मन्त्रवर्णश्चैतमर्थमवगमयति 'तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इति। अत्र भूतशब्देन जीवप्रधानानि स्थावरजङ्गमानि निर्दिशति 'अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः' इति प्रयोगात्। अंशः पादो भाग इत्यनर्थान्तरं, तस्मादप्यंशत्वागमः। कुतश्चांशत्वावगमः॥

अपि च स्मर्यते ॥ ४५ ॥

ईश्वरगीतास्वपि चेश्वरांशत्वं जीवस्य स्मर्यते 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति। तस्मादप्यंशत्वावगमः। यत्तूक्तं स्वामिभृत्यादिष्वेवेशित्रीशितव्यभावो लोके प्रसिद्ध इति। यद्यप्येषा लोके प्रसिद्धिस्तथापि शास्त्रात्त्वंशांशित्वमीशित्रीशि-

---

अस्य सहस्रशीर्षपुरुषस्य तावान् प्रपञ्चो महिमा विभूतिः पुरुषस्तस्मात् प्रपञ्चो ज्यायान्महत्तरः। भूतानि देहिनो जीवा इत्यत्र नियामकमाह। अहिंसन्निति। तीर्थानि शास्त्रोक्तकर्माणि, तेभ्योऽन्यत्र सर्वप्राणिहिंसामकुर्वन् ब्रह्मलोकमाप्नोतीत्यर्थः। अत्र भूतशब्दस्य प्राणिषु प्रयोगात् सूत्रोक्तमन्त्रेऽपि तथेति भावः। भूतानां पादत्वेऽपि अंशत्वं कुतस्तत्राह। अंशः पाद इति॥

जीवस्य पुरुषसूक्तमन्त्रोक्तभगवदंशत्वे भगवद्गीतामुदाहरति सूत्रकारः। अपि चेति। अत्यन्तभिन्ने ईशित्रीशितव्यभावप्रसिद्धेः ईशितव्यजीवस्य कथमीश्वरांशत्वमित्याशङ्क्य कल्पितभेदेनापीशितव्यत्वोपपत्तेः अनन्यथासिद्धाभेदशास्त्रबलादंशत्वमित्याह। यत्त्वित्यादिना। औपाधिके ईश्वरस्य नियन्तृत्वे जीव एव तन्नियन्ता किं न स्यादि-

तद्भावस्य निरस्यते। निरतिशयोपाधिसम्पन्नश्चेश्वरो निहीनोपाधिसम्पन्नान् जीवान् प्रशास्तीति न किञ्चिद्विप्रतिषिध्यते। अत्राह ननु जीवेश्वरांशत्वाभ्युपगमे तदीयेन संसारदुःखोपभोगेनांशिन ईश्वरस्याऽपि दुःखित्वं स्यात्, यथा लोके हस्तपादाद्यन्यतमङ्गतेन दुःखेनाङ्गिनो देवदत्तस्य दुःखित्वं तद्वत्। ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात्, अतोऽवरं पूर्वावस्थः संसार एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसङ्गः स्यादिति। अत्रोच्यते॥

प्रकाशादिवन्नैवं परः॥४६॥

यथा जीवः संसारदुःखमनुभवति नैवं पर ईश्वरोऽनुभवति इति प्रतिजानीमहे। जीवो ह्यविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःख्यहमिति अविद्याकृतं दुःखोपभोगमभिमन्यते नैवं परमेश्वरस्य देहाद्यात्मभावो

व्यत आह। निरतिशयेति। नितरां हीनः शरीराद्युपाधिः, अज्ञानिकोपाधितारतम्यादीशेशितव्यव्यवस्था, न वस्तुतः। तदुक्तं सुरेश्वराचार्यैः "ईशेशितव्यसम्बन्धः प्रत्यगज्ञानहेतुजः। सम्यग्ज्ञाने तमोध्वस्तावीश्वराणामपीश्वरः" इति। उत्तरसूत्रमवतारयति। अत्राहेति। ईश्वरः स्वांशदुःखैर्दुःखी अंशित्वात् देवदत्तवदित्यर्थः। ततः किं तत्राह। ततश्चेति। ज्ञानात् सर्वांशदुःखसमष्टिप्राप्त्यपेक्षया संसारोऽवरं तत्र स्वदुःखमात्रानुभवादित्यर्थः॥

नैवं पर इति प्रतिज्ञां विभजते। यथा जीव इति। देवदत्तदृष्टान्ते भ्रान्तिकामकर्मरूपदुःखसामग्रीमत्त्वमुपाधिः तदभावान्नेश्वरस्य दुःखित्वप्राप्तिः। उक्तञ्चैतदभेदेऽपि बिम्बप्रतिबिम्बयोर्धर्मव्यवस्थेति भावः। दुःखस्य

दुःखाभिमानो वास्ति। जीवस्याऽपि अविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानो न तु पारमार्थिकोऽस्ति। यथा च स्वदेहगतं दाहच्छेदादिनिमित्तं दुःखं तदभिमानभ्रान्त्यानुभवति तथा पुत्त्रमित्रादिगोचरमपि दुःखं तदभिमानभ्रान्त्यैवानुभवत्यहमेव पुत्त्रोऽहमेव मित्रमित्येवं स्नेहवशेन पुत्त्रमित्रादिष्वभिनिविशमानः। ततश्च निश्चितमेतदवगम्यते मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति। व्यतिरेकदर्शनाच्चैवमवगम्यते। तथा हि पुत्त्रमित्रादिमत्सु बहुषूपविष्टेषु तत्सम्बन्धाभिमानिष्वितरेषु च पुत्त्रो मृतो मित्रं मृतमित्येवमाद्युद्घोषिते येषामेव पुत्त्रमित्रादिमत्त्वाभिमानस्तेषामेव तन्निमित्तं दुःखमुत्पद्यते नाभिमानहीनानां परिव्राजकानां। अतश्च लौकिकस्याऽपि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं किमुत विषयशून्यादात्मनोऽन्यद्वस्त्वन्तरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति। तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसङ्गः। प्रकाशादिवदिति निदर्शनोपन्यासः। यथा प्रकाशः सौर्यश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसम्बन्धात् तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तत्तद्भा-

---

भ्रान्तिकृतत्वं प्रपञ्चयति। जीवस्यापीत्यादिना। भ्रान्तौ सत्यां दुःखमित्यन्वयमुक्त्वा भ्रान्त्यभावे दुःखाभावः। दर्शनाच्च भ्रान्तिकृतं दुःखमिति निश्चीयत इत्याह। व्यतिरेकेति। इतरेष्वभिमानशून्येष्वित्यर्थः। जीवस्याऽपि सम्यग्ज्ञाने दुःखाभावो दृष्टः किमु वाच्यं नित्यसर्वज्ञेश्वरस्येत्याह। अतश्चेति। एवमंशित्वे हेतोः सोपाधित्वमुक्त्वा योऽंशो स

वमिव प्रतिपद्यमानोऽपि न परमार्थतस्तद्भावं प्रतिपद्यते, यथा चाकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि न परमार्थतो गच्छति, यथा चोदशरावादिकम्पनात् तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान् सूर्यः कम्पते, एवमविद्याप्रत्युपस्थापिते बुद्ध्याद्युपाध्युपहिते जीवाख्येऽंशे दुःखायमानेऽपि न तद्वानीश्वरो दुःखायते। जीवस्याऽपि दुःखप्राप्तिरविद्यानिमित्तैवेत्युक्तं। तथाचाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयन्ति वेदान्ताः 'तत्त्वमसि' इत्येवमादयः, तस्मान्नास्ति जैवेन दुःखेन परमात्मनो दुःखित्वप्रसङ्गः॥

स्मरन्ति च॥ ४७॥

स्मरन्ति च व्यासादयः यथा जैवेन दुःखेन न परमात्मा दुःखायते इति।

"तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः।
न लिप्यते फलैश्चाऽपि पद्मपत्रमिवाम्भसा॥
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते।
स सप्तदशकेनापि राशिना युज्यते पुनः"॥ इति।

वस्तुतः स्वांशधर्मवानिति व्याप्तिस्थलत्रये व्यभिचारयति। प्रकाशादिवदिति। वस्तुतः स्वांशदुःखित्वसाध्यस्य देवदत्तदृष्टान्ते वैकल्यमप्याह। जीवस्येति। कल्पितदुःखित्वसाध्यन्तु भ्रान्त्याद्यभावादीश्वरे नास्तीत्युक्तं, किञ्च जीवस्येश्वरस्य वा वस्तुतो दुःखित्वानुमानं न युक्तं आगमबाधादित्याह। तथा चेति। दुःखित्वे तद्भावोपदेशो न स्यादित्यर्थः॥

स्मृत्याप्यनुमानं बाध्यमित्याह। स्मरन्ति चेति। सूत्रं व्याचष्टे। स्मरन्तीति। तत्र जीवपरयोर्मध्ये कर्मात्मा कर्माश्रयो जीवः। दशेन्द्रियाणि

च शब्दात् समामनन्ति चेति वाक्यशेषः। 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशि' इति 'एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' इति च। अत्राह यदि तर्हि एक एव सर्वेषां भूतानामन्तरात्मा स्यात् कथमनुज्ञापरिहारौ स्यातां लौकिकौ वैदिकौ वेति। ननु चांशो जीव ईश्वरस्येत्युक्तं तद्भेदाच्चानुज्ञापरिहारौ तदाश्रयावव्यतिकीर्णावुपपद्येते किमत्र चोद्यत इति। उच्यते नैतदेवं, अनंशत्वमपि हि जीवस्याभेदवादिन्यः श्रुतयः प्रतिपादयन्ति 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'नान्योऽतोऽस्ति द्रष्टा' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्येवंजातीयिकाः। ननु भेदाभेदावगमाभ्यामंशत्वं सिध्यतीत्युक्तं। स्यादेतदेवं यद्युभावपि भेदाभेदौ प्रतिपिपादयिषितौ स्यातां, अभेद एव त्वत्र प्रतिपिपादयिषितः, ब्रह्मात्मत्वप्रतिपत्तौ पुरुषार्थसिद्धेः। स्वभावप्राप्तस्तु भेदोऽनूद्यते। न च निरवयवस्य ब्रह्मणो मुख्योऽंशो जीवः सम्भवतीत्युक्तं,

---

पञ्च प्राणाः मनो बुद्धिश्चेति सप्तदशसङ्ख्याको राशिर्लिङ्गं। सूत्रे चशब्दः श्रुतिसमुच्चयार्थ इत्याह। चशब्दादिति। यथाऽऽदित्यः प्रकाश्यदोषैर्न लिप्यते तथेत्यर्थः। यतो बाह्योऽसङ्गः तस्मात् न लिप्यते, एवमंशित्वकृतमीश्वरे दोषं निरस्यांश इत्युक्तं जीवस्यांशत्वं देहाद्युपाधिकमिति स्फुटयितुमत्यन्तस्वरूपैक्यमादायाक्षिपति। अत्राहेत्यादिना। कथं तर्हि इत्यन्वयः। तद्भेदादंशभेदात्। निरवयवब्रह्मणो मुख्यांशेन सम्भवतीति वदता सिद्धान्तिना भेदो नास्तीत्युक्तं भवति, भेदाभावे चांशांशित्वाभावादनुज्ञादिभेदाव्यवहारानुपपत्तिरित्याक्षेपाभिप्रायः। न वयं भेदस्यासत्त्वं नरशृङ्गवत् ब्रूमः, किन्तु मिथ्यात्वं वदामः। तथा च

तस्मात् पर एव एकः सर्वेषां भूतानामन्तरात्मा जीवभावेनावस्थित इत्यतो वक्तव्यानुज्ञापरिहारोपपत्तिः, तां ब्रूमः॥

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्॥४८॥

ऋतौ भार्यामुपेयादित्यनुज्ञा, गुर्वङ्गनां नोपगच्छेदिति परिहारः, तथाऽग्नीषोमीयं पशुं सञ्ज्ञपयेदित्यनुज्ञा, मा हिंस्यात् सर्वा भूतानीति परिहारः। एवं लोकेऽपि मित्रमुपसेवितव्यमित्यनुज्ञा, शत्रुः परिहर्तव्य इति परिहारः, एवम्प्रकारावनुज्ञापरिहारावेकत्वेऽप्यात्मनो देहसम्बन्धात् स्यातां। देहैः सम्बन्धो देहसम्बन्धः। कः पुनर्देहे सम्बन्धः। देहादिरयं सङ्घातोऽहमेवेत्यात्मनि विपरीतप्रत्ययोत्पत्तिः। दृष्टा च सा सर्वप्राणिनां अहं गच्छाम्यहमागच्छामि अहमन्धोऽहमनन्धोऽहं मूढोऽहममूढ इत्येवमात्मिका। न ह्यस्याः सम्यग्दर्शनादन्यन्निवारकमस्ति। प्राक् तु सम्यग्दर्शनात् प्रततैषा भ्रान्तिः *सर्वजन्तूनां। तदेवमविद्यानिमित्तदेहाद्युपाधिसम्बन्धकृताद्विशेषादैकात्म्याभ्युपगमेऽपि अनुज्ञापरिहाराववकल्प्येते, सम्यग्दर्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यं प्राप्तं न तस्य कृतार्थत्वान्नियोज्यत्वानुपपत्तेः।

देहाद्युपाधिभेदेनांशजीवानामाब्रह्मबोधात् कल्पितभेदाद्विधिव्यवहारोपपत्तिरिति सूत्रेण समाधत्ते। तामित्यादिना॥

ननु भ्रान्तिः कुतश्चित्तद्वृत्तौ व्यवहारविच्छेदः स्यादित्यत आह। न ह्यस्या इत्यादिना। प्रतता सन्तता, विशेषो भेदः, अनियोज्यत्वाद्ब्रह्मविदः। शास्त्रानर्थक्यमिष्टमित्याह। न तस्येति। नियोगविषय-

* सर्वजन्तुष्विति सर्व० का०।

हेयोपादेययोर्हि नियोज्यो नियोक्तव्यः स्यात्, आत्मनस्त्वतिरिक्तं हेयमुपादेयं वा वस्त्वपश्यन् कथं नियुज्येत, न चात्माऽऽत्मन्येव नियोज्यः स्यात्। शरीरव्यतिरेकदर्शिन एव नियोज्यत्वमिति चेन्न तत्संहतत्वाभिमानात्। सत्यं व्यतिरेकदर्शिनो नियोज्यत्वं तथापि व्योमादिवद्देहाद्यसंहतत्वमपश्यत एवात्मनो नियोज्यत्वाभिमानः। न हि देहाद्यसंहतत्वदर्शिनः *कस्यचिदपि नियोगो दृष्टः किमुतैकात्म्यदर्शिनः। न च नियोगाभावात् सम्यग्दर्शिनो यथेष्टचेष्टाप्रसङ्गः, सर्वत्राभिमानस्यैव प्रवर्तकत्वात्, अभिमानाभावाच्च सम्यग्दर्शिनः, तस्माद्देहसम्बन्धादेवानुज्ञापरिहारौ ज्योतिरादिवत्। यथा ज्योतिष एकत्वेऽपि अग्निः क्रव्यात् परिह्रियते नेतरः, यथा च प्रकाश एकस्यापि सवितुरमेध्यप्रदेशसम्बन्धः परिह्रियते नेतरः शुचिभूमिष्ठः, तथा भौमाः प्रदेशा वज्र-

द्वैताभावादात्मन्यसाध्ये नियोगानुपपत्तेर्न ब्रह्मविन्नियोज्य इत्यर्थः। नन्वामुष्मिकफलहेतुके कर्मणि देहभिन्नात्मविवेकिन एवाधिकारी वाच्यः, तथा च ब्रह्मविन्नियोज्यः विवेकित्वात् कर्माधिकारिवदिति शङ्कते। शरीरव्यतिरेकेति। परोक्षविवेकस्यापरोक्षभ्रमाविरोधित्वात् कर्मिणो देहाभेदभ्रमोऽस्ति, तथा च भ्रम उपाधिरिति परिहरति। नेत्यादिना। यथा व्योम देहाद्भिन्नं तद्वदहमित्यपश्यतः भ्रान्तस्येत्यर्थः। ब्रह्मविन्नियोज्यः अभ्रान्तत्वात् सुषुप्तवदित्याह। न हीति। देहादिष्वसंहतत्वदर्शिनः संहतत्वदर्शनशून्यस्य भेदभ्रान्तिरहितस्य सुषुप्तस्येति यावत्। अज्ञस्याऽपि भ्रान्त्यभावकाले नियोज्यत्वं न दृष्टं किमु वाच्यमात्मविद इत्यर्थः। अनियोज्यत्वे बाधकमाशङ्क्य परिहरति। न चेति। विषयवैराग्यस्य ज्ञानार्थमभ्यस्तस्य ज्ञानान्तरमनुवृत्त्या विषयेषु प्रवर्तकरागनिवृत्तेर्नातिप्रसङ्ग इत्यर्थः। यदुक्तं भगवता 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति। एवमनुज्ञादिप्रसङ्गेनानियोज्यत्वं विदुष उक्त्वा प्रकृत-

* कस्यचिदपीति वर्ध०।

वैदूर्यादयः उपादीयन्ते, भौमा अपि सन्तो नरकलेवरादयः परिह्रियन्ते, तथा मूत्रपुरीषं गवां पवित्रतया परिगृह्यते, तदेव जात्यन्तरे परिवर्ज्यते तद्वत्॥

असन्ततेश्चाव्यतिकरः॥ ४९॥

स्यातां नामानुज्ञापरिहारावेकस्याप्यात्मनो देहविशेषयोगात्। यस्त्वयं कर्मफलसम्बन्धः स चैकात्म्याभ्युपगमे व्यतिकीर्येत स्वाम्येकत्वादिति चेत्, नैतदेवं, असन्ततेः। न हि कर्तुर्भोक्तुश्चात्मनः सन्ततिः सर्वैः शरीरैः सम्बन्धोऽस्ति। उपाधितन्त्रो हि जीव इत्युक्तं, उपाध्यसन्तानाच्च नास्ति जीवसन्तानः, ततश्च कर्मव्यतिकरः फलव्यतिकरो वा न भविष्यति॥

आभास एव च॥ ५०॥

आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः, न स एव साक्षान्नापि वस्त्वन्तरं। अतश्च यथा

मुपसंहरति। तस्मादिति। एकस्याप्युपाधिभेदात् अनुज्ञापरिहारयो दृष्टान्तमाह। ज्योतिरिति। क्रव्यं मांसमत्तीति क्रव्यादशुचिः श्मशानाग्निरित्यर्थः॥

शङ्कोत्तरत्वेन सूत्रं व्याचष्टे। स्यातामित्यादिना। यद्यपि स्थूलदेहसम्बन्धादुपादानपरित्यागौ स्यातां तथाप्यन्यकृतकर्मफलमितरेणापि भुज्येतेति कर्मफलव्यतिकरः साङ्कर्यं स्यादिह विशिष्टस्य स्वर्गादिभोगायोगेनाविशिष्टात्मन एकस्यैव भोक्तृत्वात्। तस्मात् स्वर्गी नरकी चेति व्यवस्थासिद्धये आत्मस्वरूपभेदो वाच्य इति शङ्कार्थः। भवेत्तदा साङ्कर्यं यद्यनुपहितात्मन एव भोक्तृत्वं स्यान्न त्वेतदस्ति। तद्गुणसारत्वादित्यत्र मोक्षस्यापि, बुद्ध्युपहितस्यैव कर्तृत्वादिस्थापनात्, तथा च बुद्धेः परदेहासम्बन्धात् तदुपहितजीवस्य नास्ति परदेहसम्बन्ध इति बुद्धिभेदेन भोक्तृभेदान्न कर्मादिसाङ्कर्यमिति समाधानार्थः॥

नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते, एवं नैकस्मिन् जीवे कर्मफलसम्बन्धिनि जीवान्तरस्य तत्सम्बन्धः, एवमव्यतिकर एव कर्मफलयोः आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति तद्व्युदासेन च पारमार्थिकस्य *ब्रह्मात्मभावस्योपदेशोपपत्तिः। येषान्तु बहव आत्मानस्ते च सर्वे सर्वगतास्तेषामेवैष व्यतिकरः प्राप्नोति। कथं बहवो विभवश्चात्मानश्चैतन्यमात्रस्वरूपा निर्गुणा निरतिशयाश्च तदर्थं साधारणं प्रधानं तन्निमित्तैषां भोगापवर्गसिद्धिरिति साङ्ख्याः। सति बहुत्वे विभुत्वे च घटकुड्यादिसमानाः द्रव्यमात्र-

अंशेत्याद्यसूत्रे जीवस्यांशत्वं घटाकाशस्येवोपाध्यवच्छेदबुद्ध्योक्तं सम्प्रति एवकारेणावच्छेदपक्षारुचिं सूचयन् रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुतिसिद्धं प्रतिबिम्बपक्षमुपन्यस्यति भगवान् सूत्रकारः। आभास एव चेति। स परमात्मैवानुपहितो जीवो न भवति उपाध्यनुभवात् नापि ततो भिन्नः, स एष इह प्रविष्ट इत्याद्यभेदश्रुतिस्मृतिविरोधात्, तस्मादविद्यातत्कार्यबुद्ध्यादिप्रतिबिम्ब एव जीव इत्यर्थः। अस्मिन् पक्षे बुद्धिप्रतिबिम्बभेदात् स्वर्गी नरकीत्यादिव्यवस्था जीवस्याविद्यकत्वाद्विद्यया मोक्षश्चेत्युपपद्यत इत्याह। अतश्चेत्यादिना। यत्त्वयं भास्करस्य प्रलापः प्रतिबिम्बस्य नोपाधिसंसृष्टतया कल्पितत्वं किन्तु स्वरूपेणैव, अतः कल्पितप्रतिबिम्बस्य मुक्तौ स्थित्ययोगात् न जीवत्वं इति स सिद्धान्तरहस्याज्ञानकृत इत्युपेक्षणीयः। यदि दर्पणे मुखं शुक्तौ रजतवत् कल्पितं स्यात् तदा नेदं रजतमिति स्वरूपबाधवन्नेदं मुखमिति बाध्यं स्यात्, अतो नास्ति दर्पणे मुखमिति संसर्गमात्रबाधान्मदीयं मुखमेवेदमित्यबाधितमुखाभेदानुभवात् संसृष्टत्वेनैव कल्पितत्वं प्रवेशवाक्यैश्चाविकृतब्रह्मण एव प्रतिबिम्बभावाख्यप्रवेशोक्तेर्न स्वरूपकल्पना, पराक्रान्तं चात्र दर्पणटीकायामाचार्यैरित्यु-

* ब्रह्मभावस्येति वर्ध०।

स्वरूपाः स्वतोऽचेतना आत्मानस्तदुपकरणानि चाणूनि मनांसि अचेतनानि तत्रात्मद्रव्याणां मनोद्रव्याणां च संयोगान्न वेच्छादयो वैशेषिका आत्मगुणा उत्पद्यन्ते, ते चाव्यतिकरेण प्रत्येकमात्मसु समवयन्ति, स संसारस्तेषां नवानामात्मगुणानामत्यन्तानुत्पादो मोक्ष इति काणादाः। तत्र साङ्ख्यानां तावच्चैतन्यस्वरूपत्वात् सर्वात्मनां सन्निधानाद्यविशेषाच्च एकस्य सुखदुःखसम्बन्धे सर्वेषां सुखदुःखसम्बन्धः प्राप्नोति। स्यादेतत् प्रधानप्रवृत्तेः पुरुषकैवल्यार्थत्वात् व्यवस्था भविष्यति। अन्यथा हि स्वविभूतिख्यापनार्था प्रधानप्रवृत्तिः स्यात्, तथा चानिर्मोक्षः प्रसज्येतेति। नैतत्सारं। न ह्यभिलषितसिद्धिनिबन्धना व्यवस्था शक्या विज्ञातुं, उपपत्त्या तु कयाचित् व्यवस्थोच्येतासत्यां पुनरुपपत्तौ कामं माभूदभिलषितं पुरुषकैवल्यं, प्राप्नोति तु व्यवस्थाहेत्वभावाद्व्यतिकरः, काणादाना-

---

परस्यते। एवं स्वमते स्वरूपैक्येऽप्युपहितजीवभेदादसाङ्कर्यमुक्तं, सम्प्रति सूत्रे चकारसूचितं परेषां साङ्कर्यं वक्तुमुपक्रमते। येषामित्यादिना। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना नवात्मविशेषगुणाः, सन्निधानादित्यादिपदादौदासीन्यमुक्तं। साङ्ख्यः स्वाभिप्रायं शङ्कते। स्यादेतदिति। सर्वेषां पुंसां प्रकृतिसान्निध्याद्यविशेषेऽपि प्रकृतिरेव प्रतिपुरुषं नियमेन भोगापवर्गार्थं प्रवर्त्तते, तथा चोद्देश्यपुरुषार्थनियता प्रधानप्रवृत्तिरिति भोगादिव्यवस्था, अन्यथा नियमप्रवृत्त्यनङ्गीकारे स्वमाहात्म्यख्यापनार्था प्रधानस्य प्रवृत्तिरित्युद्देश्यविघातः स्यादित्यर्थः। जडप्रधानस्योद्देश्यविवेकाभावात् पुरुषार्थस्याप्यनागतस्याचेतनस्यानियामकत्वान्न व्यवस्था मानयुक्तिशून्यत्वादित्याह। नैतदिति। यो हि नियामकाभावेनोद्देश्यविघातमापादयति तं प्रति तस्यैवापादनमिष्टमिति भावः। तार्किकमतेऽपि भोगादिसाङ्कर्यमित्याह। काणादाना-

मपि यदैकेनात्मना मनः संयुज्यते तदात्मान्तरैरपि नान्तरीयकः संयोगः स्यात् सन्निधानाद्यविशेषात्, ततश्च हेत्वविशेषात् फलाविशेष इत्येकस्यात्मनः सुखदुःखसंयोगे सर्वात्मनामेव समानसुखदुःखत्वं प्रसज्येत। स्यादेतत् *अदृष्टनिमित्तो नियमो भविष्यतीति, नेत्याह॥

अदृष्टानियमात्॥ ५१॥

बहुष्वात्मसु †आकाशवत् सर्वगतेषु प्रतिशरीरं बाह्याभ्यान्तराविशेषेण सन्निहितेषु मनोवाक्कायैर्धर्माधर्मलक्षणं अदृष्टमुपार्ज्यते। साङ्ख्यानां तावत्तदनात्मसमवायिप्रधानवर्तिप्रधानसाधारण्यान्न प्रत्यात्मं सुखदुःखोपभोगस्य नियामकमुपपद्यते। काणादानामपि पूर्ववत् साधारणेन आत्ममनःसंयोगेन निर्वर्त्तितस्याऽदृष्टस्यापि, अस्यैवात्मनः इदमदृष्टमिति नियमे हेत्वभावादेष एव दोषः। स्यादेतत् अहमिदं फलं प्राप्नवानीदं परिहराणि इत्थं प्रयते इत्थं करवाणीत्येवंविधा अभिसन्ध्यादयः प्रत्यात्मं प्रवर्तमाना अदृष्टस्यात्मनां च स्वस्वामिभावं नियंस्यन्तीति, नेत्याह॥

मिति। हेतुर्मनःसंयोगः, फलं सुखादि, यदात्मादृष्टकृतो यो मनःसंयोगः स तदात्मन एव सुखादिहेतुरिति व्यवस्थां शङ्कते। स्यादेतदिति। सूत्रेण परिहरति। नेत्याहेति॥

पूर्ववत् मनःसंयोगवत्, अदृष्टस्याऽपि सर्वात्मसाधारण्यात्वात् न व्यवस्थेत्यर्थः। रागादिनियमात् तज्जादृष्टनियम इत्याशङ्क्योत्तरत्वेन सूत्रं गृह्णाति। स्यादेतदित्यादिना॥

---

* अदृष्टनियत इति वर्ध०। † आकाशवदिति वर्ध० नास्ति।

अभिसन्ध्यादिष्वपि चैवं ॥ ५२ ॥

अभिसन्ध्यादीनामपि साधारणेनैवात्ममनःसंयोगेन सर्वात्मसन्निधौ क्रियमाणानां नियमहेतुत्वानुपपत्तेरुक्तदोषानुषङ्ग एव॥

प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥

अथोच्येत विभुत्वेऽप्यात्मनः शरीरप्रतिष्ठेन मनसा संयोगः शरीरावच्छिन्ने एवात्मप्रदेशे भविष्यति, अतः प्रदेशकृता व्यवस्थाऽभिसन्ध्यादीनामदृष्टस्य सुखदुःखयोश्च भविष्यतीति। तदपि नोपपद्यते, कस्मात् अन्तर्भावात्। विभुत्वाविशेषाद्धि सर्व एवात्मानः सर्वशरीरेष्वन्तर्भवन्ति। तत्र न वैशेषिकैः शरीरावच्छिन्नोऽप्यात्मनः प्रदेशः कल्पयितुं शक्यः। कल्प्यमानोऽप्ययं निष्प्रदेशस्यात्मनः प्रदेशः काल्पनिकत्वादेव न पारमार्थिकं कार्यं नियन्तुं शक्नोति। शरीरमपि सर्वात्मसन्निधावुत्पद्यमानमस्यैवात्मनो नेतरेषामिति न नियन्तुं शक्यं। प्रदेशविशेषाभ्युप-

---

अनियमः उक्तदोषः, आत्मान्तरप्रदेशस्य परदेहे अन्तर्भावात् व्यवस्थेति शङ्कार्थः॥

किं मनसा संयुक्तात्मैवात्मनः प्रदेशः उत कल्पितः। आद्ये सर्वात्मनां सर्वदेहेषु अन्तर्भाव इति व्यवस्था। द्वितीयं दूषयति। तत्र न वैशेषिकैरिति। सर्वात्मसान्निध्ये सति कस्यचिदेव प्रदेशः कल्पयितुमशक्यः नियामकाभावादित्यर्थः। प्रदेशकल्पनामङ्गीकृत्याह। कल्प्येति। कार्यमभिसन्ध्यादिकं यस्यात्मनो यच्छरीरं तत्र तस्यैव भोग इति व्यवस्थामाशङ्क्याह। शरीरमपीति। प्रदेशपक्षे दोषान्तरमाह। प्रदेशेति। यस्मिन्नात्मप्रदेशेऽदृष्टोत्पत्तिः स किं चलः स्थिरो वा, नाद्यः अचलेऽस्मिन्नंशस्य चलनविभागयोरसम्भवादनात्मवादापाताच्च। द्वितीये तस्मिन्नेव प्रदेशे परस्याऽपि भोगदर्शनाददृष्टमस्तीत्येकेनापि शरीरेण द्वयोरात्मनोर्भोगप्रसङ्गः। यद्यात्म-

गमेऽपि च द्वयोरात्मनोः समानसुखदुःखभाजोः कदाचिदेकेनैव तावच्छरीरेणोपभोगसिद्धिः स्यात्, समानप्रदेशस्यापि द्वयोरात्मनोरदृष्टस्य सम्भवात्। तथा हि देवदत्तो यस्मिन् प्रदेशे सुखदुःखमन्वभूत् तस्मात् प्रदेशादपक्रान्ते तच्छरीरे यज्ञदत्तशरीरे च तं देशमनुप्राप्ते तस्यापीतरेण समानः सुखदुःखानुभवो दृश्यते स न स्यात् यदि देवदत्तयज्ञदत्तयोः समानप्रदेशमदृष्टं न स्यात्, स्वर्गाद्यनुपभोगप्रसङ्गश्च प्रदेशवादिनः स्यात्, ब्राह्मणादिशरीरप्रदेशेष्वदृष्टनिष्पत्तेः प्रदेशान्तरवर्तित्वाच्च। स्वर्गाद्युपभोगस्य सर्वगतत्वानुपपत्तिश्च बहूनामात्मनां दृष्टान्ताभावात्। वद तावत् त्वं के बहवः समानप्रदे-

---

भेदात् प्रदेशयोर्भेदः तदापि तयोरेकदेहान्तर्भावाद्भोगसाङ्कर्यं तदवस्थं सावयवात्मवादप्रसङ्गश्च। किञ्च यत्र यत्रात्मनः प्रदेशे शरीरादिसंयोगाददृष्टमुत्पन्नं तत्तत्रैवाचलप्रदेशे स्थितमिति स्वर्गादिशरीरावच्छिन्नात्मन्यदृष्टाभावात् भोगो न स्यात, अतः प्रदेशभेदो न व्यवस्थापकः। यत्तु अत्रोत्पन्नमदृष्टं स्वाश्रये यत्र क्वचित् भोगहेतुरिति स्वर्गादिभोगसिद्धिरिति, तन्न भोगशरीरात् दूरस्थादृष्टे मानाभावादिति भावः। यदपि केचिदाहुः मनस एकत्वेऽप्यात्मनां भेदेन संयोगव्यक्तीनां भेदात् कयाचित् संयोगव्यक्त्या कस्मिंश्चिदेवात्मन्यदृष्टादिकमित्यसाङ्कर्यमिति, तन्न संयोगव्यक्तीनां वैजात्याभावेन सर्वासामेवैकदेहान्तः सर्वात्मस्वदृष्टहेतुत्वापत्तेः, तथाच सर्वात्मनां एकस्मिन् देहे भोक्तृत्वं दुर्वारं। किञ्च बहूनां विभुत्वमङ्गीकृत्य साङ्कर्यमुक्तं सम्प्रति कर्तॄणां विभुत्वमसिद्धमहमिहैवास्मि इत्यल्पत्वानुभवात् मानाभावाच्चेत्याह। सर्वगतत्वानुपपत्तिश्चेति। किञ्च बहूनां विभुत्वे समानदेशत्वं वाच्यं तच्चायुक्तं अदृष्टत्वादित्याह। वदेति। ननु रूपरसादीनामेकघटस्थत्वं दृष्टमिति चेत् नायमस्मत्सम्मतो दृष्टान्तः। रूपस्य तेजोमात्रत्वाद्रसस्य जलमात्रत्वात् गन्धस्य पृथिवीमात्रत्वात् इत्येवं तत्तद्गुणस्य स्वस्वधर्म्यंशेनाभेदात्

शास्त्रेति। रूपादय इति चेत् न, तेषामपि धर्म्यंशेनाभेदा-लक्षणभेदाच्च न तु बहूनामात्मनां लक्षणभेदोऽस्ति अन्त्य-विशेषवशाद्भेदोपपत्तिरिति चेत् न, भेदकल्पनाया अन्त्यवि-शेषकल्पनायाश्चेतरेतराश्रयत्वात्, आकाशादीनामपि विभुत्वं ब्रह्मवादिनोऽसिद्धं कार्यत्वाभ्युपगमात्, तस्मादात्मैकत्वपक्ष एव सर्वदोषाभाव इति सिद्धं॥

इति श्रीमच्छारीरकमीमांसाभाष्ये शङ्करभगवत्पादकृतौ द्वितीयस्याध्यायस्य तृतीयः पादः॥ * ॥

तन्त्वादिधर्म्यतिरिक्तपटाभावात्। किञ्चात्मनां बहुत्वमप्यसिद्धं, आत्मत्वरूपलक्षणस्याभेदात्, तथा च देवदत्तात्मा यज्ञदत्तात्मनो न भिन्नः आत्मत्वाद्यज्ञदत्तात्मवत्। अत्र वैशेषिकः शङ्कते। अन्त्यविशेषेति। नित्यद्रव्यमात्रवृत्तयो विशेषास्ते च स्वयं स्वाश्रयव्यावर्तका एव न स्वेषां व्यावर्तकमपेक्षन्ते इत्यन्त्या उच्यन्ते। तथा च विशेषरूपलक्षणभेदात् भवत्यात्मभेद इत्यर्थः। न तावदात्मन्यनात्मनः सकाशाद्भेदज्ञानार्था विशेषकल्पना आत्मत्वादेवानात्मभेदसिद्धेः। नाप्यात्मनां मिथो भेद-ज्ञानार्थं तत्कल्पना, आत्मभेदस्याद्याप्यसिद्धेः। न च विशेषभेदकल्पना-देवात्मभेदकल्पना युक्ता आत्मभेदज्ञानावात्मसु विशेषभेदसिद्धिस्तत्सि-द्धौ तत्सिद्धिरित्यन्योन्याश्रयादिति परिहारार्थः। यत्तु बहूनां विभुत्वे आकाशदिक्कालदृष्टान्त इति सोऽप्यसम्मत इत्याह। आकाशादीना-मिति। विभुत्वस्यैकदेशित्वे लाघवान्न विभुभेदः। यथैकस्मिन्नाकाशे भेरीवीणादिभेदेन तारमन्दादिशब्दव्यवस्था एवमेकस्मिन्नप्यात्मनि बुद्ध्युपाधिभेदेन सुखादिव्यवस्थोपपत्तेरात्मभेदेऽपि व्यवस्थानुपपत्ते-स्तत्त्वान्मुधा भेदकल्पनेत्युपसंहरति। तस्मादिति। एवम्भूतभोक्तृ-श्रुतीनां विरोधाभावात् ब्रह्मण्यदर्थे समन्वय इति सिद्धं॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दभगवत्पाद-कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां द्वितीयाध्यायस्य तृतीयः पादः॥ * ॥

ॐ परमात्मने नमः ।

तथा प्राणाः ॥ १ ॥

वियदादिविषयः श्रुतिविप्रतिषेधः तृतीयेन पादेन परिहृतः, चतुर्थेनेदानीं प्राणविषयः परिह्रियते । तत्र तावत् 'तत्तेजोऽसृजत' इति, 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाम्नायते । क्वचिच्चानुत्पत्तिरेवैषामाम्नायते 'असद्वा इदमग्र आसीत् तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रे सदासीत् तदाहुः के ते ऋषय इति प्राणा वा ऋषयः' इत्यत्र प्रागुत्पत्तेः प्राणानां

ॐ ब्रह्मणे नमः ।

पूर्वाधिकरणे कर्तुः स्वरूपं विचार्य तदुपकरणानामिन्द्रियाणामुत्पत्तिं साधयति । तथा प्राणाः । भूतभोक्तृविचारानन्तरं भौतिकप्राणविचार इति हेतुहेतुमद्भावं पादयोः सङ्गतिमाह । वियदादीति । तमेव विप्रतिषेधमाह । तत्रेत्यादिना । यद्यपि प्राणानामनुत्पत्तौ एकविज्ञानप्रतिज्ञानुपपत्तेर्वियदधिकरणन्यायात्तेषामुत्पत्तिः सिध्यति तथापि प्रलये प्राणसद्भावश्रुतेः गतिकथनार्थमेतदधिकरणमित्यपौनरुक्त्यं । अत्र प्राणाः विषयाः । ते किमुत्पद्यन्ते न वेति श्रुतीनां विप्रतिपत्त्या संशये तासां समबलत्वादनिर्णय इत्यप्रामाण्यमिति पूर्वपक्षफलं, तत्र गौणत्वादिसमाधानमाह । अथ वेति । प्राणानां प्रलये सद्भावश्रुतेर्निरवकाशत्वेन बलीयस्त्वादुत्पत्तिश्रुतिर्जीवोत्पत्तिश्रुतिवद्गौणीत्यविरोध इत्यर्थः ।

सद्भावश्रवणात्। अन्यत्र तु प्राणानामप्युत्पत्तिः पठ्यते 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मादात्मनः सर्वे प्राणाः' इति 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति 'सप्त प्राणाः प्रभवन्ति तस्मात्' इति 'स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नं' इति चैवमादिप्रदेशेषु। तत्र तत्र श्रुतिविप्रतिषेधादन्यतरनिर्धारणकारणानिरूपणाच्चा-प्रतिपत्तिः प्राप्नोति, अथवा प्रागुत्पत्तेः सद्भावश्रवणाद् गौणी प्राणानामुत्पत्तिश्रुतिरिति प्राप्नोति, अत इदं पठति। तथा प्राणा इति। कथं पुनरत्र तथेत्यक्षरानुलोम्यं, प्रकृतोपमा-नाभावात्। सर्वगतात्मवक्तृत्ववादिदूषणमतीतानन्तरपादान्ते प्रकृतं तत्तावन्नोपमानं सम्भवति, सादृश्याभावात्। सादृश्ये

अप्रमाणपक्षवद्गौणपक्षोऽपि मुख्यसिद्धान्तिनः पूर्वपक्ष एवेति ज्ञाप-नार्थमथवेत्युक्तं। मुख्यसिद्धान्त्याह। अत इति। तथाशब्दमाक्षि-पति। कथमिति। आनुलोम्यं सामञ्जस्यमित्यर्थः। साम्यं स्फुटयति, तथा दृष्टस्येति। दूषणवत् प्राणा इत्यनुचितं। यद्यप्यदृष्टवत् प्राणा अप्यनियता इति सूत्रमन्वेति तथापि पुनरुक्तं जीववत् प्राणा नो-त्पद्यन्त इति सूत्रार्थस्वेदपसिद्धान्त इत्याद्यपार्थः। समाधत्ते। न उदा-हरणेति। दृष्टान्तो दार्ष्टान्तिकसन्निहितो वाच्य इत्यङ्गीकृत्यैकवाक्य-स्थत्वेन सान्निध्यमुक्तं, सम्प्रति नायं नियमः। जैमिनिना भगवता व्यवहितात्यव्यवहितदृष्टान्तस्याश्रितत्वादित्याह। अथ वेति। अस्ति तृतीयाध्यायेऽश्वप्रतिग्रहेष्ट्यधिकरणं, तस्येदं विषयवाक्यं, "यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेद्" इत्येतदुत्तराधिक-रणे किमियं वारुणेष्टिर्दातुरुत प्रतिग्रहीतुरिति विषये प्रतिगृह्णी-यादिति श्रुतेः प्रतिग्रहीतुरित्याशङ्क्य प्रजापतिर्वरुणायाश्वमनयदि-

हि सत्युपमानं स्यात्, यथा सिंहस्तथा बलवर्मेति। अदृष्टसा- म्यप्रतिपादनार्थमिति यद्युच्येत, यथा अदृष्टस्य सर्वात्मसन्नि- धावुत्पद्यमानस्यानियतत्वं, एवं प्राणानामपि सर्वात्मनः प्र- त्यनियतत्वमिति, तदपि देहानियमेनैवोक्तत्वात् पुनरुक्तं भवेत्। न च जीवेन प्राणा उपमीयेरन्, सिद्धान्तविरोधात्। जीवस्य ह्यनुत्पत्तिराख्याता प्राणानां तूत्पत्तिराचिख्यासिता। तस्मात् तथेत्यसम्बन्धमेतत् प्रतिभाति। न, उदाहरणोपात्ते- नाप्युपमानेन सम्बन्धोपपत्तेः। अत्र प्राणोत्पत्तिवादिवाक्य- जातमुदाहरणं 'एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि च व्युच्चरन्त्येवंजातीयकं। तत्र यथा लोकादयः परस्माद्ब्रह्मण उत्पद्यन्ते तथा प्राणा* अपीत्यर्थः।

त्युपक्रमे दातृकीर्तनात् लिङ्गादश्वदातुरेवेति स्थास्यति, अतः प्रति- गृह्णीयादित्यस्य पदस्याऽश्वान् यः प्रतिग्राहयेदित्यर्थः। दद्यादिति याव- त्। योऽश्वदाता स वारुणीमिष्टिं कुर्यादिति वाक्यार्थे स्थिते चिन्ता, अश्वदाननिमित्तेयमिष्टिः किं लौकिकेऽश्वदाने वैदिके वेति। तत्र 'न केशरिणो ददाति' इति निषिद्धलौकिकाश्वदाने दोषसम्भवात् तन्नि- रासार्थेयमिष्टिरिति दोषात्त्विष्टिर्लौकिके स्यादिति सूत्रेण प्राप्ते सिद्धान्तः। 'अत्र हि वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति' इति दातुर्दोषं सङ्कीर्त्येष्टिर्विहिता। वरुणशब्दो जलोदराख्यरोग रूढः। न च लौकिकेऽश्वदानेऽयं रोगो भवति इति प्रसिद्धं। नचा- नेनैव वाक्येन प्रसिद्धिः। दाने दोषस्तन्निरासार्था चेष्टिरित्यर्थभेदे वा- क्यभेदात्। न च वृणोति इति व्युत्पत्त्या वरुणशब्दो निषेधाति- क्रमकृतदोषानुवादक इति युक्तं, रूढियोगापातात्। तत्त्यागे च वैदि-

---

* प्राण इव इति वर्ध० का०।

'तथा एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इत्येवमादिष्वपि खादिवत् प्राणानामुत्पत्तिरिति द्रष्टव्यं। अथवा पानव्यापच्च तद्वदित्येवमादिषु व्यवहितोपमानसम्बन्धस्याप्याश्रितत्वात् यथातीतानन्तरपादाद्युक्ता वियदादयः परस्य ब्रह्मणो विकाराः समधिगतास्तथा प्राणा अपि परस्य ब्रह्मणो विकारा इति योजयितव्यं। कः पुनः प्राणानां विकारत्वे हेतुः, श्रुतत्वमेव। ननु केषुचित् प्रदेशेषु न प्राणानामुत्पत्तिः श्रूयत इत्युक्तं, तदयुक्तं, प्रदेशान्तरेषु श्रवणात्। न हि क्वचिदश्रवणमन्यत्र श्रुतं निवारयितुमुत्सहते, तस्माच्छ्रुतत्वाविशेषादाकाशादिवत् प्राणा अपि उत्पद्यन्त इति सूक्तं॥

केऽपि दानेऽश्वत्यागजन्यदुःखं प्रागुक्तव्युत्पत्त्या पुरुषोऽप्यनुवदितुं, तस्मात् प्राप्तानुवाद्यर्थवादोऽयमिति यज्ञसम्बन्धिन्यश्वदाने इयमिष्टिरित्येवं विचार्योक्तं। पानव्यापच्च तद्वदिति। सोमपाने क्रियमाणे व्यापद्वमनं यदि स्यात् तदा एतं सौमेन्द्रं श्यामाकचरुं निर्वपेदिति श्रूयते। तत्राऽश्वप्रतिग्रहेष्ट्यधिकरणपूर्वपक्षन्यायो बहुसूत्रव्यवहितस्तद्वदिति परामृश्यते, तद्वल्लौकिके धातुसाम्यार्थं पीतसोमस्य वमनेऽयं चरुः स्याद्वमननिमित्तेन्द्रियशोषाख्यदोषस्य दृष्टस्येन्द्रियेण वीर्येण बाध्यते, यः सोमं वमतीत्यनुवादादिति पूर्वपक्षसूत्रार्थः। वैदिके तु सोमपाने शेषप्रतिपत्तेर्जातत्वाद्वमनेऽपि न दोष इति प्राप्ते सिद्धान्तः। लोके वमनकृतेन्द्रियशोषस्य धातुसाम्यकरत्वेन गुणत्वान्न दोषता, वेदे तु मा मे वाङ्नाभिमतिगा इति सम्यग्जरणार्थमन्त्रलिङ्गाद्वमने कर्मवैगुण्यात् तस्य दोषता। तस्माद्वैदिकसोमवमने सौमेन्द्रश्चरुरिति स्थितमित्येवमादिषु सूत्रेष्वित्यर्थः॥

गौण्यसम्भावात्॥ २॥

यत्पुनरुक्तं प्रागुत्पत्तेः सद्भावश्रवणात् गौणी प्राणानामुत्पत्तिरिति तत्प्रत्याह। गौण्यसम्भवादिति। गौण्या असम्भवो गौण्यसम्भवः। न हि प्राणानामुत्पत्तिश्रुतिर्गौणी सम्भवति, प्रतिज्ञाहानिप्रसङ्गात्। 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति ह्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्साधनायेदमाम्नायते 'एतस्माज्जायते प्राणः' इत्यादि। सा च प्रतिज्ञा प्राणादेः समस्तस्य जगतः ब्रह्मविकारत्वे सति प्रकृतिव्यतिरेकेण विकाराभावात् सिध्यति, गौण्यान्तु प्राणानामुत्पत्तिश्रुतौ प्रतिज्ञेयं हीयेत। तथा च प्रतिज्ञातार्थमुपसंहरति 'पुरुष एवेदं विश्वं* तपो ब्रह्म परामृतं' इति, 'ब्रह्मैवेदं विश्व-

---

ननु प्रतिज्ञाऽपि गौणी किं न स्यात् इत्यत आह। तथा च प्रतिज्ञातार्थमिति। उपक्रमोपसंहाराभ्यां प्रतिपिपादयिषिता द्वितीयत्वप्रतिज्ञानुरोधेन प्राणोत्पत्तिर्मुख्यैवेति भावः। मुण्डकवत् श्रुत्यन्तरेऽपि प्रतिज्ञादर्शनात् सा मुख्येत्याह। तथेति। एषा प्रतिज्ञा प्राणोत्पत्तिमुख्यत्वे हेतुत्वेन द्रष्टव्येत्यर्थः। इदानीं प्रलये प्राणसत्त्वश्रुतेर्गतिं प्रश्नपूर्वकमाह। कथमित्यादिना। नेदं वाक्यं महाप्रलये परमकारणस्य ब्रह्मणः प्राणवत्त्वपरं किन्त्ववान्तरप्रलये हिरण्यगर्भाख्यावान्तरप्रकृतिरूपप्राणसद्भावपरमित्यर्थः। ननु हिरण्यगर्भरूपविकारस्य सत्त्वे कथं तदा विकारासत्त्वकथनं तत्राह। स्वविकारेति। स्वस्य कार्यब्रह्मणो यत् कार्यं स्थूलं तस्योत्पत्तिरित्यर्थः। ननु यथाश्रुति महाप्रलये प्राणसद्भावरूपं लिङ्गं प्राणानुत्पत्तिसाधकं किमित्यवान्तरप्र-

---

* कर्म तप इति वर्ध० का०।

मिदं वरिष्ठं' इति च। तथा 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं' इत्येवंजातीयकासु श्रुतिषु एषैव प्रतिज्ञा योजयितव्या। कथं पुनः प्रागुत्पत्तेः प्राणानां सद्भावश्रवणं, नैतन्मूलप्रकृतिविषयं, 'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः' इति मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वावधारणात्। अवान्तरप्रकृतिविषयन्त्वेतत् स्वविकारापेक्षं प्रागुत्पत्तेः प्राणानां सद्भावावधारणमिति द्रष्टव्यं, व्याकृतविषयाणामपि भूयसीनामवस्थानां श्रुतिस्मृत्योः प्रकृतिविकारभावप्रसिद्धेः। वियदधिकरणे हि गौण्यसम्भवादिति पूर्वपक्षसूत्रत्वात् गौणी जन्मश्रुतिरसम्भवादिति व्याख्यातं। प्रतिज्ञाहान्या च तत्र सिद्धान्तोऽभिहितः। इह तु सिद्धान्तसूत्रत्वात् गौण्या जन्मश्रुतेरसम्भवादिति व्याख्यातं। तदनुरोधेन त्विहापि गौणी जन्मश्रुतिरसम्भवादिति व्याचक्षाणैः प्रतिज्ञाहानिरुपेक्षिता स्यात्॥

त्वयपरतया नीयत इति चेत्, एतस्माज्जायते प्राण इत्यादि प्रबलजन्मश्रुतिबलादिति वदामः। ननु विकारस्य ब्रह्मणः कथं प्रकृतित्वमित्यत आह। व्याकृतेति। 'हिरण्यगर्भः समवर्तताग्रे' इत्यादिश्रुतौ 'आदिकर्ता स भूतानां' इत्यादि स्मृतौ च विकारात्मनामपि मूलकारणावस्थारूपाणां ब्रह्मविराडादीनां प्रकृतिविकारभावेन प्रसिद्धिरस्ति। पूर्वापेक्षया विकारस्याप्युत्तरत्वादप्रकृतित्वमित्यर्थः। केचिद्वियदधिकरणानुरोधेनेदं सूत्रं व्याचक्षते तान् दूषयति। वियदिति।

तस्य जायत इति पदस्याकाशादिषु मुख्यस्य पाठापेक्षया प्राचीनेषु प्राणेषु श्रुतेर्मुख्यं जन्मेति सूत्रयोजना। तत्सामान्यादिति। तेनाकाशादिजन्मना सामान्यमेकशब्दोक्तत्वं तस्मादित्यर्थः। एकस्मिन् वाक्ये

तत् प्राक् श्रुतेः ॥ ३ ॥

इतश्चाकाशादीनामिव प्राणानामपि मुख्यैव जन्मश्रुतिः, यज्जायत इत्येकं जन्मवाचि पदं प्राणेषु प्राक् श्रुतं सदुत्तरेष्वाकाशादिष्वनुवर्तते, 'एतस्माज्जायते प्राणः' इत्यत्राकाशादिषु मुख्यं जन्मेति प्रतिष्ठापितं, तत् सामान्यात् प्राणेष्वपि मुख्यमेव जन्म भवितुमर्हति। न ह्येकस्मिन् प्रकरणे एकस्मिन् वाक्ये एकः शब्दः सकृदुच्चरितो बहुभिः सम्बध्यमानः क्वचिन्मुख्यः क्वचिद्गौण इत्यध्यवसातुं शक्यं, वैरूप्यप्रसङ्गात्। तथा 'स प्राणमसृजत प्राणाच्छ्रद्धां' इत्यत्रापि प्राणेषु श्रुतः सृजतिः परेष्वपि उत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते। यत्रापि पश्चाच्छ्रुतः उत्पत्तिवचनः शब्दः पूर्वैः सम्बध्यते तत्राप्येष एव न्यायः, यथा सर्वाणि भूतानि व्युच्चरन्तीत्ययमन्ते पठितो व्युच्चरन्तिशब्दः पूर्वैरपि प्राणादिभिः सम्बध्यते॥

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥

यद्यपि 'तत्तेजोऽसृजत' इत्येतस्मिन् प्रकरणे प्राणानामुत्पत्तिर्न पठ्यते तेजोऽबन्नानामेव त्रयाणां भूतानां उत्पत्तिश्रवणात्,

---

एकस्य शब्दस्य क्वचिन्मुख्यत्वं क्वचित् गौणत्वमिति वैरूप्यं न युक्तमिति न्यायमन्यत्राप्यतिदिशति। यत्रापि पश्चाच्छ्रुत इति॥

यच्चोक्तं छान्दोग्येऽपि प्राणानामुत्पत्तिर्न श्रूयत इति। तत्राह। तत्पूर्वकत्वाद्वाच इति। अत्र सूत्रे वाक्पदं प्राणमनसोरुपलक्षणं।

तथापि ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां तत्सामान्याच्च सर्वेषामेव प्राणानां ब्रह्मप्रभवत्वं सिद्धं भवति। तथा ह्यस्मिन्नेव प्रकरणे तेजोऽबन्नपूर्वकत्वं वाक्प्राणमनसामाम्नायते 'अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक्' इति। तत्र यदि तावन्मुख्यमेवैषामन्नादिमयत्वं ततो वर्तत एव* ब्रह्मप्रभवत्वं अथ भाक्तं तथापि ब्रह्मकर्तृकायां नामरूपव्याक्रियायां श्रवणात् 'येनाश्रुतं श्रुतं भवति' इति चोपक्रमात् ऐतदात्म्यमिदं सर्वं' इति चोपसंहारात् श्रुत्यन्तरप्रसिद्धेश्च ब्रह्मकार्यत्वप्रपञ्चनार्थमेव मनआदीनामन्नादिमयत्ववचनमिति गम्यते। तस्मादपि प्राणानां ब्रह्मविकारत्वसिद्धिः॥

सप्तगतेर्विशेषितत्वाच्च॥ ५॥

उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः,

वाक्प्राणमनसां तेजोऽबन्नपूर्वकत्वोक्तेरश्रवणमसिद्धमिति योजना। तैर्वागादिभिश्चक्षुरादीनां सामान्यं करणत्वं तत्सामान्यादित्यर्थः। अन्न मयड्विकारे मुख्य इति पक्षे वर्तत एव प्राणानां ब्रह्मकार्यत्वं तेजोऽबन्नानां ब्रह्मविकारत्वात्। यदि प्राणस्य वायोर्जलविकारत्वायोगात् तदधीनस्थितिकत्वमात्रेण भाक्तस्तथापि प्राणानां विकारत्वे भूताधीनस्थितिकत्वं लिङ्गं मयटोक्तमिति सिद्धं ब्रह्मकार्यत्वं 'स प्राणमसृजत' इत्यादिश्रुत्यन्तरे स्पष्टं, ब्रह्मकार्यत्वोक्तेः। तस्मात् प्राणानामुत्पत्तिश्रुतीनां सद्भावश्रुत्यविरोधात् कारणे ब्रह्मणि समन्वय इति सिद्धं। लिङ्गशरीरविचारात्मकाधिकरणानां लिङ्गात् तत्त्वंपदार्थभेदधीः फलमिति द्रष्टव्यं॥

एवं जन्मलब्धसत्ताकानां प्राणानामुपजीव्योपजीवकत्वसङ्गत्या सङ्ख्यां निर्णेतुं श्रुतीनां विरोधात् संशये पूर्वपक्षयति। सप्तगतेर्विशेषित-

---

* ब्रह्मप्रकृतिकत्वमितिवर्ध० का०।

सङ्ख्याविषय इदानीं परिच्छिद्यते। तत्र मुख्यं प्राणमुपरिष्टाद्वक्ष्यति। सम्प्रति तु कतीतरे प्राणा इति सम्प्रधारयति। श्रुतिविप्रतिपत्तेश्चात्र विशयः। क्वचित् सप्त प्राणाः सङ्कीर्त्त्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इति। क्वचिदष्टौ प्राणा ग्रहत्वेन गुणेन सङ्कीर्त्त्यन्ते, "अष्टौ ग्रहा अष्टावतिग्रहाः" इति, क्वचिन्नव "सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ" इति। क्वचिद्दश "नव वै पुरुषे प्राणा नाभिर्दशमी" इति। क्वचिदेकादश "दशेमे पुरुषे प्राणा आत्मैकादश" इति। क्वचिद्द्वादश "सर्व्वेषां स्पर्शानां त्वगेकायतनम्" इत्यत्र। क्वचित्त्रयोदश "चक्षुश्च द्रष्टव्यञ्च" इत्यत्र। एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः, किं तावत् प्राप्तं सप्तैव प्राणा इति। कुतः गतेः, यतस्तावन्तोऽवगम्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इत्येवंविधासु श्रुतिषु। विशेषिताश्चैते "सप्त वै शीर्षण्याः प्राणाः" इत्यत्र। ननु "गुहाशया निहिताः

त्वाच। विशयः संशयः। इन्द्रियाण्यत्र विषयः। पञ्च धीन्द्रियाणि वाङ्मनश्चेति सप्त प्राणास्त एव ग्रहत्वेन सहाष्टौ। ग्रहत्वं बन्धकत्वं गृह्णन्ति बध्नन्तीति ग्रहा इन्द्रियाणि तेषां बन्धकत्वं विषयाधीनमित्यतिग्रहाः,ग्रहानतिक्रान्ता विषया इत्यर्थः। द्वे श्रोत्रे द्वे चक्षुषी द्वे घ्राणे वाक् चेति सप्त शीर्षणि भवाः प्राणा द्वाववाञ्चौ पायूपस्थौ चेति नव, ज्ञानकर्मेन्द्रियाणि दशेमे पुरुषे देहे प्राणाः आत्मा मन एकादशप्राण इति सिद्धान्तकोटिरक्षा एत एव हृदयाख्यया बुद्ध्या सह द्वादश। अहङ्कारेण सह त्रयोदश, श्रुतितः सप्तत्वावगतेर्ये शीर्षण्याः सप्त ते प्राणा इति शीर्षण्योद्देशेन प्राणत्वविशेषणाच्च शीर्षण्यानां प्राणत्वशब्दता, इन्द्रियत्वपरिसङ्ख्या सप्तैव प्राणा इति सूत्रयोजना। सप्तत्वं वीप्साविरुद्धमिति शङ्कते।

सप्त सप्त" इति वीप्सा श्रूयते, सा सप्तभ्योऽतिरिक्तान् प्राणान् गमयतीति। नैष दोषः, पुरुषभेदाभिप्रायेयं वीप्सा प्रति पुरुषं सप्त सप्त प्राणा इति, न तत्त्वभेदाभिप्राया सप्त सप्तान्येऽन्ये प्राणा इति। नन्वष्टत्वादिकापि सङ्ख्या प्राणेषूदाहृता कथं सप्तैव स्युः। सत्यमुदाहृता विरोधात्त्वन्यतमा सङ्ख्याध्यवसातव्या, तत्र स्तोककल्पनोपरोधात् सप्तसङ्ख्याध्यवसानं वृत्तिभेदापेक्षञ्च सङ्ख्यान्तरश्रवणमिति गम्यते। अत्रोच्यते॥

हस्तादयस्तु स्थितेऽतो नैवं॥ ६॥

हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते, "हस्तो वै ग्रहः स कर्म्मणातिग्रहेण गृहीतः, हस्ताभ्यां हि कर्म्म करोति" इत्येवमाद्यासु श्रुतिषु। स्थिते च सप्तत्वातिरेके सप्तत्वमन्तर्भावाच्छक्यते सम्भावयितुं। हीनाधिकसङ्ख्याविप्रतिपत्तौ ह्यधिका सङ्ख्या संग्राह्या भवति, तस्यां *हीनान्तर्भवति, न तु ही-

नन्विति। गुहायां हृदये शेरत इति गुहाशयाः। स्वस्थानेषु निहिताः निहिता इत्यर्थः। चित्तेन चतुर्दशत्वं मन्तव्यं। पूर्वपक्षी परिहरति। नैष दोष इति। सिद्धान्तिनाप्येकादशसु मनोवृत्तिभेदान्निश्चयात्मिका बुद्धिः गर्वात्मकोऽहङ्कारः, स्मरणात्मकं चित्तं इति द्वादशादिसङ्ख्यान्तर्भावनीया। ततो वरं प्राथमिकसप्तत्वेऽन्तर्भावः लाघवादिति प्राप्ते सिद्धान्तयति। अत्रेति॥

आदानेन कर्म्मणा गृहीतः सम्बद्धः। सम्बन्धमेवाह। हस्ताभ्यामिति। अतोऽधिकसङ्ख्यायाः न्यूनायामन्तर्भावायोगात् सप्तैव प्राणाः स्युर्लाघवानुरोधादित्येवं न मन्तव्यमित्यन्वयः। तर्हि कतीन्द्रियाणी-

* हीनतरेति का० वर्ध०।

नायामधिका, अतश्च नैवं मन्तव्यं स्तोककल्पनानुरोधात् सप्तैव प्राणाः स्युरिति। उत्तरसङ्ख्यानुरोधात्त्वेकादशैव ते प्राणाः स्युः। तथा चोदाहृता श्रुतिः "दशेमे पुरुषे प्राणा आत्मैकादश" इति। आत्मशब्देन चात्रान्तःकरणं परिगृह्यते करणाधिकारात्। ननु एकादशत्वादप्यधिके द्वादशत्रयोदशत्वे उदाहृते। सत्यमुदाहृते न त्वेकादशभ्यः कार्य्यजातेभ्योऽधिकं कार्य्यजातमस्ति यदर्थं अधिकं करणं कल्प्येत। शब्दस्पर्शरूपरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्म्मभेदास्तदर्थानि च पञ्च कर्म्मेन्द्रियाणि सर्व्वार्थविषयं त्रैकाल्यवृत्ति मन एकमनेकवृत्तिकं तदेव वृत्तिभेदात् क्वचिद्भिन्नवद्व्यपदिश्यते "मनो बुद्धिरहङ्कारश्चित्तञ्च" इति। तथाच श्रुतिः कामाद्या नानाविधा वृत्तीरनुक्रम्याह "एतत् सर्वं मन एव" इति। अपि च सप्तैव शीर्षण्यान् प्राणानभिमन्यमानस्य चत्वार एव प्राणा अभिमताः स्युः स्थानभेदाद्ध्येते चत्वारः सन्तः सप्त गण्यन्ते, "द्वे श्रोत्रे द्वे चक्षुषी

त्याकाङ्क्षायामाह। उत्तरेति। श्रुतीनां मिथो विरोधे सति मानान्तरानुगृहीता श्रुतिर्बलीयसीति न्यायेन कार्य्यलिङ्गानुमानानुगृहीतैकादशप्राणश्रुत्यनुसारेणान्याः श्रुतयो नेया इत्यभिसन्धायाह। सत्यमिति। एकादशकार्य्यलिङ्गान्याह। शब्देति। त्रयः कालास्त्रैकाल्यं, तद्विषया वृत्तिर्यस्य तत् त्रैकाल्यवृत्ति। इन्द्रियान्तराणां वर्त्तमानमात्रग्राहित्वादतीतादिज्ञानाय मनोऽङ्गीकार्य्यमित्यर्थः। विशेषितत्वादित्युक्तं निरस्यति। अपि च सप्तेति। न च तावतामिति। आदानादीनां श्रोत्रा-

द्वे नासिके एका वाक्” इति। न च तावतामेव वृत्तिभेदा इतरे प्राणा इति शक्यते वक्तुं, हस्तादिवृत्तीनामत्यन्तविजातीयत्वात्। तथा “नव वै पुरुषे प्राणा नाभिर्दशमी” इत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते, न प्राणतत्त्वभेदाभिप्रायेण ‘नाभिर्दशमी’ इति वचनात्। न हि नाभिर्नाम कश्चित् प्राणः प्रसिद्धोऽस्ति, मुख्यस्य तु प्राणस्य भवति, नाभिरपि एकं विशेषायतनमित्यतो नाभिर्दशमीत्युच्यते। क्वचिदुपासनार्थं कतिचित् प्राणा गण्यन्ते, क्वचित् प्रदर्शनार्थं। तदेवं विचित्रे प्राणेयत्ताम्नाने सति क्व किं परमाम्नानमिति विवेक्तव्यं। कार्य्यजातवशात्त्वेकादशत्वाम्नानं प्राणविषयं प्रमाणमिति स्थितं। इयमपरा सूत्रद्वययोजना। सप्तैव प्राणाः स्युः यतः सप्तानामेव गतिः श्रूयते “तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति” इत्यत्र। ननु सर्वशब्दोऽप्यत्र पठ्यते कथं सप्तानामेव गतिः प्रतिज्ञायत इति, विशेषितत्वादित्याह। सप्तैव हि प्राणाश्चक्षुरादयः त्वक्पर्य्यन्ता विशे-

---

दिभ्योऽत्यन्तवैजात्यादित्यर्थः। तेषां तद्वृत्तित्वे बधिरादीनामादानादि न स्यादिति भावः। कथं तर्हि छिद्रे प्राणशब्दः इत्याशङ्क्य लक्षणयेत्याह। मुख्यस्य त्विति। सप्त प्राणाः प्रभवन्तीत्युपासनार्थं। अष्टौ ग्रहा इति श्रुतिस्तूपलक्षणार्था। पायूपस्थपादानामपि बन्धकत्वाविशेषादिति विवेक्तव्यं। नन्विदं सूत्रव्याख्यानमसङ्गतं पञ्चधीन्द्रियवाङ्मनसां सप्तत्वावगतिः शीर्षण्यानाञ्चतुर्णां विशेषितत्वमिति हेतोर्वैयधिकरण्यादुक्तपरिसङ्ख्यादोषाच्चेत्यरुचेराह। इयमपरेति। इन्द्रि-

षिताः इह प्रकृताः, स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्त्तते अथारूपज्ञो भवति एकीभवति न पश्यतीत्याहुरित्येवमादिनानुक्रमणेन। प्रकृतगामी च सर्वशब्दो भवति। यथा सर्वे ब्राह्मणा भोजिता इति ये निमन्त्रिताः प्रकृता ब्राह्मणास्त एव सर्वशब्देनोच्यन्ते नान्ये, एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यन्ते नान्य इति। नन्वत्र विज्ञानमष्टममनुक्रान्तं कथं सप्तानामेवानुक्रमणं, नैष दोषः। मनोविज्ञानयोस्तत्त्वाभेदाद्वृत्तिभेदेऽपि सप्तत्वोपपत्तेः। तस्मात् सप्तैव प्राणा इत्येवं प्राप्ते ब्रूमः। हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते "हस्तो वै ग्रहः" इत्यादिश्रुतिषु। ग्रहत्वञ्च बन्धनभावो गृह्यते, बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बन्धनेनेति। स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरान्तरेष्वपि तुल्यत्वाद्बन्धनस्य। तस्माच्छरीरान्तरसञ्चारीदं ग्रहसंज्ञकं बन्धनमित्यर्थादुक्तं भवति। तथा च स्मृतिः "पुर्य्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च" इति। प्राङ्मोक्षाद्ग्रहसंज्ञकेनानेन बन्धनेनावियोगं

याणि कतीति सन्देहे पूर्वपक्षसूत्रं योजयति। सप्तेति। तं जीवात्मानं ये प्राणाः सह गच्छन्ति तेषामेव भोगहेतुत्वादिन्द्रियत्वमित्यर्थः। विपन्नावस्थायां एष चाक्षुषस्तदुपि स्थितोऽनुग्राहकसूर्य्यांशरूपः पुरुषः पराङ् पर्य्यावर्त्तते बहिर्देशात् स्वांशिनं सूर्य्यं प्रतिगच्छति। अथ तदानीमयं मुमूर्षुररूपज्ञो भवति देवांशे देवं प्रविष्टे लिङ्गांशश्चक्षुर्हृदये मनस्येकीभवति तदायं न पश्यतीति पार्श्वस्था आहुरित्यर्थः। आदिपदात् जिघ्रति न वदति न रसयते न शृणोति न मनुते न स्पृ-

दर्शयति। आथर्वणे च विषयेन्द्रियानुक्रमणे "चक्षुश्च द्रष्टव्यञ्च" इत्यत्र तुल्यवद्धस्तादीनीन्द्रियाणि सविषयाण्यनुक्रामति "हस्तौ चादातव्यञ्च उपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यञ्च" इति। तथा "दशेमे पुरुषे प्राणा आत्मैकादशः ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति" इत्येकादशानां प्राणानामुत्क्रान्तिं दर्शयति। सर्वशब्दोऽपि च प्राणशब्देन सम्बध्यमानोऽशेषान् प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेव व्यवस्थापयितुं शक्यते, प्रकरणाच्छब्दस्य च बलीयस्त्वात्। सर्वे ब्राह्मणा भोजिता इत्यत्रापि सर्वेषामेव अवनिवर्त्तिनां ब्राह्मणानां ग्रहणं न्याय्यं सर्वशब्दसामर्थ्यात्। सर्वभोजनासम्भवात् तु तत्र निमन्त्रितमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता, इह तु न किञ्चित् सर्वशब्दार्थसङ्कोचकारणमस्ति, तस्मात् सर्वशब्देनात्राशेषाणां प्राणानां परिग्रहप्रदर्शनार्थं सप्तानामनुक्रमणमित्यनवद्यं। तस्मादेकादशैव प्राणाः शब्दतः कार्य्यतश्चेति सिद्धं॥

शति न विजानातीति गृह्यते। सप्तानामेव जीवेन सह गतिरित्यसिद्धं। ग्रहत्वश्रुत्या हस्तादीनामपि गतिप्रतीतेरिति सिद्धान्तयति। एवमित्यादिना। हस्तादिबन्धस्यामोक्षात् सहगतौ स्मृतिमाह। पुर्य्यष्टकेनेति। प्राणादिपञ्चकं भूतसूक्ष्मपञ्चकं ज्ञानेन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकं अन्तःकरणचतुष्टयमविद्या कामकर्म्म चेति पुर्य्यष्टकमात्मनो ज्ञापकत्वाल्लिङ्गं सति सम्भवे सर्वश्रुतिसङ्कोचो न युक्त इत्याह। सर्वशब्दोऽपीति। तस्मात् सङ्ख्याश्रुतीनामविरोधादेकादशेन्द्रियकारणं ब्रह्मणि समन्वय इति सिद्धं॥

अणवश्च ॥ ७ ॥

अधुना प्राणानामेव स्वभावान्तरमभ्युच्चिनोति। अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः। अणुत्वञ्चैषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, कृत्स्नदेहव्यापि *कार्य्यानुपपत्तिप्रसङ्गात्। सूक्ष्मा एते प्राणाः स्थूलाश्चेत् स्युः मरणकाले शरीरान्निर्गच्छन्तो बिलादहिरिवोपलभ्येरन् म्रियमाणस्य पार्श्वस्थैः। परिच्छिन्नाश्चैते प्राणाः सर्वगताश्चेत् स्युः उत्क्रान्तिगत्यागतिश्रुतिव्याकोपः स्यात्, तद्गुणसारत्वञ्च जीवस्य न सिध्येत्। सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत्, न, वृत्तिमात्रस्य करणत्वोपपत्तेः। यदेव ह्युपलब्धिसाधनं वृत्तिः अन्यद्वा तस्यैव नः करणत्वं, तेन संज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका, तस्मात् सूक्ष्माः परिच्छिन्नाश्चैते प्राणा इत्यध्यवस्यामः ॥

अणवश्च। 'प्राणाः सर्वे तन्ता इति श्रुतेः' इन्द्रियाणां विभुत्वात् तेषामुत्क्रान्तिरसिद्धा किन्तु तत्तद्देहे तेषामभिव्यक्तिरूपाः प्रादेशिक्यो वृत्तयः सन्ति न तासामुत्क्रान्त्यादिरिति साङ्ख्यानामाक्षेपस्तत्सङ्गत्या प्राणाः किंपरिमाणा इति सन्देहे सिद्धान्तयति। अधुनेत्यादिना। उत्पत्तिसङ्ख्यानिर्णयानन्तरं परिमाणं निरूप्यत इत्यर्थः। अनुद्भूतरूपस्पर्शत्वं सूक्ष्मत्वं, परिच्छेदोऽल्पत्वं, बुद्ध्यादीनां विभुत्वे तदुपाधिकमात्मनोऽणुत्वादिकं न सिध्येदित्युक्तन्यायविरोधमाह। तद्गुणसारत्वमिति। उक्ताक्षेपमनूद्य निरस्यति। सर्वगतानामिति। आनन्त्यश्रुतेरुपासनार्थत्वान्नोत्क्रान्त्यादिश्रुतीनां तया विरोध इति सिद्धं ॥

---

* कार्य्यानुत्पत्तीति॰का॰ वर्ध॰।

श्रेष्ठश्च ॥ ८ ॥

मुख्यश्च प्राणः इतरप्राणवद्ब्रह्मविकार इत्यतिदिशति। नन्वविशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातं, 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति, सेन्द्रियमनोव्यतिरेकेणापि प्राणस्योत्पत्तिश्रवणात्, 'स प्राणमसृजत' इत्यादिश्रवणेभ्यश्च। किमर्थः पुनरतिदेशः, अधिकाशङ्कावारणार्थः। नासदासीये हि ब्रह्मप्रधाने सूक्ते मन्त्रवर्णो भवति, 'न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परं किञ्च नास' इति। आनीदिति प्राणकर्मोपादानात् प्रागुत्पत्तेः सन्तमिव प्राणं सूचयति। तस्मात् अजः प्राण इति जायते कस्यचिन्मतिः, तामतिदेशेनापनुदति। आनीच्छब्दोऽपि न प्रागुत्पत्तेः प्राणसद्भावं सूचयति। अवातमिति विशेषणात्, "अप्राणो ह्यमनाः शुभ्रः" इति च मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वस्य दर्शितत्वात्। तस्मात्

श्रेष्ठश्च। अतिदेशत्वान्न सङ्गत्याद्यपेक्षा तथा प्राणा इत्युक्तन्यायोऽत्रातिदिश्यते। ननु प्राणो जायते न वेति संशयाभावादतिदेशो न युक्त इत्याक्षिपति। किमर्थ इति। निखिलमहाप्रलये प्राणसद्भावश्रुत्याऽधिकाशङ्कामाह। नासदासीये हीति। नासदासीदित्यारभ्याधीत इत्यर्थः। तर्हि तदा प्रलयकाले मृत्युर्मारको मृत्युमत्वार्थं वा नासीदमृतञ्च देवभोग्यं नासीत् रात्र्याः प्रकेतश्चिह्नरूपश्चन्द्रः अह्नः प्रकेतः सूर्यश्च नास्तां, स्वधया सहेत्यन्वयः, पितृभ्यो देयमन्नं स्वधा। यद्वा स्वेन धृता माया स्वधा तया सह तदेकं ब्रह्मानीदासीदिति परमार्थः। अत्रानीदिति तस्येष्टां श्वसनवदिति पूर्वपक्षार्थः। तस्माद् ब्रह्मणः

कारणसद्भावप्रदर्शनार्थ एवायमानीच्छब्द इति। श्रेष्ठ इति च मुख्यं प्राणमभिदधाति, "प्राणो वाव ज्येष्ठः श्रेष्ठश्च" इति श्रुतिनिर्देशात्। ज्येष्ठश्च प्राणः, शुक्रनिषेककालादारभ्य तस्य वृत्तिलाभात्, न चेत् तस्य तदानीं वृत्तिलाभः स्यात् योनौ निषिक्तं शुक्रं पूयेत न सम्भवेद्वा, श्रोत्रादीनान्तु कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभान्न ज्येष्ठत्वं। श्रेष्ठश्च प्राणः गुणाधिक्यात्, "न वै शक्ष्यामस्त्वदृते जीवितुम्" इति श्रुतेश्च॥

न वायुक्रिये पृथगुपदेशात्॥ ९॥

स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते। तत्र प्राप्तं तावत् श्रुतेर्वायुः प्राण इति, एवं हि श्रूयते, 'यः प्राणः स वायुः स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानः' इति। अथवा तन्त्रान्तरीयाभिप्रायात् सम-

---

परः परमुत्कृष्टमन्यच्च किमपि न बभूवेत्यर्थः। परिहारः सुबोधः। ननु श्रेष्ठशब्दस्य प्राणे प्रसिद्ध्यभावात् कथं सूत्रमिति तत्राह। श्रेष्ठ इति चेति। श्रुतिं व्याचष्टे। ज्येष्ठश्च प्राण इत्यादिना। पूयेत पूयं भवेत्। न सम्भवेद्गर्भो न भवेदित्यर्थः। वागादिजीवनहेतुत्वं प्राणस्य गुणः। एवमानीच्छ्रुत्यविरोधात् प्राणोत्पत्तिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं॥

इन्द्रियाणि विचार्य्य तद्व्यापारात् प्राणं पृथक् कर्तुमुत्पत्तिरतिदिष्टा, संप्रत्युत्पन्नप्राणस्वरूपं पृथक् करोति। न वायुक्रिये पृथगुपदेशात्। मुख्यः प्राणः किं वायुमात्रं उत करणानां साधारणव्या-

स्वकरणवृत्तिः प्राण इति इति प्राप्तं, एवं हि तन्त्रान्तरीया आचक्षते। 'सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च' इति। अत्रोच्यते। न वायुः प्राणः नापि करणव्यापारः। कुतः पृथग्पदेशात्। वायोस्तावत् प्राणस्य पृथगुपदेशो भवति, 'प्राण एव ब्रह्मणश्चतुर्थः पादः, स वायुना ज्योतिषा भाति च तपति च' इति। नहि वायुरेव सन् वायोः पृथगुपदिश्यते तथा करणवृत्तेरपि पृथगुपदेशो भवति, वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक् प्राणस्यानुक्रमणात् वृत्तिवृत्तिमतोश्चाभेदात्। नहि करणव्यापार एव सन् करणेभ्यः पृथगुपदिश्येत। तथा 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुः' इत्येवमादयोऽपि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशा अनुसर्त्तव्याः। न च समस्तानां करणानामेका वृत्तिः सम्भवति, प्रत्येकमेकैकवृत्तित्वात्, समुदायस्य चाकारकत्वात्। ननु पञ्जरचालनन्यायेन एतद्भविष्यति यथैकपञ्जरवर्त्तिनः एकादश पक्षिणः प्रत्येकं प्रतिनियतव्यापाराः सन्तः सम्भूयैकं पञ्जरं चालयन्ति एवमेकशरीरवर्त्तिनः एकादश प्राणाः प्रत्येकं नियतवृत्तयः सन्तः सम्भूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्त इति। नेत्युच्यते

पारः आहोस्वित्तत्त्वान्तरमिति वायुप्राणयोर्भेदाभेदश्रुतीनां मिथो विरोधात्। संशये पूर्वपक्षमाह। तत्रेति। द्वितीयं सांख्यपूर्वपक्षमाह। अथवेति। सिद्धान्तत्वेन सूत्रमादत्ते। अत्रोच्यत इति। मनोरूपब्रह्मणो वाक्प्राणचक्षुःश्रोत्रैश्चतुष्पात्त्वं श्रुतावुक्तं, तत्र प्राणो वायुनाधिदैविकेन भात्यभिव्यज्यते अभिव्यक्तः संस्तपति कार्यक्षमो

युक्तं। तत्र प्रत्येकवर्त्तिभिरवान्तरव्यापारैः पञ्जरचालनानुरूपैरेवोपेताः पक्षिणः सम्भूयैकं पञ्जरं चालयेयुरिति तथा दृष्टत्वात्। इह तु श्रवणाद्यवान्तरव्यापारोपेताः प्राणा न सम्भूय प्राणुरिति युक्तं, प्रमाणाभावात् अत्यन्तविजातीयत्वाच्च श्रवणादिभ्यः प्राणनस्य। तथा प्राणस्य श्रेष्ठताद्युद्घोषणं गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्तिमात्रे प्राणेऽवकल्पते, तस्मादन्यो वायुक्रियाभ्यां प्राणः। कथं तर्हीयं श्रुतिः, 'यः प्राणः स वायुः' इति, उच्यते। वायुरेवायमध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते न तत्त्वान्तरं नापि वायुमात्रं, अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते। स्यादेतत्, प्राणोऽपि तर्हि जीववदस्मिन् शरीरे स्वातन्त्र्यं प्राप्नोति, श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादीनामिन्द्रियाणां। तथा हि अनेकविधा विभूतिः प्राणस्य श्राव्यते। 'सुप्तेषु वागादिषु प्राण एवैको जागर्त्ति

भवतीत्यर्थः। श्रुतिषु तत्र तत्र प्राणस्य वागादीनाञ्च मिथः संवादलिङ्गेन पृथगुत्पत्तिलिङ्गेन चेन्द्रियतदभिन्नव्यापारेभ्योऽपि भिन्नत्वमित्याह। तथेति। प्राणस्येन्द्रियवृत्तित्वं श्रुत्या निरस्य युक्त्यापि निरस्यति। न च समस्तानामिति। या चक्षुःसाध्या वृत्तिः सैव न श्रोत्रादिसाध्या करणानां प्रत्येकमेकैकरूपग्रहादिवृत्तावेव हेतुत्वात्। न च समुदायस्य वृत्तिः सम्भवति तस्यासत्त्वादित्यर्थः। प्रमाणाभावादिति श्रोत्रादीनामेकप्राणनाख्यवृत्त्यनुकूलपरिस्पन्देषु मानाभावात् श्रवणादीनामपरिस्पन्दत्वेन विजातीयत्वात् परिस्पन्दरूपप्राणनानुकूलत्वादवान्तरव्यापाराभावान्न समस्तकरणवृत्तिः प्राण इत्यर्थः। किञ्च प्राणस्य वृत्तित्वे वागादीनामेव प्राधान्यं वाच्यं नैतदस्तीत्याह। तथा

प्राण एवैको मृत्युनाऽनाप्तः प्राणः संवर्गो वागादीन् संवृङ्क्ते प्राण इतरान् प्राणान् रक्षति मातेव पुत्रान्' इति। तस्मात् प्राणस्यापि जीववत् स्वातन्त्र्यप्रसङ्गः, तं परिहरति॥

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः॥ १०॥

तुशब्दः प्राणस्य स्वातन्त्र्यं व्यावर्त्तयति। यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य कर्तृत्वं भोक्तृत्वं च प्रत्युपकरणानि न स्वतन्त्राणि तथा मुख्योऽपि प्राणो राजमन्त्रिवत् जीवस्य सर्वार्थत्वेन उपकरणभूतो न स्वतन्त्रः। कुतः तत्सहशिष्ट्यादिभ्यः तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते, प्राणसंवादादिषु समानधर्माणाञ्च सहशासनं युक्तं बृहद्रथन्तरादिवत्। आदिशब्देन संहतत्वाचेतनत्वादीन् प्राणस्य स्वातन्त्र्यनिराकरणहेतून् दर्शयति। स्यादेतत् यदि चक्षुरादिवत् प्राणस्य जीवं

प्राणस्येति। यथा मृदो घटो न वस्त्वन्तरं नापि मृण्मात्रं तद्विकारत्वात् तथा वायोर्विकारः प्राण इत्यभेदश्रुतेर्गतिमाह। उच्यत इति। देहं प्राप्तः पञ्चावस्थो विकारात्मना स्थितो वायुरेव प्राण इत्यर्थः। प्राणस्य करणवृत्तित्वाभावे जीववत् भोक्तृत्वं स्यादिति शङ्कते। स्यादेतदिति॥

प्राणो न भोक्ता भोगोपकरणत्वात् चक्षुरादिवदिति सूत्रार्थमाह। तुशब्द इत्यादिना। यथा बृहद्रथन्तरयोः सर्वत्र सहप्रयुज्यमानत्वेन सामत्वेन वा साम्यात् सहपाठस्तथा करणैः सहोपकरणत्वेन साम्यात् प्राणस्य पाठ इति न हेत्वसिद्धिरित्यर्थः। किञ्च प्राणो न भोक्ता सा-

प्रति करणभावोऽभ्युपगम्येत विषयान्तरं रूपादिवत् प्रसज्येत रूपालोचनाद्याभिर्वृत्तिभिर्यथा चक्षुरादीनां स्वं जीवं प्रति करणभावो भवति। अपि चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेकादश प्राणाः संगृहीताः न तु द्वादशमपरं कार्य्यजातमवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञायत इति। अत उत्तरं पठति॥

अकरणत्वाच्च न दोषस्तथा हि दर्शयति॥ ११॥

न तावद्विषयान्तरप्रसङ्गो दोषः, अकरणत्वात् प्राणस्य। नहि चक्षुरादिवत् प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते। न चास्यैतावता कार्य्याभाव एव। कस्मात्, तथा हि श्रुतिः प्राणान्तरेष्वसम्भाव्यमानं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयति। प्राणसंवादादिषु "अथ ह प्राणा अहंश्रेयसे व्यूदिरे" इत्युपक्रम्य 'यस्मिन् व उत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः' इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणेन तद्वृत्ति-

---

वयवत्वाज्जडत्वाद्भौतिकत्वाच्च देहवत्। ननु यदङ्गोपकरणं तत् सविषयं दृष्टं यथा चक्षुरादिकं, प्राणस्य तु निर्विषयत्वादसाधारणकार्य्याभावाच्च नोपकरणत्वमिति शङ्कते। स्यादेतदिति॥

उक्तव्याप्तेः शरीरे व्यभिचाराद्देहेन्द्रियधारणोत्क्रान्त्याद्यसाधारणकार्य्यसत्त्वाच्च निर्विषयस्यापि प्राणस्य शरीरवदङ्गोपकरणत्वमङ्गीकृतं न तु चक्षुरादिवत् ज्ञानकर्मकरणत्वमस्ति येन सविषयत्वं स्यादिति परिहरति। न तावदित्यादिना। अहंश्रेयसे स्वस्य श्रेष्ठतानिमित्तं,

मात्रहीनं यथापूर्वं जीवनं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयित्वा प्राणोत्क्रिमिषायां वागादिशैथिल्यापत्तिं शरीरपातप्रसङ्गञ्च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति 'तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्वाणमवष्टभ्य विधारयामि' इति च। एतमेवार्थं श्रुतिराह। "प्राणेन रचन्नवरं कुलायं" इति च सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति। 'यस्मात् कस्माच्चाङ्गात् प्राण उत्क्रामति तदेव तच्छुष्यति तेन यदश्नाति यत् पिबति तेनेतरान् प्राणानवति' इति च प्राणनिमित्तां शरीरेन्द्रियपुष्टिं दर्शयति। 'कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते ऽहं प्रतिष्ठास्यामीति स प्राणमसृजत' इति प्राणनिमित्ते एव जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति॥

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते॥ १२॥

इतश्चास्ति मुख्यप्राणस्य वैशेषिकं कार्य्यं यत्कारणं पञ्चवृत्तिरयं व्यपदिश्यते श्रुतिषु 'प्राणोऽपानो व्यान उदानः स-

---

वूदिरे विवादं चक्रिरे। तद्वृत्तिमात्रहीनमिति मूकादिभावेन स्थितमित्यर्थः। अवरं नीचं, कुलायं देहाख्यं गृहं, प्राणेन रक्षञ्जीवः स्वपितीत्यर्थः। तदेव तदानीमेव, तेन प्राणेन यदश्नाति जीवः तेन प्राणकृताशनेनेति यावत्। एवंश्रुतेः प्राणस्यासाधारणं कार्य्यमस्तीत्युक्तं॥

तत्रैव हेत्वन्तरार्थं सूत्रं व्याचष्टे। इतश्चेत्यादिना। वृत्तिरवस्था।

मानः’ इति। वृत्तिभेदश्चायं कार्य्यभेदापेक्षः। ‘प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा, अपानोऽवाग्वृत्तिर्निश्वासादिकर्मा, व्यानः तयोः सन्धौ वर्त्तमानो वीर्य्यवत् कर्महेतुः, उदानः ऊर्द्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः, समानः समं सर्वेष्वङ्गेषु योऽन्नरसान्नयति’ इति। एवं पञ्चवृत्तिः प्राणः मनोवत् यथा मनसः पञ्चवृत्तयः एवं प्राणस्यापीत्यर्थः। श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पञ्च वृत्तयः प्रसिद्धाः। न तु कामः सङ्कल्प इत्याद्याः परिपठिताः परिगृह्येरन्, पञ्चसङ्ख्यातिरेकात्। नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयाऽपरा मनसो वृत्तिरस्तीति समानः पञ्चसङ्ख्यातिरेकः। एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिगृह्यन्ते प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयो नाम। बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यं। जीवोपकरणत्वमपि प्राणस्य पञ्चवृत्तित्वान्मनोवदिति योजयितव्यं॥

अभिमन्थनादिकं वीर्य्यवत् कर्म। कामादिवृत्तिवज्ज्ञानेऽपि पञ्चत्वनियमो नास्तीत्यरुचिं स्वयमेवोद्भाव्य पक्षान्तरं गृह्णाति। नन्वत्रापीत्यादिना। प्रमाणं प्रमितिः। विपर्य्ययो भ्रमः। शशविषाणादिज्ञानं विकल्पः। तामसी वृत्तिर्निद्रा। स्मृतिः प्रसिद्धा। भ्रमनिद्रयोरविद्यावृत्तित्वान्न मनोवृत्तित्वमित्यरुच्या स्वमतमाह। बह्विति। सूत्रस्यार्थान्तरमाह। जीवेति। तदेवं प्राणवायोर्भेदाभेदश्रुत्योरविरोध इति सिद्धं॥

अणुश्च ॥ १३ ॥

अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः इतरः प्राणवत्। अणुत्वञ्चेहापि सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, पञ्चभिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात्। सूक्ष्मः प्राण उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात्, परिच्छिन्नश्चोत्क्रान्तिगत्यागतिश्रुतिभ्यः। ननु विभुत्वमपि प्राणस्य समाम्नायते, "समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण" इत्येवमादिषु प्रदेशेषु। तदुच्यते, आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण प्राणात्मना एतद्विभुत्वमाम्नायते नाध्यात्मिकेन। अपि च समः प्लुषिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्त्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते तस्माददोषः॥

एवं मुख्यप्राणस्योत्पत्तिं स्वरूपञ्चोक्त्वा परिमाणसन्देहेऽणुत्वमुपदिशति। अणुश्चेति। अधिकाशङ्कामाह। ननु विभुत्वमपीति। प्लुषिर्मशकादपि सूक्ष्मो जन्तुः पुत्तिकेत्युच्यते। नागो हस्ती। प्राण उत्क्रामतीति श्रुत्याल्पत्वं प्राणस्य भाति, समोऽनेन सर्वेणेति श्रुत्या विभुत्वमिति विरोधे आध्यात्मिकप्राणस्याल्पत्वमाधिदैविकस्य विभुत्वमिति विषयभेदाच्छ्रुत्योरविरोधः इति समाधत्ते। तदुच्यत इति। किञ्चोपक्रमे प्राणस्य प्लुष्यादिसमत्वेनाल्पत्वोक्तेः सम एभिस्त्रिभिर्लोकैरिति विराड्देहसाम्यं। समोऽनेनेति सूत्रात्मत्वमिति विषयव्यवस्था सुस्थेत्याह। अपि चेति। अणवश्चेत्यत्र सर्वेऽनन्ता इति इन्द्रियानन्त्यमुपासनार्थमिति समाहितं, अत्र तु प्राणविभुत्वमाधिदैविकमिति समाधानान्तरोक्तेरपौनरुक्त्यं। अन्ये तु प्रसङ्गात्तत्र सांख्याक्षेपो निरस्तः अत्र तु श्रुतिविरोधो निरस्त इत्यपौनरुक्त्यमाहुः। पूर्वं प्राणस्याध्यात्मिकाधिदैविकविभागेनाप्यणुत्वविभुत्वव्यवस्थोक्ता॥

ज्योतिराद्यधिष्ठानन्तु तदामननात् ॥ १४ ॥

ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्य्याय प्रभवन्ति आहोस्विद्देवताधिष्ठिताः प्रभवन्तीति विचार्य्यते। तत्र प्राप्तं तावद्यथा स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्त्तेरन्निति। अपि च देवताधिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसङ्गात् शारीरस्य भोक्तृत्वं प्रलीयेत, अतः स्वमहिम्नैवैषां प्रवृत्तिरिति, एवं प्राप्त इदमुच्यते। ज्योतिराद्यधिष्ठानन्त्विति। तुशब्देन पूर्वपक्षो व्यावर्त्त्यते। ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्य्येषु प्रवर्तत इति प्रतिजानीते। हेतुश्च व्याचष्टे। तदामननादिति। तथा ह्यामनन्ति अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि। अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनाऽधिष्ठा-

---

तत्प्रसङ्गेनाध्यात्मिकानां प्राणानामाधिदैविकाधीनत्वमाह। ज्योतिराद्यधिष्ठानन्तु तदामननात्। 'वाचा हि नामान्यभिवदति चक्षुषा रूपाणि पश्यति' इति तृतीयाश्रुत्याऽन्वयव्यतिरेकवत्या वागादीनां निरपेक्षसाधनत्वोक्तिविरोधादग्निर्वाग्भूत्वेत्यादिश्रुतिस्तेषामचेतनाग्न्याद्युपादानकत्वपरा न तु तेषामधिष्ठातृदेवतापरा। न च स्वकार्य्ये शक्तानामपि वागादीनामचेतनत्वादधिष्ठातृपेक्षा न विरुध्यत इति वाच्यं, जीवस्याधिष्ठातृत्वात्। किञ्च देवतानामधिष्ठातृत्वे जीववद्भोक्तृत्वमस्मिन् देहे स्यात्, तथा चैकत्रानेकभोक्तॄणां विरोधात् दुर्बलस्य जीवस्य भोक्तृत्वं न स्यादिति पूर्वपक्षार्थः। सिद्धान्तयति। एवं प्राप्त इत्यादिना। अग्निर्वाग्भूत्वादित्यश्चक्षुर्भूत्वेति च तद्भावोऽग्न्यादिदेवताधिष्ठेयत्वरूप एव सम्बन्धो न तदुपादानकत्वरूपो दूरस्थादित्य-

त्वमङ्गीकृत्योच्यते। नहि देवतासम्बन्धं प्रत्याख्यायाग्नेर्वाचि मुखे वा कश्चिद्विशेषः सम्बन्धो दृश्यते। तथा 'वायुः प्राणो भूत्वा नासिके प्राविशत्' इत्येवमाद्यपि योजयितव्यं। तथान्यत्रापि 'वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च' इत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्ववचनेनैतमेवार्थं द्रढयति। 'स वै वाचमेव प्रथमामत्यवहत् सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवदिति च' एवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति। सर्वत्र चाध्यात्माधिदैवतविभागेन वागाद्यग्न्याद्यनुक्रमणमनयैव प्रत्यासत्त्या भवति। स्मृतावपि।

'वागध्यात्ममिति प्राहुः ब्राह्मणास्तत्त्वदर्शिनः।
वक्तव्यमधिभूतन्तु वह्निस्तत्राधिदैवतम्'॥

इत्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं सप्रपञ्चं प्रदर्शितं। यदुक्तं स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्त्ते-

---

मण्डलादेर्मुखस्य चक्षुराद्युपादानत्वासम्भवादित्याह। अग्निर्वागिति। वायुः प्राणाधिष्ठाता भूत्वा नासापुटे प्राविशदिति व्याख्येयमित्याह। तथेति। भाति दीप्यते, तपति स्वकार्य्यं करोतीत्यर्थः। एतस्मिन्नधिष्ठात्रधिष्ठेयत्वरूपार्थे लिङ्गान्तरमाह। स वै वाचमिति। स प्राणो वाचं प्रथमामुद्गीथकर्म्मणि प्रधानामन्तरादिपाप्मरूपं मृत्युमतीत्यावहन्मृत्युना मुक्तां कृत्वा अग्निदेवतात्मत्वं प्रापितवानित्यर्थः। किञ्चास्मिन्नर्थे वागप्येति वातं प्राणः चक्षुरादित्यमित्यादिश्रुतिरप्यधिष्ठात्रधिष्ठेयत्वे सम्बन्धं द्योतयतीत्याह। सर्वत्रेति। ननु शकटादीनां बलीवर्द्दादिप्रेरितानां प्रवृत्तिर्दृष्टा, क्षीरादीनान्त्वनधिष्ठितानामपि दध्यादिप्रवृत्तिर्दृश्यते, तथा चोभयथासम्भवे कथं निश्चयस्तत्राह।

रस्मिति, तदयुक्तं। शक्तानामपि शकटादीनामनडुहाद्यधिष्ठितानां प्रवृत्तिदर्शनात्। उभयथोपपत्तौ चागमाद्देवताधिष्ठितत्वमेव निश्चीयते। यदप्युक्तं देवतानामेवाधिष्ठात्रीणां भोक्तृत्वप्रसङ्गो न शारीरस्य जीवस्येति तत् परिह्रियते॥

प्राणवता शब्दात्॥ १५॥

सतीष्वपि प्राणानामधिष्ठात्रीषु देवतासु प्राणवता कार्य्यकरणसङ्घातस्वामिना शारीरेणैवैषां प्राणानां सम्बन्धः श्रुतेरवगम्यते। तथा हि श्रुतिः 'अथ यत्रैतदाकाशमनुप्रविषसं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्' इत्येवंजातीयका शारीरेणैव प्राणानां सम्बन्धं श्रावयति। अपि चानेकत्वात् प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्वमस्मिन् शरीरेऽवकल्पते। एको ह्ययमस्मिन् शरीरे शारीरो भोक्ता प्रतिसन्धानादिसम्भवादवगम्यते॥

उभयथोपपत्तौ चेति। उक्तदोषान्तरनिरासाय सूत्रमवतारयति। यदपीति॥

शारीरेणैवेति। भोक्त्रेति शेषः। सम्बन्धो भोक्तृभोग्यभावः। अथ देहे प्राणप्रवेशानन्तरं यत्र गोलके एतच्छिद्रमनुप्रविष्टं चक्षुरिन्द्रियं तत्र चक्षुष्यभिमानी स आत्मा चाक्षुषः तस्य रूपदर्शनाय चक्षुः। यद्यप्यात्मा करणान्यपेक्षते तथापि स्वियज्ञानतदाश्रयाहङ्कारं यो वेद स आत्मा चिद्रूप एव, करणानि तु गन्धादिप्रवृत्तयेऽपेक्ष्यन्ते न चैतन्यायेति श्रुत्यर्थः। किञ्च योऽहं रूपमद्राक्षं स एवाहं शृणोमीति प्रतिसन्धानादेकः शारीर एव भोक्ता न बहवो देवा इत्याह। अपि चेति॥

तस्य च नित्यत्वात् ॥ १६ ॥

तस्य च शारीरस्यास्मिन् शरीरे भोक्तृत्वेन नित्यत्वं पुण्य-पापोपलेपसम्भवात् सुखदुःखोपभोगसम्भवाच्च न देवतानां। ता हि परस्मिन्नैश्वर्य्ये पदेऽवतिष्ठमाना न हीनेऽस्मिंच्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति। श्रुतिश्च भवति 'पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति' इति शारीरेणैव च नित्यः प्राणानां सम्बन्धः। उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात्। 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्यादिश्रुतिभ्यः। तस्मात् सतीष्वपि करणानां नियन्त्रीषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति, करणपक्षस्यैव हि देवता न भोक्तृत्वपक्षस्येति ॥

कदाचिद्देवानामन्नभोक्तृत्वं कदाचिज्जीवस्येत्यनियमोऽस्त्वित्याशङ्क्य स्वकर्म्मार्जिते देहे जीवस्य भोक्तृत्वनियमान्नैवमित्याह सूत्रकारः। तस्य चेति। उत्क्रमणादिषु जीवस्य प्राणाव्यभिचारात्तस्यैव प्राणस्वामित्वं, देवतानान्तु परस्वामिकरथसारथिवदधिष्ठातृत्वमात्रमिति व्याख्यान्तरमाह। शारीरेणैव च नित्य इति। यथा प्रदीपादिः करणोपकारकतया करणपक्षस्यान्तर्गतस्तथा देवाः करणोपकारिण एव न भोक्तार इत्यर्थः। जीवस्यादृष्टद्वारा करणाधिष्ठातृत्वाद्रथस्वामिवद्भोक्तृत्वं, देवानान्तु करणोपकाराभिज्ञतया सारथिवदधिष्ठातृत्वमिति न जीवेनान्यथासिद्धिः। देवानामधिष्ठातृत्वेनास्मिन् देहे भोक्तृत्वानुमानन्तु न ह वै देवान् पापं गच्छतीत्युक्तश्रुतिबाधितं, तस्माच्चक्षुषा हि रूपाणि पश्यतीति श्रुतेः साधनत्वमात्रबोधित्वादग्निर्वाग्भूत्वेत्याद्यधिष्ठातृदेवतापेक्षाबोधकश्रुतिभिरविरोध इति सिद्धं ॥

न इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

मुख्यश्चैक इतरे चैकादश प्राणा अनुक्रान्ताः, तत्रेदमपरं सन्दिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहो-स्वित् तत्त्वान्तराणीति। किन्तावत् प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति। कुतः श्रुतेः। तथा हि श्रुतिर्मुख्यमितरांश्च प्राणान् सन्निधाप्य मुख्यात्मतामितरेषां ख्यापयति 'हन्तास्यैव सर्वे रूप-ससामेति तत्र तस्यैव सर्वे रूपमभवन्' इति। प्राणैकश-ब्दत्वाच्चैकत्वाध्यवसायः, इतरथा ह्यन्याय्यमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्र वा मुख्यत्वमितरत्र वा लाक्षणिकत्वमापद्येत। तस्माद् यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तयः एवं वागाद्या अप्येकादशेत्येवं प्राप्ते ब्रूमः। तत्त्वान्तराण्येव प्राणाद्वागादी-नीति। कुतः, व्यपदेशभेदात्। कोऽयं व्यपदेशभेदः, ते प्रकृ-ताः प्राणाः श्रेष्ठं वर्जयित्वाऽवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते।

सत्स्विन्द्रियेषु तदधिष्ठातृदेवताचिन्ता तान्येव प्राणवृत्तिव्यतिरेकेण न सन्तीत्याक्षेपं प्रत्याह। न इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्। प्राणादिन्द्रियाणां भेदाभेदश्रुतिभ्यां संशयं वदन् पूर्वपक्षयति। मुख्य-स्येत्यादिना। हन्त इदानीमस्यैव मुख्यप्राणस्य सर्वे वयं स्वरूपं भवा-मेति सङ्कल्प्यते वागादयस्तथाऽभवन्नित्यभेदश्रुत्यर्थः। ते प्राणादभिन्नाः प्राणपदवाच्यत्वात् प्राणवदित्याह। प्राणेति। ते प्राणाः श्रेष्ठादन्यत्रान्य इति प्रतिज्ञार्थत्वेन पदत्रयं व्याचष्टे। तत्त्वान्तराण्येवेति। तद्व्यपदेशा-दित्यत्र तच्छब्दः प्रतिज्ञातान्यत्वं परामृशति। प्राणा इन्द्रियाणीति। अप-र्यायशब्दाभ्यामन्यत्वोक्तेरिति हेतूपपादनार्थत्वेन पुनस्तानि सूत्रपदानि योजयति। क इत्यादिना। सूत्रस्य विश्वतोमुखत्वादुभयार्थत्वमलङ्कार एव न दूषणं, एतेन प्रतिज्ञाध्याहारः तच्छब्दस्याप्रकृतभेदपराम-

श्रुतावेवं व्यपदेशभेददर्शनात्। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इत्येवंजातीयकेषु श्रुतिप्रदेशेषु पृथक् प्राणो व्यपदिश्यते पृथक् चेन्द्रियाणि। ननु मनसोऽप्येवं सति वर्जनम् *इन्द्रियत्वेन प्राणवत् स्यात् 'मनः सर्वेन्द्रियाणि च' इति पृथक् व्यपदेशभेददर्शनात्। सत्यमेतत्, स्मृतौ तु एकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते, प्राणस्य त्विन्द्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं †तत्त्वभेदपक्षे उपपद्यते। तत्त्वैकत्वे तु 'स एवैकः सन् प्राण इन्द्रियव्यपदेशं लभते न लभते च' इति विप्रतिषिद्धं, तस्मात्तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे॥

भेदश्रुतेः॥ १८॥

भेदेन च वागादिभ्यः प्राणः सर्वत्र श्रूयते। 'ते ह वाचमूचुः'

र्भिन्नत्वश्चेति दोषद्वयमपास्तं। शब्दभेदाद्वस्तुभेदसाधनेऽतिप्रसङ्गं शङ्कते। नन्विति। प्राणवन्मनसोऽपि इन्द्रियेभ्यो भेदः स्यादित्यर्थः। अपर्य्यायसंज्ञाभेदात् स्वतन्त्रसंज्ञिवस्तुभेद इत्युत्सर्गः। स च मनःषष्ठानीन्द्रियाणीत्यादिस्मृतिबाधान्मनस्यपोद्यते, प्राणे तु बाधकाभावादुत्सर्गसिद्धिरिति समाधत्ते। सत्यमित्यादिना। मन इन्द्रियाणि चेति भेदोक्तिर्गोबलीवर्दन्यायेन नेया। सिद्धान्ते मनसः प्रथमोपादानत्वादात्मवदनिन्द्रियत्वमिष्टं ततो नोत्सर्गबाध इति केचित्। किञ्चैतस्माज्जायते प्राण मनः सर्वेन्द्रियाणि चेति पृथक्जन्मव्यपदेशात् स्वतन्त्रवस्तुभेद इत्याह। व्यपदेशभेदश्चायमिति। एकस्मिन् वाक्ये प्राण इन्द्रियशब्दमैक्याल्लभते पुनरुक्तिभयान्न लभते चेति व्याख्यात इत्यर्थः॥

एवं भेदेनापर्य्यायसंज्ञाभ्यामुक्तेः पृथक्जन्मोक्तेश्चेति तद्व्यपदेशादिति

---

* इन्द्रियत्वे इति वर्ध० का०।
† तत्त्वभेदे सतीति वर्ध० का०।

इत्युपक्रम्य वागादीनसुरपाप्मविध्वस्ताननुपन्यस्योपसंहृत्य वागादिप्रकरणं, 'अथ हेममासन्यं प्राणमूचुः' इत्यसुरविध्वंसिनो मुख्यस्य प्राणस्य पृथगुपक्रमात्, तथा 'मनो वाचं प्राणं तान्यात्मनेऽकुरुत' इत्येवमाद्या अपि भेदश्रुतय उदाहर्त्तव्याः। तस्मादपि तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे॥

वैलक्षण्याच्च॥ १९॥

वैलक्षण्यञ्च भवति मुख्यप्राणस्येतरेषाञ्च सुप्तेषु वागादिषु मुख्य एको जागर्त्ति स एव चैको मृत्युनाऽनाप्तः। आप्तास्त्वितरे तस्यैव प्राणस्यावस्थित्युत्क्रान्तिभ्यां देहधारणपातनहेतुत्वं नेन्द्रियाणां विषयालोचनहेतुत्वञ्चेन्द्रियाणां न प्राणस्येत्येवंजातीयको भूयान् लक्षणभेदः प्राणेन्द्रियाणां। तस्मादप्येषां तत्त्वान्तरभावसिद्धिः। यदुक्तं 'तत्र तस्यैव सर्वे रूपमभवन्' इति श्रुतेः प्राण एवेन्द्रियाणीति, तदयुक्तं। तत्रापि पौर्वापर्य्यालोचनाद्भेदप्रतीतेः।

हेतुर्व्याख्यातः। भेदश्रुतेरिति सूत्रेण प्रकरणभेदो हेतुरुक्त इति न पौनरुक्त्यं। ते देवाः प्राणोयेन्द्रियमनोवृत्तिरूपाः असुराणां पापवृत्तिरूपाणां जयार्थमुद्गीथकर्म्मणि प्रथमं व्याप्ततां वाचमूचुस्त्वन्न उद्गायासुरनाशार्थमिति तथास्त्वित्यङ्गीकृत्योद्गायन्तीं वाचमनृतादिदोषेण विध्वंसितवन्तोऽसुरा इत्येवं क्रमेण सर्वेष्विन्द्रियेषु पापग्रस्तेषु पश्चादथेति प्रकरणं विच्छिद्य प्रसिद्धमास्ये भवमासन्यं मुख्यं प्राणमूचुस्त्वन्न उद्गायेति तेन प्राणेनोद्गाता निर्विषयतया सङ्गदोषशून्येनासुरा नष्टा इत्यसुराणां विध्वंसिनो मुख्यप्राणस्योक्तेर्भेदसिद्धिरित्याह। ते हेति। तानि त्रीण्यन्यान्यात्मने स्वार्थं प्रजापतिः कृतवानित्यर्थः॥

विरुद्धधर्म्मवत्त्वाच्च। भेद इत्याह। वैलक्षण्यञ्चेति। मृत्युरासङ्गदोषः। वागादयो हतवत,त्यर्थः। बहुभिर्भेदलिङ्गैर्विरोधाद्वागादीनां प्राण-

तथा हि 'वदिष्याम्येवाहमिति वाग्दध्रे' इति वागादीनीन्द्रियाण्यनुक्रम्य 'तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वाक्' इति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधाय 'अथेममेव नाप्नोत् योऽयं मध्यमः प्राणः' इति पृथक् प्राणं मृत्युनानभिभूतमनुक्रामति। 'अयं वै नः श्रेष्ठः' इति च श्रेष्ठतामस्यावधारयति। तस्मात्तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तु तादात्म्यं। अतएव प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वसिद्धिः। तथा च श्रुतिः 'त एतस्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायन्ते प्राणाः' इति मुख्यप्राणविषयस्यैव प्राणशब्दस्य इन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति। तस्मात्तत्त्वान्तराणि प्राणाद्वागादीन्द्रियाणीति॥

संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥ २०॥

सत्प्रक्रियायां तेजोऽबन्नानां *सृष्टिमभिधायोपदिश्यते। 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानु-

---

रूपभवनं प्राणाधीनस्थितिकत्वरूपं व्याख्येयं। एतदेव प्राणशब्दस्येन्द्रियेषु लक्षणाबीजं श्रुतौ तस्मादेत एतेनाख्यायन्त इति परामृष्टमिति न भेदाभेदश्रुत्योर्विरोध इति सिद्धं॥

उत्पत्तिवत्पादनेति च कार्य्यकर्त्रोर्व्यापारौ प्रसिद्धौ, तत्र जगदुत्पत्तिश्रुतिविरोधः अतीतेन पादद्वयेन निरस्तः, इन्द्रियोपादानश्रुतिविरोधो निरस्यते। तथापि सूक्ष्मभूतोत्पादनं पारमेश्वरमेवेति श्रुत्यविप्रतिपन्नं, स्थूलभूतोत्पादने त्वस्ति श्रुतिविप्रतिपत्तिरिति तन्निरासार्थमाह। संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। नामरूप-

---

* सृष्टिं विधायेति का० वर्ध०।

प्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति। तत्र संशयः किं जीवकर्तृकमिदं नामरूपव्याकरणमाहोस्वित् परमेश्वरकर्तृकमिति। तत्र प्राप्तं तावत् जीवकर्तृकमेवेदं नामरूपव्याकरणमिति। कुतः, अनेन जीवेनात्मनेति विशेषणात्। यथा लोके चारेणाहं परसैन्यमनुप्रविश्य सङ्कलयामीत्येवंजातीयके प्रयोगे चारकर्तृकमेव *सत्सैन्यसङ्कलनं हेतुकर्तृत्वाद्राजात्मन्यध्यारोपयति सङ्कलयामीत्युत्तमपुरुषप्रयोगेण, एवं जीवकर्तृकमेव सन्नामरूपव्याकरणं हेतुकर्तृत्वाद्देवतात्मन्यध्यारोपयति व्याकरवाणीत्युत्तमपुरुषप्रयोगेण। अपि च डित्थडवित्थादिषु नामसु घटशरावादिषु च रूपेषु जीवस्यैव व्याकर्तृत्वं दृष्टं, तस्माज्जीवकर्तृकमेवेदं नामरूपव्याकरणमित्येवं प्राप्तेऽभिधत्ते। संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत इति।

भेदात् करणभिन्नः प्राण इत्युक्तं, तत्प्रसङ्गेन स्थूलनामरूपक्लृप्तिः किंकर्तृकेति चिन्त्यत इत्यवान्तरसङ्गतिः। प्रक्रिया प्रकरणं। ईक्षणमेवाह। हन्तेत्यादिना। हन्त इदानीं देवताः सूक्ष्मा अनुप्रविश्येति सम्बन्धः। तासां तिसृणां देवतानामेकैकां देवतां तेजोऽबन्नात्मना त्र्यात्मिकां करिष्यामीति श्रुतिः पञ्चीकरणोपलक्षणार्था। छान्दोग्येऽप्याकाशवाय्वोरुपसंहारस्योक्तत्वात्। एवं स्थूलीकृतेषु भूतेषु प्राणिनां व्यवहारः सेत्स्यतीति परदेवतायास्तात्पर्यं। जीवेनेतिपदस्य व्याकरवाणीत्यनेन सम्बन्धसम्भवासम्भवाभ्यां संशयमाह। तत्रेति। पूर्वपक्षे जीवस्यैव भौतिकस्रष्टृत्वाद्ब्रह्मणः सर्वस्रष्टृत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलं। जीवेनेत्यस्य व्याकरवाणीतिप्रधानक्रियापदेन सम्बन्ध इति पूर्वपक्षमाह। तत्र प्राप्तमिति। परदेवताया अकर्तृत्वे कथमुत्तमपुरुषप्रयोग इत्याशङ्क्य प्रयोजकत्वात् कर्तृत्वोपचार इत्याह। यथा

---

* परसैन्येति वर्ध० का०।

तुशब्देन पक्षं व्यावर्तयति। संज्ञामूर्तिक्लृप्तिरिति नामरूपव्याक्रियेत्येतत् त्रिवृत्कुर्वत इति परमेश्वरं लक्षयति, त्रिवृत्करणे तस्य निरपवादकर्तृत्वनिर्देशात्। येयं संज्ञाक्लृप्तिर्मूर्तिक्लृप्तिश्चाग्निरादित्यश्चन्द्रमा विद्युदिति तथा कुशकाशपलाशादिषु पशुमृगमनुष्यादिषु च प्रत्याकृति प्रतिव्यक्ति चानेकप्रकारा सा खलु परमेश्वरस्यैव तेजोऽबन्नानां निर्मातुः कृतिर्भवितुमर्हति। कुतः उपदेशात्। तथा हि सेयं देवतेत्युपक्रम्य व्याकरवाणीत्युत्तमपुरुषप्रयोगेण परस्यैव ब्रह्मणो व्याकर्तृत्वमिहोपदिश्यते। ननु जीवनेति विशेषणाज्जीवकर्तृकत्वं व्याकरणस्याध्यवसितुं नैतदेवं जीवेनेत्येतदनुप्रविश्येत्यनेन सम्बध्यते आनन्तर्यात् न व्याकरवाणीत्यनेन। तेन हि सम्बन्धे व्याकरवाणीत्ययं देवताविषय उत्तमपुरुष औपचारिकः कल्प्येत। न च गिरिनदीसमुद्रादिषु नानाविधेषु नामरूपेषु अनीश्वरस्य जीवस्य

लोक इति। सिद्धान्तयति। तुशब्देनेत्यादिना। प्रत्याकृति प्रतिजातीत्यर्थः। अनेन स्थूलसर्गे जीवस्यासामर्थ्यं द्योतितं। तथा च पदान्वयस्य पदार्थयोग्यताधीनत्वाज्जीवरूपेण प्रविश्याहमेव व्याकरवाणीत्यन्वयः न तु जीवेन व्याकरवाणीति। ननु तर्हि प्रवेशक्रिया जीवकर्तृका व्याकरणमीश्वरकर्तृकमिति कर्तृभेदात् क्त्वाप्रत्ययो न स्यादित्यत आह। न च जीवो नामेति। वस्तुतस्तु सूर्यो जले प्रविष्ट इति प्रतिबिम्बभावाख्यप्रवेशे सूर्यस्यैव कर्तृत्वप्रयोगाज्जीवात्मना प्रवेशेऽपीश्वर एव कर्तेति क्त्वाश्रुतिर्युक्तेति बोध्यं। नन्वभेदश्चेज्जीव एव व्याकर्ता किं न स्यादित्याशङ्क्य कल्पनया भिन्नस्य तस्याशक्यत्वाच्छ्रुतिविरोधाच्च नैवमित्याह। परमेश्वर इति। प्रत्येकं महाभूतसर्गस्य प्रागुक्तत्वा-

व्याकरणसामर्थ्यमस्ति, येष्वपि चास्ति सामर्थ्यं तेष्वपि परमेश्वरायत्तमेव तत्। न च जीवो नाम परमेश्वरादत्यन्तभिन्नश्चार इव राज्ञः, आत्मेति विशेषणात्, उपाधिमात्रनिबन्धनत्वाच्च जीवभावस्य। तेन तत्कृतमपि नामरूपव्याकरणं परमेश्वरकृतमेव भवति। परमेश्वर एव च नामरूपयोर्व्याकर्तेति सर्वोपनिषत्सिद्धान्तः। 'आकाशो ह वै नाम नामरूपयोर्निर्वहिता' इत्यादिश्रुतिभ्यः। तस्मात् परमेश्वरस्यैव त्रिवृत्कुर्वतः कर्म नामरूपव्याकरणं, त्रिवृत्करणपूर्वकमेवेदमिह नामरूपव्याकरणं विवक्ष्यते। प्रत्येकं नामरूपव्याकरणस्य तेजोऽबन्नोत्पत्तिवचनेनैवोक्तत्वात्, तच्च त्रिवृत्करणमग्न्यादित्यचन्द्रविद्युत्सु श्रुतिर्दर्शयति 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य' इत्यादिना। तत्राग्निरितीदं रूपं व्याक्रियते। सति च रूपव्याकरणे विषयप्रतिलम्भादग्निरितीदं नाम व्याक्रियते। एवमेवादित्यचन्द्रविद्युत्स्वपि

दिह व्याकरणवाक्ये यत्नपूर्वकस्थूलभौतिकसर्ग उच्यते इति पाठव्यत्ययेन सूचितं श्रुत्यर्थमाह। त्रिवृत्करणपूर्वकमिति। ईश्वरकृतं त्र्यात्मत्वमिति क्व दृष्टमित्यत आह। तच्चेति। इदानीं नामरूपव्याकरणे क्रममाह। तत्राग्निरिति। यद्यप्यतः प्रभवादित्यत्र वेदशब्दपूर्विकाऽर्थसृष्टिरुक्ता तथाप्यव्यक्तात् स्मृताच्छब्दादर्थसृष्टौ सत्यां स्फुटनामसन्धाभिव्यक्तिरत्रोक्तेत्यविरोधः। नन्वग्न्यादीनां तैजसानामेव श्रुतावुदाहरणात् भूजलयोस्त्र्यात्मकत्वं न विवक्षितमित्यत आह। अन्नं चेति। उपक्रमे तासां मध्य इति शेषः। यत्कपालरूपादिकं कृष्णत्वादिविशेषाकारेणाविज्ञातमिव भवति तद्देवतानां समुदय-

द्रष्टव्यं। अनेन चाग्न्याद्युदाहरणेन भौमाम्भसतैजसेषु त्रिष्वपि द्रव्येष्वविशेषेण त्रिवृत्करणमुक्तं भवति, उपक्रमोपसंहारयोः साधारणत्वात्। तथा हि अविशेषेणैवोपक्रमः 'इमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति' इति। अविशेषेणैव चोपसंहारः 'यदु रोहितमिवाभूत्' इति तेजसस्तद्रूपमित्येवमादिः 'यदविज्ञातमिवाभूत्' इत्येतासामेव देवतानां समास इत्येवमन्तः। तासां तिसृणां देवतानां बहिस्त्रिवृत्कृतानां सतीनामध्यात्ममपरं त्रिवृत्करणमुक्तं 'इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति' इति। तदिदानीमाचार्यो यथाश्रुत्यैवोपदर्शयत्याशङ्कितं कञ्चित् दोषं परिहरिष्यन्॥

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥

भूमेस्त्रिवृत्कृतायाः पुरुषेणोपयुज्यमानाया मांसादि कार्यं यथाशब्दं निष्पद्यते। तथा हि श्रुतिः 'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' इति। त्रिवृत्कृता भूमिरेवैषा व्रीहियवाद्यन्नरूपेणाद्यत इत्यभिप्रायः। तस्याश्च

रूपमित्यर्थः। बाह्यं त्रिवृत्करणमुक्त्वाध्यात्मिकमपरं पूर्वोक्तलक्ष्यं वदन् उत्तरसूत्रमवतारयति। तासामित्यादिना। पुरुषशरीरं प्राप्यैकैका त्रिवृद्भवति कार्यत्रयात्मना भवतीत्यर्थः। उत्तरसूत्रेण शङ्कितं दोषं निरसितुमादौ भाष्यविषयमाध्यात्मिकत्रिवृत्करणं दर्शयतीति भाष्यार्थः॥

स्थविष्ठं रूपं पुरीषभावेन बहिर्निर्गच्छति, मध्यममध्यात्मं मांसं वर्धयति, अणिष्ठन्तु मनः। एवमितरयोरप्तेजसोर्यथाशब्दं कार्यमवगन्तव्यं 'मूत्रं लोहितं प्राणस्तापां कार्यं अस्थि मज्जा वाक् तेजसः' इति। अत्राह यदि सर्वमेव त्रिवृत्कृतं भूतभौतिकं अविशेषश्रुतेः 'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इति, किं कृतस्तर्ह्ययं विशेषव्यपदेशः, 'इदं तेज इमा आप इदमन्नं' इति। तथा 'अध्यात्ममिदमन्नस्याशितस्य कार्यं मांसादि इदमपां पीतानां कार्यं लोहितादि इदं तेजसोऽशितस्य कार्यमस्थ्यादि' इति। अत्रोच्यते॥

वैशेष्यात्तु तद्वादस्तद्वादः॥ २२॥

तुशब्देन चोदितं दोषमपनुदति। विशेषस्य भावो वैशेष्यं, भूयस्त्वमिति यावत्। सत्यपि त्रिवृत्करणे क्वचित् कस्यचित् भूतधातोर्भूयस्त्वमुपलक्ष्यते 'अग्नेस्तेजोभूयस्त्वमुदकस्याब्भूयस्त्वं पृथिव्या अन्नभूयस्त्वं' इति। व्यवहारप्रसिद्ध्यर्थश्चेदं त्रिवृत्करणं। व्यवहारस्य त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगोचरो लोकस्य प्रसिध्येत्। तस्मात् सत्यपि त्रिवृत्करणे वैशे-

---

नन्वन्नमयं मांसादि कथं भौममित्यत आह। त्रिवृत्कृता भूमिरेवेति। प्राणस्य वायोरपकार्यत्वं औपचारिकं द्रष्टव्यं॥

एवं विषयमुक्त्वा दोषं शङ्कते। अत्राहेति। तदुत्तरत्वेन सूत्रं व्याचष्टे। तुशब्देनेति। स्वभागाधिक्यं वैशेष्यं किमर्थं कृतमित्यत

स्यादेष तेजोऽबन्नविशेषवादो भूतभौतिकविषय उपपद्यते। तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति॥

इति श्रीमच्छारीरकमीमांसाभाष्ये शङ्करभगवत्पादकृतौ द्वितीयस्याध्यायस्य चतुर्थः पादः॥ ० ॥

अध्यायश्च समाप्तः।

आह। व्यवहारप्रसिद्ध्यर्थमिति। एवं स्मृतिन्यायमतान्तरश्रुतिभिरविरोधो ब्रह्मणि वेदान्ततात्पर्यस्येति सिद्धं॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दानन्दभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां द्वितीयाध्यायस्य चतुर्थः पादः॥ * ॥

अध्यायश्च समाप्तः॥

ॐ परमात्मने नमः ।

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्न-
निरूपणाभ्यां ॥ १ ॥

द्वितीयेऽध्याये स्मृतिन्यायविरोधो वेदान्तविहिते ब्रह्मदर्शने परिहृतः, परपक्षाणाञ्चानपेक्षत्वं प्रपञ्चितं, श्रुतिविप्रतिषेधश्च परिहृतः, तत्र च जीवव्यतिरिक्तानि तत्त्वानि जीवोपकरणानि ब्रह्मणो जायन्त इत्युक्तं । अथेदानीमुपकरणोपहितस्य जीवस्य संसारगतिप्रकारस्तदवस्थान्तराणि ब्रह्मसतत्त्वं विद्याभेदाभेदौ गुणोपसंहारानुपसंहारौ सम्यग्दर्शनात् पुरुषार्थसिद्धिः सम्यग्दर्शनोपायविधिप्रभेदो मुक्तिफलानियमश्चेत्येत-

---

ॐ ब्रह्मणे नमः ।

यं हि वैराग्यसम्पन्नास्तत्त्वमर्थविवेकिनः ॥
लभन्ते साधनैर्दान्तास्तं सीतानायकं भजे ॥ १ ॥

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्यां । वृत्तमनूद्य तृतीयाध्यायार्थमाह । द्वितीय इत्यादिना । अविरुद्धे वेदान्तार्थे तज्ज्ञानसाधनचिन्तावसर इत्यनयोर्हेतुहेतुमद्भावः । लिङ्गोपाधिसिद्धौ तदुपहितजीवसंसारचिन्तेति पादयोरपि तद्भावसङ्गतिः । अत्र प्रथमपादे वैराग्यं । द्वितीये स्वप्नाद्यवस्थोक्ता त्वंपदार्थो ब्रह्मतत्त्वञ्चोच्यते । तृतीये वाक्यार्थस्तदर्थमुपासनाश्च विचार्यन्ते । चतुर्थपादार्थमाह । सम्यग्दर्शनादिति । दर्शनोपायाः सन्न्यासादयः । मुक्तिरूपफलस्य स्वर्ग-

दर्थजातं तृतीयेऽध्याये निरूपयिष्यते प्रसङ्गागतञ्च किमप्यन्यत्। तत्र प्रथमे तावत् पादे पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते, वैराग्यहेतोस्तस्माज्जुगुप्सेतेति चान्ते *श्रवणात्। जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्को विद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यत इत्येतदवगतं। 'अथैनमेते प्राणा अभिसमायन्ति' इत्येवमादेः 'अन्यन्नवतरं कल्याणतरं रूपं कुरुते' इत्येवमन्तात् संसारप्रकरणस्थाच्छब्दात्, धर्माधर्मफलोपभोगसम्भवाच्च। स किं देहबीजैर्भूतसूक्ष्मैरसम्परिष्वक्तो गच्छति आहोस्वित् सम्परिष्वक्त इति चिन्त्यते। किन्तावत् प्राप्तं असम्परिष्वक्त इति। कुतः, करणोपादानवद्भूतोपादानस्याश्रुतत्वात्। 'स एतास्तेजोमात्राः समभ्याददानः' इत्यत्र तेजोमात्राशब्देन करणानामुपादानं सङ्कीर्तयति, वाक्यशेषे चक्षुरादिसङ्कीर्तनात्। नैवंभूतमात्रोपादानसङ्कीर्तनमस्ति सुलभास्च सर्वत्र भूतमात्राः, यत्रैष देह आरब्धव्यस्तत्रैव सन्ति

वत्तारतम्यनियमाभावः एकरूपमिति यावत्। प्रसङ्गागतं देहात्मदूषणं। पञ्चसु द्युपर्जन्यपृथिवीपुरुषयोषित्स्वग्नित्वध्यानं पञ्चाग्निविद्या। यस्मात् कर्मणा गत्यागतिरूपोऽनर्थस्तस्मात् कर्मफले जुगुप्सां धारणाविरक्तिं कुर्वीतेति पञ्चाग्निविद्योपसंहारे श्रवणाद्वैराग्यार्थं प्रदर्श्यते इत्यन्वयः। शास्त्रादिसूत्रे नित्यानित्यविवेककृतं वैराग्यमुक्तं इह तद्दार्ढ्यं गत्यागतिक्लेशभावनाकृतं तदुच्यत इत्यपौनरुक्त्यं। अधिकरणविषयमाह। जीव इति। अविद्या प्रसिद्धा। विद्येति पाठे उपासना ग्राह्या। कर्म धर्माधर्माख्यं, पूर्वप्रज्ञा जन्मान्तरसंस्कारः। अथ मरणकाले प्राणा हृदये जीवेनैकीभवन्तीत्यर्थः। रूपं शरीरं, पञ्चीकृतभूतभागाः उत्तर-

* श्रवणादिति वर्धं० का० नास्ति।

ततश्च तासां नयनं निष्प्रयोजनं, तस्मात् संपरिष्वक्तो यातीत्येवं प्राप्ते पठत्याचार्यः। तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त इति। तदन्तरप्रतिपत्तौ देहात् देहान्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः सम्परिष्वक्तो रंहति गच्छतीत्यवगन्तव्यं। कुतः प्रश्ननिरूपणाभ्यां। तथाहि प्रश्नः 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति। निरूपणञ्च प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति। तस्माद्-द्भिः परिवेष्टितो जीवो रंहति व्रजतीति गम्यते। नन्वन्या श्रुतिः 'जलौकावत् पूर्वदेहं न मुञ्चति यावन्न देहान्तरमाक्रमतीति

देहपरिणामिनो भूतसूक्ष्माः। वेदान्तार्थज्ञानसाधनविचारत्वात् सर्वाधिकरणानां, श्रुतिशास्त्राध्यायसङ्गतयः वैराग्यफलकत्वादेतत्पादसङ्गतिः। पूर्वाधिकरणे व्यवहारार्थं पञ्चीकरणमुक्तं स व्यवहारोऽत्र निरूप्यत इति फलफलिभावोऽवान्तरसङ्गतिः। अत्र पूर्वपक्षे निराश्रयप्राणगत्यभावात् न वैराग्यं सिध्यति, सूत्राश्रयप्राणगतेर्वैराग्यमिति फलभेदः। तेजोमात्रास्चक्षुरादयः, पश्यति जिघ्रतीति वाक्यशेषात्। आपः पञ्चस्वग्निषु हुताः पञ्चम्यामाहुतौ हुतायां यथा पुरुषशब्दवाच्याः पुरुषात्मना परिणमन्ते तथा किं त्वं वेत्थेति श्वेतकेतुं प्रति राज्ञः प्रवाहणस्य प्रश्नः, तस्य चोत्तराज्ञाने तत्पितरं प्रति राज्ञो 'वाचासौ वाव लोको गौतमाग्निस्तत्र श्रद्धाख्या आपः आहुतिः पर्जन्यामौ सोमरूपा इह स्वस्वमिहोत्रे श्रद्धया हुता, दध्याख्या हि रूपा आपो यजमानसंलग्नाः स्वर्गं लोकं प्राप्य सोमाख्यदिव्यदेहात्मना स्थिताः कर्मान्ते हुताः पर्जन्ये भूयन्ते ततो वृष्टिरूपाः पृथिव्यां अन्नरूपाः पुरुषे रेतोरूपाः योषिति हुताः आपः पुरुषशब्दवाच्या भवन्ति' इति निरूपणं कृतं। नन्वे-

दर्शयति, इति। तद्यथा तृणजलायुकेति, तत्राप्यपरिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं जलूकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः प्रकल्पनाः व्यापिनां करणानामात्मनश्च देहान्तरप्रतिपत्तौ कर्मवशात् वृत्तिलाभस्तत्र भवति केवलस्यैव वात्मनो वृत्तिलाभस्तत्र भवति इन्द्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थाने उत्पद्यन्ते मन एव वा केवलं भोगस्थानमभिप्रतिष्ठते जीव एव वोत्प्लुत्य देहाद्देहान्तरं प्रतिपद्यते शुक इव वृक्षाद् वृक्षान्तरमित्येवमाद्याः ताः सर्वा एवानादर्तव्याः, श्रुतिविरोधात्। ननूदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः सम्परिष्वक्तो रंहतीति प्राप्नोति, अप्शब्दश्रवणसामर्थ्यात्, तत्र

तद्देहं त्यक्त्वाऽद्भिः सह गतस्य पश्चाद्देहान्तरप्राप्तिरित्ययुक्तं। यथा तृणजलायुका तृणान्तरं गृहीत्वा पूर्वतृणं त्यजति तथा जीवो देहान्तरं गृहीत्वा पूर्वदेहं त्यजतीति श्रुतिविरोधादिति शङ्कते। नन्वन्येति। इहैव कर्मायत्तभाविदेहं देवोऽहमित्यादिभावनया गृहीत्वा पूर्वदेहं त्यजतीति श्रुत्यर्थः, अतो न विरोधः, इति समाधत्ते। तत्रापीति। भावनाया दीर्घभावो भाविदेहविषयत्वं। घटाकाशवदुपहितो जीवः सूक्ष्मोपाधिगत्या लोकान्तरं गच्छतीति पक्षाभिप्रेत्युक्तः प्रकारस्तद्विरोधादन्याः कल्पनाः अनादर्तव्या इत्यन्वयः। साङ्ख्यकल्पनामाह। व्यापिनामिति। सुगतकल्पनामाह। केवलस्येति। निर्विकल्पकज्ञानसन्तानरूपस्यात्मनो देहान्तरे शब्दादिसविकल्पज्ञानाख्यवृत्तिलाभो भवतीत्यर्थः। काणादकल्पनामाह। मन इति। देहान्तरं प्रति मनोमात्रं गच्छति, इन्द्रियाणि तु भूतान्येवारभन्ते।

कथं सामान्येन प्रतिज्ञायते सर्वैरेव भूतसूक्ष्मैः सम्परिष्वक्तो रंहतीत्यत उत्तरं पठति॥

त्र्यात्मकत्वात्तु भूयस्त्वात्॥ २॥

तुशब्देन चोदितामाशङ्कामुच्छिनत्ति। त्र्यात्मिका ह्यापः त्रिवृत्करणश्रुतेः। तास्वारम्भिकास्वभ्युपगतास्वितरदपि भूतद्वयमवश्यमभ्युपगन्तव्यं भवति। त्र्यात्मकश्च देहस्त्रयाणामपि तेजोऽबन्नानां तस्मिन् कार्योपलब्धेः, पुनश्च त्र्यात्मकस्त्रिधातुकत्वात् त्रिभिर्वातपित्तश्लेष्मभिः। न भूतान्तराणि स प्रत्याख्याय केवलाभिरद्भिरारब्धुं शक्यते। तस्मात् भूयस्त्वापेक्षोऽयमापः पुरुषवचस इति प्रश्नप्रतिवचनयोरप्शब्दो न कैवल्यापेक्षः, सर्वदेहेषु हि रसलोहितादिद्रवभूयस्त्वं दृश्यते। ननु पार्थिवो धातुर्भूयिष्ठो देहेषूपलक्ष्यते, नैष दोषः, इतरापेक्षयाऽपां बाहुल्यं भविष्यति। दृश्यते च शुक्रशोणितलक्षणेऽपि देहबीजे द्रवबाहुल्यं। कर्म च निमित्तकारणं, देहान्तरारम्भे कर्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृतिद्रवद्रव्य*व्यपाश्रयाणि। कर्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाख्ये-

दिगम्बरकल्पनामाह। जीव इति। ननु पाकस्वेदगन्धरूपकार्यत्रयोपलब्धेस्त्र्यात्मको देह इत्ययुक्तं॥

प्राणावकाशयोरप्युपलब्ध्या देहस्य पञ्चभूतात्मत्वादित्यरुच्या व्याख्यान्तरमाह। पुनश्चेति। देहधारकत्वाद्धातवो वातादयस्त्रिधातुत्वात्त्र्यात्मक इत्यन्वयः। देहस्य केवलाब्जत्वे वातं पित्तञ्च वायव्यं तैजसं न

* व्यपाश्रयाणीति वर्ध० का०।

ऽग्नौ हूयन्त इति वक्ष्यति, तस्मादप्यपां बाहुल्यप्रसिद्धिः। बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यं ॥

प्राणगतेश्च ॥ ३ ॥

प्राणानाञ्च देहान्तरप्रतिपत्तौ गतिः श्राव्यते। 'तमुत्क्रान्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्यादिश्रुतिभिः। सा च प्राणानां गतिराश्रयमन्तरेण न सम्भवतीत्यतः प्राणगतिप्रयुक्तानां तदाश्रयभूतानामपामपि भूतान्तरोपसृष्टानां गतिरवगम्यते। न हि निराश्रयाः प्राणाः क्वचिद्गच्छन्ति तिष्ठन्ति वा, जीवतोऽदर्शनात् ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

स्यादेतत्, नैव प्राणा देहान्तरप्रतिपत्तौ सह जीवेन गच्छन्ति, अग्न्यादिगतिश्रुतेः। तथाहि श्रुतिः मरणकाले वागादयः प्राणाः अग्न्यादीन् देवान् गच्छन्तीति दर्शयति 'यत्रास्य पुरुषस्य मृतस्याऽग्निं वागप्येति वातं प्राणः' इत्यादिनेति चेन्न,

---

स्यातामिति भावः। पृथिवीतरभूतापेक्षया बाहुल्यं। किञ्च देहनिमित्तानां कर्मणामपूर्वबाहुल्यात्ताभिर्भूतान्तराण्युपलक्ष्यन्त इत्याह। कर्म चेत्यादिना ॥

उक्ताश्च प्राणा देहबीजपञ्चभूताश्रयाः प्राणत्वाज्जीवद्देहस्थ प्राणवदित्याह। प्राणगतेश्चेति ॥

प्राणानां गतिरसिद्धेत्याशङ्क्य निषेधति। अग्न्यादीति। अदर्शनादोषधिवनस्पतिगमनस्येति शेषः। लोमान्यपि यन्तीत्यर्थः। प्राणानाम-

भाक्तत्वात्। वागादीनामग्न्यादिगतिश्रुतिर्गौणी लोमसु केशेषु चादर्शनात्। 'ओषधीर्लोमानि वनस्पतीन् केशाः' इति हि तत्राम्नायते। न हि लोमानि केशाश्चोत्प्लुत्यौषधीर्वनस्पतींश्च गच्छन्तीति सम्भवति। न च जीवस्य प्राणोपाधिप्रत्याख्याने गमनमवकल्पते, नापि प्राणैर्विना देहान्तर उपभोग उपपद्यते, विस्पष्टञ्च प्राणानां सह जीवेन गमनमन्यत्र श्रावितं, अतो वागाद्यधिष्ठात्रीणां अग्न्यादिदेवतानां वागाद्युपकारिणीनां मरणकाल उपकारनिवृत्तिमात्रमपेक्ष्य वागादयोऽग्न्यादीन् गच्छन्तीत्युपचर्यते॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः॥५॥

स्यादेतत्, कथं पुनः पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीत्येतन्निर्द्धारयितुं पार्यते यावता नैव प्रथमेऽग्नावपां श्रवणमस्ति। इह हि द्युलोकप्रभृतयः पञ्चाग्नयः पञ्चानामाहुतीनामाधारत्वेनाधीताः, तेषाञ्च प्रमुखे 'असौ वाव लोको गौतमाग्निः' इत्युपन्यस्य तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' इति श्रद्धा होम्यद्रव्यत्वेनावेदिताः, न तत्रापो होम्यद्रव्यतया श्रुताः। यदि नाम पर्जन्यादिषु उत्तरेषु चतुर्ष्वग्निष्वपां होम्यद्रव्यता

ग्न्यादिषु लयस्य मुख्यत्वे जीवस्य गतिभोगयोरयोगात् सर्वे प्राणा अनूत्क्रामन्तीति विस्पष्टश्रुतेर्लोमादिगौणफलपाठाच्च गौणत्वमित्यर्थः॥

भूतान्तरयुक्तानामपामाहुतिमुक्त्वा पुरुषवचस्त्वं तासामाक्षिप्य समाधत्ते। प्रथम इति। ननु प्रथमपदं व्यर्थं उत्तराग्निष्वप्यपामश्रवणा-

परिकल्प्येत परिकल्पतां नाम,तेषु होतव्यतयोपात्तानां सोमादीनामब्बहुलत्वोपपत्तेः। प्रथमे त्वग्नौ श्रुतां श्रद्धां परित्यज्याश्रुता आपः परिकल्प्यन्त इति साहसमेतत्। श्रद्धा च नाम प्रत्ययविशेषः प्रसिद्धिसामर्थ्यात्। तस्मादयुक्तः पञ्चम्यामाहुतावपां पुरुषभाव इति चेन्नैष दोषः। हि यतस्तत्रापि प्रथमेऽग्नौ ता एवापः श्रद्धाशब्देनाभिप्रेयन्ते। कुतः, उपपत्तेः। एवं ह्यादिमध्यावसानसंज्ञानादनाकुलमेतदेकवाक्यमुपपद्यते, इतरथा पुनः पञ्चम्यामाहुतावपां पुरुषवचस्त्वप्रकारे पृष्टे प्रतिवचनावसरे प्रथमाहुतिस्थाने यद्यनपो होम्यद्रव्यं श्रद्धां नामावतारयेत् ततोऽन्यथा प्रश्नोऽन्यथा प्रतिवचनमित्येकवाक्यता न स्यादिति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति चोपसंहरन्नेतदेव दर्शयति। श्रद्धाकार्यञ्च सोमवृष्ट्यादि स्थूलीभवदब्बहुलं लक्ष्यते। सा च श्रद्धाया अप्सु युक्तिः। कारणा-

---

दित्याशङ्क्य सोमवृष्ट्यन्तरे तासामगतत्वादुत्तर एतासां श्रवणमस्ति। न प्रथम इत्याह। यदि नामेति। पञ्चाग्निष्वपामाहुतित्वे सिद्धे तासां पञ्चम्यामाहुतौ पुरुषवचस्त्वं भवेन्न तत्सिद्धं प्रथमाग्नौ तासामनाहुतित्वादिति शङ्कार्थः। एवं हि श्रद्धाशब्देनापां ग्रहे सति प्रश्नोत्तरोपसंहाराणां संज्ञानादेकार्थत्वादेकवाक्यतोपपद्यते, अग्रहे चतुर्ष्वग्निष्वेवापामाहुतित्वाच्चतुर्थ्यामाहुताविति वाच्यं, अतः प्रश्नोपसंहारयोः पञ्चम्यामिति श्रवणात् प्रथमाग्नावप्याप एव ग्राह्या इति समाधानार्थः। अनपः अद्भ्योऽन्यत एतदेवेति श्रद्धाशब्दस्याप्यर्थान्तरत्वं दर्शयतीत्यर्थः। उपपत्तेरित्यस्यार्थान्तरमाह। श्रद्धाकार्यमिति। तस्याः श्रद्धाहुतेः सोमः सम्भवतीत्यादिना श्रद्धासोमादीनां पूर्वपूर्वपरिणामत्वं श्रुतं ततो द्रवपरिणामत्वात् श्रद्धाया अत्वं प्रत्यया-

नुरूपं हि कार्यं भवति। न च श्रद्धाख्यः प्रत्ययो मनसो जीवस्य वा धर्मः सन् धर्मिणो निष्कृष्य होमायोपादातुं शक्यते पश्वादिभ्य इव हृदयादीनीत्याप एव श्रद्धाशब्दा भवेयुः, श्रद्धाशब्दश्चाप्सूपपद्यते, वैदिकात् प्रयोगदर्शनात् 'श्रद्धा वा आपः' इति। तनुत्वं च 'श्रद्धासारूप्यं गच्छन्त्यापो देहबीजभूताः' इत्यतः श्रद्धाशब्दाः स्युः, यथा सिंहपराक्रमो नरः सिंहशब्दो भवति। श्रद्धापूर्वककर्मसमवायाच्चाप्सु श्रद्धाशब्द उपपद्यते मञ्चशब्द इव पुरुषेषु। श्रद्धाहेतुत्वाच्च श्रद्धाशब्दोपपत्तिः 'आपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे' इति श्रुतेः॥

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः॥ ६॥

अथापि स्यात् प्रश्नप्रतिवचनाभ्यामापः श्रद्धादिक्रमेण पञ्चम्यामाहुतौ पुरुषाकारं प्रतिपद्येरन्नाम तत्सम्परिष्वक्ता जीवा रंहेयुः, अश्रुतत्वात्। न ह्यत्रापामिव जीवानां श्रावयिता कश्चिच्छब्दोऽस्ति। तस्माद्रंहति सम्परिष्वक्त इत्ययुक्तमिति चेत्, नैष दोषः। कुतः, इष्टादिकारिणां प्रतीतेः। अथ 'य इमे

त्मकमुख्यश्रद्धाया आहुतित्वायोगाच्चेत्यर्थः। श्रद्धाशब्दस्याप्सु सूक्ष्मत्वगुणेन वृत्तिमुक्त्वा लक्षणां वक्तुं श्रद्धया अद्भिरेव कर्मयोगित्वं हेतुत्वं वा सम्बन्धमाह। श्रद्धापूर्वेति। अस्मै यजमानाय। स्नानाद्यर्थमापः श्रद्धां सन्नमन्ते जनयन्तीति श्रुत्यर्थः॥

अपां गतिमुपेत्याद्भिःसह जीवानां गतिमाक्षिप्य समाधत्ते। अथापीत्यादिना। द्युलोकाग्नौ श्रद्धाहुतेः सोमो राजा सम्भवतीत्युक्त्वा वाक्य-

ग्रामे इष्टापूर्ते दात्तमित्युपासते ते धूममभिसम्भवन्ति' इत्युपक्रम्ये-ष्टादिकारिणां धूमादिना पितृयानेन पथा चन्द्रमाप्तिं कथयति 'आकाशाच्चन्द्रमसमेष सोमराजा इति त एवेहापि प्रतीयन्ते तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवति' इति श्रुतिसामान्यात्। तेषाञ्चाग्निहोत्र-दर्शपूर्णमासादिकर्मसाधनभूता दधिपयःप्रभृतयो द्रवद्रव्यभूयस्त्वात् प्रत्यक्षमेवापः सम्भवन्ति, ता आहवनीये हुताः सूक्ष्मा आहुत्योऽपूर्वरूपाः सत्यस्तानिष्टादिकारिण आश्रयन्ति। तेषाञ्च शरीरं नैधनेन विधानेनान्त्येऽग्नावृत्विजो जुह्वत्यसौ स्वर्गाय लोकाय स्वाहेति। ततस्ताः श्रद्धापूर्वककर्मसमवायिन्य आहुतिमय्य आपोऽपूर्वरूपाः सत्यस्तानिष्टादिकारिणो जीवान् परिवेष्ट्यामुं लोकं फलदानाय नयन्तीति यत्तदत्र जुहोति नाभिधीयते श्रद्धां जुह्वतीति। तथाचाऽग्निहोत्रे षट्प्रश्नीनिर्वचन-

---

शेषे धूमादिमार्गेण आकाशाच्चन्द्रमसं प्राप्ता इष्टादिकारिण एष सोमो राजेत्युक्ताः अतः सोमराजशब्दसामान्यादिष्टादिकारिणां जीवानां श्रद्धाशब्देनाद्भिः सह गतिरिह श्रद्धाहुतिवाक्ये प्रतीयत इत्यर्थः। तेषां सूक्ष्माभिर्द्रव्यापूर्वरूपाभिः पञ्चीकृताभिरद्भिः सम्बन्धं वदन् सहगतिं विवृणोति। तेषाञ्चाग्निहोत्रेति। नैधनं मरणं, तन्निमित्तकमन्त्येष्टिविधानं, असौ यजमानः, स्वर्गाय गच्छत्विति मन्त्रार्थः। हुतद्रव्यरूपाणामपां गमने श्रुत्यन्तरमाह। तथा चेति। अग्निहोत्रप्रकरणे जनकेन याज्ञवल्क्यं प्रति 'नत्त्वेवैनयोः सायंप्रातराहुत्योस्त्वमुत्क्रान्तिं न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्थ' इति षट् प्रश्नाः कृतास्तेषां निर्वचनमपि राज्ञैव ते एते आहुती हुते उत्क्रामतः तेऽन्तरिक्षद्वारा दिवं गच्छतस्ते दिवमेवाहवनीयप्रतिष्ठां

रूपेण वाक्यशेषेण 'ते वा एते आहुती हुते उत्क्रामतः' इत्येवमादिनाऽग्निहोत्राहुत्योः फलारम्भाय लोकान्तरप्राप्तिर्दर्शिता। तस्मादाहुतिमयीभिरद्भिः सम्परिष्वक्ता जीवा रंहन्ति स्वकर्मफलोपभोगायेति श्लिष्यते। कथं पुनरिदमिष्टादिकारिणां स्वकर्मफलोपभोगाय रंहणं प्रतिज्ञायते, यावता तेषां धूमप्रतीकेन वर्त्मना चन्द्रमसमधिरूढानामन्नभावं दर्शयति 'एष सोमो राजा तद्देवानामन्नन्तद्देवा भक्षयन्ति' इति। 'ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयन्ति' इति *च समानविषयं श्रुत्यन्तरं। न च व्याघ्रादिभिरिव देवैर्भक्ष्यमाणानामुपभोगः सम्भवतीत्यत उत्तरं पठति॥

भाक्तं वाऽनात्मवित्त्वात् तथाहि दर्शयति॥ ७॥

वाशब्दश्चोदितदोषव्यावर्तनार्थः। भाक्तमेषामन्नत्वं न मुख्यं, मुख्ये ह्यन्नत्वे 'स्वर्गकामो यजेत' इत्येवंजातीयकाधिकारश्रुति-

कुर्वाते दिवं तर्पयतस्ते ततः पुनरावर्तेते ततः पृथिव्यां पुरुषे योषिति च हुते पुरुषरूपेणोत्तिष्ठत इति वाक्यशेषेण श्रुतं। सम्प्रत्युत्तरसूत्रव्यावर्त्यं शङ्कते। कथमित्यादिना। अत्र सोमाख्यचन्द्रस्यान्नत्वमुक्तं नेष्टादिकारिणामिति भ्रान्तिनिरासार्थं श्रुत्यन्तरमाह। ते चन्द्रमिति। यथा यज्ञे चमसस्थं सोमम्टत्विज आप्यायस्वेति क्रियावृत्तौ लोट् पुनः पुनराप्याय्य पुनः पुनरपक्षय्य भक्षयन्ति। एवं एतानिष्टादिकारिणोऽन्नरूपान् भक्षयन्ति देवा इत्यर्थः॥

अधिक्रियते पुरुषो विधिना सम्बध्यतेऽनेनेत्यधिकारः फलकामना।

* चेति वर्ध० पु० नास्ति।

रुपरुध्येत। चन्द्रमण्डले चेदिष्टादिकारिणामुपभोगो न स्यात् किमर्थमधिकारिण इष्टाद्यायासबहुलं कर्म कुर्युः। अन्नशब्दश्चोपभोगहेतुत्वसामान्यात् अनन्नेऽप्युपचर्यमाणो दृश्यते 'यथा विशोऽन्नं राज्ञां पशवोऽन्नं विशाम्' इति। तस्मादिष्टस्त्रीपुत्रमित्रादिभिरिव गुणभावोपगतैरिष्टादिकारिभिर्यत्सुखविहरणं देवानां तदेवैषां भक्षणमभिप्रेतं न मोदकादिवच्चर्वणं निगरणं वा। 'न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति' इति देवानां चर्वणादिव्यापारं वारयति। तेषां चेष्टादिकारिणां देवान् प्रति गुणभावोपगतानामप्युपभोग उपपद्यते राजोपजीविनामिव परिजनानां, अनात्मवित्त्वाच्चेष्टादिकारिणां देवोपभोग्यभाव उपपद्यते। तथा हि श्रुतिरनात्मविदां देवोपभोग्यतां दर्शयति 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' इति। स चास्मिन्नपि लोक इष्टादिभिः कर्मभिः प्रीणयन् पशुवद्देवानामुपकरोत्यमुष्मिन्नपि लोके तदुपजीवी तदादिष्टं फलमुपभुञ्जानः पशुवदेव देवानामुपकरोतीति गम्यते। अनात्मवित्त्वात् तथा हि दर्शयति इत्यस्यापरा व्याख्या।

शास्त्रानर्थक्यवारणाय अन्नत्वं गौणमिति भावः। केन दोषेण तेषां देवभोग्यतेत्यत आह। अनात्मवित्वाच्चेति। यथा पशुर्भोग्य एवमज्ञः स इह भेदधीमान् देवानां भोग्य इत्यर्थः। आत्मशब्दस्य मुख्यत्वबलेन सूत्रांशं व्याख्याय प्रकृतपञ्चाग्नयः सूत्रकृतात्मत्वेनोपचरिता इति व्याख्यान्तरमाह। अनात्मेत्यादिना। विद्यास्तुत्यर्थमन्नत्वं न मुख्यमित्यत्र

अनात्मविदो ह्येते केवलकर्मिण इष्टादिकारिणो न ज्ञानकर्मसमुच्चयानुष्ठायिनः। पञ्चाग्निविद्यामिहात्मविद्येत्युपचरन्ति प्रकरणात् पञ्चाग्निविद्याविहीनत्वाच्चेदमिष्टादिकारिणां गुणवादेनान्नत्वमुद्भाव्यते पञ्चाग्निविद्याप्रशंसार्थं। पञ्चाग्निविद्या इह विधित्सिता वाक्यतात्पर्यावगमात्। तथा हि श्रुत्यन्तरं चन्द्रमण्डले भोगसद्भावं दर्शयति 'स सोमलोके भूतिमनुभूय पुनरावर्त्तते' इति। तथान्यदपि श्रुत्यन्तरं 'अथ ये शतं पितॄणां जितलोकानामानन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते' इतीष्टादिकारिणां देवैः संवसतां भोगप्राप्तिं दर्शयति। एवं भाक्तत्वादन्नभाववचनस्येष्टादिकारिणो जीवा रंहन्तीति प्रतीयन्ते। तस्माद्रंहति सम्परिष्वक्त इति युक्तमेवोक्तं॥

कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च॥ ८॥

इष्टादिकारिणां धूमादिना वर्त्मना चन्द्रमण्डलमधिरूढानां भुक्तभोगानां ततः प्रत्यवरोह आम्नायते 'तस्मिन् यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथेतमित्यारभ्य या-

---

श्रुत्यन्तरार्थं सूत्रशेषं व्याचष्टे। तथाहीति। एवं गतिपर्यालोचनया वैराग्यमिति सिद्धं॥

इदानीं गत्यन्तरभाविनीमागतिं निरूपयति। कृतात्यय इति। भोक्तव्यकर्मसमाप्त्यामन्तर्यमयशब्दार्थः। यथेतमित्यारभ्य श्वादियोनिमित्यन्तं वाक्यं यावत्तावदाम्नायत इति योजना। अत्र यावत्-

वद्रमणीयचरणा ब्राह्मणादियोनिमापद्यन्ते कपूयचरणाः श्वादियोनिम्' इति। तत्रेदं विचार्यते किं निरनुशया भुक्तकृत्स्नकर्माणोऽवरोहन्त्याहोस्वित्सानुशयाः इति। किन्तावत् प्राप्तं निरनुशया इति। कुतः यावत्सम्पातमिति विशेषणात्। सम्पातशब्देनात्र कर्माशय उच्यते। सम्पतन्त्यनेनास्माल्लोकादमुं लोकं फलोपभोगायेति, यावत्सम्पातमुषित्वेति च कृत्स्नस्य तस्य तत्रैव भुक्ततां दर्शयति। 'तेषां यदा तत्पर्यवैति' इति च श्रुत्यन्तरेणैष एवार्थः प्रदर्श्यते। स्यादेतत् यावदमुष्मिँल्लोके उपभोक्तव्यं कर्म तावदुपभुङ्क्ते इति कल्पयिष्यामीति। नैवं कल्पयितुं शक्यते यत्किञ्चेत्यन्यत्र परामर्शात्। 'प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययं। तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे' इत्यपरा श्रुतिः यत्किञ्चेत्यविशेषपरामर्शेन कृत्स्नस्येह कृतस्य कर्मणस्तत्र क्षयिततां दर्शयति। अपि च प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं। प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबन्धस्याभिव्यक्त्यनुपपत्तेः। तच्चाविशेषात् यावत् किञ्चिदनारब्धफलं तस्य सर्वस्याभिव्यञ्जकं, न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति। न ह्यविशिष्टे

सम्पातमिति विशेषणाद्रमणीयचरणा इति वाक्याच्च संशयमाह। तत्रेति। अनुशय कर्म, अत्र पूर्वपक्षे कर्माभावेनागतेरनियमात् वैराग्यादार्ढ्यं, सिद्धान्ते कर्मसत्त्वेनागतिनियमाद्वैराग्यदार्ढ्यमिति भेदः। तेषामिष्टादिकारिणां यदा तत्कर्म पर्यवैति विपरिक्षीणं भवति तदा पुनरावर्तन्त इति श्रुत्यन्तरेणापि कृत्स्नकर्मणस्तस्मिंल्लोके भुक्तत्वमुच्यते

प्रदीपसन्निधौ घटोऽभिव्यज्यते न पट इत्युपपद्यते। तस्मान्निरनुशया अवरोहन्तीत्येवं प्राप्ते ब्रूमः। कृतात्ययेऽनुशयवानिति। येन कर्मवृन्देन चन्द्रमसमारूढाः फलोपभोगाय तस्मिन्नुपभोगेन क्षयिते तेषां यदम्मयं शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगक्षयदर्शनशोकाग्निसम्पर्कात् प्रविलीयते सवितृकिरणसम्पर्कादिव हिमकरके, हुतभुगर्चिःसम्पर्कादिव घृतकाठिन्यं। ततः कृतात्यये कृतस्येष्टादेः कर्मणः फलोपभोगेनोपक्षये सति सानुशया एवेममवरोहन्ति। केन हेतुना दृष्टस्मृतिभ्यामित्याह। तथा हि प्रत्यक्षा श्रुतिः सानुशयानामवरोहं दर्शयति 'तद् य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा' इति। चरणशब्देनात्रानुशयः सूच्यते इति वर्णयिष्यते। दृष्टश्चायं जन्मैव प्रतिप्राण्युच्चावचरूप उपभोगः प्रविभज्य-

---

इत्यर्थः। यावत् पदसङ्कोचो न युक्तः श्रुत्यन्तरविरोधादित्याह। नैवमिति। अयं नरो यत्किञ्चिदिह लोके कर्म करोति तस्यान्तं फलं परलोके प्राप्य कर्मार्थं पुनरायातीति श्रुत्यर्थः। कर्माभावे श्रुतिमुक्त्वा युक्तिमाह। अपि चेति। अभिव्यक्तिः फलोन्मुखता, मरणेनाभिव्यक्तस्य सर्वस्य कर्मणः परलोकभोगस्यावश्यम्भावात् कर्माभाव इत्यर्थः। चरणाख्यशीलमात्रादवरोह इति प्राप्ते सिद्धान्तप्रतिज्ञां व्याचष्टे येनेत्यादिना। तत्रावरोहतां जीवानां मध्ये ये केचिदिह कर्मभूमौ रमणीयचरणाः पुण्यकर्माणः पुण्ययोनिभाज इति यत् अभ्याशो ह

मानः आकस्मिकत्वासम्भवादनुशयसद्भावं सूचयति। अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुत्वस्य सामान्यतः शास्त्रेणावगमितत्वात्। स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रत्येककर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्त इति सानुशयानामेवावरोहं दर्शयति। कः पुनरनुशयो नामेति, केचित्तावदाहुः स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत्। यथा हि स्नेहभाण्डं रिच्यमानं न सर्वात्मना रिच्यते भाण्डानुसार्येव कश्चित् स्नेहशेषोऽवतिष्ठते तथानुशयोऽपीति। ननु कार्यविरोधित्वाददृष्टस्य न भुक्तफलस्यावशेषावस्थानं न्याय्यं। नायं दोषः न हि सर्वात्मना भुक्तफलत्वं कर्मणः प्रतिजानीमहे। ननु निरवशेषकर्मफलोपभोगाय चन्द्रमण्डलमारूढाः। वाढं। तथापि स्वल्पकर्मावशेषमात्रेण तत्रावस्थातुं न शक्यते। यथा किल कश्चित् सेवकः सकलैः सेवोपकरणैः राजकुलमुपसृप्तश्चिरप्रवासात् परिक्षीणबहूपकरण-

---

अवश्यं हीत्यर्थः। कपूयं पापं। दृष्टशब्दस्य श्रुतमर्थमुक्त्वार्थान्तरमाह। दृष्टस्येति। पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्यादिशास्त्रेण सुखदुःखयोर्धर्माधर्महेतुकत्वमवगतं। ततश्च जन्मारभ्य दृष्टो भोगः कर्महेतुकभोगत्वात् स्वर्गभोगवत् इत्यनुशयसिद्धिः। विपक्षे च हेत्वभावात् भोगस्याकस्मिकत्वप्रसङ्ग इत्यर्थः। स्मृता वा अन्याः आश्रमिणः प्रेत्य मृत्वा लोकान्तरे कर्मफलं भुक्त्वा ततः शेषेण भुक्तादन्येन कर्मणा अनुशयाख्येन पुनर्जन्म प्रतिपद्यन्ते इति सम्बन्धः। विशिष्टा देशादयो मेधान्ता दश गुणा येषु ते तथोक्ताः। श्रुतं ज्ञानं, वृत्तं आचारः। स्वाभिमतानुशयं

च्छत्रपादुकादिमात्रावशेषो न राजकुलेऽवस्थातुं शक्नोत्येवमनुशयलेशमात्रपरिग्रहो न चन्द्रमण्डलेऽवस्थातुं शक्नोतीति। न चैतद्युक्तमिव, न हि स्वर्गार्थस्य कर्मणो भुक्तफलस्यावशेषानुवृत्तिरुपपद्यते कार्यविरोधित्वादित्युक्तं। नन्वेतदप्युक्तं न स्वर्गफलस्य कर्मणो निखिलस्य भुक्तफलत्वं भवतीति। तदेतदपेशलं। स्वर्गार्थं किल कर्म स्वर्गस्थस्यैव स्वर्गफलं निखिलं जनयति स्वर्गच्युतस्याऽपि कञ्चित् फललेशं जनयतीति न शब्दप्रमाणकानां ईदृशी कल्पनावकल्पते। स्नेहभाण्डे तु स्नेहलेशानुवृत्तिर्दृष्टत्वादुपपद्यते। तथा सेवकस्योपकरणलेशानुवृत्तिर्दृश्यते न त्विह तथा स्वर्गफलस्य कर्मणो लेशानुवृत्तिर्दृश्यते नापि कल्पयितुं शक्यते, स्वर्गफलत्वशास्त्रविरोधात्। अवश्यञ्चैतदेवं विज्ञेयं न स्वर्गफलस्येष्टादेः कर्मणो भाण्डानुसारिस्नेहवदेकदेशोऽनुवर्तमानोऽनुशय इति। यदि हि येन सुकृतेन कर्मणेष्टादिना स्वर्गमन्वभूवन् तस्यैव कश्चिदेकदेशोऽनुशयः

वक्तुं पृच्छति। कः पुनरिति। कृतस्य कर्मणः स्वर्गे भोगे सति भुक्तस्य कर्मणो लेशोऽनुशयस्तद्वानवरोहति, भाण्डे स्नेहलेशस्य दृष्टत्वात्। ततः शेषेणेति स्मृतेस्तेनैकदेशिव्याख्यामाह। केचिदित्यादिना। रिच्यमानं स्नेहेन वियुज्यमानं। ननु भोगनाश्यत्वात् कर्मणो लेशो न युक्त इति शङ्कते। नन्विति। कृत्स्नकर्मणो भोगे जाते नाशः स्यात् न तु भोगो जात इति परिहारार्थो भोगो न जायत इत्ययुक्तमिति शङ्कते। नन्विति। भोगः सावशेषो जात इति समाधत्ते। वाढमित्यादिना। इदमेकदेशिव्याख्यानं दूषयति। न चेति। स्वर्गकामो यजेतेत्यादिशास्त्रेण स्वर्गभोगार्थं कर्म चोदितं, तच्छेषस्य मर्त्यभोगहेतुत्वे शास्त्रवि-

कल्प्येत ततो रमणीय एवैकोऽनुशयः स्यान्न विपरीतस्तत्रेयम-नुशयविभागश्रुतिरुपरुध्येत 'तद् य इह रमणीयचरणा अथ य इह कपूयचरणाः' इति। तस्मादामुष्मिकफले कर्मजाते उपभुक्ते अवशिष्टमैहिकफलं कर्मान्तरजातं अनुशयस्तद्वन्तो-ऽवरोहन्तीति। यदुक्तं यत्किञ्चेत्यविशेषपरामर्शात् सर्वस्येह कृतस्य कर्मणः फलोपभोगेनान्तं प्राप्य निरनुशया अवरोहन्तीति। नैतदेवं, अनुशयसद्भावस्यावगमितत्वात्। यत्किञ्चिदिह कृतमामुष्मिकफलं कर्मारब्धभोगं तत्सर्वं फलोपभोगेन क्षपयित्वेति गम्यते। यदप्युक्तं प्रायणमविशेषादनारब्धफलं कृत्स्नमेव कर्माभिव्यनक्ति, तत्र केनचित् कर्मणामुष्मिन् लोके फल-मारभ्यते केनचिदस्मिन्नित्ययं विभागो न सम्भवतीति। तद-प्यनुशयसद्भावप्रतिपादनेनैव प्रत्युक्तं। अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्रतिज्ञायत इति

रोध इत्यर्थः। किञ्च स्वर्गहेतुकर्मशेषादवरोहे कपूययोन्यापत्तिश्रुति-विरोध इत्याह। अवश्यश्चेति। स्वाभिमतमनुशयमाह। तस्मा-दिति। पूर्वपक्षबीजमनूद्य दूषयति। यदित्यादिना। क्षपयित्वा पुनरागच्छतीति प्राप्यान्तमिति वाक्येन गम्यत इति योजना। जन्मा-रभ्य दृष्टभोगलिङ्गानुगृहीतया रमणीयकपूयचरणश्रुत्यैहिकानुश-याख्यकर्मविशेषपरया विरोधात् यत्किञ्चेति यावत्सम्पातमिति च सामान्यशब्दयोरामुष्मिकविषयत्वेन सङ्कोचो न्याय्य इति भावः। मरणं कृत्स्नकर्माभिव्यञ्जकमित्ययुक्तं उक्तानुशयश्रुतिविरोधादित्याह। तद-पीति। बलवदनारब्धकर्मप्रतिबन्धाच्च न कृत्स्नकर्माभिव्यक्तिरित्याह। अपि चेत्यादिना। तस्य कृत्स्नकर्मव्यञ्जकत्वे हेतुर्नास्तीति भावः। प्रश्न-मत्वोत्तरं शङ्कते। आरब्धेति। आरब्धवदनारब्धस्यापि बलवतः

वक्तव्यं। आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तेस्तदुपशमात् प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्येत तत्र वक्तव्यं, यथा तर्हि प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिः, एवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारम्भासम्भवाद्बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति। न ह्यनारब्धफलत्वसामान्येन जात्यन्तरोपभोग्यफलमप्यनेकं कर्मैकस्मिन् प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुं, प्रतिनियतफलत्वविरोधात्, नापि कस्यचित् कर्मणः प्रायणेऽभिव्यक्तिः कस्यचिदुच्छेद इति शक्यते वक्तुं, ऐकान्तिकफलत्वविरोधात्। न हि प्रायश्चित्तादिभिर्हेतुभिर्विना कर्मणामुच्छेदः सम्भाव्यते। स्मृतिरपि विरुद्धफलेन कर्मणा प्रतिबद्धस्य कर्मान्तरस्य चिरमप्यवस्थानं दर्शयति—

प्रतिबन्धकत्वात् न सर्वकर्मणां फलदानायाभिव्यक्तिरिति समाधत्ते। यथेति। अनारब्धफलत्वाविशेषात् सर्वकर्मणामभिव्यक्तिमाशङ्क्य मिथो विरुद्धस्वर्गनरकादिदेहफलानामेकदेहारम्भकत्वासम्भव उक्तस्तं विवृणोति। नहीति। अस्तु तर्हि दुर्बलस्य कर्मणो नाश इत्यत आह। नापीति। नाभुक्तं क्षीयते कर्मेत्येकान्त उत्सर्गः, स च प्रायश्चित्तब्रह्मज्ञानभ्यामेवबाध्यते न मरणमात्रेणेत्यर्थः। मरणेन दुर्बलकर्माविनाशे मानमाह। स्मृतिरिति। कर्मनाशपक्षं निरस्य प्रकृतकृत्स्नकर्माभिव्यक्तिपक्षे दोषान्तरमाह। यदि चेति। कृत्स्नकर्मणामेकस्मिन् देवादिजन्मनि भोगेन क्षयात् न जन्मान्तरं स्यात् ज्ञानाभावात् न मुक्तिरित्यत्र देवस्य कष्टा दशा स्यादित्यर्थः।

"कदाचित्सुकृतं कर्म कूटस्थमिह तिष्ठति।
*पच्यमानस्य संसारे यावद्दुःखाद्विमुच्यते"॥

इत्येवंजातीया। यदि च कृत्स्नमनारब्धफलं कर्म एकस्मिन् प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत ततः स्वर्गनरकतिर्यग्योनिषु अधिकारानवगमाद्धर्माधर्मानुत्पत्तौ निमित्ताभावान्नोत्तरा जातिरुपपद्येत। ब्रह्महत्यादीनां चैकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वं स्मर्यमाणमुपरुध्येत। न च धर्माधर्मयोः स्वरूपफलसाधनादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं सम्भावयितुं। न च दृष्टफलस्य कर्मणः कारीर्यादेः प्रायणमभि-

"श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणां।
चण्डालपुक्कसानां च ब्रह्महा योनिमिच्छति"॥

इत्यादिस्मृतिविरोधाच्च न सर्वकर्मणामेकजन्मारम्भकत्वमित्याह। ब्रह्मेति। नन्वेकस्य कर्मणः कथमनेकजन्मफलकत्वं अदृष्टत्वादित्यत आह। न चेति। किञ्च व्यञ्जकत्वेऽपि मरणस्य किं सर्वकर्मव्यञ्जकत्वं कल्प्यते उत यत्किञ्चित्कर्मव्यञ्जकत्वं, नाद्यः, इह कृतकारीर्यादेरत्रैव फलहेतोर्मरणव्यङ्ग्यत्वासम्भवादित्याह। न चेति। द्वितीयं निरस्यन् परोक्तं दृष्टान्तं विघटयति। प्रदीपेति। रूपाणां प्रदीपवत् मरणं न कस्यचिदपि कर्मणो व्यञ्जकं किन्तु प्रबलकर्मप्रतिबन्धाभावे दुर्बलं व्यज्यत इत्यर्थः। एवं मरणस्य व्यञ्जकत्वानङ्गीकारेण दीपदृष्टान्तो निरस्तः, अङ्गीकारेऽप्यननुकूलो दृष्टान्त इत्याह। स्थूलेति। सूक्ष्ममनुद्भूतरूपमिति मरणे सर्वकर्माभिव्यक्त्यसिद्धिरिति शेषः। एवं सर्वकर्मसङ्घ एकजन्मारम्भ इत्येकभविकः कर्माशय इति मतनिराशमुपसंहरति। तस्मादिति। चरणश्रुत्या ततः शेषेणेत्यादिस्मृत्या प्रबलप्रतिबन्धादितिन्यायेन चानभिव्यक्तकर्मसद्भावादित्यर्थः। ननु मुक्त्यनुपपत्त्याऽङ्गीकार्य एकभविक इत्यत आह। शेषेति। सूत्रशेषं व्याचष्टे। ते चेत्यादिना।

* मज्जमानस्येति सो० वर्ध० का०।

व्यञ्जकं *सम्भवतीत्येषापि केयं प्रायणस्याभिव्यञ्जकत्वकल्पना। प्रदीपोपन्यासोऽपि कर्मबलाबलप्रदर्शनेनैव प्रतिनीतः, स्थूलसूक्ष्मरूपाभिव्यक्तिवच्चेदं द्रष्टव्यं। यथा हि प्रदीपः समानेऽपि सन्निधाने स्थूलरूपमभिव्यनक्ति न सूक्ष्मं, एवं प्रायणं समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्येति। तस्माच्छ्रुतिस्मृतिन्यायविरोधादश्लिष्टोऽयमशेषकर्माभिव्यक्त्यभ्युपगमः, शेषकर्मसद्भावेऽनिर्मोक्षप्रसङ्ग इत्ययमप्यस्थाने सम्भ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः। तस्मात् स्थितमेतदनुशयवन्तोऽवरोहन्तीति। ते चावरोहन्तो यथेतमनेवं चावरोहन्ति। यथेतमिति यथागतमित्यर्थः। अनेवमिति तद्विपर्ययेणेत्यर्थः। धूमाकाशयोः पितृयाणेऽध्वन्युपात्तयोरवरोहे सङ्कीर्तनात् यथेतंशब्दाच्च यथागतमिति प्रतीयते, रात्र्याद्यसङ्कीर्तनादभ्राद्युपसङ्ख्यानाच्च विपर्ययोऽपि प्रतीयते॥

अवरोहमार्ग इत्थं श्रूयते 'तस्मिन् यावत्सम्पातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते अतो वै दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति तद्य इह रमणीयचरणा रमणीयां योनिमापद्यन्ते' इति। धूमाध्वना यथेतं यथागतं तथेतमध्वानं पुनरायान्तीत्युक्त्वा धूमादिरूपपितृमार्गस्य रात्र्यादिकं नोक्तं अधिकं चाभ्रादिकमुक्तमिति मत्वा सूत्रकृतोक्तं यथेतमनेवञ्चेति। अवशिष्टश्चार्थोऽग्रे स्फुटीभविष्यति॥

---

* सम्भवतीत्यप्यपिकेयमिति वर्ध०।

चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

अथापि स्यात् या श्रुतिरनुशयसद्भावप्रतिपादनायोदाहृता 'तद् य इह रमणीयचरणाः' इति सा खलु चरणाद्योन्यापत्तिं दर्शयति नानुशयादन्यच्चरणमन्योऽनुशयः, चरणञ्चारित्रमाचारः शीलमित्यनर्थान्तरं। अनुशयस्तु भुक्तफलात् कर्मणोऽतिरिक्तं कर्माभिप्रेतं। श्रुतिश्च कर्मचरणे भेदेन व्यपदिशति। 'यथाचारी तथा भवति' इति 'यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि' इति च। तस्माच्चरणाद्योन्यापत्तिश्रुतेर्नानुशयसिद्धिरिति चेन्नैष दोषः। यतोऽनुशयोपलक्षणार्थैवेषा चरणश्रुतिरिति कार्ष्णाजिनिराचार्यो मन्यते ॥

आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

स्यादेतत्, कस्मात् पुनश्चरणशब्देन श्रौतं शीलं विहाय लाक्षणिकोऽनुशयः प्रत्याय्यते। ननु शीलस्यैव तु श्रौतस्य विहित-

---

सम्प्रति श्रुतिस्थचरणशब्दमाक्षेपपूर्वकं सूत्रद्वयाचष्टे। चरणादिति चेदिति।

"अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।
अनुग्रहश्च ज्ञानञ्च शीलमेतद्विदुर्बुधाः" ॥ इति—

स्मृतावक्रोधादयः शास्त्रार्थज्ञानरूपं शीलं सर्वकर्माङ्गमुक्तं तद्बोधकं चरणपदमङ्गिनः श्रौतादिकर्मणो लक्षकं 'कर्मण एवोत्तरावस्था धर्माधर्माख्यापूर्वं' इति कर्मलक्षणयैव तदभिन्नापूर्वाख्यानुशयसिद्धिरिति कार्ष्णाजिनिमतं ॥

तदेव शङ्कासमाधानाभ्यामाह। आनर्थक्यमिति चेदित्यादिना सूत्रेण। चरणशब्दवाच्यस्यैव ग्रहणसम्भवानुलक्षणा युक्तेति शङ्कित्वैव

प्रतिषिद्धस्य साध्वसाधुरूपस्य शुभाशुभयोन्यापत्तिः फलं भविष्यति, अवश्यं च शीलस्यापि किञ्चित् फलमभ्युपगन्तव्यं। अन्यथा ह्यानर्थक्यमेव शीलस्य प्रसज्येतेति चेत्। नैष दोषः। कुतस्तदपेक्षत्वात्। इष्टादि हि कर्मजातं चरणापेक्षं। न हि सदाचारहीनः कश्चिदधिकृतः स्यात्। 'आचारहीनं न पुनन्ति वेदाः' इत्यादिस्मृतिभ्यः। पुरुषार्थत्वादप्याचारस्य नानर्थक्यं। इष्टादौ हि कर्मजाते फलमारभमाणे तदपेक्ष एवाचारस्तत्रैव कञ्चिदतिशयमारप्स्यते। कर्म च सर्वार्थकारीति श्रुतिस्मृतिप्रसिद्धिः, तस्मात् कर्मैव शीलोपलक्षितमनुशयभूतं योन्यापत्तौ कारणमिति कार्ष्णाजिनेर्मतं। न हि कर्मणि सम्भवति शीलाद्योन्यापत्तिर्युक्ता। न हि पद्भ्यां पलायितुं पारयमाणो जानुभ्यां रंहितुमर्हतीति ॥

ब्रूते। नन्विति। प्रतिषिद्धं शीलं क्रोधानृतादिरूपं। किञ्च शीलस्य विफलत्वायोगाच्छ्रुतयोन्यापत्तिस्तस्यैव फलं नानुशयस्येत्याह। अवश्यञ्चेति। वेदास्तदर्थकर्मण्याचारं विना न फलन्तीति स्मृत्या शीलस्य कर्माङ्गत्वान्न पृथक्फलापेक्षा अङ्गिफलेनार्थवत्त्वात्। न चाङ्गमात्राद्योन्यापत्तिः फलमिति वाच्यं। अङ्गस्य फलासम्भवेन मुख्यार्थस्याचारस्य ग्रहणायोगाल्लक्षणा युक्तेति समाधानार्थः। यद्याचारस्य स्नानादिवत् पुरुषसंस्कारतया पुरुषार्थत्वं तदाप्यविरोध इत्याह। पुरुषार्थत्वेऽपीति। अङ्गावबद्धोपास्तिवदाचारोऽर्थवानित्यर्थः। अस्तु तर्हि शीलाख्याचारादेव योन्यापत्तिरित्याशङ्क्य पुण्यो वै पुण्येन कर्मणेत्यादिश्रुत्यादिविरोधान्नैवमित्याह। कर्म चेति। कार्ष्णाजिनेः शब्दो यद्यप्यक्रोधादिरूपं शीलं साधारणधर्मात्मकं विशेषरूपात् कर्मणोऽभिन्नं तथापि चरणाचारशब्दौ कर्मवाचिनावेव न शीलवाचकाविति न लक्षणावसर इति बादरिमतं ॥

सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इति मन्यते। चरणमनुष्ठानं कर्मेत्यनर्थान्तरं। तथा ह्यविशेषेण कर्ममात्रे चरतिः प्रयुज्यमानो दृश्यते। यो हीष्टादिलक्षणं पुण्यं कर्म करोति तं लौकिका आचक्षते धर्मञ्चरत्येष महात्मेति। आचारोऽपि धर्मविशेष एव, भेदव्यपदेशस्तु कर्मचरणयोर्ब्राह्मणपरिव्राजकन्यायेनाप्युपपद्यते। तस्माद्रमणीयचरणाः प्रशस्तकर्माणः, कपूयचरणा निन्दितकर्माण इति निर्णयः ॥

अनिष्टादिकारिणामपि च श्रुतं ॥ १२ ॥

इष्टादिकारिणश्चन्द्रमसं गच्छन्तीत्युक्तं। *ये त्वितरेऽनिष्टादिकारिणस्तेऽपि किं चन्द्रमसं गच्छन्ति उत न गच्छन्तीति चिन्त्यते। तत्र तावदाह। इष्टादिकारिण एव चन्द्रमसं गच्छन्ती-

---

मुख्यसिद्धान्तमाह। सुकृतेति। चरणशब्दार्थमुपसंहरति। आचारोऽपीति। कर्मण एवाचारत्वे यथाकारीत्यादिभेदोऽस्ति कथमित्यत आह। भेदव्यपदेश इति। निरुपपदाचारशब्दात् सदाचाररूपो विशेषो भाति अतस्तत्समभिव्याहृतः कर्मसामान्यवाचको यथाकारीतिशब्दस्तदितरविशेषपरः, एवमनवद्यानि कर्माणीति सामान्यतः, अस्माकं सुचरितानीति विशेष इति विवेकः, तस्मादनुशयबलादागत्यावश्यम्भावानुसन्धानाद्वैराग्यमिति सिद्धं ॥

एवं पुण्यात्मनां गत्यागतिचिन्तया वैराग्यं निरूप्य पापिनां तच्चिन्तया तन्निरूपयति। अनिष्टादिकारिणामपीति। ये के चेत्यविशेषश्रुतेर्वैवस्वतं सङ्गमनं जनानामिति श्रुतेश्च संशये प्रथमाधिकरणेन सिद्ध-

---

* ये त्वितर इष्टादिभ्य इति वर्ध० का०।

त्येतन्न, कस्मात्, यतोऽनिष्टादिकारिणामपि चन्द्रमण्डलं गन्तव्यत्वेन श्रुतं। तथा ह्यविशेषेण कौषीतकिनः समामनन्ति 'ये वै केचास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति। देहारम्भोऽपि च पुनर्जायमानानां नान्तरेण चन्द्रप्राप्तिमवकल्प्येत, पञ्चम्यामाहुताविंत्याहुतिसङ्ख्यानियमात्, तस्मात् सर्व एव चन्द्रमसमासीदेयुः। इष्टादिकारिणामितरेषाञ्च समानगतित्वं न युक्तमिति चेत्, न, इतरेषां चन्द्रमण्डले भोगाभावात्॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्॥ १३॥

तुशब्दः पक्षं व्यावर्तयति। नैतदस्ति सर्वे चन्द्रमसं गच्छन्तीति। कस्मात्, भोगायैव हि चन्द्रारोहणं न निष्प्रयोजनं नापि प्रत्यवरोहायैव, यथा कश्चिद्वृक्षमारोहति पुष्पफलोपादानाय न निष्प्रयोजनं नापि पतनायैव। भोगश्चानिष्टादिकारिणां चन्द्रमसि नास्तीत्युक्तं, तस्मादिष्टादिकारिण एव चन्द्रमसमारोहन्ति नेतरे। इतरे तु संयमनं यमालयमवगाह्य स्वदुष्कृतानु-

---

नियमाक्षेपसङ्गत्या पूर्वपक्षसूत्रं व्याचष्टे। तथेत्यादिना। यमराजं पापिजनानां सम्यग्गम्यं, त्रिविधा स्त्रीणां पततीति श्रुत्यर्थः। पूर्वपक्षे पुण्यवतामेव चन्द्रगतिरिति नियमाभावात् पुण्यवैयर्थ्यं पापाद्वैराग्यदार्ढ्यञ्चेति फलं, सिद्धान्ते पापिनां चन्द्रलोकदर्शनमपि नास्तीति पुण्यार्थवत्त्वं वैराग्यदार्ढ्यञ्चेति फलं, पञ्चमाग्नौ देहारम्भ इति नियमात् पापिनामपि प्रथमद्युलोकाग्निप्राप्तिर्वाच्येत्याह। देहारम्भ इति। पापिनां स्वर्गभोगाभावेऽपि मार्गान्तराभावाच्चन्द्रगतिरिति भावः॥

सिद्धान्तसूत्रं व्याचष्टे। तुशब्द इत्यादिना। संयमने यमलोके यमकृता

रूपा याम्मीर्यातनाः अनुभूय पुनरेवेमं लोकं प्रत्यवरोहन्ति, एवम्भूतौ तेषामारोहावरोहौ भवतः। कुतः तद्गतिदर्शनात्। तथा हि। यमवचनस्वरूपा श्रुतिः प्रयतामनिष्टादिकारिणां यमवश्यतां दर्शयति—

'न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढं।
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे'॥

इति। 'वैवस्वतं सङ्गमनं *जनानां' इत्येवंजातीयकञ्च बह्वेव यमवश्यताप्राप्तिलिङ्गं भवति॥

स्मरन्ति च॥१४॥

अपि च मनुव्यासप्रभृतयः शिष्टा संयमने पुरे यमायत्तं कपूयकर्मविपाकं स्मरन्ति नाचिकेतोपाख्यानादिषु॥

†अपि च सप्त॥१५॥

अपि च सप्त नरका रौरवप्रमुखा दुष्कृतफलोपभोगभूमित्वेन स्मर्यन्ते पौराणिकैः,ताननिष्टादिकारिणः प्राप्नुवन्ति, कुतस्ते चन्द्रं प्राप्नुयुरित्यभिप्रायः। ननु विरुद्धमिदं यमायत्ता यातनाः पापकर्माणोऽनुभवन्तीति, यावता तेषु रौरवादिषु अन्ये चित्रगुप्तादयो नानाधिष्ठातारः स्मर्यन्त इति, नेत्याह॥

यातनाः अनुभूयावरोहन्तीत्येवं आरोहावरोहाविति योजना सूत्रस्य ज्ञेया। यमवश्यतां मत्वा गच्छतां। सम्यक् परस्तात् प्राप्यत इति संपरायः परलोकः, तदुपायः साम्परायः, बालमज्ञं, विशेषतो वित्तरागेण मूढं मोहात् प्रमादं कुर्वन्तं प्रति न भाति। स च बालोऽयं स्त्रीवित्तादिलोकोऽस्ति न परलोकोऽस्तीति मानी स मे मम यमस्य वशमाप्नोतीत्यर्थः॥

---

* जनानां यमराजं हविषेति सो० का० वर्ध०। † अपि सप्तेति का० वर्ध०।

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

तेष्वपि सप्तसु नरकेषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराभ्युपगमादविरोधः। यमप्रयुक्ता एव हि ते चित्रगुप्तादयोऽधिष्ठातारः स्मर्य्यन्ते ॥

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

पञ्चाग्निविद्यायां 'वेत्थ यथासौ लोको न सम्पूर्यते' इत्यस्य प्रश्नस्य प्रतिवचनावसरे श्रूयते, 'अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते' इति। तत्रैतयोः पथोरिति विद्याकर्मणोरित्येतत्। कस्मात् प्रकृतत्वात्। विद्याकर्मणी हि देवयानपितृयानयोः पथोः प्रतिपत्तौ प्रकृते। 'तद् य इत्थं विदुः' इति विद्या तया प्रतिपत्तव्यो देवयानः पन्थाः प्रकीर्तितः, इष्टापूर्ते दत्तमिति कर्म तेन प्रतिपत्तव्यः पितृयाणः पन्थाः प्रकीर्तितः, तत्प्रक्रियायामथैतयोः पथोर्न

पापिनां यमवश्यतावादिविशेषश्रुतिस्मृतिबलात् 'ये वै केच' इत्यविशेषश्रुतिरिष्टादिकारिविषयत्वेन व्याख्येयेति भावः ॥

सूत्रत्रयस्य भाष्यं सुबोधं ॥

यदुक्तं मार्गान्तराभावात् पापिनामपि चन्द्रगतिरिति तन्न, तृतीयमार्गश्रुतेरित्याह। विद्याकर्मणोरिति। मार्गद्वितयोक्त्यनन्तरं तृतीयमार्गोक्तिसमारम्भार्थं श्रुतावथशब्दः। एतयोर्विद्याकर्मणोः पथिद्वयसाधनयोरन्यतरेणापि साधनेन ये नरा न युक्तास्ते जन्ममरणावृत्तिरूपतृतीयसर्गस्थानि भूतानि भवन्ति, क्रियावृत्तौ लोट्, तेन

कतरेण च नेति श्रुतं। एतदुक्तं भवति, ये च न विद्यासाधनेन देवयाने पथ्यधिकृताः नापि कर्मणा पितृयाने तेषामेष क्षुद्रजन्तुलक्षणोऽसकृदावर्ती तृतीयः पन्था भवतीति, तस्मादपि नानिष्टादिकारिभिश्चन्द्रमाः प्राप्यते। स्यादेतत्, तेऽपि चन्द्रबिम्बमारुह्य ततोऽवरुह्य क्षुद्रजन्तुत्वं प्रतिपत्स्यन्त इति, तदपि नास्ति, आरोहानर्थक्यात्। अपि च सर्वेषु प्रयत्सु चन्द्रलोकं प्राप्नुवत्स्वसौ लोकः प्रयद्भिः सम्पूर्येतेत्यतः प्रश्नविरुद्धं प्रतिवचनं प्रसज्येत। तथाहि प्रतिवचनं दातव्यं यथासौ लोको न सम्पूर्यते। अवरोहाभ्युपगमादसम्पूरणोपपत्तिरिति चेत्, न, अश्रुतत्वात्। सत्यं अवरोहादप्यसम्पूरणमुपपद्यते। श्रुतिस्तु तृतीयस्थानसङ्कीर्तनेनासम्पूरणं दर्शयति 'एतत् तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते' इति। तेनानारोहादेवासम्पूरणमिति युक्तं। अवरोहस्येष्टादिकारिष्वप्यविशिष्टत्वे सति तृतीयस्थानोक्त्यानर्थक्यप्रसङ्गात्। तुशब्दस्तु शाखान्तरीयवाक्यप्रभवामशेषगमनाशङ्कामुच्छिनत्ति, एवं सत्यधिकृतापेक्षः शाखान्तरीये

पापिनां चन्द्रगत्यभावाच्चन्द्रलोको न संपूर्यत इति श्रुत्यर्थः। प्रतिपत्ताविति प्राप्तिसाधने इत्यर्थः। अपि च पापिनां चन्द्रगतौ 'असौ लोकः सम्पूर्येत अतश्च न सम्पूर्यते' इत्येतत्प्रतिवचनं विरुद्धं प्रसज्येतेत्यन्वयः। अवरोहादसंपूरणमश्रुतं न कल्प्यं श्रुतहान्यापत्तेरित्याह। नाश्रुतत्वादिति। अवरोह एव तृतीयं स्थानं श्रुत्युक्तमित्यत आह। अवरोहस्येति। इममध्वानं पुनर्निवर्तन्त इति इष्टादिकारिणामवरोहोक्तेरनिष्टादिकारिणामपि अवरोहस्यार्थसिद्धत्वात् पुनरुक्तिर्व्यर्थेत्यर्थः। अप्येतयोरिति मार्गान्तरोपक्रमबाधश्रुतौ सशब्दबाधस्त्वेत्यतः स्थान-

वाक्ये सर्वशब्दोऽवतिष्ठते 'ये वै केचिदधिकृता अस्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति। यत्पुनरुक्तं देहलाभोपपत्तये सर्वे चन्द्रमसं गन्तुमर्हन्ति पञ्चम्यामाहुतावित्याहुतिसङ्ख्यानियमादिति तत्प्रत्युच्यते॥

न तृतीये तथोपलब्धेः॥ १८॥

न तृतीये स्थाने देहलाभाय पञ्चसङ्ख्यानियम आहुतीनामादर्तव्यः। कुतः, तथोपलब्धेः। तथा ह्यन्तरेणैवाहुतिसङ्ख्यानियमं वर्णितेन प्रकारेण तृतीयस्थानप्राप्तिरुपलभ्यते 'जायस्व म्रियस्व' इत्येतत् तृतीयं स्थानमिति। अपि च 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति मनुष्यशरीरहेतुत्वेनाहुतिसङ्ख्या संकीर्त्यते न कीटपतङ्गादिशरीरहेतुत्वेन, पुरुषशब्दस्य मनुष्यजातिवचनत्वात्। अपि च पञ्चम्यामाहुतावपां पुरुषवचस्त्वमुपदिश्यते नापञ्चम्यामाहुतौ पुरुषवचस्त्वं प्रतिषिध्यते, वाक्यस्य द्व्यर्थतादोषात्, तत्र येषामारोहावरोहौ सम्भवतस्तेषां पञ्चम्यामाहुतौ देह उद्भविष्यत्यन्येषान्तु विनैवाहुतिसङ्ख्यया भूतान्तरोपसृष्टाभिरद्भिर्देह आरभ्यते॥

शब्दो मार्गलक्षक इति द्रष्टव्यं। एवमविशेषश्रुतेर्मार्गाभावाच्चेति पूर्वपक्षबीजद्वयं निरस्य तृतीयबीजनिरासार्थं सूत्रमाह। यत्पुनरित्यादिना॥

विद्याकर्मशून्यानां कृमिकीटादिभावेन जायस्वेत्यादिश्रुत्या निरन्तरजन्ममरणोपलब्धेर्नाहुतिसङ्ख्यादर इत्यर्थः। पुरुषशब्दाच्चैवमित्याह। अपि चेति॥

स्मर्यतेऽपि च लोके ॥ १९ ॥

अपि च स्मर्यते लोके द्रोणधृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनाञ्चायोनिजत्वं, तत्र द्रोणादीनां योषिद्विषयैकाहुतिर्नास्ति, धृष्टद्युम्नादीनान्तु योषित्पुरुषविषये द्वे अप्याहुती न स्तः। यथा च तत्राहुतिसङ्ख्यानादरो भवति एवमन्यत्रापि भविष्यति। बलाकाप्यन्तरेणैव रेतःसेकं गर्भं धत्त इति लोके रूढिः॥

दर्शनाच्च ॥ २० ॥

अपि च चतुर्विधे भूतग्रामे जरायुजाण्डजस्वेदजोद्भिज्जलक्षणे स्वेदजोद्भिज्जयोरन्तरेणैव ग्राम्यधर्ममुत्पत्तिदर्शनादाहुतिसङ्ख्यानादरो भवति, एवमन्यत्रापि भविष्यति। ननु तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति 'आण्डजं जीवजमुद्भिज्जमिति' अत्र त्रिविध एव भूतग्रामः श्रूयते कथं चतुर्विधत्वं भूतग्रामस्य प्रतिज्ञातमित्यत्रोच्यते॥

मनुष्यदेहस्याऽपि नाहुतिसङ्ख्यानियम इत्याह। अपिचेत्यादिना। विधिनिषेधरूपार्थद्वये वाक्यभेदः स्यादित्यर्थः। अनियमे स्मृतिसंवादार्थं सूत्रं। स्मर्यतेऽपीति। लोक्यतेऽनेनेति लोको भारतादिरुक्तः। मुख्यार्थमप्याह। बलाकेति॥

अण्डजानि च जरायुजानि च स्वेदजानि च उद्भिज्जानीति चेच्छ्रुत्यवष्टम्भेन सूत्रं व्याचष्टे। अपि चेति। अन्यत्राप्यनिष्टादिकारिष्वित्यर्थः। अनया श्रुत्या चातुर्विध्यं कथमुक्तं श्रुत्यन्तरे त्रीण्येवेत्यवधारणविरोधादिति प्रश्नोत्तरत्वेन सूत्रमादत्ते। नन्वित्यादिना॥

तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

'आण्डजं जीवजमुद्भिज्जम्' इत्यत्र तृतीयेनोद्भिज्जशब्देनैव स्वेदजोपसङ्ग्रहः कृतः प्रत्येतव्यः, उभयोरपि स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात्। स्थावरोद्भेदात्तु विलक्षणो जङ्गमोद्भेद इत्यन्यत्र स्वेदजोद्भिज्जयोर्भेदवाद इत्यविरोधः॥

साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

इष्टादिकारिणश्चन्द्रमसमारुह्य 'तस्मिन् यावत्सम्पातमुषित्वा ततः सानुशया अवरोहन्ति' इत्युक्तं, अथावरोहप्रकारः परीक्ष्यते। तत्रेयमवरोहश्रुतिर्भवति 'अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति' इति। तत्र संशयः किमाकाशादिस्वरूपमेवावरोहन्तः प्रतिपद्यन्ते किं वाकाशादिसाम्यमिति। तत्र प्राप्तं तावदाकाशादिस्वरूपमेव प्रतिपद्यन्त इति। कुतः, एवं हि श्रुतिर्भवति, इतरथा-

---

जीवजं जरायुजं मनुष्यादि, भूमिमुद्भिद्य जायते वृक्षादिकं, उदकं भित्त्वा जायते यूकादिजङ्गममिति भेदः। संशोकः स्वेदः॥

एवं पापिनां गत्यागतौ विचार्य सम्प्रतीष्टादिकारिणामवरोहे विशेषमाह। साभाव्यापत्तिरुपपत्तेः। यथेतमनेवं चेत्युक्तरीत्या यथागतं धूमाद्यध्वानं पुनर्निवर्तन्ते, निवृत्तास्वानुशयिनः कर्मान्ते द्रुतदेहाः आकाशं गताः आकाशसदृशा भवन्ति। आकाशसादृश्यानन्तरं पिण्डीकृता अतिसूक्ष्मलिङ्गोपहिताः वायुनेतस्ततस्च नीयमाना वायुसमा भवन्ति। सानुशयः सद्यो वायुसमो भूत्वा धूमं गतस्तत्समो भवति, धूमसमो भूत्वाऽभ्रसमो भवति। अपो बिभर्तीत्यभ्रं, मेहति सिञ्चतीति वृष्टिकर्ता मेघस्तत्समो भूत्वा वर्षधाराद्वारा पृथिवीं प्रविश्य व्रीहियवादिरूपो

लक्षणा स्यात्। श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या न लक्षणा, तथा च 'वायुर्भूत्वा धूमो भवति' इत्येवमादीन्यक्षराणि तत्स्वरूपोपपत्तावेव कल्प्यन्ते, तस्मादाकाशादिस्वरूपोपपत्तिरित्येवं प्राप्ते ब्रूमः, आकाशादिसाम्यं प्रतिपद्यन्त इति। चन्द्रमण्डले यदम्मयं शरीरं उपभोगार्थमारब्धं तदुपभोगक्षये सति प्रविलीयमानं सूक्ष्ममाकाशसमम्भवति ततो वायोर्वशमेति ततो धूमादिभिः संसृज्यते इति। तदेतदुच्यते 'यथेतमाकाशमाकाशाद्वायुमित्येवमादिना। कुतः, एतदुपपत्तेः। एवं ह्येतदुपपद्यते, न ह्यन्यस्यान्यभावो मुख्य उपपद्यते। आकाशस्वरूपप्रतिपत्तौ च वाय्वादिक्रमेणावरोहो नोपपद्यते। विभुत्वाच्चाकाशेन नित्यसम्बन्धत्वान्न तत्सादृश्यापत्तेरन्यस्तत्सम्बन्धो घटते। श्रुत्यसम्भवे च लक्षणाश्रयणं न्याय्यमेव, अत आकाशादितुल्यतापत्तिरेवात्राकाशादिभाव इत्युपचर्यते॥

भवतीति सिद्धान्तगत्या श्रुत्यर्थः। पूर्वान्तरयुक्तिद्वयं संशयबीजं मन्तव्यं, पूर्वत्र मार्गद्वयं उक्तमिहतीयमार्गोक्तिर्युक्ता स्थानशब्दस्य मार्गलक्षकत्वमिह दुग्धं दधि भवतीत्यादिप्रयोगे भवति श्रुतेर्विकारस्वरूपापत्तौ मुख्यत्वात् सादृश्यापत्तिलक्षणाबीजं नास्तीति प्रत्युदाहरणसङ्गतिः। श्रुतिमुख्यत्वं फलमिति पूर्वपक्षः। अनुशयिनां पूर्वसिद्धाकाशादिस्वरूपापत्त्ययोगाल्लक्षणेति सिद्धान्तयति। एवमित्यादिना। समानो भावो धर्मो यस्य तद्भावः साभाव्यं साम्यमिति सूत्रपदार्थः। एवं ह्येतदिति एतद्भवनमेवंसादृश्यरूपमेवोपपद्यत इत्यर्थः। अनुशयिनामाकाशादिभ्यो निर्गमनान्यथानुपपत्त्यापि सादृश्यलक्षणेत्याह। आकाशस्वरूपेति। संयोगलक्षणामाशङ्क्याह। विभुत्वादिति। भवतिश्रुत्या संयोगलक्षणाया अनुवादः स्यादित्यर्थः। विविधभूतसाम्यमवरोहे भवतीत्यनुसन्धानाद्वैराग्यमुपसंहरति। अत इति॥

नातिचिरेण विशेषात्॥ २३॥

तत्राकाशादिप्रतिपत्तौ प्राग्व्रीह्यादिप्रतिपत्तेर्भवति विशयः किं दीर्घं दीर्घं कालं पूर्वपूर्वसादृश्येनावस्थायोत्तरोत्तरसादृश्यं गच्छन्ति उताल्पमल्पमिति। तत्रानियमो नियमकारिणः शास्त्रस्याभावात् इत्येवं प्राप्त इदमाह। नातिचिरेणेति। अल्पमल्पं कालमाकाशादिभावेनावस्थाय वर्षधाराभिः सहेमां भुवमापतन्ति। कुत एतत् विशेषदर्शनात्। तथा हि व्रीह्यादिभावापत्तेरनन्तरं विशिनष्टि 'अतो वै खलु दुर्निष्प्रपतरम्' इति। तकार एकश्छान्दस्यां प्रक्रियायां लुप्तो मन्तव्यः। दुर्निष्प्रपतरं दुर्निष्क्रमतरं दुःखतरमस्मात् व्रीह्यादिभावान्निःसरणं भवतीत्यर्थः। तदत्र दुःखं निष्प्रपतनं प्रदर्शयन् पूर्वेषु सुखं निष्प्रपतनं दर्शयति। सुखदुःखताविशेषश्चायं निष्प्रपतनस्य कालाल्पत्वदीर्घत्वनिमित्तः, तस्मिन्नवधौ शरीरानिष्पत्तेरुपभोगासम्भवात्, तस्मात् व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः स्यादिति॥

नातिचिरेण। उक्तं सादृश्यमुपजीव्य लोके गन्तॄणां चिराचिरगतिदर्शनात् संशयं वदन् पूर्वपक्षयति। तत्रेत्यादिना। अनियमात् कदाचिद्विलम्बेन योन्यापत्तिरिति पूर्वपक्षफलं, सिद्धान्ते तु व्रीहियवादिभावादनुशयिनां विलम्बेन निर्गमनमिति विशेषादाकाशादिभावाच्छीघ्रं निर्गम इत्यविलम्बेन योन्यापत्तिरित्यनुसन्धानाद्वैराग्यदार्ढ्यमिति विवेकः। नन्वाकाशादिष्वनुशयिनां सुखं व्रीहियवादिषु दुःखमिति दुःशब्दाद्भाति न चिराचिरनिर्गमनमित्यत आह। सुखदुःखताविशेषश्चायमिति। अवधिः कालः॥

अन्याधिष्ठिते पूर्ववदभिलापात्॥ २४॥

तस्मिन्नेवावरोहे प्रवर्षणानन्तरं पठ्यते 'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' इति। तत्र संशयः किमस्मिन्नेवावधौ स्थावरजात्यापन्नाः स्थावरसुखदुःखभाजोऽनुशयिनो भवन्त्याहोस्वित् क्षेत्रज्ञान्तराधिष्ठितेषु स्थावरशरीरेषु संश्लेषमात्रं गच्छन्तीति। किं तावत् प्राप्तं स्थावरजात्यापन्नास्तत्सुखदुःखभाजोऽनुशयिनो भवन्तीति। कुत एतत्, जनेर्मुख्यार्थत्वोपपत्तेः, स्थावरभावस्य च श्रुतिस्मृत्योरुपभोगस्थानत्वप्रसिद्धेः, पशुहिंसादियोगाच्चेष्टादेः कर्मजातस्यानिष्टफलत्वोपपत्तेः तस्मान्मुख्यमेवानुशयिनां व्रीह्यादिजन्म-

---

अन्याभिलापात् श्रुतिक्रमात् अर्थक्रमाच्चाधिकरणानां क्रमो बोध्यः। इह भूमौ वर्षधाराद्वारा पतितास्तेऽनुशयिनो व्रीह्यादिसाम्येन जायन्त इति श्रुत्यर्थः। अत्र जायन्त इति श्रुतेः पूर्वत्राकाशादिवर्षान्तसादृश्योक्तेश्च संशयमाह। तत्रेति। अस्मिन्नवधौ वर्षसादृश्यानन्तरमित्यर्थः। दुर्निष्प्रपतरशब्देन चिरनिर्गमनलक्षणोक्ता न युक्ता दुःखेन निर्गमनमिति मुख्यसम्भवादित्याक्षेपसङ्गत्या पूर्वपक्षयति। किन्तावदित्यादिना। अत्र पूर्वपक्षे स्थावरत्वनिवृत्तयेऽधिकारिणां यत्नगौरवं, सिद्धान्ते व्रीह्यादिसंश्लेषमात्रं परिहर्तुं यत्नलाघवमवैधर्म्यञ्चेति विवेकः। ननु देहोत्पत्त्या जीवानां जन्म स्यान्न स्वतः, व्रीह्यादेस्तु न देहत्वमित्यत आह। स्थावरभावस्येति। 'स्थाणुमन्येऽनुसंयन्ति' इत्याद्या श्रुतिः। 'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः' इत्याद्या स्मृतिः। ननु स्वर्गिणां पापाभावात् कथं स्थावरत्वं तत्राह। पश्विति। सोमाद्युच्छिष्टभक्षणसुरापशावादिशब्दार्थः। क्रत्वर्थहिंसादेरपि हिंसात्वादिसामान्येन प्रवृत्ते-

श्वादिजन्मवत्। यथा श्वयोनिं वा शूकरयोनिं वा चण्डाल-योनिं वेति मुख्यमेवानुशयिनां श्वादिजन्म तत्सुखदुःखान्वितं भवति एवं व्रीह्यादिजन्मापीत्येवं प्राप्ते ब्रूमः। अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यन्ते न तत्सुखदुःखभाजो भवन्ति पूर्ववत्। यथा वायुधूमादिभावोऽनुशयिनां तत्संश्लेषमात्रमेवं व्रीह्यादिभावोऽपि जातिस्थावरैः संश्लेषमात्रं। कुत एतत्, तद्वदेवेहाप्यभिलापात्। कोऽभिलापस्य तद्वद्भावः कर्मव्यापारमन्तरेण सङ्कीर्तनं यथाकाशादिषु प्रवर्षणान्तेषु न कञ्चित् कर्मव्यापारं परामृशत्येवं व्रीह्यादिजन्मन्यपि। तस्मान्नास्त्यत्र सुखदुःखभाक्त्वमनुशयिनां। यत्र तु सुखदुःखभाक्त्वमभिप्रैति परामृशति तत्र कर्मव्यापारं रमणीयचरणाः कपूयचरणा इति। अपि च मुख्येऽनुशयिनां व्रीह्यादिजन्मनि व्रीह्यादिषु लूयमानेषु कण्ड्यमानेषु भज्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभिमानिनोऽनुशयिनः प्रवसेयुः,

---

र्न हिंस्यादित्यादिशास्त्रनिषिद्धत्वाकारेण दुरितापूर्वकारित्वमविरुद्धमिति साङ्ख्या आह। अतो तु व्रीह्यादिभावोऽनुशयिनां न जन्मरूपः कर्मविशेषपरामर्शं विनाचोक्तत्वात् पूर्वोक्ताकाशादिभाववदिति सिद्धान्तयति। एवं प्राप्त इत्यादिना। पूर्ववदिति पदं दृष्टान्तत्वेन हेतुत्वेन च व्याख्यातं, यदत्रप्रकरणे कर्मविशेषपरामर्शपूर्वकमुच्यते तज्जन्मेति व्यतिरेकदृष्टान्तमप्याह। यत्र त्विति। अपि च 'यो यो ह्यन्नमत्ति यो रेतः स्त्रियां सिञ्चति तद्रूप एव भवति' इति वाक्यशेषे व्रीह्यादिषु प्रविष्टस्यानुशयसङ्गस्य न दारारेतःसिक्पुरुषयोगः अतः तदन्यथानुपपत्त्यापि जन्मश्रुतिर्न मुख्येत्याह। अपि चेत्यादिना। व्रीह्यादिरू-

यो हि जीवो यच्छरीरमभिमन्यते स तस्मिन् पीड्यमाने प्रवसति इति प्रसिद्धं। तत्र व्रीह्यादिभावाद्रेतःसिग्भावोऽनुशयिनां नाभिलप्येत, अतः संसर्गमात्रमनुशयिनामन्याधिष्ठितेषु व्रीह्यादिषु भवति। एतेन जनेर्मुख्यार्थत्वं प्रति ब्रूयात्, उपभोगस्थानत्वञ्च स्थावरभावस्य। न च वयमुपभोगस्थानत्वं स्थावरभावस्यावजानीमहे, भवत्वन्येषां जन्तूनामपुण्यसामर्थ्येन स्थावरभावमुपगतानामेतदुपभोगस्थानं। चन्द्रमसस्त्ववरोहन्तोऽनुशयिनो न स्थावरभावमुपभुञ्जत इत्याचक्ष्महे॥

अशुद्धमिति चेन्न शब्दात्॥ २५॥

यत्पुनरुक्तं पशुहिंसादियोगादशुद्धमाध्वरिकं कर्म तस्यानिष्टमपि फलमवकल्पत इत्यतो मुख्यमेवेहानुशयिनां व्रीह्यादिजन्मास्तु तत्र गौणी कल्पनाऽनर्थिकेति, तत्परिह्रियते। न

पदहनाशे देहिनामुत्क्रान्तेरवश्यम्भावाद्रेतःसिग्योगो न स्यादित्यर्थः। एतेनेति उक्तानुमानार्थापत्तिभ्यां। जायत इति श्रुतेर्मुख्यार्थत्वमनुशये भोगायतनत्वञ्च व्रीह्यादेः प्रति ब्रूयादित्यर्थः। ननु व्रीह्यादेर्भोगायतनत्वानङ्गीकारे पूर्वोक्तश्रुतिस्मृतिप्रवृत्तिबाध इत्यत आह। न चेति॥

वैदिकं कर्माशुद्धं न भवति शास्त्रविहितत्वादिति सूत्रार्थं प्रपञ्चयति। अयं धर्म इत्यादिना। शुचौ देशे प्रातःसायङ्काले जीवनादिनिमित्तं कृतमग्निहोत्रं धर्मो भवति स एवाशुचिदेशे मध्यरात्रे मरणादिनिमित्ते कृतः सन्नधर्मो भवतीति निर्णयः शास्त्रैकसाध्य इत्यर्थः। ततः किन्तत्राह। शास्त्राच्चेति। ननु या हिंसा सोऽधर्म इत्युत्सर्गस्य विशेषविधिना बाधोऽत्र न युक्तः। नाभिचरेदिति निषिद्धश्ये-

शास्त्रहेतुत्वाद्धर्माधर्मविज्ञानस्य। अयं धर्मोऽयमधर्म इति शास्त्रमेव विज्ञाने कारणमतीन्द्रियत्वात् तयोरनियतदेशकालनिमित्तत्वाच्च। यस्मिन् देशे काले निमित्ते च यो धर्मोऽनुष्ठीयते स एव देशकालनिमित्तान्तरेष्वधर्मो भवति, तेन न शास्त्रादृते धर्माधर्मविषयं विज्ञानं कस्यचिदस्ति। शास्त्राच्च हिंसानुग्रहाद्यात्मको ज्योतिष्टोमो धर्म इत्यवधारितं, स कथमशुद्ध इति शक्यते वक्तुं। ननु न हिंस्यात् सर्वभूतानीति शास्त्रमेव भूतविषयां हिंसामधर्म इत्यवगमयति। बाढं, उत्सर्गस्तु सः, अयञ्चापवादोऽग्नीषोमीयं पशुमालभेतेति उत्सर्गापवादयोश्च व्यवस्थितविषयत्वं। तस्माद्विशुद्धं वैदिकं कर्म शिष्टैरनुष्ठीयमानत्वादनिन्द्यमानत्वाच्च। तेन न तस्य प्रतिरूपं फलं जातिस्थावरत्वं। न च श्वादिजन्मवदपि ब्रीह्यादिजन्म भवितुमर्हति। तद्धि कपूयचरणानधिकृत्योच्यते, नैवमिह

नस्य पुरुषार्थत्ववत् निषिद्धहिंसादेरपि क्रतूपकारकत्वाविरोधादिति तत्राह। उत्सर्गापवादयोरिति। अयमर्थः काम्ये कर्मणि सर्वत्र करणांशे रागतः प्रवृत्तिः अङ्गेषु विधित इति स्थितिः। तथा च श्येनाख्ये कर्मणि निषेधोपरोधप्राबल्यात् प्रवृत्तिः स्यात् क्रत्वङ्गहिंसादौ तु विधित एव प्रवृत्तिर्वाच्या। स च विधिर्यद्युत्सर्गप्राप्तं अनर्थहेतुत्वं न बाधेत तर्हि प्रवर्तको न स्यात्, प्रवर्तकत्वे वा विधिरनर्थाय स्यात, अतो निरवकाशो विधिः सावकाशमुत्सर्गमविहितहिंसादिषु स्थापयतीति। इदञ्च निषेधशास्त्रस्य हिंसात्वादिसामान्येन प्रवृत्तिमङ्गीकृत्योक्तं। वस्तुतस्तस्य रागप्राप्तहिंसाविषयत्वाद्वैधहिंसायामप्रवृत्तेर्नाशुद्धत्वशङ्कावसर इति द्रष्टव्यं। प्रतिरूपं दुःखरूपं तस्य फलं नेति योजना। इह व्रीह्या-

वैशेषिकः कश्चिदधिकारोऽस्ति, अतस्तन्नस्थलात् स्खलितानामनुशयिनां व्रीह्यादिसंश्लेषमात्रं तद्भाव इत्युपचर्यते ॥

रेतःसिग्योगोऽथ ॥ २६ ॥

इतश्च व्रीह्यादिसंश्लेषमात्रं तद्भावो यत्कारणं व्रीह्यादिभावस्यानन्तरमनुशयिनां रेतःसिग्भाव आम्नायते 'यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति' इति। न चात्र मुख्यो रेतःसिग्भावः सम्भवति। चिरजातो हि प्राप्तयौवनो रेतःसिग्भवति कथमिवानुपचरिततद्भावमन्नमानान्नानुगतोऽनुशयी प्रतिपद्यते। तत्र तावदवश्यं रेतःसिग्योग एव रेतःसिग्भावोऽभ्युपगन्तव्यः तद्वत् व्रीह्यादिभावोऽपि व्रीह्यादियोग एवेत्यविरोधः ॥

योनेः शरीरं ॥ २७ ॥

अथ रेतःसिग्भावानन्तरं योनौ निषिक्ते रेतसि योनेरधिशरीरमनुशयिनामनुशयफलोपभोगाय जायत इत्याह शास्त्रं

दिभावे कश्चिदधिकारः कर्मपरामर्शो नास्तीत्युक्तं। अथ व्रीह्यादिभावानन्तरं रेतःसिग्भावः श्रुतः। तत्रान्नस्यानुशयिनो रेतःसेककर्तृत्वायोगाद्योगमात्रं वाच्यं तद्वदनुशयक्रमेऽपि योग एवाश्रेयः, अन्यथोपक्रमोपसंहारयोः विरोधः स्यादिति मत्वोक्तमित्यविरोध इति योनेः शरीरश्रुतेर्न व्रीह्यादिशरीरत्वमनुशयिनामिति सूत्रार्थः।
एवं कर्मिणां गत्यागतिसंसारो दुर्वार इत्यनुसन्धानात् कर्मफला-


'तद् य इह रमणीयचरणाः' इत्यादि, तस्मादप्यवगम्यते नाव-रोहे व्रीह्यादिभावावसरे तच्छरीरमेव सुखदुःखान्वितं भव-तीति, तस्मात् व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धं ॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीशङ्करभगवत्पादकृतौ तृतीयाध्यायस्य प्रथमः पादः ॥

वैराग्यतत्त्वज्ञानसाधनं सिद्धमिति पादार्थमुपसंहरति। इति सिद्ध-मिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दानन्दभगवत्-पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां तृतीयाध्या-यस्य प्रथमः पादः ॥

ॐ परमात्मने नमः।



सन्ध्ये सृष्टिराह हि ॥ १॥

अतिक्रान्ते पादे पञ्चाग्निविद्यामुदाहृत्य जीवस्य संसारगतिप्रभेदः प्रपञ्चितः, इदानीं तस्यैवावस्थाभेदः प्रपञ्च्यते। इदमामनन्ति 'स यत्र प्रस्वपिति' इत्युपक्रम्य 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते' इत्यादि। तत्र संशयः किं प्रबोध इव स्वप्नेऽपि पारमार्थिकी सृष्टिरा-

---

ॐ वेदव्यासाय नमः।

सन्ध्ये सृष्टिराह हि। उक्तवैराग्यसाध्यस्तत्त्वंपदार्थविवेको वाक्यार्थज्ञानसाधनमस्मिन् पादे निरूप्यत इति पादयोर्हेतुसाध्यभावसङ्गतिमाह। अतिक्रान्त इति। साधनविचारत्वादेवास्य पादस्यास्मिन्नध्याये सङ्गतिः। अस्मिन् पादे न स्थानतोऽपीत्यतः प्रागुद्देश्यत्वेन प्रथमं जिज्ञासितत्वंपदार्थोऽवस्थाद्वारा विविच्यते, तदारभ्यापादसमाप्तेर्विधेयस्तत्पदार्थविवेकः, तत्र पूर्वं गत्यागतिचिन्तया जाग्रदवस्था निरूपिता तदनन्तरभाविनीं स्वप्नावस्थां श्रुत्युक्तां विषयीकृत्य तत्र स्वप्ने रथादिसृष्ट्युक्तेस्तदभावोक्तेश्च संशयं वदन् पूर्वपक्षसूत्रं योजयति। तत्र संशय इत्यादिना। स्वप्नरथादयो जाग्रद्रथादिवत् व्यावहारिकसत्ताका उत शुक्तिरजतवत् प्रातीतिका इति संशयार्थः। आरम्भाधिकरणे प्रपञ्चस्य पारमार्थिकत्वनिषेधादिति मन्तव्यं। अत्र पूर्वपक्षे जाग्रद्वत् स्वप्नाज्जीवस्य विवेकासिद्धिः

होऽस्मिन्मायामयीति। तत्र तावत् प्रतिपद्यते सन्ध्ये सृष्टिरिति। सन्ध्यमिति स्वप्नस्थानमाचष्टे वेदे प्रयोगदर्शनात् 'सन्ध्यं तृतीयं स्वप्नस्थानम्' इति। द्वयोर्लोकस्थानयोः प्रबोधसम्प्रसादस्थानयोर्वा सन्धौ भवतीति सन्ध्यं तस्मिन् सन्ध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति। कुतः, यतः प्रमाणभूता श्रुतिरेवमाह 'अथ रथान् रथयोगान् पथः सृजते' इत्यादि। स हि कर्तेति चोपसंहारादेवमेवावगम्यते॥

निर्मातारं चैके पुत्रादयश्च॥२॥

अपि चैके शाखिनोऽस्मिन्नेव सन्ध्ये स्थाने कामानां निर्मातारमात्मानमामनन्ति 'य एष सुप्तेषु जागर्ति कामं कामं पुरु-

---

सिद्धान्ते प्रातीतिकदृश्यसाक्षितया विवेकात् स्वयंज्योतिष्ट्वसिद्धिरिति फलं। सुमूर्षोः सर्वेन्द्रियोपसंहारादेतल्लोकाननुभवे सति वासनामात्रेण इमं लोकं स्मरतः कर्मबलाद्धृदये मानसपरलोकस्फूर्तिरूपः स्वप्नो भवति, सोऽयं लोकद्वयसन्धौ भवतीति सन्ध्यः स्वप्नः। तथा च श्रुतिः 'तस्मिन् सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यति इदञ्च परलोकस्थानञ्च' इति अयं स्वप्नः कादाचित्क इत्यरुच्या नित्यस्वप्नस्य प्रबोधस्वप्नस्य प्रबोधसम्प्रसादसन्धिभवत्वमुक्तं। अतयस्तु मर्त्यचक्षुराद्यजन्यरूपादिसाक्षात्कारवत्त्वं परलोकलक्षणं, दैवचक्षुराद्यजन्यत्वं मर्त्यलोकलक्षणञ्च स्वप्नेऽस्तीति लक्षणतो लोकद्वयस्पर्शित्वात् नित्यस्वप्नस्यैव लोकद्वयसन्ध्यत्वं ग्रामद्वयस्पर्शिमार्गस्य तत्सन्ध्यत्ववदिति व्याचक्षते। न केवलं श्रुत्या स्वप्नार्थानां व्यावहारिकसत्यत्वं किन्तु सकर्तृकत्वादपीत्याह। स हि कर्तेति॥

किञ्च स्वप्नार्थाः सत्याः प्राज्ञनिर्मितत्वात् आकाशादिवदिति सूत्रार्थमाह। अपि चेत्यादिना। रूढिमाशङ्क्य प्रकरणान्निरस्यति। नन्वि-

षो निर्मिमाणः' इति। पुत्रादयश्च तत्र कामा अभिप्रेयन्ते काम्यन्त इति। ननु कामशब्देनेच्छाविशेषा एवोच्येरन्, न, 'शतायुषः पुत्रपौत्रान् वृणीष्व' इति प्रकृत्य 'अन्ते कामानान्त्वा कामभाजं करोमि' इति प्रकृतेषु तत्र पुत्रादिषु कामशब्दस्य प्रयुक्तत्वात्। प्राज्ञं चैनं निर्मातारं प्रकरणवाक्यशेषाभ्यां प्रतीमः। प्राज्ञस्य हीदं प्रकरणं 'अन्यत्र धर्मादन्यत्राधर्मात्' इत्यादि। तद्विषयएव च वाक्यशेषोऽपि--

'तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन'॥ इति

प्राज्ञकर्तृका च सृष्टिस्तथ्यरूपा समधिगता जागरिताश्रया तथा स्वप्नाश्रयापि सृष्टिर्भवितुमर्हति। तथा च श्रुतिः 'अथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्तः' इति स्वप्नजागरितयोः समानन्यायतां श्रावयति। तस्मात् तथ्यरूपैव सन्ध्ये सृष्टिरित्येवं प्राप्ते प्रत्याह॥

मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥ ३॥

तुशब्दः पक्षं व्यावर्तयति। नैतदस्ति यदुक्तं सन्ध्ये सृष्टिः पारमार्थिकीति। मायामय्येव सन्ध्ये सृष्टिर्न परमार्थगन्धोऽप्यस्ति।

त्यादिना। यः सुप्तेषु करणेषु जागर्ति तदेव शुक्रं स्वप्रकाशं ब्रह्मेत्यर्थः। स्वप्नस्य जाग्रदर्थैः समानदेशत्वश्रुतेरभेदश्रुतेश्च सत्यत्वे तात्पर्यमित्याह। अथो खल्वाहुरिति॥

स्वप्नरथादयः प्रातीतिकाः जाग्रद्रथादौ कॢप्तसामग्रीं विनादृष्टत्वाच्छुक्तिरूप्यादिवदिति सिद्धान्तयति। तुशब्द इत्यादिना। चिन्मात्रनिष्ठाऽ-

कुतः, कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्। न हि कार्त्स्न्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपः स्वप्नः। किं पुनरत्र कार्त्स्न्यमभिप्रेतं, देशकालनिमित्तसम्पत्तिरबाधश्च। न हि परमार्थवस्तुविषयाणि देशकालनिमित्तानि अबाधश्च स्वप्ने सम्भाव्यते। न तावत् स्वप्ने रथादीनामुचितो देशः सम्भवति, न *तावत् संवृते देहदेशे रथादयोऽवकाशं लभेरन्। स्यादेतत्, वहिर्देहात् स्वप्नं द्रक्ष्यति दिशान्तरितद्रव्यग्रहणात्। दर्शयति च श्रुतिः 'वहिर्देहात् स्वप्नं वहिःकुलायादमृतश्चरित्वा स ईयते अमृतो यत्र कामम्' इति। स्थितिगतिप्रत्ययभेदश्च नानिष्क्रान्ते जन्तौ सामञ्जस्यमश्नुवीतेति। नेत्युच्यते, न हि सुप्तस्य जन्तोः चणमात्रेण योजनशतान्तरितं देशं पर्येतुं विपर्येतुञ्च ततः सामर्थ्यं सम्भाव्यते। क्वचिच्च प्रत्यागमनवर्जितं स्वप्नं श्रावयति 'कुरुष्वहं †शय्यायां शयानो निद्रयाभिप्लुतः स्वप्ने पञ्चालानभिगतश्चास्मिन् प्रतिबुद्धश्च' इति। देहाच्चेदपेयात् पञ्चालेष्वेव प्रतिबुध्येत तानसावभिगत इति कुरुष्वेव तु प्रतिबुध्यते। येन चायं देहेन देशान्तरमश्नुवानो मन्यते ‡तमन्ये पार्श्वस्थाः शयनदेश एव पश्यन्ति। यथा-

---

विद्या चित्तावच्छेदेन जीवेऽपि स्थिता रथाद्याकारा मायेति सूत्रभाष्ययोरुक्तमायाविद्ययोरभेदज्ञापनार्थमात्रपदेन सति प्रमातर्यबाध्यत्वरूपस्य व्यावहारिकसत्यत्वस्य निरास उक्तः। कार्त्स्न्यमत्र जाग्रति पाकप्रसामग्री, तज्जन्यत्वं परमार्थवस्तुनो जाग्रदर्थस्य कार्यस्य धर्मः सत्यत्वव्यापकः तदभावं स्वप्ने विवृणोति। न तावदित्यादिना। संवृते सङ्कीर्णे,

---

* तावदित्यस्य स्थाने चेति वर्ध० का०।

† शय्यायामित्यस्य स्थानेऽद्येति वर्ध० का० मो०।

‡ तमस्याभ्यासस्थं ख्या इति वर्ध० का०।

भूतानि चायं देशान्तराणि स्वप्ने पश्यति न तानि तथाभूतान्येव भवन्ति, परिधावंश्चेत् पश्येज्जाग्रद्वस्तुभूतमर्थमाकलयेत्। दर्शयति च श्रुतिः 'अन्तरेव देहे स्वप्नं स यत्रैतत् स्वप्नयाचरति' इत्युपक्रम्य 'स्वे शरीरे यथाकामं परिवर्तते' इति। अतश्च श्रुत्युपपत्तिविरोधाद्बहिःकुलायश्रुतिर्गौणी व्याख्यातव्या 'बहिरिव कुलायादमृतश्चरित्वा' इति यो हि वसन्नपि शरीरे न तेन प्रयोजनं करोति स बहिरिव शरीराद्भवति इति। स्थितिगतिप्रत्ययभेदोऽप्येवं सति विप्रलम्भ एवाभ्युपगन्तव्यः, कालविसंवादोऽपि च स्वप्ने भवति रजन्यां सुप्तो वासरं भारते वर्षे मन्यते तथा मुहूर्तमात्रवर्तिनि स्वप्ने कदाचिद्बहून् वर्षपूगानतिवाहयति। निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे वोचितानि विद्यन्ते, करणोपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि सन्ति, रथादिनिर्वर्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारूणि वा, बाध्यन्ते चैते रथादयः स्वप्नदृष्टाः प्रबोधे, स्वप्न एव चैते सुलभबाधा भवन्ति आद्यन्तयोर्व्यभिचारदर्शनात्, रथोऽयमिति हि कदाचित् स्वप्ने निर्धारितः क्षणेन मनुष्यः सम्प-

---

पर्येतुं गन्तुं, विपर्येतुमागन्तुं, श्रावयति प्रबुद्धो जनः, पार्श्वस्थान् प्रतीति शेषः। एतत् स्वप्नं यथा स्यात् तथा यत्र काले स्वप्नयावृत्त्या चरति तदा स्वशरीरे यथेष्टं चरतीत्यर्थः। बहिरिवेति कुलायदेहात् बहिरिवामृत आत्मा चरित्वा यत्र कामं यथेष्टमीयते विहरतीत्यर्थः। गुणमाह। यो हीति। देहाभिमानहीनत्वगुणेन बहिष्ठवद्देहस्थोऽपि विहरतीत्युक्त इत्यर्थः। एवं सति श्रुतियुक्तिभ्यां स्वत एव स्वप्ने सतीत्यर्थः। विप्रलम्भो विभ्रमः, योग्यदेशाभावमुक्त्वा काला-

ष्यते, मनुष्योऽयमिति वा निर्धारितः क्षणेन वृक्षः। स्पष्टञ्चाभावं रथादीनां स्वप्ने श्रावयति शास्त्रं 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति' इत्यादि। तस्मान्मायामात्रं स्वप्नदर्शनं॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः॥ ४॥

मायामात्रत्वात् तर्हि न कश्चित् स्वप्ने परमार्थगन्ध इति, नेत्युच्यते। सूचकश्च हि स्वप्नो भवति भविष्यतोः साध्वसाधुनोः। तथा हि श्रूयते 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने' इति। तथा 'पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति' इत्येवमादिभिः स्वप्नैरचिरजीवित्वमावेद्यत इति श्रावयति। आचक्षते च स्वप्नाध्यायविदः 'कुञ्जरारोहणादीनि स्वप्ने धन्यानि खरयानादीन्यधन्यानि' इति, मन्त्रदेवताद्रव्यविशेषनिमित्ताश्च केचित् स्वप्नाः सत्यार्थगन्धिनो भवन्तीति मन्यन्ते, तत्रापि भवतु नाम सूच्यमानस्य वस्तुनः सत्यत्वं, सूचकस्य तु स्त्रीदर्शनादेर्भवत्येव वैतथ्यं

भावमाह। कालेति। अत्र रात्रिसमयेऽपि केतुमालादिवर्षान्तरे वासरो भवति इति भारत इत्युक्तं॥

पूर्वपक्षानुमानानां जाग्रदर्थदृष्टान्ते क्रमसामग्रीजन्यत्वमबाध्यत्वं उपाधिरिति सूत्रतात्पर्यं स्वप्नस्य भ्रान्तिमात्रत्वे तत्सूचितोऽप्यर्थः सत्यो न स्यादिति शङ्कोत्तरत्वेन सूत्रान्तरं व्याचष्टे। मायेत्यादिना। मन्त्रेण देवतानुग्रहेणौषधिसेवया वा स्वप्नाः सत्यसूचकाश्चेत् स्वप्नाः स्युरित्यत आह। तत्रापि भवतु नामेति। सत्यहर्षहेतोरपि शुक्तिरूप्यस्य सत्यत्वादर्शनादिति भावः। यथा क्वचिद्दारा ला-

बाध्यमानत्वादित्यभिप्रायः। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं। यदुक्तमाह हीति तदेवं सति भाक्तं व्याख्यातव्यं, यथा लाङ्गलं गवादीनुद्वहतीति निमित्तमात्रत्वादेवमुच्यते न तु प्रत्यक्षमेव लाङ्गलं गवादीनुद्वहति, एवं निमित्तमात्रत्वात् सुप्तो रथादीन् सृजते स हि कर्त्तेति चोच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन् सृजति। निमित्तत्वन्त्वस्य रथादिप्रतिभाननिमित्तमोदत्रासदर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्त्तृत्वेनेति वक्तव्यं। अपि च जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्चात्मनः स्वयंज्योतिष्ट्वं द्रष्टुर्दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः, तत्र यदि रथादिसृष्टिवचनं श्रुत्या नीयेत स्वयंज्योतिष्ट्वं न निर्णीतं स्यात्। तस्माद्रथाद्यभाववचनश्रुत्या रथादिसृष्टिवचनं *भाक्तमिति व्याख्येयं।

ङ्गलस्य गवादिजीवननिमित्तत्वं तथा स्वप्नभोक्तुरदृष्टद्वारा स्वप्नसृष्टिनिमित्तत्वं नतु कुम्भं प्रति कुम्भकारस्येव साक्षात् स्वप्नकर्त्तृत्वं सामग्र्यभावबाधयोरुक्तत्वादित्याह। यदुक्तमित्यादिना। तथा च स्वप्नस्य सकर्त्तृकत्वं मुख्यं नास्तीति हेत्वसिद्धिरिति भावः। श्रुतितात्पर्यविरोधाच्च न स्वप्नसत्यतेत्याह। अपि चेति। व्यतिकरः सङ्करः, श्रुत्या तत्परतयेत्यर्थः। जागरितादविशेषादिति भावः। फलितमाह। तस्मादिति। एतेनेति भाक्तत्वेनेत्यर्थः। द्वितीयसूत्रोक्तप्राज्ञकर्त्तृत्वहेतुरपि स्वप्नस्य किं श्रुतिसिद्धः उत प्राज्ञस्य सर्वेश्वरत्वात् सिद्धः, नाद्य इत्याह। यदुक्तमित्यादिना। स्वयं विहत्य जाग्रद्देहं निश्चेष्टं कृत्वा, स्वयं वासनया देहं निर्माय, स्वेन भासा स्वीयबुद्धिवृत्त्या स्वेन ज्योतिषा स्वरूपचैतन्येन च स्वप्नमनुभवतीत्यर्थः। न केवलं दृष्ट-

* भक्त्येति का० वर्ध०।

एतेन निर्माणश्रवणं व्याख्यातं। यदप्युक्तं 'प्राज्ञमेनं निर्मातारमामनन्ति' इति, तदप्यसत् श्रुत्यन्तरे 'स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति' इति जीवव्यापारश्रवणात्। इहापि च 'य एष सुप्तेषु जागर्ति' इति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता सङ्कीर्त्यते, तस्य तु वाक्यशेषेण तदेव शुक्रन्तद्ब्रह्मेति जीवभावं व्यावर्त्य ब्रह्मभाव उपदिश्यते, 'तत्त्वमसि' इत्यादिवदिति न ब्रह्मप्रकरणत्वं विरुध्यते। न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिध्यते, तस्य सर्वेश्वरत्वात् सर्वास्ववस्थास्वधिष्ठातृत्वोपपत्तेः। पारमार्थिकस्तु नायं सन्ध्याश्रयः सर्गो वियदादिसर्गवदित्येतावत् प्रतिपाद्यते। न च वियदादिसर्गस्याप्यात्यन्तिकं सत्यत्वमस्ति, प्रतिपादितं हि 'तदन्यत्वमारम्भणशब्दादिभ्यः', इत्यत्र समस्तस्य प्रपञ्चस्य मायामात्रत्वं। प्राक् च ब्रह्मात्मदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति, सन्ध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इत्यतो वैशेषिकमिदं सन्ध्यस्य मायामात्रत्वमुदितं॥

दारण्यके जीवस्य स्वप्नकर्तृत्वं श्रुतं किन्तु काठकेऽपीत्याह। इहापीति। जीवोक्तौ ब्रह्मप्रकरणाविरोध इत्यत आह। तस्य त्विति। एवं हेतोः श्रुतिसिद्धत्वं निरस्य द्वितीयमङ्गीकरोति। न चास्माभिरिति। तर्हि हेतुसिद्धेः स्वप्नस्य सत्यत्वमित्याशङ्क्य सत्यत्वं व्यावहारिकं पारमार्थिकञ्चेति विकल्प्य व्यवहारकाले बाधदर्शनात् नाद्य इत्याह। पारमार्थिकस्त्विति। द्वितीये दृष्टान्तस्य साध्यवैकल्यमित्याह। न चेति। कस्तर्हि स्वप्नस्य जाग्रतो विशेषोऽत्र कथन इत्याशङ्क्य प्रतिभासिकत्वमित्याह। प्रागिति॥

पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

अथापि स्यात् परस्यैव तावदात्मनोऽंशो जीवोऽग्नेरिव विस्फुलिङ्गः, तत्रैवं सति यथाग्निविस्फुलिङ्गयोः समाने दहनप्रकाशनशक्ती भवतः एवं जीवेश्वरयोरपि ज्ञानैश्वर्यशक्ती, ततश्च जीवस्यैश्वर्यवशात् साङ्कल्पिकी स्वप्ने रथादिसृष्टिर्भविष्यतीति, अत्रोच्यते। सत्यपि जीवेश्वरयोरंशांशीभावे प्रत्यक्षमेव जीवेश्वरविपरीतधर्मत्वं, किं पुनर्जीवस्येश्वरसमानधर्मत्वं नास्त्येव न नास्तीति, विद्यमानमपितु तत् तिरोहितं, अविद्याव्यवधानात्। तत्पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतस्येव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात् संसिद्धस्य कस्यचिदेवाविर्भवति न स्वभावत

पूर्वं सृष्टसामग्र्यभावात् स्वप्नो मायेत्युक्तमयुक्तं सङ्कल्पमात्रेणापि सत्यसृष्टिसम्भवात् इति शङ्कां कृत्वा परिहरन् सूत्रं व्याचष्टे। अथापि स्यादित्यादिना। सत्यसङ्कल्पस्य हि सङ्कल्पात् सृष्टिः सत्या भवति जीवस्य त्वसत्यसङ्कल्पत्वं प्रत्यक्षमिति परिहारार्थः। तर्हि विरुद्धधर्मवत्त्वाज्जीवस्येश्वरत्वं नास्त्येवेति शङ्कते। किमिति। नास्तीति न किन्त्वावृतमस्ति, तत्पुनरीश्वरप्रसादात् कस्यचित् व्यज्यत इत्याह। न नास्तीति। विधूतध्वान्तस्य निष्पापस्य संसिद्धस्याणिमादिविशिष्टस्यैश्वर्यः। अहमेवाहमिति देवं ज्ञात्वा साक्षात्कृत्य सर्वपाशानामविद्यादिक्लेशानामपहानिरपक्षयस्तद्भयो भवति। क्षीणैश्च क्लेशैस्तत्कार्यजन्ममरणात्मकबन्धध्वंस इति निर्गुणविद्याफलमुक्तं सगुणविद्याफल-

एव सर्वेषां जन्तूनां, कुतस्ततो हि ईश्वराद्धेतोरस्य जीवस्य बन्धमोक्षौ भवतः, ईश्वरस्य स्वरूपापरिज्ञानाद्बन्धः तत्स्वरूपपरिज्ञानात्तु मोक्षः। तथा च श्रुतिः 'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः। तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः' इत्येवमाद्या।

देहयोगाद्वा सोऽपि ॥ ६ ॥

कस्मात् पुनर्जीवः परमात्मांश एव संस्तिरस्कृतज्ञानैश्वर्यो भवति, युक्तन्तु ज्ञानैश्वर्ययोरतिरस्कृतत्वं विस्फुलिङ्गस्येव दहनप्रकाशयोरिति। उच्यते सत्यमेवैतत्, सोऽपि तु जीवस्य ज्ञानैश्वर्यतिरोभावो देहयोगाद्देहेन्द्रियमनोबुद्धिविषयवेदनादियोगाद्भवति। अस्ति चात्रोपमा यथाग्नेर्दहनप्रकाशनसम्पन्नस्याप्यरणिगतस्य दहनप्रकाशने तिरोभवतः, यथा वा भस्मनाच्छन्नस्य, एवमविद्याप्रत्युपस्थापितनामरूपकृतदेहाद्युपाधियोगात् तदविवेकभ्रमकृतो जीवस्य ज्ञानैश्वर्यतिरोभावः। वाशब्दो जीवेश्वरयोरन्यत्वाशङ्काव्यावृत्त्यर्थः। नन्वन्य एव जीव

माह। तस्येति। परस्याभिमुख्येनाहंग्रहेण ध्यानाद्बन्धमोक्षापेक्षया मन्त्रोक्तहानिद्वयापेक्षया वा तृतीयं विश्वैश्वर्यमणिमादिरूपं मर्त्यदेहपाते सति सिद्धदेहे भवति तद्भोगानन्तरमात्मज्ञानात् केवलो द्वैतशून्य आप्तकामः प्राप्तस्वयंज्योतिरानन्दो भवतीति क्रममुक्तिरित्यर्थः॥

उक्तैश्वर्यतिरोभावे देहाभिमानो हेतुरिति कथनार्थं सूत्रं, तन्निरस्याशङ्कामाह। कस्मादिति। सत्यावरणं नास्तीत्यङ्गीकृत्य कल्पि-

ईश्वरादस्तु तिरस्कृतज्ञानैश्वर्यत्वात् किं देहयोगकल्पनया। नेत्युच्यते, न ह्यन्यत्वं जीवस्येश्वरादुपपद्यते 'सेयं देवतैचत' इत्युपक्रम्य 'अनेन जीवेनात्मनानुप्रविश्य' इत्यात्मशब्देन जीवस्य परामर्शात्। 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति च जीवायोपदिशतीश्वरात्मत्वं, अतोऽनन्य एवेश्वरात् जीवः सन् देहयोगात् तिरोहितज्ञानैश्वर्यो भवति, अतश्च न साङ्कल्पिकी जीवस्य स्वप्ने रथादिसृष्टिसिद्धिर्घटते। यदि च साङ्कल्पिकी स्वप्ने सृष्टिसिद्धिः स्यात् नैवानिष्टं कश्चित् स्वप्नं पश्येत्। न हि कश्चिदनिष्टं सङ्कल्पयते। यत्पुनरुक्तं जागरितदेशश्रुतिः स्वप्नस्य सत्यत्वं ख्यापयतीति न तत्साम्यवचनं सत्यत्वाभिप्रायं स्वयंज्योतिष्ट्वविरोधात्, श्रुत्यैव च स्वप्ने रथाद्यभावस्य दर्शितत्वात्, जागरितप्रभववासनानिमित्तत्वात् तु स्वप्नस्य तत्तुल्यनिर्भासत्वाभिप्रायं तत्। तस्मादुपपन्नं स्वप्नस्य मायामात्रत्वं॥

तदभावो नाडीषु तच्छ्रुतेरात्मनि च॥ ७॥

स्वप्नावस्था परीक्षिता सुषुप्तावस्थेदानीं परीक्ष्यते। तत्रैताः

तावदर्थं साधयति। उच्यत इत्यादिना। जीवस्येश्वरत्वमङ्गीकृत्यावरणकल्पनात्परमन्यत्वकल्पनेत्याशङ्कामुद्धाव्य श्रुत्या निरस्यति। नन्वित्यादिना। स्वप्नेऽप्यालोकादेः स्वप्नत्वे जाग्रतीवात्मनः स्वप्रकाशत्वमस्फुटं स्यात् प्रातिभासिकत्वे त्वालोकेन्द्रियाद्यसत्त्वेऽप्यर्थापरोक्ष्यमात्मज्योतिष एवेति स्फुटं सिध्यति, तस्माद्देशादिसाम्यवचनं स्वप्नस्य जाग्रत्तुल्यभानाभिप्रायमित्यर्थः॥

एवं बाह्यकरणोपरमे सति मनोवासनोद्दीपिताविद्याविलासात्मकं

सुषुप्तविषयाः श्रुतयो भवन्ति। क्वचिच्छ्रूयते 'तद् यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सृप्तो भवति' इति। अन्यत्र तु नाडीरेवानुक्रम्य श्रूयते 'ताभिः प्रत्यवसृप्य पुरीतति शेते' इति। तथान्यत्रापि नाडीरेवानुक्रम्य 'तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति' इति। तथान्यत्रापि 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति। तथान्यत्र 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' इति। तथा 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' इति च। तत्र संशयः। किमेतानि नाड्यादीनि *परस्परनिरपेक्षतया भिन्नानि सुप्तिस्थानानि आहोस्वित् परस्परापेक्षतयैकं सुप्तिस्थानमिति। किन्तावत् प्राप्तं भिन्नानीति। कुतः एकार्थत्वात्। न हि एकार्थानां क्वचित्

स्वप्नमात्मनः साक्षिणः स्वयंज्योतिःष्ट्वार्थं विचार्य प्रतियोग्यनुयोगिभावसङ्गत्या स्वप्नावस्थमनोलयात्मिकां सुषुप्तिं विचारयति। तदभावो नाडीषु तच्छ्रुतेरात्मनि च। तदेतत् स्वप्नं यथा स्यात् तथा। यत्र काले सुप्तः सुषुप्तः समस्तो निरस्तबाह्यकरणो मनोलयात् सम्यक् प्रसन्न इत्यर्थः। स्वापे नाडीस्थानमुक्ता नाडीपुरीततो नाडीपरमात्मनोश्च समुच्चयश्रुती आह। अन्यत्रेति। परमात्ममात्रश्रुतीराह। तथान्यत्रेत्यादिना। नाडीपुरीतद्ब्रह्मसु सप्तमीश्रुतेः समुच्चयश्रुतेश्च संशयमाह। तत्रेति। पूर्वपक्षे स्थानविकल्पाज्जीवस्य ब्रह्मात्मैक्यानिर्णयः सिद्धान्ते नाडीभिः पुरीततं गत्वा तर्हि ब्रह्मण्येव शेत इति समुच्चयात् तन्निर्णय इति विवेकः। एकपुरोडाशार्थत्वं व्रीहियवयोर्दृष्टं नाड्यादीनामेकस्मिन् स्वापरूपार्थे निरपेक्षस्थानत्वन्तु कुत इत्यत आह। नाड्यादीनाञ्चेति। सति ब्रह्मणि तृतीयाश्रुतेर्न सप्त-

---

* परस्परनिरपेक्षाणीति वर्ध० का०।

परस्परापेक्षत्वं दृश्यते व्रीहियवादीनां। नाड्यादीनाञ्चैकार्थता सुषुप्तौ दृश्यते 'नाडीषु सृप्तो भवति पुरीतति शेते' इति च तत्र तत्र सप्तमीनिर्देशस्य तुल्यत्वात्। ननु नैवं सति सप्तमीनिर्देशो दृश्यते 'सता सोम्य तदा सम्पन्नो भवति' इति। नैष दोषः, तत्रापि सप्तम्यर्थस्य गम्यमानत्वात्। वाक्यशेषे हि 'तत्रायतनैषी जीवः सदुपसर्पति' इत्याह। 'अन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते' इति प्राणशब्देन तत्र प्रकृतस्य सत उपादानात्। आयतनञ्च सप्तम्यर्थः, सप्तमीनिर्देशोऽपि तत्र वाक्यशेषे दृश्यते, 'सति सम्पद्य न विदुः सति सम्पद्यामहे' इति। सर्वत्र च विशेषविज्ञानोपशमलक्षणं सुषुप्तं न विशिष्यते। तस्मादेकार्थत्वान्नाड्यादीनां विकल्पेन कदाचित् किञ्चित् स्थानं स्वापायोपसर्पतीत्येवं प्राप्ते प्रतिपद्यते तदभावो नाडीषु आत्मनि चेति। तदभाव इति तस्य प्रकृतस्य स्वप्नदर्शनस्याभावः

मीति शङ्कार्थः। आयतनशब्दस्तु सप्तम्यर्थः आधारत्वं गम्यत इत्याह। नैष दोष इति। अन्यत्रावस्थादये श्रान्तो जीवो विश्रान्तिस्थानं प्राणाख्यं सद्ब्रह्मोपसर्पति सुषुप्ताविव्यर्थः। सप्तमीश्रुत्या निरपेक्षाधारत्वभानाद्विकल्प आस्थेयः। कदाचित् समुच्चित्यापि नाड्यादीनां स्थानत्वमिति न समुच्चयश्रुतिविरोध इति पूर्वपक्षार्थः। सिद्धान्तयति। एवं प्राप्त इति। सूत्रे चकारः पुरीतत्समुच्चयार्थः। यदा नाड्यः सुषुप्तिस्थानं तदा पुरीतत्स्थानं न भवतीति श्रुतस्थानत्वस्य पक्षे बाधः स्यात् स न युक्त इत्याह। विकल्पे ह्येषामिति। व्रीहियवयोस्तुल्यत्वात् विकल्प इति भावः। यत् तु सप्तमीश्रुत्या नाड्यादीनामेकफलकत्वमिति तन्नेत्याह। न ह्येकेति। प्रासादस्य पर्यङ्काधारत्वमर्थः पर्यङ्कस्य तु शयनमिति फलभेदेऽप्येकविभक्तिर्दृश्यते, व्यवधानाद्य-

सुषुप्तमित्यर्थः, नाडीष्वात्मनि चेति समुच्चयेनैतानि नाड्यादीनि स्वापायोपैति न विकल्पेनेत्यर्थः। कुतः तच्छ्रुतेः। तथा हि सर्वेषामेषां नाड्यादीनां तत्र तत्र सुप्तिस्थानत्वं श्रूयते तच्च समुच्चये संगृहीतं भवति, विकल्पे ह्येषां पक्षे बाधः स्यात्। नन्वेकार्थत्वाद्विकल्पो नाड्यादीनां व्रीहियवादिवदित्युक्तं। नेत्युच्यते, न ह्येकविभक्तिनिर्देशमात्रेणैकार्थत्वं विकल्पश्चापतति, नानार्थत्वसमुच्चययोरप्येकविभक्तिनिर्देशदर्शनात् प्रासादे शेते पर्यङ्के शेत इत्येवमादिषु, तथेहापि नाडीषु पुरीतति ब्रह्मणि च स्वपितीत्येतदुपपद्यते समुच्चयः, तथा च श्रुतिः 'तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति' इति समुच्चयं नाडीनां प्राणस्य च सुषुप्तौ श्रावयति, एकवाक्योपादानात्। प्राणस्य च ब्रह्मत्वं समधिगतं 'प्राणस्तथानुगमाद्' इत्यत्र। यत्रापि निरपेक्षा इव नाडीः सुप्तिस्थानत्वेन श्रावयति 'आसु तदा नाडीषु सृप्तो भवति' इति तत्रापि प्रदेशान्तरप्रसिद्धस्य ब्रह्मणोऽप्रतिषेधान्नाडीद्वारेण ब्रह्मण्येवावतिष्ठत इति प्रतीयते। न चैवमपि नाडीषु सप्तमी विरुध्यते, नाडीभिरपि ब्रह्मोप-

---

वधानाभ्यां प्रयमसाधनत्वात् समुच्चयस्य, तथेहापि नाडीपुरीतो जीवस्य सञ्चारद्वारा ब्रह्मण्येव सुप्तिरिति समुच्चय इत्यर्थः। नाडीनां प्राणस्य च एकेन वाक्येनोपादानान्मिथः समुच्चय इत्याह। एकवाक्येति। आधारत्वमात्रं सप्तम्यर्थो न निरपेक्षत्वं अतो न समुच्चयस्य सप्तम्या बाध इत्याह। न चैवमपीति। समुच्चयेऽपीत्यर्थः। अत्र नाडी-

सर्पन् सुप्त एव नाडीषु भवति। यो हि गङ्गया सागरं गच्छति गत एव स गङ्गायां भवति। अपि चात्र रश्मिनाडीद्वारात्मकस्य ब्रह्मलोकमार्गस्य विवक्षितत्वान्नाडीस्तुत्यर्थं सुप्तिसङ्कीर्तनं, नाडीषु सुप्तो भवतीत्युक्त्वा 'अतस्तं न कश्चन पाप्मा स्पृशति' इति ब्रुवन् नाडीः प्रशंसति। ब्रवीति च पाप्मस्पर्शाभावे हेतुं 'तेजसा हि तदा सम्पन्नो भवति' इति। तेजसा नाडीगतेन पित्ताख्येनाभिव्याप्तकरणो न वाह्यान् *विषयानीक्षते इत्यर्थः। अथवा तेजस इति ब्रह्मण एवायं निर्देशः, श्रुत्यन्तरे 'ब्रह्मैव तेज एव' इति तेजःशब्दस्य ब्रह्मणि प्रयुक्तत्वात्, ब्रह्मणा हि तदा सम्पन्नो भवति नाडीद्वारेण अतस्तं न कश्चन पाप्मा स्पृशतीत्यर्थः। ब्रह्मसम्पत्तिश्च पाप्मस्पर्शाभावे हेतुः समधिगतः, सर्वे पाप्मानोऽतो निवर्तन्ते अप-

---

श्रुतौ नाडीषु भोक्तुः सुप्तिर्न विवक्षिता रश्मिसम्बन्धनाडीरूपमार्गस्तुत्यर्थत्वादित्याह। अपि चेति। पित्तेन विषयेक्षणाभावे सुखदुःखयोरभावात् तद्धेतुधर्माधर्मात्मकपाप्मास्पर्श इत्यर्थः, अपहतपाप्मब्रह्मसम्पत्त्या वा पाप्मास्पर्श इत्याह। अथ वेति। अस्मिन् व्याख्याने लाभमाह। एवञ्च सतीति। तासु तदा भ॰ त्यथास्मिन् प्राण एवैकधा भवतीति श्रुतः समुच्चय आश्रितो भवतीत्यर्थः। नाडीब्रह्मणोर्गुणप्रधानभावेन सुप्तौ समुच्चयवत् पुरीतद्ब्रह्मणोरपीत्याह। तथेत्यादिना। आकाशे ब्रह्मणि शेत इत्युपक्रम्य ताभिः प्रत्यवसृप्य पुरीतति शेत इत्युक्तं, तथा च नाडीद्वारा पुरीततं गत्वा ब्रह्मणि शेत इति समुच्चयः सिद्ध इत्याह। यथा नाडीति। सत्तासम्पन्नो भवति प्राज्ञेन सम्परिष्वक्त इति सत्प्राज्ञयोः श्रुतेः पञ्च सुप्तिस्थानानीत्यत आह। सत्प्राज्ञयोरिति। किञ्च प्रकृतदर्शादिसाधनैकपुरोडाशनिष्पत्तौ मिथोऽनपेक्षतया समर्थत्वाद्युक्तो व्रीहियवयोर्विकल्पः, ना-

---

* विषयान् वेदेति वर्ध॰ का॰।

हतपाप्मा ह्येष ब्रह्मलोकः' इत्यादिश्रुतिभ्यः। एवञ्च सति प्रदेशान्तरप्रसिद्धेन ब्रह्मणा सुप्तिस्थानेनानुगतो नाडीनां *चयः समाश्रितो भवति। तथा पुरीततोऽपि ब्रह्मप्रक्रियायां सङ्कीर्तनात् तदनुगुणमेव सुप्तिस्थानत्वं विज्ञायते 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति हृदयाकाशे सुप्तिस्थाने प्रकृते इदमुच्यते 'पुरीतति शेते' इति। पुरीतदिति हृदयपरिवेष्टनमुच्यते, तदन्तर्वर्तिन्यपि हृदयाकाशे शयानः शक्यते पुरीतति शेत इति वक्तुं, प्राकारपरिच्छिन्नेऽपि हि पुरे वर्तमानः प्राकारे वर्तत इत्युच्यते। हृदयाकाशस्य च ब्रह्मत्वं समधिगतं 'दहर उत्तरेभ्यः' इत्यत्र। तथा नाडीपुरीतत्समुच्चयोऽपि ताभिः प्रत्यवसृप्य पुरीतति शेत इत्येकवाक्योपादानादवगम्यते। सत्प्राज्ञयोश्च प्रसिद्धमेव ब्रह्मत्वमेतासु श्रुतिषु 'त्रीण्येव सुप्तिस्थानानि सङ्कीर्तितानि नाड्यः पुरीतद्ब्रह्म च' इति, तत्रापि च द्वारमात्रं नाड्यः पुरीतच्च, ब्रह्मैव त्वेकं अनपायि सुप्तिस्थानं। अपि च नाड्यः पुरीतद्वा जीवस्योपाध्याधार एव भवति, तत्रास्य करणानि वर्तन्त इति। न ह्युपाधिसम्बन्धमन्तरेण स्वत एव जीवस्या-

---

स्थादीनान्तु ब्रह्मनिरपेक्षतया सुषुप्तजीवाधारत्वासामर्थ्यात् न विकल्प इत्याह। अपि च नाड्य इति। उपाधिलिङ्गाश्रयनाडीपुरीतत्सम्बन्धितजीवाश्रयत्वं परम्परया वाच्यं, तदपि सुषुप्तौ न सम्भवति उपाधिलयादित्यर्थः। ननु ब्रह्मापि जीवस्य न मुख्यं स्थानं अभेदादित्यत आह। ब्रह्माधारत्वमिति। जीवस्य ब्रह्मण्यभेदेनावस्थानं नाडीपुरीतोऽस्तु लीनोपाधेर्जीवस्य स्थितिरेव न सम्भवतीत्येका-

---

* चय इत्यस्य स्थाने लय इति वर्ध० का०।

धारः कश्चित् सम्भवति, ब्रह्माव्यतिरेकेण स्वमहिमप्रतिष्ठितत्वात्। ब्रह्माधारत्वमप्यस्य सुषुप्तेनैवाधाराधेयभेदाभिप्रायेणोच्यते कथं तर्हि तादात्म्याभिप्रायेण यत आह 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' इति। स्वशब्देनात्माभिलप्यते स्वरूपमापन्नः सुषुप्तो भवतीत्यर्थः। अपि च न कदाचिज्जीवस्य ब्रह्मणा सम्पत्तिर्नास्ति स्वरूपस्यानपायित्वात्, स्वप्नजागरितयोस्तु उपाधिसम्पर्कवशात् पररूपापत्तिमिवापेक्ष्य *तदुपशमसमाचात् सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते, अतश्च सुषुप्तावस्थायां कदाचित् सता सम्पद्यते कदाचित् न सम्पद्यत इत्ययुक्तं। अपि च स्थानविकल्पाभ्युपगमेऽपि विशेषविज्ञानोपशमलक्षणं तावत् सुषुप्तं न क्वचिद्विशिष्यते तत्र सति सम्पन्नस्तावदेकत्वात् न विजानातीति युक्तं 'तत्केन कं विजानीयात्' इति श्रुतेः। नाडीषु पुरीतति च शयानस्य न किञ्चिदविज्ञाने कारणं शक्यं विज्ञातुं भेदविषयत्वात्, 'यत्र वान्यदिव स्यात् तत्रान्योऽन्यत्प-

र्थसामर्थ्याभावात् न विकल्प इत्यर्थः। सुषुप्तौ जीवस्य भेदकोपाधिलयाच्चौत्सर्गिकब्रह्माभेदस्य विकल्पो न युक्त इत्याह। अपि चेति। किञ्च नाड्यादीनामन्यतमस्थाने क्व सुप्तिवादिनापि सुप्तं न विशिष्यत इति वक्तव्यं तच्च वक्तुं न शक्यत इत्याह। अपि च स्थानेति। भेदाभावो हि भेदज्ञानाभावे हेतुः, नाडीपुरीतद्गतस्य तु जीवस्य भेदावस्थत्वात् भेदाविज्ञाने कारणं नास्तीत्यर्थः। द्वैतावस्थस्यापि द्वैताज्ञाने हेतुं शङ्कते। ननु भेदेति। इष्टदृष्टस्यात् दूरत्वं स्वाभाविकमौपाधिकं वा। तत्राद्यं सदृष्टान्तमनूद्य प्रत्याह। वाढमित्यादिना। द्वितीयमनूद्य दूषयति। उपाधिगतमेवेति। उपाधिभिस्तस्यैव नाड्यादौ स्वापे

* तदुपशमादिति वर्ध० का०। तदुपरमादिति सो०।

ष्येत्' इति श्रुतेः। ननु भेदविषयस्याप्यतिदूरादिकारणमविज्ञाने स्यात्। वाढमेवं स्यात् यदि जीवः स्वतः परिच्छिन्नोऽभ्युपगम्येत यथा विष्णुमित्रः प्रवासी स्वगृहं न पश्यतीति, न तु जीवस्योपाधिव्यतिरेकेण परिच्छेदो विद्यते, उपाधिगतमेवातिदूरादिकारणमविज्ञान इति यद्युच्येत तथाप्युपाधेरुपशान्तत्वात् सत्येव सम्पन्नो न विजानातीति युक्तं। न च वयमिह तुल्यवत् नाड्यादिसमुच्चयं प्रतिपादयामः, न हि नाड्यः सुप्तिस्थानं पुरीतच्चेत्यनेन विज्ञानेन किञ्चित् प्रयोजनमस्ति, न ह्येतद्विज्ञानप्रतिबद्धं फलं किञ्चित् श्रूयते, नाप्येतद्विज्ञानं फलवतः कस्यचिदङ्गमुपदिश्यते, ब्रह्म त्वनपायि सुप्तिस्थानमित्येतत् प्रतिपादयामः, तेन तु विज्ञानेन प्रयोजनमस्ति, जीवस्य ब्रह्मात्मत्वावधारणं *स्वप्नजागरितगतव्यवहारविमुक्तत्वावधारणञ्च। तस्मादात्मैव सुप्तिस्थानं॥

अतः प्रबोधोऽस्मात्॥ ८॥

यस्मात्चात्मैव सुप्तिस्थानं अत एव कारणात् नित्यवदेवास्मादात्मनः प्रबोधः स्वापाधिकारे शिष्यते, कुत एतदागा-

---

कतिपयसन्निकृष्टार्थज्ञानप्रसङ्गात् सुषुप्तिव्याघातः स्यात्। उपाधिलये त्वन्यत् न जीवस्य स्थित्ययोगात् ब्रह्मण्येव स्वाप आस्थेय इत्यर्थः। एवं विकल्पं निरस्य नाडीपुरीतोर्ब्रह्मणा सह तुल्यवत्समुच्चयवत्फलत्वेन दूषयन् गुणप्रधानत्वेन समुच्चयमुपसंहरति। न च वयमित्यादिना॥

किञ्च ब्रह्मणः सकाशाज्जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमित्याह

---

* स्वप्नजागरितव्यव० इति वर्ध० का०।

दित्यस्य प्रश्नस्य प्रतिवचनावसरे 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणाः' *इत्यादि, 'सत आगम्य न विदुः सत आगच्छामहे' इति च। विकल्प्यमानेषु तु †सुषुप्तिस्थानेषु कदाचित् नाडीभ्यः प्रतिबुध्यते कदाचित् पुरीततः कदाचिदात्मन इत्यशासिष्यत्। तस्मादप्यात्मैव तु सुप्तिस्थानमिति॥

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः॥ ९॥

तस्याः पुनः सत्सम्पत्तेः प्रतिबुध्यमानः किं य एव सत्सम्पन्नः स एव प्रतिबुध्यते ‡उतान्यो वेति चिन्त्यते। तत्र प्राप्तं तावत् अनियम इति। कुतः, यदा हि जलराशौ कश्चिज्जलबिन्दुः प्रक्षिप्यते जलराशिरेव स तदा भवति, पुनस्तदुद्धरणे स एव जलबिन्दुर्भवतीति दुःसम्पादं, तद्वत् सुप्तः परेणैकत्वमापन्नः सम्प्रसीदति न स एव पुनरुत्थातुमर्हति,

सूत्रकारः। अतः प्रबोध इति। नाडीपुरीततोः स्वाप्युत्थानापादनत्वाश्रवणात् न सुप्तिस्थानमित्यर्थः, तस्मादुपाधिलये जीवस्य ब्रह्माभेदादौपाधिक एव भेद इति विवेकाद्वाक्यार्थाभेदसिद्धिरिति स्थितं॥

स एव कर्मानुस्मृतिशब्दविधिभ्यः सुषुप्तौ उपाधिनाशात् कर्मानुस्मृत्यादेर्दर्शनाच्च संशये सत्यस्मात् ब्रह्मणो जीवस्योत्थानश्रुतेर्ब्रह्मैव सुषुप्तिस्थानमित्युक्तमयुक्तं। सुप्तादन्यस्याप्युत्थानसम्भवेन सुषुप्तस्थानापादिस्थानत्वसम्भवादित्याक्षेपसङ्गत्या नियामकाभावादनियम इति पूर्वपक्षमाह। तस्याः पुनरित्यादिना। पूर्वपक्षे ज्ञानवैयर्थ्यं सुषुप्त्यैवापुनरावृत्तिरूपमुक्तिसिद्धेः, सिद्धान्ते तु अज्ञातब्रह्मात्मना स्थितस्या-

* इत्यादिनेति वर्ध० का० सो०। † सुप्तीति वर्ध० [illegible]।

‡ उत स वा अन्यो वति वर्ध० का०।

तस्मात् स एवेश्वरो वान्यो वा जीवः प्रतिबुध्यत इत्येवं प्राप्ते इद-माह। स एव तु जीवः सुप्तः स्वास्थ्यं गतः पुनरुत्तिष्ठति नान्यः। कस्मात्, कर्मानुस्मृतिशब्दविधिभ्यः। विभज्य हेतून् दर्शयिष्यामि, कर्मशेषानुष्ठानदर्शनात् तावत् स एवोत्थातुमर्हति नान्यः। तथा हि पूर्वेद्युरनुष्ठितस्य कर्मणोऽपरेद्युः शेषमनुतिष्ठन् दृश्यते, न चान्येन सामिकृतस्य कर्मणोऽन्यः शेषक्रियायां प्रवर्तितुमर्हति अतिप्रसङ्गात्, तस्मादेक एव पूर्वेद्युरपरेद्युश्चै-कस्य कर्मणः कर्तेति गम्यते। इतश्च स एवोत्तिष्ठति यत्का-रणमतीतेऽहन्यहमदोऽद्राक्षमिति पूर्वानुभूतस्य पश्चात् स्मरणं अन्यस्योत्थाने नोपपद्यते, न ह्यन्यदृष्टमन्योऽनुस्मर्तुं अर्हति। 'सोऽहमस्मि' इति चात्मानुस्मरणमात्मान्तरोत्थाने नावकल्पते। शब्देभ्यश्च तस्यैवोत्थानमवगम्यते 'तथा हि पुनः प्रतिन्यायं प्रति-योन्याद्रवति बुद्धान्तायैव इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति। त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद् यद्भवन्ति तत्तदा भवन्ति' इत्येवमादयः शब्दाः स्वापप्र-

---

ज्ञानबलेन पुनस्तस्यैवोत्थानावश्यम्भावादज्ञाननाशाय ज्ञानापेक्षेति फलं ईश्वरो वेत्यनियमदार्ढ्यायोक्तं। 'स वान्यो वेत्येव पूर्व्वपक्षः। ज्ञान विना बुद्ध्याद्युपाधेरत्यन्तनाशाभावाद्यया बुद्ध्योपहितो जीवः सुषुप्तौ कारणात्मना स्थितस्तयैव नानाकर्म्मानुभवसंस्कारवत्योपहित उत्तिष्ठ-तीति सिद्धान्तयति। स एव त्वित्यादिना। सामिकृतस्यार्द्धकृतस्य' एक-स्यैव ज्योतिष्टोमादेरनेकयजमानकलापतोऽतिप्रसङ्गः। स्मृतिमुक्त्वानु-[illegible]पितां प्रत्यभिज्ञामाह। सोऽहमिति। अयनं गमनं आयः।

बोधाधिकारे पठिता नात्मान्तरोत्थाने सामञ्जस्यमीयुः। कर्मविद्याविधिभ्यश्चैवमेव गम्यते, अन्यथा हि कर्मविद्याविधयोऽनर्थकाः स्युः, अन्योत्थानपक्षे हि सुषुप्तमात्रो मुच्येत इत्यापद्येत, एवं चेत् स्यात् वद किं कालान्तरफलेन कर्मणा विद्यया वा कृतं स्यात्। अपि चान्योत्थानपक्षे यदि तावच्छरीरान्तरे व्यवहरमाणो जीव उत्तिष्ठेत् तत्तद्व्यवहारलोपप्रसङ्गः स्यात्। अथ तत्र सुप्त उत्तिष्ठेत कल्पनानर्थक्यं स्यात्, यो हि यस्मिन् शरीरे सुप्तः स तस्मिन्नोत्तिष्ठति, अन्यस्मिन् शरीरे सुप्तोऽन्यस्मिन्नुत्तिष्ठतीति कोऽस्यां कल्पनायां लाभः स्यात्। अथ मुक्त उत्तिष्ठेत् अन्तवान्मोक्ष आपद्येत, निवृत्ताविद्यस्य च पुनरुत्थानमनुपपन्नं। एतेनेश्वरोत्थानं प्रत्युक्तं, नित्यनिवृत्ताविद्यत्वात्। अकृताभ्यागमकृतविप्रणाशौ च दुर्निवारावन्योत्थानपक्षे स्यातां, तस्मात् स एवोत्तिष्ठति नान्य इति। यत्पुनरुक्तं 'यथा जलराशौ प्रक्षिप्ता जलबिन्दुर्नोद्धर्तुं शक्यते एवं सति सम्पन्नो जीवो नोत्पतितुमर्हतीति, तत्परिह्रियते। युक्तं तत्र

योनिं तत्तदिन्द्रियस्थानं प्रति नियतं गमनं यथा भवति तथा प्रतियोन्याग‌च्छति जागरणायेति अन्वयः। न विन्दन्तीत्यज्ञानसत्त्वात् सुप्तस्योत्थाननियम उक्तः, इह पूर्वप्रबोधे ये भवन्ति त एव तदोत्तरप्रबोधे भवन्तीत्यर्थः। विधिं व्याचष्टे। कर्मेति। स एवोत्तिष्ठतीति निश्चीयते इत्यर्थः। अत्रैवोत्सूत्रं युक्त्यन्तरमाह। अपि चेत्यादिना। अन्योत्थाने सुखादेर्न पूर्वकर्मकार्यतेत्यकृतसुखाद्यागमः पूर्वसुप्तजीवकृतकर्मनाशश्चेत्यर्थः। पूर्वपक्षयुक्तं दृष्टान्तं वैषम्येण दूषयति। यत् पुनरित्यादिना। असदाद्यशक्यमपि विवेचनं प्राणदृष्टापेक्षः ईश्वरः करो-

विवेककारणाभावाज्जलबिन्दोरनुद्धरणं, इह तु विद्यते विवेककारणं, कर्म च विद्या चेति वैषम्यं। दृश्यते च दुर्विवेचनयोरपि असज्जातीयैः चीरोदकयोः संसृष्टयोर्हंसेन विवेचनं। अपि च न जीवो नाम कश्चित् परस्मादात्मनोऽन्यो विद्यते यो जलबिन्दुरिव जलराशेः सतो विविच्येत, सदेव तूपाधिसम्पर्काज्जीव इत्युपचर्यते इत्यसकृत् प्रपञ्चितं। एवं सति यावदेकोपाधिगता बन्धानुवृत्तिस्तावदेकजीवव्यवहारः, उपाध्यन्तरगतायां तु बन्धानुवृत्तौ जीवान्तरव्यवहारः, स एवायमुपाधिः स्वापप्रबोधयोर्बीजाङ्कुरन्यायेनेत्यतः स एव जीवः प्रतिबुध्यत इति युक्तं॥

मुग्धेऽर्द्धसम्पत्तिः परिशेषात्॥ १०॥

अस्ति मुग्धो नाम यं मूर्च्छित इति लौकिकाः कथयन्ति, स तु किमवस्थ इति परीक्षायामुच्यते, तिस्रस्तावदवस्थाः शरीरस्थस्य जीवस्य प्रसिद्धाः जागरितं स्वप्नः सुषुप्तमिति। चतुर्थी शरीरादपसृप्तिः, न तु पञ्चमी काचिदवस्था जीवस्य

तीति मत्वा दृष्टान्तमाह। दृश्यते चेति। ब्रह्माभेदाच्च जीवस्य जलबिन्दुवैषम्यमित्याह। अपि चेति। अभेदे 'स वान्यो वोत्तिष्ठति' इति चिन्तानवकाश इत्याशङ्क्य बुद्धिभेदेन जीवभेदाच्चिन्तेत्याह। एवं सतीति। सुषुप्तौ बुद्धिनाशेन प्रत्यहं बुद्ध्युपाधिभेदादेकजीवस्य व्यवहारो न स्यादित्यत आह। स एवायमिति। स्थूलसूक्ष्मात्मना तिष्ठत्येकोपाधिरित्यर्थः॥

अवस्थात्रयादात्मानं विविच्य मूर्च्छातो विवेचयति। मुग्धेऽर्द्धसम्पत्तिः परिशेषात्। मूर्च्छा प्रसिद्धावस्थान्तर्गता वा पञ्चमावस्था वेति

श्रुतौ स्मृतौ वा प्रसिद्धास्ति, तस्माच्चतसृणामेवावस्थानामन्यतमावस्था मूर्च्छेत्येवं प्राप्ते ब्रूमः। न तावन्मुग्धो जागरितावस्थो भवितुमर्हति, न ह्ययमिन्द्रियैर्विषयानीक्षते। स्यादेतत् इषुकारन्यायेन मुग्धो भविष्यति, यथेषुकारो जाग्रदपि इष्वासक्तमनस्तया नान्यान् विषयानीक्षते एवं मुग्धो मुसलसम्पातादिजनितदुःखानुभवव्यग्रमनस्तया जाग्रदपि नान्यान् विषयानीक्षते इति। न, अचेतयमानत्वात्। इषुकारो हि व्यापृतमना ब्रवीति इषुमेवाहमेतावन्तं कालं उपलभमानोऽभूवमिति, मुग्धस्तु लब्धसञ्ज्ञो ब्रवीति अन्धे तमसि अहमेतावन्तं कालं प्रक्षिप्तोऽभूवं न किञ्चिन्मया चेतितमिति। जाग्रतश्चैकविषयासक्तचेतसोऽपि देहो विध्रियते, मुग्धस्य तु देहो धरण्यां पतति, तस्मात् न जागर्ति नापि स्वप्नान् पश्यति, निःसञ्ज्ञत्वात्। नापि मृतः, प्राणोष्मणोर्भावात्। मुग्धे हि जन्तौ मृतोऽयं स्यात् न वाऽमृत इति संशयाना उष्मास्ति नास्तीति हृदयदेशमालभन्ते निश्चयार्थं, प्राणोऽस्ति नास्तीति च नासिकादेशं, यदि प्राणोष्मणोरस्तित्वं नावगच्छन्ति ततो मृतोऽयमित्यध्यवसाय

अवस्थाचतुष्टयसिद्धेर्मुग्धस्य तद्वैलक्षण्याच्च संशये सोऽहमिति प्रत्यभिज्ञयोत्थितस्य सुप्ताभेदवद्विशेषज्ञानभावाविशेषेण लिङ्गेन सुषुप्तिरेव मूर्च्छेति प्रत्यभिज्ञानात् सुषुप्त्यन्तर्गता मूर्च्छेति दृष्टान्तसङ्गत्या पूर्वपक्षमाह। तिस्रस्तावदिति। पूर्वपक्षे प्रसिद्धावस्थातः पृथगात्मनो मूर्च्छातो विवेकार्थं यत्नासिद्धिः फलं, सिद्धान्ते पृथक्यत्नध्रौव्यमिति भेदः। परिशेषं दर्शयन् सिद्धान्तयति। न तावदित्यादिना। जाग्रदपि जागरावस्थोऽपीत्यर्थः। ऐन्द्रियकमर्थज्ञानं देहधारणञ्च तस्यास्ति न मुग्धस्येति वैधर्म्योक्त्या दूषयति। नेत्यादिना। मूर्च्छाया जागरद्वैद-

दहनायारण्यं नयन्ति, अथ तु प्राणमूष्माणं वा प्रतिपद्यन्ते ततो नायं मृत इत्यध्यवसाय सञ्ज्ञालाभायाभिषज्यन्ति। पुनरुत्थानाच्च न दिष्टं गतः न हि यमं गतो यमराष्ट्रात् प्रत्यागच्छति। अस्तु तर्हि सुषुप्तः निःसञ्ज्ञत्वात् अमृतत्वाच्च। न, वैलक्षण्यात्। मुग्धः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुरस्य देहो भवति भयानकञ्च वदनं विस्फारिते नेत्रे, सुषुप्तस्तु प्रसन्नवदनः तुल्यकालं पुनः पुनरुच्छ्वसिति निमीलिते अस्य नेत्रे भवतः, न चास्य देहो वेपते, पाणिपेषणमात्रेण च सुषुप्तमुत्थापयन्ति, न तु मुग्धं मुद्गरघातेनापि। निमित्तभेदश्च भवति मोहस्वापयोः, मुषलसम्पातादिनिमित्तत्वान्मोहस्य श्रमनिमित्तत्वाच्च स्वापस्य। न च लोकेऽस्ति प्रसिद्धिः मुग्धः सुप्त इति। परिशेषादर्द्धसम्पत्तिर्मुग्धतेत्यवगच्छामः निःसञ्ज्ञकत्वात् सम्पन्नः इतरस्माच्च वैलक्षण्यादसम्पन्न इति। कथं पुनरर्द्धसम्पत्तिर्मुग्धता इति शक्यते वक्तुं, यावता सुप्तं प्रति तावदुक्तं श्रुत्या 'सता सोम्य तदा सम्पन्नो भवति अत्र स्तेनोऽस्तेनो भवति नैनं सेतुमहोरात्रे

मुक्त्वा स्वप्नमृतिभ्यां भेदमाह। नापीत्यादिना। आलम्भते स्पृशन्ति। दिष्टं मरणं। सुषुप्तिमूर्च्छयोः किञ्चित्साम्येऽपि बहुवैलक्षण्याद्भेद इत्याह। नेति। लक्षणभेदमुक्त्वा निमित्तभेदमाह। निमित्तेति। प्रत्यभिज्ञाप्यसिद्धेत्याह। न चेति। उक्तसारूप्यवैरूप्याभ्यामर्द्धसम्पत्तिः सर्वैः सुषुप्तिधर्मैरसम्पन्नो मुग्धः सुषुप्तो न भवति, सर्वैर्मरणावस्थाधर्मैरसम्पत्तेर्मृतोऽपि न किन्तु अवस्थान्तरं गत इति सूत्रार्थः। अत्र सूत्रे जीवस्य ब्रह्मणार्द्धसम्पत्तिरुक्तेति भ्रान्तः शङ्कते। कथमिति। यत् सुषुप्तं प्रति सत्सम्पन्नत्वं श्रुतं तदुपाध्यभावाभिप्रायं। उपाध्यभावश्च मुग्धस्यापि सम इति यतः तस्मात् कृत्स्नसम्पत्तिरेवेत्यर्थः। सुषुप्तकाले

तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतम्' इत्यादि। जीवे हि सुकृतदुष्कृतयोः प्राप्तिः सुखित्वदुःखित्वप्रत्ययोत्पादनेन भवति, न च सुखित्वप्रत्ययो दुःखित्वप्रत्ययो वा सुषुप्ते विद्यते, मुग्धेऽपि तौ प्रत्ययौ नैव विद्येते, तस्मादुपाध्युपशमात् सुषुप्तवन्मुग्धेऽपि कृत्स्नसम्पत्तिरेव भवितुमर्हति नार्द्धसम्पत्तिरिति। अत्रोच्यते न ब्रूमो मुग्धेऽर्द्धसम्पत्तिर्जीवस्य ब्रह्मणा भवति इति, किं तर्हि अर्द्धेन सुषुप्तपक्षस्य भवति मुग्धत्वं अर्द्धेनावस्थान्तरपक्षस्येति ब्रूमः। दर्शिते च मोहस्य स्वापेन साम्यवैषम्ये। द्वारञ्चैतन्मरणस्य यदास्य सावशेषं कर्म भवति तदा वाङ्मनसे प्रत्यागच्छतः यदा तु निरवशेषं कर्म भवति तदा प्राणोष्माणावपगच्छतः, तस्मादर्द्धसम्पत्तिं ब्रह्मविद इच्छन्ति। यत्तूक्तं न पञ्चमी काचिदवस्था प्रसिद्धास्तीति, नैष दोषः, कादाचित्कीयमवस्थेति न प्रसिद्धा स्यात्, प्रसिद्धा चैषा लोकायुर्वेदयोः। अर्द्धसम्पत्त्यभ्युपगमाच्च न पञ्चमी *गम्यत इत्यनवद्यं॥

कर्मासम्बन्धे पुनरुत्थानं कथमित्याशङ्क्य तत्कार्याभावात्तदसम्बन्धोक्तिरित्याह। जीवे हीति। ब्रह्मणा कृत्स्नसम्पत्तिमङ्गीकृत्य परिहरति। न ब्रूम इति। मुग्धत्वं हि सुषुप्तस्यार्द्धेन निःसंज्ञत्वादिधर्म्मेण साम्येन सम्पन्नं भवति, मरणस्यार्द्धेन कम्पादिना सम्पन्नमित्यर्द्धसम्पत्तिरित्यर्थः। इतोऽपि सुषुप्तिवैषम्यमित्याह। द्वारञ्चेति। अप्रसिद्धिमङ्गीकृत्योक्तां प्रसिद्धिरप्यस्तीत्याह। प्रसिद्धा चेति। आयुर्वेदो वैद्यशास्त्रं। प्रसिद्धौ कथं विचार इत्याशङ्क्य पञ्चमत्वेनाप्रसिद्धेरित्याह। अर्द्धेति। सुषुप्तिमृतिधर्म्मार्द्धसम्पत्त्या तदन्तर्भावबुद्धिर्लोकानामित्यर्थः॥

---

* गण्यत इति पा०।

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

येन ब्रह्मणा सुषुप्तादिषु जीव उपाध्युपशमात् सम्पद्यते तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते। सन्त्युभयलिङ्गाः श्रुतयः ब्रह्मविषयाः 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्येवमाद्याः सविशेषलिङ्गाः, 'अस्थूलमनण्वह्रस्वमदीर्घम्' इत्येवमाद्याश्च निर्विशेषलिङ्गाः। किमासु श्रुतिषु उभयलिङ्गं ब्रह्म प्रतिपत्तव्यमुतान्यतरलिङ्गं, यदाप्यन्यतरलिङ्गं तदापि सविशेषमुत निर्विशेषमिति मीमांस्यते। तत्रोभयलिङ्गश्रुत्यनुग्रहात् उभयलिङ्गमेव ब्रह्मेत्येवं प्राप्ते ब्रूमः, न तावत् स्वत एव परस्य ब्रह्मण उभयलिङ्गत्वमुपपद्यते, न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतञ्चेत्यभ्युपगन्तुं शक्यं विरोधात्। अस्तु तर्हि स्थानतः पृथिव्याद्युपाधियोगादिति, तदपि नोपपद्यते। न ह्युपाधियोगादप्यन्यादृशस्य वस्तुनोऽन्यादृशस्वभावः सम्भवति। न हि स्वच्छः सन् स्फटिकोऽलक्तकाद्युपाधियोगादस्वच्छो भवति,

---

सर्वाभिरवस्थाभिरलिप्तत्वमर्थ इति विचार्य्योपादसमाप्तेस्तत्पदार्थं निरूपयितुकामः प्रथमं तस्य निर्विशेषत्वमाह। न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि। उद्देश्यत्वं पदार्थजिज्ञासोपरमानन्तरं तत्स्वरूपब्रह्मविचारस्यावसरसङ्गतिमाह। येनेति। निर्विशेषत्वं सविशेषत्वञ्चेत्युभयं लिङ्ग्यते ज्ञाप्यते याभिस्ता उभयलिङ्गाः श्रुतयः संशयबीजत्वेन सन्तीत्यर्थः। यथा विरुद्धसुषुप्तिसंसर्गोभयरूपं मुग्धत्वं तथा श्रुतिप्रामाण्यादुभयरूपं ब्रह्म ध्येयमिति दृष्टान्तेन पूर्वपक्षः। निर्विशेषमेकरूपमेव ज्ञेयमिति सिद्धान्तयति। एवमिति। किमुभयरूपत्वं स्वतः उत स्वतो निर्गुणस्य सर्वगन्धत्वादिविशेषः उपाधितः सत्यः आहोस्वित् स्वतः सविशेषमेव ब्रह्मेति, तत्राद्यं निरस्य द्वितीयं अनूद्य दूषयति। अस्तु

भ्रममात्रत्वादस्वच्छताभिनिवेशस्य, उपाधीनाञ्चाविद्याप्रत्युपस्थापितत्वात्। अतश्चान्यतरलिङ्गपरिग्रहेऽपि समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रतिपत्तव्यं न तद्विपरीतं। सर्वत्र हि ब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येषु 'अशब्दमस्पर्शमरूपमव्ययम्' इत्येवमादिष्वपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात्॥ १२॥

अथापि स्यात्, यदुक्तं निर्विकल्पकमेकलिङ्गमेव ब्रह्म नास्य स्वतः स्थानतो वोभयलिङ्गत्वमस्तीति, तन्नोपपद्यते। कस्मात्, भेदात्। भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यन्ते 'चतुष्पात् ब्रह्म षोडशकलं ब्रह्म वामनत्वादिलक्षणं ब्रह्म त्रैलोक्यशरीरवैश्वानरशब्दोदितं ब्रह्म' इत्येवंजातीयकाः, तस्मात् सविशेषत्वमपि ब्रह्मणोऽभ्युपगन्तव्यं। ननूक्तं नोभयलिङ्गत्वं ब्रह्मणः सम्भवति इति। अयमप्यविरोधः, उपाधिकृतत्वादाकारभेदस्य, अन्यथा हि निर्विषयमेव भेदशास्त्रं प्रसज्येतेति चेत्। नेति

तर्हीति। स्थानमुपाधिः, ब्रह्मणि विशेषः कल्पितः औपाधिकत्वात् स्फटिकलौहित्यवदित्यर्थः। उपाधेः सत्यत्वेऽपि तत्कृतं मिथ्येति इष्टं ब्रह्मणि तूपाधीनां मिथ्यात्वात् तत्कृतो विशेषो मिथ्येति किमु वाच्यमित्याह। उपाधीनामिति। इतोऽयं निरस्यति। अतश्चेति। सर्वस्य विशेषस्य कल्पितत्वादेवेत्यर्थः। निषेधश्रुतेश्चैवमित्याह। सर्वत्र हीति॥

भिद्यत इति भेदो विशेषः, विशेषश्रुतावपि विशेषस्यापि श्रुतेरुभयरूपत्वं स्यादिति शङ्कां व्याचष्टे। अथापि स्यादिति। पूर्वोक्तं विरोधं स्मारयति। ननूक्तमिति। भेदश्रुतिप्रामाण्यार्थमौपाधिकरूपभेदस्वीकारादविरोध इति समाधेरर्थः। किमुपाधिगत एव रूप-

ब्रूमः। कुतः, प्रत्येकमतद्वचनात्। प्रत्युपाधिभेदं हि अभेदमेव ब्रह्मणः श्रावयति शास्त्रं 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा' इत्यादि। अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुं, *भेदस्योपासनार्थत्वादभेदे तात्पर्यात्॥

अपि चैवमेके॥ १३॥

अपि चैवं भेददर्शननिन्दापूर्वकमभेददर्शनमेवैके शाखिनः समामनन्ति—

"मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"॥ इति।

तथान्येऽपि 'भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्' इति समस्तस्य भोग्यभोक्तृनियन्तृलक्षणस्य प्रपञ्चस्य ब्रह्मैकस्वभावतामधीयते, कथं पुनराकारवदुपदेशिनीष्वनाकारोपदेशिनीषु च ब्रह्मविषयासु श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमित्येतदुत्तरं पठति॥

भेदो ब्रह्मण्युपचर्यते ध्यानार्थमुतोपाधियोगात् सत्यविरुद्धरूपवत्तया ब्रह्मणो भेदो भवतीति। आद्येऽस्मदिष्टसिद्धिः द्वितीये भेदश्रुत्या दूषयति। नेति ब्रूम इति॥

द्वैतनिन्दापूर्वकमद्वैतोक्तेश्च निर्विशेषं तत्त्वमिति सूत्रार्थमाह। अपि चेति। भोक्ता जीवो भोग्यं शब्दादि तयोः प्रेरितारमीश्वरं च मत्वा विचार्य मे मम प्रोक्तं तत्सर्वं त्रिविधं ब्रह्मैवेति जानीयादित्यर्थः। द्विविधश्रुतीषु सतीषु निर्विशेषत्वे किं नियामकमिति शङ्कते। कथं पुनरिति॥

* भेदेत्यादि तात्पर्यादित्यन्तं वर्ष० का० नास्ति।

अरूपवदेव हि तत्प्रधानत्वात्॥ १४॥

रूपाद्याकाररहितमेव हि ब्रह्मावधारयितव्यं न रूपादिमत्। कस्मात् तत्प्रधानत्वात्। 'अस्थूलमनण्वह्रस्वमदीर्घं, अशब्दमस्पर्शमरूपमव्ययं, आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म, दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः, तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' इत्येवमादीनि हि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानीत्येतत्प्रतिष्ठापितं 'तत्तु समन्वयात्' इत्यत्र। तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यं, इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि उपासनाविधिप्रधानानि हि तानि, तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यं, सति तु विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति इति। एष विनिगमनायां हेतुः येनोभयास्वपि श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते न पुनर्विपरीतमिति का तर्हि आकारवद्विषयाणां श्रुतीनां गतिरित्यत आह॥

तत्परातत्परविरोधे तत्परं बलवदिति न्यायो नियामक इत्याह। अरूपवदेवेति। उपासनपरवाक्येषु आकारे तात्पर्याभावेऽपि देवताविग्रहवदाकारसिद्धिमाशङ्क्य निष्प्रपञ्चपरश्रुतिविरोधान्मैवमित्याह। तेष्वसतीति॥

प्रकाशवच्चावैयर्थ्यात्॥ १५॥

यथा प्रकाशः सौरश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसम्बन्धात्तेषु ऋजुवक्रादिभावम्प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यते एवं ब्रह्मापि पृथिव्याद्युपाधिसम्बन्धात् तदाकारमिव प्रतिपद्यते, तदालम्बनो ब्रह्मण आकारविशेषोपदेश उपासनार्थो न विरुध्यते, एवमवैयर्थ्यमाकारवद्ब्रह्मविषयाणामपि वाक्यानां भविष्यति, न हि वेदवाक्यानां कस्यचिदर्थवत्त्वं कस्यचिदनर्थवत्त्वमिति युक्तं प्रतिपत्तुं प्रमाणत्वाविशेषात्। नन्वेवमपि यत् पुरस्तात् प्रतिज्ञातं नोपाधियोगादप्युभयलिङ्गत्वं ब्रह्मणोऽस्तीति तद्विरुध्यते, नेति ब्रूमः। उपाधिनिमित्तस्य वस्तुधर्मतानुपपत्तेः, उपाधीनां चाविद्याप्रत्युपस्थापितत्वात्। सत्यमेव च नैसर्गिक्यामविद्यायां लोकवेदव्यवहारावतार इति तत्र तत्रावोचाम॥

कल्पितद्वैते सावकाशत्वाच्च सप्रपञ्चत्वश्रुतयो दुर्बला इत्याह। प्रकाशवच्चेति। नन्वाकारवाक्यानामुपाधिकल्पितसर्वगन्धत्वादिनार्थवत्त्वं किमिति वर्ण्यते वैयर्थ्यमेवोच्यतां। तत्राह। न हि वेदवाक्यानामिति। नन्वेवमपीति उक्तरीत्योभयरूपत्वाङ्गीकारेण श्रुतीनां व्यवस्थितेः त्वपीत्यर्थः। उपाधीनां कल्पितत्वादौपाधिकस्य सत्यत्वानुपपत्तेर्न सत्यमुभयरूपत्वमिति पूर्वमुक्तं सम्प्रति सत्यं निर्विशेषत्वं मिथ्या सविशेषत्वमित्युच्यत इत्युभयरूपत्वाङ्गीकारेऽपि न पूर्वापरविरोध इत्याह। नेति ब्रूम इति। द्वैतस्य मिथ्यात्वे ज्ञानेन बाधादुपासनादिव्यवहारो न स्यादित्याशङ्क्य बाधात् प्रागेव स इत्याह। सत्यमिति॥

आह च तन्मात्रं ॥ १६ ॥

आह च श्रुतिश्चैतन्यमात्रं विलक्षणरूपान्तररहितं निर्विशेषं ब्रह्म 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इति। एतदुक्तं भवति, नास्यात्मनोऽन्तर्बहिर्वा चैतन्यादन्यद्रूपमस्ति, चैतन्यमेव तु निरन्तरमस्य स्वरूपं, यथा सैन्धवघनस्यान्तर्बहिश्च लवणरस एव निरन्तरो भवति न रसान्तरन्तथैवायमपीति ॥

दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

दर्शयति च श्रुतिः पररूपप्रतिषेधेनैव ब्रह्म निर्विशेषं 'अथात आदेशो नेति नेति, अन्यदेव तद्विदितादथो अविदितादधीति, यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्येवमाद्या। बाष्कलिना च बाध्वः पृष्टः सन्नवचनेनैव ब्रह्म प्रोवाचेति श्रूयते 'स होवाचाधीहि भगवो ब्रह्मेति स तूष्णीं बभूव तं ह द्वितीये वा

यतः श्रुतिश्चिन्मात्रमाह अतस्स विशेषो मिथ्येति सूत्रार्थमाह। आह चेति। सैन्धवघनो लवणपिण्डः ॥

किञ्च श्रुतिस्मृत्योः परनिषेधेन ब्रह्मोपदेशात् निष्प्रपञ्चं ब्रह्मेत्याह। दर्शयतीति चेति। अथ द्वैतोक्त्यनन्तरं ज्ञानहेतुत्वान्नेति नेति उपदेशः क्रियत इत्यर्थः। अधि अन्यत् पुनः पुनरधीहि भो इति निर्बन्धकारिणं तं द्वितीये तृतीये च प्रश्ने तूष्णींभावं त्यक्त्वा उवाच। उपशान्तो निरस्तद्वैतः। अतस्तस्य तूष्णींभाव एवोत्तरमिति सौत्रस्य अथोशब्दस्तथार्थकः। आदिमत्कार्यं तन्न भवतीत्यनादिमत्। सत् इन्द्रियवेद्यं। असत् परोक्षञ्च न स्वप्रकाशत्वादित्यर्थः। सर्वभूतगुणैर्विश्व-

तृतीये वा वचन उवाच ब्रूमः खलु त्वन्तु न विजानासि उपशान्तोऽयमात्मा' इति। तथा स्मृतिष्वपि परप्रतिषेधेनैवोपदिश्यते—

"ज्ञेयं यत् तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते"॥

इत्येवमाद्यासु। तथा विश्वरूपधरो नारायणो नारदमुवाचेति स्मर्यते—

"माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्हसि"॥ इति।

अत एव चोपमा सूर्यकादिवत्॥ १८॥

यत एव चायमात्मा चैतन्यस्वरूपो निर्विशेषो वाङ्मनसातीतः परप्रतिषेधेनोपदेश्योऽत एव चास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादिवत् इत्युपमोपादीयते मोक्षशास्त्रेषु—
'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति।

गन्धादिभिर्युक्तं मां मूर्तिमन्तं पश्यसीति यत्सा माया अत एव सद्वैतो भगवानिति मां द्रष्टुं नार्हसि वस्तुतो द्वैतातीतत्वादित्यर्थः॥

किञ्च यथा जलाद्युपाधिकल्पितः सूर्यचन्द्रादेर्भेदचलनादिर्धर्म एवमात्मन इति दृष्टान्तः। श्रुतेश्च निर्विशेषं तत्त्वमित्याह। अत एव चोपमेति। जलबिम्बत्वाकारेण सूर्यस्याभासत्वद्योतनाय सूर्यकेति कप्रत्ययः। यथायं ज्योतिर्मयो विवस्वान् स्वत एकोऽपि घटभेदेन भिन्नाः

"एक एव तु भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" ॥
इति चैवमादिषु। अत्र प्रत्यवस्थीयते ॥

अम्बुवदग्रहणात् तु न तथात्वं ॥ १९ ॥

न जलसूर्यादितुल्यत्वमिहोपपद्यते तद्वदग्रहणात्। सूर्यादिभ्यो हि मूर्तेभ्यः पृथग्भूतं विप्रकृष्टदेशं मूर्तं जलं गृह्यते तत्र युक्तः सूर्यादिप्रतिबिम्बोदयः न त्वात्माऽमूर्तो न चास्मात् पृथग्भूता विप्रकृष्टदेशाश्चोपाधयः, सर्वगतत्वात् सर्वानन्यत्वाच्च। तस्मादयुक्तोऽयं दृष्टान्त इति। अत्र प्रतिविधीयते ॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं ॥ २० ॥

युक्त एव त्वयं दृष्टान्तः विवक्षितांशसम्भवात्, न हि दृष्टान्तदार्ष्टान्तिकयोः क्वचित् किञ्चिद्विवक्षितमंशं मुक्त्वा सर्वसारूप्यं केनचिद्दर्शयितुं शक्यते, सर्वसारूप्ये हि दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात्। न चेदं स्वमनीषिकया जलसूर्यकादिदृष्टान्तप्रणयनं। शास्त्रप्रणीतस्य त्वस्य प्रयोजनमात्रमुपन्यस्यते

ष्पोऽनुगच्छन् बहुधा क्रियते एवमजोऽयमात्मा देवः स्वप्रकाश एकोऽप्युपाधिना मायया चोत्रेष्वनुगच्छन् भेदरूपः क्रियत इति योजना ॥

दृष्टान्तमनुक्तदृष्टान्तवैषम्यशङ्कासूत्रं। अम्बुवदिति। आत्मनो रूपत्वात् दूरस्थोपाध्यभावाच्च मायया बुद्ध्यादिषु प्रतिबिम्बभेदो न युक्त इत्यर्थः ॥

उपाध्यन्तर्भावेन तत्कल्पितधर्मवत्त्वमत्र विवक्षितांशस्तेन साम्येन समाधानसूत्रं। वृद्धिह्रासेति। दृष्टान्तसाम्येऽपि नीरूपात्मनः प्रति-

किं पुनरत्र विवक्षितं सारूप्यमिति। तदुच्यते। वृद्धिह्रासभाक्त्वमिति। जलगतं हि सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते जलह्रासे ह्रसति जलचलने चलति जलभेदे भिद्यत इत्येवं जलधर्मानुविधायि भवति, न तु परमार्थतः सूर्यस्य तथात्वमस्ति, एवं परमार्थतोऽविकृतमेकरूपमपि सत् ब्रह्म देहाद्युपाध्यन्तर्भावात् भजत इवोपाधिधर्मान् वृद्धिह्रासादीन्, एवमुभयोर्दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यादविरोधः॥

दर्शनाच्च॥ २१॥

दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिषु अन्तरनुप्रवेशं—

'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्'॥

इति, 'अनेन जीवेनात्मनानुप्रविश्य' इति च। तस्मा-

बिम्बं स्वबुद्ध्या कथं कल्प्यत इत्याह। न चेदमिति। श्रूयते न कल्प्यत इत्यर्थः। श्रुतदृष्टान्तस्य सूर्यकादिवत् इत्युपन्यासेन किं फलमित्यत आह। शास्त्रेति। आत्मनो निर्विशेषत्वं फलमित्यर्थः। अविरोध इति न वैषम्यमित्यर्थः। आत्मा प्रतिबिम्बशून्यः नीरूपद्रव्यत्वात् वायुवत इत्यनुमाने आकाशे व्यभिचारः। अल्पजले विदूराकाशप्रतिबिम्बदर्शनादुपाधिरूपस्थत्वमपि क्वचिदनपेक्षितमिति भावः॥

प्रवेशश्रुतेश्चोक्तानुमानबाध इत्याह सूत्रकारः। दर्शनाच्चेति। द्विपदः पुरो मनुष्यादिदेहांश्चक्रे चतुष्पदः पुरः पशून् कृत्वा पुरस्तात् चक्षुराद्यभिव्यक्तेः पुरस्तात् स ईश्वरः पक्षी लिङ्गशरीरी भूत्वा पुर उक्तानि शरीराण्याविशत् स च प्रविष्टोऽपि पुरुषः पूर्ण एवेत्यर्थः।

युक्तमेतत् अत एवोपमासूर्यकादिवदिति। तस्मात् निर्विकल्पकैकलिङ्गमेव ब्रह्म नोभयलिङ्गं न विपरीतलिङ्गञ्चेति सिद्धं। अत्र केचित् द्वे अधिकरणे कल्पयन्ति, प्रथमं तावत् किं प्रत्यस्तमिताशेषप्रपञ्चमेकाकारं ब्रह्म उत प्रपञ्चवदनेकाकारोपेतमिति, द्वितीयन्तु स्थिते प्रत्यस्तमितप्रपञ्चत्वे किं सल्लक्षणं ब्रह्म उत बोधलक्षणं उतोभयलक्षणमिति। अत्र वयं वदामः सर्वथाप्यानर्थक्यमधिकरणान्तरारम्भस्येति। यदि तावदनेकलिङ्गत्वं परस्य ब्रह्मणो निराकर्तव्यमित्ययं प्रयासः तत्पूर्वेणैव न स्थानतोऽपीत्यनेनाधिकरणेन निराकृतमित्युत्तरमधिकरणं प्रकाशवच्चैतत् व्यर्थमेव भवेत्। न च सल्लक्षणमेव ब्रह्म न बोधलक्षणमिति शक्यं वक्तुं, विज्ञानघन एवेत्यादि श्रुतिवैयर्थ्यप्रसङ्गात्। कथं वा निरस्तचैतन्यं ब्रह्म चेतनस्य जीवस्यात्मत्वेनोपदिश्येत। नापि बोधलक्षणमेव ब्रह्म, न सल्लक्षण-

---

तैत्तिरीयके लिङ्गस्य पश्चाद्युक्तेः पश्चित्वं मन्तव्यं। एवं प्रतिबिम्बभावेन भेदादेः कल्पितत्वात् निर्विशेषं ब्रह्मेति स्वमतमुपसंहरति। तस्मादिति। एकदेशिव्याख्यामुत्थापयति। अत्रेति। न स्थानतोऽपीत्याद्येकमधिकरणं, तत्र ब्रह्मणो निष्प्रपञ्चत्वे स्थिते किंलक्षणं ब्रह्मेति सन्देहे प्रकाशवच्चेत्यादिद्वितीयमधिकरणं प्रवृत्तं न सद्रूपमेव ब्रह्म किन्तु प्रकाशवच्च चिद्रूपञ्च। कुतः, अवैयर्थ्यात्। सत्यं ज्ञानं सदेव सोम्येत्युभयश्रुतेर्द्विरूपे ब्रह्मण्यर्थवत्त्वादिति पूर्वपक्षे सिद्धान्तः। आह च तन्मात्रं सन्मात्रं ब्रह्म। श्रुतिराह ज्ञानस्य सत्तानतिरेकादिति। इदं द्वितीयाधिकरणं दूषयति। अत्र वयमिति। द्वितीयाधिकरणस्य किं ब्रह्मणोऽनेकरूपत्वनिरासः फलं उत बोधरूपत्वनिरासः आहोस्वित् सत्तानिरास इति विकल्प्य सर्वथाप्यानर्थक्यं प्रपञ्चयन् आद्ये गतार्थतामाह।

मिति शक्यं वक्तुं, 'अस्तीत्येवोपलब्धव्यः' इत्यादिश्रुतिवैयर्थ्यप्रसङ्गात्, कथं वा निरस्तसत्ताको बोधोऽभ्युपगम्येत। नाप्युभयलक्षणमेव ब्रह्मेति शक्यं वक्तुं, पूर्वाभ्युपगमविरोधप्रसङ्गात् सत्ताव्यावृत्तेन बोधन बोधव्यावृत्तया च सत्तयोपेतं ब्रह्म प्रतिजानानस्य तदेव पूर्वाधिकरणप्रतिषिद्धं सप्रपञ्चत्वं प्रसज्येत। श्रुतत्वाददोष इति चेत्, न, एकस्यानेकस्वभावत्वानुपपत्तेः। अथ सत्तैव बोधः बोध एव च सत्ता नानयोः परस्परव्यावृत्तिरस्ति इति यद्युच्येत तथापि किं सल्लक्षणं ब्रह्म उत बोधलक्षणं उतोभयलक्षणमित्ययं विकल्पो निरालम्बन एव स्यात्, सूत्राणि त्वेकाधिकरणत्वेनैवास्माभिर्नीतानि। अपि च ब्रह्मविषयासु श्रुतिष्वाकारवदनाकारप्रतिपादनेन विप्रतिपन्नास्वनाकारे ब्रह्मणि परिगृहीते अवश्यं वक्तव्येतरासां श्रुतीनां

यदि तावदिति। न हि द्वितीय इत्याह। न चेति। ब्रह्मणो बोधरूपत्वनिरासे जडत्वाज्जीवाभेदश्रुतिबाधश्च स्यादित्याह। कथं वेति। न तृतीय इत्याह। नापीति। सत्तानिरासे बोधस्य तुच्छत्वं च स्यादित्याह। कथमिति। न च बोधस्य सत्तानतिरेकान्न तुच्छतेति वाच्यं। सद्बोधपदयोर्वाच्यानतिरेके पर्यायत्वप्रसङ्गात्। एवं सिद्धान्तं फलाभावेन दूषयित्वा पूर्वपक्षं दूषयति। नापीति। प्रसङ्गमेवाह। सत्तेति। व्यावृत्तत्वं भिन्नत्वं। निष्प्रपञ्चैकरूपत्वसिद्धान्तविरोधात् भिन्नोभयरूपत्वपूर्वपक्षानुत्थानमित्यर्थः। उभयश्रुतिबलादुत्थानमिति शङ्कते। श्रुतत्वादिति। मेरुविन्ध्यवत् परस्परं भिन्नसत्ताबोधयोरेकब्रह्माभेदशङ्का श्रुतिशतेनापि न युक्तेत्याह। नेति। सद्बोधयोर्भेदोऽस्ति न वा आद्ये श्रुतेरपि विरुद्धार्थत्वानुपपत्तेर्न पूर्वपक्षोत्थानमित्युक्तं। सम्प्रति द्वितीयं शङ्कते। अथ सत्तैवेति। सद्बोधपदयोर्वाच्यभेदेऽपि

गतिः, तादर्थ्येन प्रकाशवच्चेत्यादीनि सूत्राणि अर्थवन्तराणि सम्पद्यन्ते। यदप्याहुः आकारवादिन्योऽपि श्रुतयः प्रपञ्च-प्रविलयमुखेनानाकारप्रतिपत्त्यर्था एव न पृथगर्था इति तदपि न समीचीनमिव लक्ष्यते। कथं ये हि परविद्याधिकारे केचित् प्रपञ्चा उच्यन्ते 'यथा युक्ता ह्यस्य हरयः शता दशेत्ययं वै हर-योऽयं वै दश च सहस्राणि बहूनि चानन्तानि च' इत्येवमादयः ते भवन्तु प्रविलयार्थाः, 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरम-बाह्यं' इत्युपसंहारात्। ये पुनरुपासनाधिकारे प्रपञ्चा उच्यन्ते 'यथा मनोमयः प्राणशरीरो भारूपः' इत्येवमादयो न तेषां प्रविलयार्थत्वं न्याय्यं, स क्रतुं कुर्वीतेत्येवंजातीयकेन प्रकृतेनै-

---

वाक्यैक्योपपत्तिरखण्डार्थस्वीकारादित्यर्थः। अखण्डार्थस्य पूर्वपक्षत्वं न स्यात् सिद्धान्तत्वात्। किञ्चात्र संशयोऽप्ययुक्त इत्याह। तथापीति। एकाधिकरणपक्ष सूत्राणि कथं नेयानीत्यत आह। सूत्राणीति। स्व-पक्षे सूत्रसामञ्जस्यं चेत्याह। अर्थवदिति। अवश्यापेक्षितगत्यर्थत्वेनोत्त-रसूत्राणां पूर्वैकवाक्यत्वान्नाधिकरणभेद इति भावः। आकारश्रुतीनां कल्पिताकारो गतिरिति स्वमतमुक्तं, प्रपञ्चविलयवादिनस्तु 'मनोमयः प्राणशरीरः सत्यकामः' इत्याद्याकारश्रुतीनां तदितराकारप्रविलयो गतिरित्याहुः। मनोमय इति कोऽर्थः, मनोऽतिरिक्तोपाधिशून्य इत्यर्थः। एवं या शरीरपदेन प्राणातिरिक्तोपाधिनिषेधान्मनसोऽप्य-भावसिद्धिः एवं सर्वे शब्दा अनाकारब्रह्मपरा एवेति तन्मतमनूद्य दूषयति। यदपीत्यादिना। किं ज्ञेयब्रह्मप्रकरणस्थानामाकारशब्दा-नां निषेधपरत्वं उतोपासनाप्रकरणस्थानामपि तत्राद्यमङ्गीकरोति। ये हीति। अस्य जीवभावं प्राप्तस्येश्वरस्य दश हरयो विषया हरणा-द्दशेन्द्रियाणि प्राणिभेदापेक्षया शतानि सहस्राणि च तेषामीश्वरा-द्भेदमाशङ्क्याह। अयमिति। ईश्वर एव हरय इत्यर्थः। द्वितीयं

वोपासनविधिना तेषां सम्बन्धात्। श्रुत्या चैवंजातीयकानां गुणानामुपासनार्थत्वेऽवकल्प्यमाने न लक्षणया प्रविलयार्थत्वमवकल्पते। सर्वेषाञ्च साधारणे प्रविलयार्थत्वे सति 'अरूपवदेव हि तत्प्रधानत्वात्' इति विनिगमनकारणवचनमनवकाशं स्यात्। फलमप्येषां यथोपदेशं क्वचित् दुरितक्षयः क्वचिदैश्वर्यप्राप्तिः क्वचित् क्रममुक्तिरित्यवगम्यत एवेति। अतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानाञ्च न्याय्यं नैकवाक्यत्वं। कथञ्चैषामेकवाक्यतोत्प्रेक्ष्यत इति वक्तव्यं। एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवदिति चेत्, न, ब्रह्मवाक्येषु नियोगाभावात्। वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि न नियोगोपदेशीनीति एतद्विस्तरेण प्रतिपादितं 'तत्तु समन्वयात्' [वेदा०अ०१।पा०१।सू०४] इत्यत्र। किंविषयकश्चात्र नियोगोऽभिप्रेत इति वक्तव्यं, पुरुषो हि नियुज्यमानः कुर्विति स्वव्यापारे कस्मिंश्चित् नियुज्यते। ननु

दूषयति। ये पुनरिति। मनोमयादिशब्दानां मुख्यवृत्त्या गुणपरत्वसम्भवे निषेधलक्षणापि न युक्तेत्याह। श्रुत्या चेति। किञ्चाकारानाकारश्रुतिद्वैविध्ये सति ब्रह्म नाकारमेवेत्यत्र किं विनिगमकमिति शङ्कोत्थानादस्थूलादिश्रुतीनां निराकारतात्पर्यनियामकमिति कथनार्थमिदं सूत्रमर्थवत् भवति। सर्वश्रुतीनां निषेधार्थत्वे तु शङ्कानुत्थानात् नियामकसूत्रं व्यर्थं स्यादित्याह। सर्वेषाञ्चेति। ननूपासनार्थवाक्यानां स्वार्थे फलाभावात् सफलनिषेधवाक्यशेषत्वमित्याशङ्क्य तस्य श्रुतत्वान्नान्यशेषतेत्याह। फलमपीति। अर्थैक्याभावाच्च नैकवाक्यतेत्याह। कथञ्चेति। अर्थैक्यं शङ्कते। एकेति। यथा फलवत् परमापूर्वाख्यनियोगैक्यादङ्गप्रधानवाक्यानामेकवाक्यता तथा तत्त्वावबो-

द्वैतप्रपञ्चप्रविलयो नियोगविषयो भविष्यति, अप्रविलापिते हि द्वैतप्रपञ्चे ब्रह्मतत्त्वावबोधो न भवतीत्यतो ब्रह्मतत्त्वावबोध-प्रत्यनीकभूतो द्वैतप्रपञ्चः प्रविलाप्यः यथा स्वर्गकामस्य यागोऽनुष्ठातव्य उपदिश्यते, एवमपवर्गकामस्य प्रपञ्चप्रविलयः, यथा च तमसि व्यवस्थितं घटादितत्त्वं अवबुभुत्समानेन तत्प्रत्यनीकभूतं तमः प्रविलाप्यते, एवं ब्रह्मतत्त्वमवबुभुत्समानेन तत्प्रत्यनीकभूतः प्रपञ्चः प्रविलापयितव्यः। ब्रह्मस्वभावो हि प्रपञ्चो न प्रपञ्चस्वभावं ब्रह्म तेन नामरूपप्रपञ्चप्रविलापनेन ब्रह्मतत्त्वावबोधो भवति इति। अत्र वयं पृच्छामः कोऽयं प्रपञ्चप्रविलयो नाम, किमग्निप्रतापसम्पर्कात् घृतकाठिन्यप्रविलय इव प्रपञ्चप्रविलयः कर्तव्यः आहोस्विदेकस्मिन् चन्द्रे तिमिरकृतानेकचन्द्रप्रपञ्चवदविद्याकृतो ब्रह्मणि नामरूपप्रपञ्चो विद्यया प्रविलापयितव्य इति। तत्र यदि तावद्विद्यमानोऽयं प्रपञ्चो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्येत स पुरुषमात्रेणाशक्यः प्रविलापयि-

---

धकामस्य प्रपञ्चप्रविलयविषयक एको नियोगरूपोऽर्थोऽस्तीत्याकारानाकरवाक्यानां सर्वेषामेकवाक्यतेत्यर्थः। नियोगासिद्ध्या दूषयति। नेति। विषयं ग्राह्यते। ननु द्वैतेति। प्रत्यनीकं प्रतिबन्धकं। ननु प्रपञ्चविलये ब्रह्मलयं स्यादभेदादित्यत आह। ब्रह्मस्वभावो हि प्रपञ्च इति। कारणं हि कार्यस्य स्वरूपं अतः कार्यनाशेऽपि कारणस्य न लयः घटनाशेऽपि मृद्दर्शनादित्यर्थः। प्रपञ्चस्य सत्यस्य कल्पितस्य वा लयो विधिरिति विकल्प्याद्यं दूषयति। तत्र यदि तावदिति। सत्यस्य नाशादध्वस्तेः मुसलादिना च कृत्स्नद्वैतध्वंसायोगात् नभोग्रसनवि-

तुमिति तत्प्रलयोपदेशोऽशक्यविषय एव स्यात्, एकेन चादि-मुक्तेन पृथिव्यादिप्रविलयः कृतः इदानीं पृथिव्यादिशून्यं जगद्भविष्यत्। अथाविद्याध्यस्तो ब्रह्मण्येकस्मिन्नयं प्रपञ्चो विद्यया प्रविलाप्यत इति ब्रूयात्, ततो ब्रह्मैवाविद्याध्यस्तप्रपञ्चप्रत्याख्यानेनावेदयितव्यं 'एकमेवाद्वितीयं ब्रह्म तत्सत्यं स आत्मा तत्त्वमसि' इति। तस्मिन्नावेदिते विद्या स्वयमेवोत्पद्यते तया चाविद्या बाध्यते ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत् प्रविलीयते। अनावेदिते तु ब्रह्मणि ब्रह्मविज्ञानं कुरु प्रपञ्चप्रविलयञ्चेति शतकृत्वोऽप्युक्ते न ब्रह्मविज्ञानं प्रपञ्चप्रविलयो वा जायेत। नन्वावेदिते ब्रह्मणि तद्विज्ञानविषयः प्रपञ्चविलयविषयो वा नियोगः स्यात्, न, निष्प्रपञ्चब्रह्मात्मत्वावेदनेनैवोभयसिद्धेः, रज्जुस्वरूपप्रकाशनेनैव हि तत्स्वरूपविज्ञानमविद्याध्यस्तसर्पादिप्रपञ्चप्रविलयश्च भवति, न च कृतमेव पुनः क्रियते। नियोज्योऽपि च प्रपञ्चावस्थायां योऽवगम्यते जीवो नाम स प्रपञ्चपक्षस्यैव वा स्यात् ब्रह्मपक्षस्यैव

धिवदशक्यविषयोऽयं विधिः, किञ्च शुकादिमुक्त्या सर्वमुक्तिः स्यादित्यर्थः। द्वितीयमनूद्य दूषयति। अथेत्यादिना। उपदेशजन्यज्ञानादेवाविद्यातज्जन्यप्रपञ्चलयसिद्धेर्नियोगो व्यर्थ इत्यर्थः। किञ्च ब्रह्मज्ञानादौ विधिः किं ब्रह्मण्यज्ञाते ज्ञाते वा, नाद्यः अशक्यत्वादित्याह। अनावेदिते त्विति। द्वितीयं शङ्कते। नन्विति। उपदेशादेव ज्ञाते ब्रह्मणि साक्षात्कारद्वैतबाधयोः सिद्धेर्विधिवैयर्थ्यसिद्धस्य विधिना कर्तुमयोगादित्याह। नेति। एवं विषयाभावात् नियोगाभावमुक्त्वा नियोज्याभावात् तदभावमाह। नियोज्योऽपि चेति। प्रपञ्चान्तर्भूतो ब्रह्म

वा। प्रथमे विकल्पे निष्प्रपञ्चब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापितत्वात् कस्य प्रपञ्चप्रविलये नियोग उच्येत कस्य वा नियोगनिष्ठतया मोक्षोऽवाप्तव्य उच्येत। द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपं जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावात् नियोगाभाव एव। द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठितास्तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधानाः भवन्ति, लोकेऽपीदं पश्येदमाकर्णयेति चैवंजातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते न साक्षात् ज्ञानमेव कुर्विति। ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्ज्ञायते कदाचित् न जायते, तस्मात्तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन, तस्मिन् दर्शिते स्वयमेव यथाविषयं यथाप्रमाणञ्च ज्ञानमुत्पद्यते। न च प्रमाणान्तरेणान्यथाप्रसिद्धेऽर्थेऽन्यथाज्ञानं नियुक्तस्याप्युपपद्यते। यदि पुनर्नियुक्तोऽहमित्यन्यथा ज्ञानं कुर्यात्

वेत्यर्थः, आद्ये जीवनाशाद्विध्ययोगः द्वितीये नियोज्यादिसिद्धिः। तर्हि ज्ञाने विधिप्रत्ययानां का गतिरित्यत आह। द्रष्टव्यादिशब्दा इति। ननु श्रुतं ज्ञानं त्यक्त्वा तत्साधनव्यापारविधिः किमिति कल्प्यत इत्याशङ्क्य ज्ञानस्य पुरुषकृत्यसाध्यत्वादित्याह। ज्ञेयाभिमुखस्यापीति। किञ्च ज्ञानविधिवादिना ज्ञेयं ब्रह्मावश्यं वेदान्तैर्ज्ञापनीयं विषयानवबोधे विधिबोधायोगात्। तथा च वेदान्तैरेव ज्ञानोत्पत्तेर्विध्यानर्थक्यमित्याह। तस्मादिति। तं ज्ञानार्थिनं प्रतीत्यर्थः। ननूत्पन्नं ज्ञानमन्यथाकर्तुं विधिरर्थवानिति नेत्याह। न चेति। नन्वनग्निमग्निं ध्यायेदिति प्रत्यक्षप्रमाणादुत्पन्नमपि ज्ञानं तमग्निं ध्यायेदिति विधिनान्यथा कृतं दृश्यत इत्यत आह। यदीति। अन्यथाधीः कृतिसाध्या

न तु तज्ज्ञानं किं तर्हि मानसी सा क्रिया स्वयमेव चेदन्यथोत्पद्येत भ्रान्तिरेव स्यात्, ज्ञानन्तु प्रमाणजन्यं यथाभूतविषयं च न तन्नियोगशतेनापि कारयितुं शक्यते, न च प्रतिषेधशतेनापि वारयितुं शक्यते, न हि तत्पुरुषतन्त्रं वस्तुतन्त्रमेव हि तत्, अतोऽपि नियोगाभावः, किञ्चान्यत् नियोगनिष्ठतयैव पर्यवस्यति आम्नाये यदभ्युपगतमनियोज्यब्रह्मात्मत्वं जीवस्य तदप्रमाणकमेव स्यात्। अथ शास्त्रमेवानियोज्यब्रह्मात्मत्वमव्याचचीत तदवबोधे च पुरुषं नियुञ्जीत, ततो ब्रह्मशास्त्रस्यैकस्य *द्व्यर्थपरता विरुद्धार्थपरता च प्रसज्येयातां नियोगपरतायां च श्रुतहानिरश्रुतकल्पना कर्मफलवन्मोक्षफलस्यादृष्ट-

चेत् क्रियैव, कृतिं विनैव चेत् भ्रान्तिरेवातो भानं विना विधितो भानासिद्धेर्भानवस्तुतन्त्रे ज्ञाने विधिर्व्यर्थ इत्यर्थः। वेदान्तेषु विधिवादिनोऽन्यच्च दूषणमस्तीत्याह। किञ्चान्यदिति। ब्रह्मात्मैक्ये नियोगे च वेदान्तवाक्यस्य प्रामाण्यमाशङ्क्यार्थभेदाद्वाक्यभेदो विरुद्धार्थत्वादप्रामाण्यं चेति दूषयति। अथेत्यादिना। किञ्च श्रुतं ब्रह्म न श्रुतो विधिर्वेदान्तेषु तत्कल्पने च कर्मजन्यत्वान्मोक्षस्यानित्यत्वसातिशयत्वादिप्रसङ्ग इत्याह। नियोगपरतायां चेति। फलितमाह। अत इति। इदानीं प्रौढवादेन नियोगमङ्गीकृत्य तदेकत्वं खण्डयति। अभ्युपगम्यमानेऽपीति। भिन्नक्रियावाचिशब्दः शब्दान्तरं यथा यजति ददातीति, तथेहापि वेदोपासीतेति शब्दभेदः। निर्गुणसगुणरूपभेदः प्रकरणभेदः मुक्त्यभ्युदयफलभेद इत्येतैः प्रमाणैर्निर्गुणज्ञानसगुणोपासनाविषयकनियोगभेद इत्यर्थः। कथं तर्ह्यङ्गाङ्गिवाक्येषु नियोगैक्यं तत्राह। प्रयाजेति। एकस्यैव स्वर्गकामस्य साङ्गप्रधानाधिकारात् तद्वाध्यफलापूर्वैक्यादेकवाक्य-

* द्व्यर्थता वस्तुपरता विधिरूपार्थेत्यादि मु०।

फलत्वमनित्यत्वं चेत्येवमादयो दोषाः नापि केनचित् परिहर्तुं शक्याः, तस्मादवगतिनिष्ठान्येव ब्रह्मवाक्यानि न नियोगनिष्ठानि, अतश्चैकनियोगप्रतीतेरेकवाक्यतेत्ययुक्तं। अभ्युपगम्यमानेऽपि च ब्रह्मवाक्येषु नियोगसद्भावे तदेकत्वं निष्प्रपञ्चोपदेशेषु सप्रपञ्चोपदेशेषु वाऽसिद्धं, न हि शब्दान्तरादिभिः प्रमाणैः नियोगभेदेऽवगम्यमाने सर्वत्रैको नियोग इति शक्यमाश्रयितुं। प्रयाजदर्शपूर्णमासवाक्येषु तु अधिकारांशेनाभेदायुक्तमेकत्वं न त्विह सगुणनिर्गुणचोदनासु कश्चिदेकत्वाकारांशोऽस्ति। न हि भारूपत्वादयो गुणाः प्रपञ्चविलयोपकारिणो भवन्ति नापि प्रपञ्चविलयादयो गुणा भारूपत्वादिगुणोपकारिणः परस्परविरोधित्वात्। न हि कृत्स्नप्रपञ्चप्रविलापनं प्रपञ्चैकदेशापेक्षणञ्च एकस्मिन् धर्मिणि युक्तं समावेशयितुं। तस्मादस्मदुक्त एव विभाग आकारवदनाकारोपदेशानां युक्ततर इति॥

तेत्यर्थः। इहापि निर्गुणसगुणविद्ययोरेकाधिकारात् नियोगैक्यमस्तु नेत्याह। न त्विहेति। मुक्त्यभ्युदयार्थभेदान्मिथो विरुद्धार्थविद्ययोरङ्गाङ्गित्वायोगाच्च म नियोगैक्यं। न च निर्गुणविद्यानियोग एकपूर्वसगुणविद्यानङ्गीकारादिति वाच्यं। अहो विपतीतं पाण्डित्यमायुष्मतः, विध्ययोग्यायां विद्यायां विधिर्योग्यायामविधिरिति, तस्मात् साकारवाक्यानामाकारलयद्वारा निर्गुणवाक्यैकवाक्यतागतिरसद्गतिरेव, किन्तु तेषां फलिताकारो गतिस्तदुपासनयाभ्युदयसिद्धेः, निर्गुणवाक्यानान्तु परमार्थालम्बनत्वमित्यल्पस्तदुक्त एव विभागः साधीयानित्युपसंहरति। तस्मादिति॥

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यञ्चामृतञ्च स्थितञ्च यच्च सच्च त्यच्च' इत्युपक्रम्य पञ्च महाभूतानि द्वैराश्येन प्रविभज्यामूर्तरसस्य च पुरुषशब्दोदितस्य माहारजनादीनि रूपाणि दर्शयित्वा पुनः पठ्यते, 'अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति' इति। तत्र कोऽस्य प्रतिषेधस्य विषय इति जिज्ञासामहे, न ह्यत्रेदं तदिति विशेषितं किञ्चित् प्रतिषेध्यमुपलभ्यते, इतिशब्देन त्वत्र प्रतिषेध्यं किमपि समर्प्यते नेति नेतीति, इतिशब्दपरत्वान्नञ्प्रयोगस्य। इतिशब्दश्चायं सन्निहितालम्बनः एवंशब्दसमानवृत्तिः प्रयुज्यमानो दृश्यते 'इति ह स्मोपाध्यायः कथयति' इत्येवमा-

---

ब्रह्मणो निर्विशेषचिन्मात्रत्वमुक्त्वा सर्वनिषेधावधित्वेन सद्रूपत्वमाह। प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति। पृथिव्यप्तेजोभूतत्रयं मूर्तं वाय्वाकाशद्वयममूर्तमिति राशिद्वयमुक्त्वा भूतद्वयस्यामूर्तस्य सारः 'करणात्मा हिरण्यगर्भो य एष एतस्मिन् सूर्यमण्डले पुरुषो यश्चायं दक्षिणेऽक्षिणि पुरुषः' इत्युक्तः, तस्य वासनामयानि स्वप्नरूपाणि 'तद्यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपः' इत्युपमाभिरुक्तानि विचित्राणि, तत्र महारजनं हरिद्रा तयालिप्तं वस्त्रं माहारजनं, पाण्ड्वाविकमतिधवलं कम्बलादि। केचित्तु श्रुतिमुपलक्षणं कृत्वा सूक्ष्मपञ्चभूतान्यमूर्तानि पञ्चीकृतानि मूर्तानि ततश्चामूर्तरसत्वोक्त्या करणानां पाञ्चभौतिकत्वसिद्धिरिति व्याचक्षते। अथ सत्यादात्मकप्रपञ्चोक्त्यनन्तरं, अत उक्तारोपस्य निषेधार्थत्वान्नेति नेतीति निषेधेनोपदेशः क्रियत इत्यर्थः। नेतिशब्दार्थमाह। न हीति। एतस्मादात्मनोऽन्यत्रास्तीति नेतीत्युच्यत इत्यर्थः। शून्यतानिरासार्थं परं

दिषु। सन्निहितञ्चात्र प्रकरणसामर्थ्याद्रूपद्वयं सप्रपञ्चं ब्रह्मणः तच्च ब्रह्म यस्य ते द्वे रूपे, तत्र नः संशय उपजायते किमयं प्रतिषेधो रूपे रूपवच्चोभयमपि प्रतिषेधति आहोस्विदेकतरं, यदाप्येकतरं तदापि किं ब्रह्म प्रतिषेधति रूपे परिशिनष्टि आहोस्विद्रूपे प्रतिषेधति ब्रह्म परिशिनष्टि इति। तत्र प्रकृतत्वाविशेषादुभयमपि प्रतिषेधतीत्याशङ्कामहे। द्वौ तौ प्रतिषेधौ द्विर्नेतिशब्दप्रयोगात्, तयोरेकेन सप्रपञ्चं ब्रह्मणो रूपं प्रतिषिध्यतेऽपरेण रूपवद्ब्रह्मेति भवति मतिः। अथवा ब्रह्मैव रूपवत् प्रतिषिध्यते, तद्धि वाङ्मनसातीतत्वादसम्भाव्यमानसद्भावं प्रतिषेधार्हं नतु रूपप्रपञ्चः प्रत्यक्षादिगोचरत्वात् प्रतिषेधार्हः, अभ्यासस्त्वादरार्थ इत्येवं प्राप्ते ब्रूमः, न तावदुभयप्रतिषेध उपपद्यते, शून्यवादप्रसङ्गात्। कञ्चिद्धि परमार्थमालम्ब्यापरमार्थः प्रतिषिध्यते यथा रज्ज्वादिषु सर्पादयः। तच्च परिशिष्यमाणे कस्मिंश्चिद्भावेऽवकल्पते। कृत्स्न-

---

ब्रह्मास्ति इति सिद्धान्तरीत्या श्रुत्यर्थः। अत्र निषेध्यविशेषानुपलम्भात् संशयमाह। तत्र कोऽस्येत्यादिना। तत्र प्रयोगस्य नकारस्येतिशब्दोपस्थापितवस्तुनिषेधकत्वादित्यर्थः। इतिशब्दात् निषेध्यसामान्यसमर्पणे विशेषाकाङ्क्षायां प्रकरणाद्रूपद्वयस्वरूपिब्रह्मणश्च निषेध्यत्वभानात् संशयमुक्त्वा पूर्वोक्तं निर्विशेषं ब्रह्म नास्ति इत्याक्षेपसङ्गत्या पूर्वपक्षयति। तत्र प्रकृतत्वेति। पूर्वपक्षे तत्पदार्थाभावाद्वाक्यार्थाभेदासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलं, निरधिष्ठाननिषेधादर्शनात् सर्वनिषेधो न युक्त इत्यरुच्या प्रपञ्चे ब्रह्मनिषेध इत्याह। अथ वेति। एकब्रह्मण एव निषेधे न कारणद्वयस्य पौनरुक्त्यमित्यत आह। अभ्यासस्त्विति। उत्सूत्रमेव तावत् सिद्धान्तमुपक्रमते। एवमिति।

प्रतिषेधे हि कोऽन्यो भावः परिशिष्येत, अपरिशिष्यमाणे चान्यस्मिन् य इतरः प्रतिषेद्धुमारभ्यते तस्य प्रतिषेद्धुमशक्यत्वात् तस्यैव परमार्थत्वापत्तेः प्रतिषेधानुपपत्तिः। नापि ब्रह्मप्रतिषेध उपपद्यते, 'ब्रह्म ते ब्रवाणि' इत्युपक्रमविरोधात्, 'असन्नेव स भवति असद्ब्रह्मेति वेद च' इत्यादिनिन्दाविरोधात्, 'अस्तीत्येवोपलब्धव्यः' इत्यवधारणविरोधात्, सर्ववेदान्तव्याकोपप्रसङ्गाच्च। वाङ्मनसातीतत्वमपि ब्रह्मणो नाभावाभिप्रायेणाभिधीयते, न हि महता परिकरबन्धेन 'ब्रह्मविदाप्नोति परं' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्येवमादिना वेदान्तेषु ब्रह्म प्रतिपाद्य तस्यैव पुनरभावोऽभिलप्येत, प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति* न्यायात्। †अतः प्रतिपादनप्रक्रिया त्वेषा 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति। एतदुक्तं भवति वाङ्मनसातीतमविषयान्तःपातिप्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति। तस्मात् ब्रह्मणो रूपप्रपञ्चं

शून्यप्रसङ्ग इष्ट इति वदन्तं प्रत्याह। कश्चिद्ब्रूतीति।—तच्चेति प्रतिषेधनमित्यर्थः। अधिष्ठानानवशेषे तत्प्रमारूपहेत्वभावात् निषेधवाक्यार्थप्रमाणं स्यात् इदमत्र नास्ति इति लोके निषेधस्य साधिष्ठानस्यैव प्रमितिदर्शनादित्यर्थः। किञ्च यद्भाति तत्सदित्युत्सर्गस्य भानार्थाभावाधिष्ठानप्रमितिस्तदपवादः पूर्वभानस्य भ्रमत्वनिश्चयेनार्थसत्त्वापलापात् अपवादानङ्गीकारे तूत्सर्गतः प्रपञ्चस्य सत्यत्वापत्तेः निषेधानुपपत्तिरित्याह। अपरिशिष्यमाणे चेति। अधिष्ठानसत्त्वं विना भ्रान्तिनिषेधयोरयोगात् शून्यवादो न युक्त इत्युक्त्वा पूर्ववादिनः पक्षान्तरं दूषयति। नापीति। देहात्माभिमानवल्लौकिकमानप्राप्तद्वैतस्य निषेधो युक्तो न

---

* च्चि न्याय इति वर्ध० का०।　　† अत इति वर्ध० का० नास्ति।

प्रतिषेधति परिशिनष्टि ब्रह्मेत्यवगन्तव्यं। तदेतदुच्यते। प्रकृतैतावत्त्वं हि प्रतिषेधति इति। प्रकृतं यदेतावत्त्वं परिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति। तद्धि प्रकृतं प्रपञ्चितञ्च पूर्वस्मिन् ग्रन्थेऽधिदैवतमध्यात्मं च तज्जनितमेव च वासनालक्षणमपरं रूपममूर्तरसभूतं पुरुषशब्दोदितं लिङ्गात्मव्यपाश्रयं माहारजनाद्युपमाभिर्दर्शितं, अमूर्तरसस्य पुरुषस्य चक्षुर्ग्राह्यरूपयोगित्वानुपपत्तेः। तदेतत् सप्रपञ्चं ब्रह्मणो रूपं सन्निहितालम्बनेनेति करणेन प्रतिषेधकनञं प्रत्युपनीयत इति गम्यते। ब्रह्म तु रूपविशेषणत्वेन षष्ठ्या निर्दिष्टं पूर्वस्मिन् ग्रन्थे न स्वप्रधानत्वेन। प्रपञ्चिते च तदीये रूपद्वये रूपवतः स्वरूपजिज्ञासायामिदमुपक्रान्तं 'अथात आदेशो नेति नेति' इति। तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निर्णीयते, तदास्पदं हीदं समस्तं

वेदान्तप्रमितब्रह्मण इति भावः। यदुक्तं वाङ्मनसातीतत्वात् निषेधाहं ब्रह्मेति तत्राह। वाङ्मनसेति। ब्रह्मणो वागाद्यतीतत्वात् निषेधार्थं न चेत् किमर्थं तदुक्तिरित्यत आह। प्रतिपादनेति। उक्तार्थे सूत्रं योजयति। तदेतदित्यादिना। 'द्वे वाव ब्रह्मणो रूपे' इति रूपद्वयस्यैव प्राधान्येन प्रकृतत्वान्नेतीति निषेध इत्यर्थः। नन्वादित्यमण्डले पुरुष इति ब्रह्माप्यत्र प्राधान्येनोक्तमित्याशङ्क्य पुरुषो लिङ्गात्मा अमूर्तरसत्वश्रुत्या भूतजनितत्वभानात् स्वप्नरूपवत्त्वश्रुतेश्चेत्याह। तज्जनितमेवेति। रूपरूपिणोरभेद उक्तः। ननु वासनामयं रूपमेव किमित्युपमीयते प्रसिद्धरूपमेव किं न स्यादित्यत आह। अमूर्तरसस्येति। रूपद्वयस्यैव प्राधान्येन प्रकृतत्वे फलितमाह। तदिति। प्रतियोगित्वेन समर्प्यत इत्यर्थः। न चार्थतः प्राधान्यात् ब्रह्मणो निषेधः राज्ञो भृत्यो नास्तीत्यत्र

कार्यं नेति नेतीति प्रतिषिद्धं। युक्तञ्च कार्यस्य वाचारम्भण-शब्दादिभ्योऽसत्त्वमिति नेति नेतीति प्रतिषेधनं न तु ब्रह्मणः सर्वकल्पनामूलत्वात्। न चात्रेयमाशङ्का कर्तव्या कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयमेव पुनः प्रतिषेधति 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरं' इति, यतो नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति, लोकप्रसिद्धन्त्विदं रूपद्वयं ब्रह्मणि कल्पितं परामृशति प्रतिषेध्यत्वाय शुद्धब्रह्म-स्वरूपप्रतिपादनाय चेति निरवद्यं, द्वौ चैतौ प्रतिषेधौ यथा-सङ्ख्याचेन द्वे अपि मूर्तामूर्ते प्रतिषेधतः। यद्वा पूर्वः प्रतिषेधो भूतराशिं प्रतिषेधति उत्तरो वासनाराशिं। अथवा 'नेति नेति' इति वीप्सेयमितीति यावत् किञ्चिदुत्प्रेक्ष्यते तत्सर्वं न भवति इत्यर्थः। परिगणितप्रतिषेधे हि क्रियमाणे यदि नैतत् ब्रह्म किमन्यद्ब्रह्म भवेदिति जिज्ञासा स्यात् वीप्सायान्तु सत्यां समस्तस्य विषयजातस्य प्रतिषेधादविषयः प्रत्यगात्मा ब्रह्मेति जिज्ञासा निवर्तते। तस्मात् प्रपञ्चमेव ब्रह्मणि कल्पितं प्रतिषेधति

राजनिषेधप्रसङ्गादिति भावः। किञ्चात्र ब्रह्मणः प्रतिपाद्यत्वात् न निषेध इत्याह। प्रपञ्चिते चेति। ननु ब्रह्मणि निषिद्धस्याप्यन्यत्र स्थिति-सम्भवात् कथं कल्पितत्वमित्यत आह। तदास्पदमिति। उपादाने निषिद्धस्यान्यत्र न स्थितिरित्यर्थः। यत् तु द्वैतनिषेधे प्रत्यक्षादिविरोध इति तत्राह। युक्तञ्चेति। स्थापितं हि आरम्भणाधिकरणे प्रत्यक्षादे-र्व्यवहारिकं प्रामाण्यं न तत्त्वावेदकमिति अतस्तत्त्वतो निषेधान्न विरोध इति भावः। ननु वस्तुत्वात् द्वैतवत् ब्रह्मणोऽपि निषेधोऽस्तु, नेत्याह। न त्विति। द्वैतभावाभावसाक्षित्वादशक्यो निषेध इत्यर्थः। न चेत्यादि

परिशिनष्टि ब्रह्मेति निर्णयः। इतश्चैष एव निर्णयः यतस्ततः प्रतिषेधाद्भूयो ब्रवीति 'अन्यत् परमस्ति' इति अभावावसाने हि प्रतिषेधे क्रियमाणे किमन्यत् परमस्ति इति ब्रूयात्। तत्रैषाऽक्षरयोजना नेति नेतीति ब्रह्मादिश्य तमेवादेशं पुनर्निर्वक्ति, नेति नेतीत्यस्य कोऽर्थः, न ह्येतस्मात् ब्रह्मणो व्यतिरिक्तमस्तीति अतो नेति नेतीत्युच्यते न पुनः स्वयमेव नास्ति इत्यर्थः। तच्च दर्शयति 'अन्यतः परमप्रतिषिद्धं ब्रह्मास्ति' इति। यदा पुनरेवमक्षराणि योज्यन्ते न ह्येतस्मादिति नेति नेति प्रपञ्चप्रतिषेधरूपादादेशनादन्यत् परमादेशनं न ब्रह्मणोऽस्ति इति तदा ततो ब्रवीति च भूय इत्येतन्नामधेयविषयं योजयितव्यं। अथ नामधेयं 'सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यं इति हि ब्रवीति' इति, तच्च ब्रह्मावसाने प्रतिषेधे समञ्जसम्भवति अभावावसाने तु प्रतिषेधे किं सत्यस्य सत्यमित्युच्येत तस्मात् ब्रह्मावसानोऽयं प्रतिषेधो नाभावावसान इत्यध्यवस्यामः॥

स्पष्टार्थं। यच्चोक्तं निषेधाभ्यां रूपं रूपि ब्रह्म च निषिध्यते इति तत्राह। द्वौ चैताविति। उद्देश्यविधेयार्थानां सङ्ख्यासाम्ये यथाक्रमं सम्बन्ध इति न्यायः 'यथासङ्ख्यमनुदेशः समानाम्' [पा०१।३।१०] इति पाणिनिसूत्रसिद्धः तेनात्र रूपद्वयोद्देशे न निषेधद्वयविधिरित्यर्थः। वीप्सापक्षे सर्वदृश्यनिषेधाज्जिज्ञासाशान्तिरिति विशेषमाह। परिगणितेति। मूर्तं नामूर्तं नेत्येवं विशिष्यनिषेधे जिज्ञासा न शाम्यति इत्यर्थः। सूत्रशेषं व्याचष्टे। इतश्चेति। प्रतिषेधानुपपत्त्या ब्रह्मास्तीत्यवगत, भूयः पुनः, परमस्तीति श्रुतिः साक्षादपि ब्रवीतीत्यर्थः। तच्चेति। रूपशिष्टं ब्रह्मेत्यर्थः। स्पष्टमन्यत्॥

तदव्यक्तमाह हि ॥ २३ ॥

यत्तत्प्रतिषिद्धात् प्रपञ्चजातादन्यत् परं ब्रह्म तदस्ति चेत् कस्मात् न गृह्यत इति। उच्यते। तदव्यक्तमनिन्द्रियग्राह्यं सर्वदृश्यसाक्षित्वात् आह ह्येवं श्रुतिः 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा, स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते, यत्तदद्रेश्यमग्राह्यं यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' इत्याद्या। स्मृतिरपि 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते' इत्येवमाद्या ॥

*अपि संराधने प्रत्यक्षानुमानाभ्यां ॥ २४ ॥

अपि चैनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ति योगिनः। संराधनं भक्तिध्यानप्रणिधानाद्यनुष्ठानं। कथं पुनरवगम्यते संराधनकाले पश्यन्ति इति, प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः। तथा हि श्रुतिः-

'पराञ्चि खानि व्यतृणत् स्वयम्भुः
तस्मात् पराङ् पश्यति नान्तरात्मन्।
कश्चिद्धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन्' ॥ इति।

नन्वग्राह्यत्वात् ब्रह्म नास्तीति शङ्कानिरासार्थं सूत्रं व्याचष्टे। यत् तत्प्रतिषिद्धादिति। रूपाद्यभावादव्यक्तमिन्द्रियाग्राह्यं न त्वसत्त्वादित्यर्थः। अन्यैर्देवैरिन्द्रियान्तरैर्न गृह्यत इत्यन्वयः ॥

तर्हि कदा ग्राह्यमिति शङ्कोत्तरं सूत्रं व्याख्याति। अपि चैनमिति। वस्त्वर्थः इन्द्रियैर्न गृह्यते अपि तु संराधनेन शास्त्रसंस्कृतमनसेत्यर्थः। भक्तिध्यानाभ्यां प्रत्यगात्मनश्चित्ते प्रकर्षेण निधानं स्थापनं प्रणिधानं

---

* अपि चेति वर्धं० का०।

'ज्ञानप्रसादेन विशुद्धसत्त्वः ततस्तु तं पश्यति निष्कलं ध्यायमानः' इति चैवमाद्या। स्मृतिरपि-

"यं विनिद्रा जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनं"। इति-

चैवमाद्या। ननु संराध्यसंराधकभावाभ्युपगमात् परापरात्मनोरन्यत्वं स्यादिति नेत्युच्यते॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्॥ २५॥

यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृतिषु कर्मसूपाधिभूतेषु सविशेषा इवावभासन्ते न च स्वाभाविकीमविशेषात्मतां जहति, एवमुपाधिनिमित्त एवायमात्मभेदः स्वतस्त्वैकात्म्यमेव, तथा हि वेदान्तेष्वभ्यासेनासकृज्जीवप्राज्ञयोरभेदः *प्रतिपाद्यते॥

जपनमस्कारादिरादिशब्दार्थः। स्वयम्भूरीश्वरः। खानीन्द्रियाणि। पराञ्चि नात्मग्राहकाणि कृत्वा व्यहनत् नाशितवान्। स हि तेषां नाशे यद-समर्थग्राहितया सर्जनं तस्मात् तेषां तथा स्रष्टत्वात् सर्वो लोकः परागर्थमेव पश्यति नान्तरात्मानं। कश्चित्तु धीरो धीमानावृत्तचक्षुर्निरुद्धेन्द्रियः शुद्धे चेतसि प्रत्यगात्मानं शास्त्रेण पश्यति मोक्षार्थीत्यर्थः। ततः कर्मणा विशुद्धचित्तो ज्ञानाख्यसत्त्वोत्कर्षेण ध्यायंस्तं निष्कलं पश्यतीत्यर्थः। विनिद्राः वितमस्काः, तत्र हेतुर्जितश्वासत्वं प्राणायामनिष्ठत्वं, युञ्जाना ध्यायिनः, योगलभ्यः आत्मा योगात्मा॥

यथा प्रकाशादयः उपाधिषु भिद्यन्ते न स्वतः एवं प्रकाशश्चिदात्मापि ध्यानादिकर्मण्युपाधौ भिद्यते स्वतस्तस्यावैशेष्यमेकरसत्वमेव तत्त्वमसीत्यभ्यासादिति सूत्रयोजना॥

---

* प्रतिपद्यत इति वर्ध० का०।

अतोऽनन्तेन तथा हि लिङ्गं ॥ २६ ॥

अतश्च स्वाभाविकत्वादभेदस्याविद्याकृतत्वाच्च भेदस्य विद्ययाऽविद्यां विधूय जीवः परेणानन्तेन प्राज्ञेनात्मनैकतां गच्छति। तथा हि लिङ्गं 'स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येति' इत्यादि ॥

उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ २७ ॥

तस्मिन्नेव संराध्यसंराधकभावे मतान्तरमुपन्यस्यति स्वमतविशुद्धये। क्वचिज्जीवप्राज्ञयोर्भेदो व्यपदिश्यते 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति ध्यातृध्यातव्यत्वेन द्रष्टृद्रष्टव्यत्वेन च 'परात्परं पुरुषमुपैति दिव्यं' इति गन्तृगन्तव्यत्वेन 'यः सर्वाणि भूतान्यन्तरो यमयति' इति नियन्तृनियन्तव्यत्वेन च। क्वचित् तु तयोरेवाभेदो व्यपदिश्यते, 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'एष त आत्मा सर्वान्तरः एष त आत्माऽन्तर्याम्यमृतः' इति। तत्रैवमुभयव्यपदेशे सति यद्यभेद एवैकान्तः परिगृह्येत भेदव्यपदेशो

जीवस्य ब्रह्मात्मत्वफलश्रुतिरूपलिङ्गादपि भेद औपाधिक एवेत्याह सूत्रकारः। अतोऽनन्तेनेति ॥

भेदाभेदपूर्वपक्षसूत्रद्वयस्य सङ्गतिमाह। तस्मिन्नेवेति। पश्वादित्वेनाभेदः, कुण्डलाख्यस्य सर्वावस्थाविशेषस्य कुण्डलत्वेन भेदः, तथा जीवस्य ब्रह्मत्वेनाभेदो जीवत्वेन भेदः, यद्वा सूर्यप्रकाशयोरेकतेजस्त्वधर्मावच्छेदेन भेदाभेदवज्जीवपरयोरपि एकेनैवात्मत्वधर्मेण भेदाभेदौ श्रुतिबलात् स्वीकार्यावविति सूत्रद्वयार्थः। कुण्डलत्वं वलयाकारत्वं स्वा-

निरालम्बन एव स्यात्, अत उभयव्यपदेशदर्शनादहिकुण्डलवदत्र तत्त्वं भवितुमर्हति यथाहिरित्यभेदः कुण्डलाभोगप्रांशुत्वादीनि च भेदः एवमिहापीति॥

प्रकाशाश्रयवद्वा तेजस्त्वात्॥ २८ ॥*

अथवा प्रकाशाश्रयवदेतत् प्रतिपत्तव्यं, यथा प्रकाशः सावित्रस्तदाश्रयश्च सविता नात्यन्तभिन्नावुभावपि तेजस्त्वाविशेषात् अथ च भेदव्यपदेशभाजौ भवतः एवमिहापीति॥*

पूर्ववद्वा॥ २९ ॥

यथा वा पूर्वमुपन्यस्तं प्रकाशादिवच्चावैशेष्यमिति तथैव तद्भवितुमर्हति। तथा ह्यविद्याकृतत्वाद्बन्धस्य विद्यया मोक्ष उपपद्यते यदि पुनः परमार्थत एव बद्धः कश्चिदात्माऽहिकुण्डलन्यायेन वा परस्यात्मनः संस्थानभूतः प्रकाशाश्रयन्यायेनैवैकदेशभूतोऽभ्युपगम्येत ततः पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येत। न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति अभेदमेव हि प्रतिपाद्यत्वेन निर्दिशति,

---

भोगत्वं चक्राकारत्वं, प्रांशुत्वं दीर्घदण्डाकारत्वं उद्धृतमुखत्वं आदिशब्दार्थः॥

सिद्धान्तसूत्रं। पूर्ववद्वेति। धर्मभेदेनैकधर्मिणा वा भेदाभेदस्वीकारे भेदस्य सत्यत्वादभेदवदस्यानिवृत्तिः स्यात्। एकत्रैव भेदाभेदस्वीकारे

---

* ॥ २८ ॥ सूत्रभाष्यस्य पूर्वपक्षसूत्रान्तर्भूतत्वेन सुगमत्वान्न टीका कृतेति प्रतीयते॥

भेदन्तु पूर्वप्रसिद्धमेवानुवदति अर्थान्तरविवक्षया। तस्मात् प्रकाशवच्चाविशेष्यमित्येष एव सिद्धान्तः॥

प्रतिषेधाच्च॥ ३०॥

इतश्चैष एव सिद्धान्तः यत्कारणं परस्मादात्मनोऽन्यत् चेतनं प्रतिषेधति शास्त्रं 'नान्योऽतोऽस्ति द्रष्टा' इत्येवमादि 'अथात आदेशो नेति नेति तदेतत् ब्रह्मापूर्वमनपरमनन्तरमबाह्यं' इति च। ब्रह्मव्यतिरिक्तप्रपञ्चनिराकरणात् ब्रह्ममात्रपरिशेषाच्चैष एव सिद्धान्त इति गम्यते॥

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः॥ ३१॥

यदेतन्निरस्तसमस्तप्रपञ्चं ब्रह्म निर्धारितं अस्मात् परमन्यत् तत्त्वमस्ति नास्ति इति श्रुतिविप्रतिपत्तेः संशयः, कानिचिद्वाक्यान्यापातेनैव प्रतिभासमानानि ब्रह्मणोऽपि परमन्यत् तत्त्वं प्रतिपादयन्तीव तेषां परिहारमभिधातुमयमुपक्रमः क्रियते, परमतो ब्रह्मणोऽन्यत् तत्त्वं भवितुमर्हति। कुतः, सेतुव्यपदेशात्, उन्मानव्यपदेशात्, सम्बन्धव्यपदेशात्, भेदव्यपदेशाच्च। सेतुव्यपदेशस्तावत् 'अथ य आत्मा स सेतुर्वि-

---

लोके विरोधकथोच्छेद इत्यपि द्रष्टव्यं, तस्मात् निष्प्रपञ्चं चिदेकरसं ब्रह्म तत्पदलक्ष्यमस्ति इति सिद्धं॥

यदुक्तं नेति नेत्यादिश्रुतिभिः ब्रह्मातिरिक्तं वस्तु निषिध्यत इति तदयुक्तं। सेत्वादिश्रुतिभिर्वस्त्वन्तरास्तित्वं भानादित्याक्षिपति। परमत इति। यद्यपि द्युभ्वाद्यधिकरणे सेतुशब्दो विधारकत्वेन गौणो व्याख्यातः तथाप्युन्मानादिश्रुतीनां गतिमजानतोऽयं पूर्वपक्षः, तत्रा-

धृतिः' इत्यात्मशब्दाभिहितस्य ब्रह्मणः सेतुत्वं सङ्कीर्तयति। सेतुशब्दस्य हि लोके जलसन्तानविच्छेदकारके मृद्दार्वादिप्रचय-प्रसिद्धः, इह च सेतुशब्दः आत्मनि प्रयुक्त इति लौकिकसे-तोरिवात्मसेतोरन्यस्य वस्तुनोऽस्तित्वं गमयति 'सेतुं तीर्त्वा' इति च तरतिशब्दप्रयोगात्, यथा लौकिकं सेतुं तीर्त्वा जाङ्गलम-सेतुं प्राप्नोति इति गम्यते, एवमात्मानं सेतुं तीर्त्वा अनात्मान-मसेतुं प्राप्नोति इति गम्यते। उन्मानव्यपदेशश्च भवति 'तदेतत् ब्रह्म चतुष्पादष्टाशफं षोडशकलं' इति। यच्च लोके उन्मित-मेतावदिदमिति परिच्छिन्नं कार्षापणादि ततोऽन्यदस्त्वस्ति इति प्रसिद्धं तथा ब्रह्मणोऽप्युन्मानात् ततोऽन्येन वस्तुना भवितव्य-मिति गम्यते। तथा सम्बन्धव्यपदेशो भवति 'सता सोम्य तदा-सम्पन्नो भवति' इति 'शारीर आत्मा प्राज्ञेनात्मना सम्परिष्व-क्तः' इति च, अमितानां च मितेन सम्बन्धो दृष्टः यथा नराणां नगरेण। जीवानां च ब्रह्मणा सम्बन्धं व्यपदिशति सुषुप्तौ। अत-स्ततः परमन्यदमितमस्ति इति गम्यते। भेदव्यपदेशश्चैनमर्थं

न्मानादिश्रुतीनां मुख्यत्वात् सद्वयं ब्रह्मेति फलं सिद्धान्ते तूक्ताद्वितीय तत्पदलक्ष्यसिद्धिरिति विवेकः। ब्रह्म सद्वयं सेतुत्वात् लौकिकसेतुवत् तीर्यत्वश्रुतेश्चेत्याह। सेतुं तीर्त्वेति। जाङ्गलं वातभूयिष्ठमिति वैद्योक्तिः वातप्रचुरो देशो जाङ्गलं, इह तु देशमात्रं ग्राह्यं। दिशश्चतस्रः कलाः प्रकाशवान्नाम पादः, पृथिव्यन्तरीक्षं द्यौः समुद्र इत्यनन्तवान्नाम पादः, अग्निः सूर्यश्चन्द्रो विद्युदिति ज्योतिष्मान्नाम पादः, चक्षुः श्रोत्रं वाङ्मन इत्यायतनवान्नाम पाद इति चतुष्पाद्ब्रह्म, पादानामर्द्धानि अष्टौ शफा अस्येत्यष्टाशफं, पादेषु चतुर्षु प्रत्येकं चतस्रः कला इति षोडशकलमि-त्यर्थः। षोडशपलपरिमितं ताम्रं कार्षापणसंज्ञं भवति तद्वत् सद्वयं

गमयति, तथाहि 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इत्यादित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारमीश्वरं व्यपदिशति 'अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते' इति। अतिदेशं चास्यामुना रूपादिषु करोति 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' इति। सावधिकत्वञ्चेश्वरत्वमुभयोर्व्यपदिशति 'ये चामुष्मात् पराञ्चो लोकास्तेषां चेष्टे देवकामनाञ्चेत्येकस्य ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामनां चेत्येकस्य यथेदं मागधस्य राज्यमिदं वैदेहस्येति। एवमेतेभ्यः सेत्वादिव्यपदेशेभ्यो ब्रह्मणः परमस्ति इत्येवं प्राप्ते प्रतिपद्यते॥

सामान्यात् तु॥ ३२।

तुशब्देन प्रदर्शितां प्राप्तिं निरुणद्धि। न ब्रह्मणोऽन्यत् किञ्चिद्भवितुमर्हति प्रमाणाभावात्, न ह्यन्यस्यास्तित्वे किञ्चित् प्रमाणमुपलभामहे, सर्वस्य हि जनिमतो वस्तुजातस्य जन्मादि ब्रह्मणो भवति इति निर्धारितं, अनन्यत्वं च कारणात्

ब्रह्म परिमितत्वादित्यर्थः। सम्बन्धित्वाच्च नगरवदित्याह। तथा सम्बन्धेति। अन्यदमितमिति असङ्ख्यातमित्यर्थः। अन्यस्पर्शे अल्पत्वेन मितत्वनियमादिति मन्तव्यं, भेदेनोक्तत्वाच्च घटवदित्याह। भेदव्यपदेशस्येति। अस्याक्षिस्थस्यामुनादित्यस्थेन सहेति यावत्। आधारतोऽतिदेशतश्च भेदमुक्त्वाऽवधितोऽपि तमाह। सावधिकत्वेति।

सिद्धान्तसूत्रं व्याचष्टे। तुशब्देनेत्यादिना। यदन्यत् तत् किं साधनादिवान् असाधनादिवान् वा, नाद्यः मानाभावात्, कार्यस्य ब्रह्मानन्यत्वनिर्णयाच्चेत्युक्त्वा न द्वितीयः प्रागुत्पत्तेरद्वयत्वावधारणादित्याह।

कार्यस्य। न च ब्रह्मव्यतिरिक्तं किञ्चिदजं सम्भवति 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' इत्यवधारणात्, एकविज्ञानेन च सर्वविज्ञानप्रतिज्ञानात् न च ब्रह्मव्यतिरिक्तं वस्त्वस्तित्वमवकल्पते। ननु सेत्वादिव्यपदेशाः ब्रह्मव्यतिरिक्तं तत्त्वं सूचयन्ति इत्युक्तं नेत्युच्यते। सेतुव्यपदेशस्तावत् न ब्रह्मणो बाह्यस्य सद्भावं प्रतिपादयितुं क्षमते, 'सेतुरात्मेति ह्याह न पुनस्ततः परमस्ति' इति। तत्र परस्मिन्नसति सेतुत्वं नावकल्पत इति परं किमपि कल्प्येत, न चैतन्न्याय्यं दृष्टो ह्यप्रसिद्धकल्पना। अपि च सेतुव्यपदेशादात्मनो लौकिकसेतुनिदर्शनेन *सेतुवाह्यवस्तुतां प्रसञ्जयता मृद्दारुमयतापि प्रासज्यत न चैतन्न्याय्यं अजत्वादिश्रुतिविरोधात्। सेतुसामान्यात् तु सेतुशब्द आत्मनि प्रयुक्त इति श्लिष्यते, जगतस्तन्मर्यादानाञ्च विधारकत्वं सेतुसामान्यमात्मनः, अतः सेतुरिव सेतुरिति प्रकृत आत्मा स्तूयते। सेतुं तीर्त्वेत्यपि तरतेरतिक्रमासम्भवात् प्राप्त्यर्थ एव वर्तते, यथा व्याकरणं तीर्ण इति प्राप्त इत्युच्यते नातिक्रान्तस्तद्वत् ॥

न च ब्रह्मव्यतिरिक्तमिति। उक्तानुमानानामागमबाध इति भावः। उक्तं स्मारयित्वा हेतूनामसिद्धिमाह। ननु सेत्वित्यादिना। किं सेतुश्रुत्या परसिद्धिरर्थाद्वा, नाद्य इत्युक्त्वा द्वितीयं शङ्कते। तत्र परस्मिन्निति। सेतुत्वलिङ्गेनाद्वितीयत्वश्रुतिबाधनमन्याय्यमित्याह। न चेति। लिङ्गञ्चासिद्धमित्याह। अपि चेति। विधारकत्वन्तु कल्पितद्वितीयापेक्षयापि युज्यत इति भावः। तीर्णत्वं हेतुरप्यसिद्ध इत्याह। सेतुं तीर्त्वेति ॥

* सवाह्यवस्तुतामिति वर्ध० का०।

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

यदप्युक्तमुन्मानव्यपदेशादस्ति परमिति तत्राभिधीयते। उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वप्रतिपत्त्यर्थः, किमर्थस्तर्हि बुद्ध्यर्थः उपासनार्थ इति यावत्। चतुष्पादष्टाशफं *षोड़शकलमित्येवंरूपा बुद्धिः कथं नु नाम ब्रह्मणि स्थिरा स्यादिति विकारद्वारेण ब्रह्मण उन्मानकल्पनैव क्रियते न ह्यविकारेऽनन्ते ब्रह्मणि सर्वैः पुंभिः शक्या बुद्धिः स्थापयितुं, मन्दमध्योत्तमबुद्धित्वात् पुंसामिति पादवत्। यथा मनआकाशयोरध्यात्ममधिदैवतञ्च ब्रह्मप्रतीकयोराम्नातयोश्चत्वारो वागादयो मनःसम्बन्धिनः पादाः कल्प्यन्ते, चत्वारश्चाग्न्यादय आकाशसम्बन्धिनः आध्यानाय तद्वत्। अथवा पादवदिति, यथा कार्षापणे पादविभागो व्यवहारप्राचुर्याय कल्प्यते, न हि सकलेनैव कार्षापणेन सर्वदा सर्वे जना व्यवहर्तुमीशते क्रयविक्रयपरिमाणानियमात् तद्वदित्यर्थः॥

परिमितत्वमप्यसिद्धमित्याह। बुद्ध्यर्थ इति। वाक्प्राणचक्षुःश्रोत्राणि मनसः पादाः अग्निवाय्वादित्यदिश आकाशस्य पादाः ध्यानार्थं कल्पिताः तद्वत् ब्रह्मण उन्मानमित्यर्थः। लौकिकं दृष्टान्तमाह। अथ वेति। पादकल्पनां विनापि व्यवहारः किं न स्यादित्यत आह। नहीति। कार्षापणस्य व्यवहाराय पादकल्पनावत् मन्दधियां ध्यानव्यवहाराय ब्रह्मण उन्मानकल्पनेत्यर्थः॥

* षोडशपलमिति वर्ध० का०।

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

इह सूत्रे द्वयोरपि व्यपदेशयोः परिहारोऽभिधीयते। यदप्युक्तं सम्बन्धव्यपदेशाद्भेदव्यपदेशाच्च परमतः स्यादिति। तदप्यसत्। यत एकस्याऽपि स्थानविशेषापेक्षया एतौ व्यपदेशावुपपद्येते। सम्बन्धव्यपदेशे तावदयमर्थः बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्य विशेषविज्ञानस्योपाध्युपशमे य उपशमः स परमात्मना सम्बन्ध इत्युपाध्यपेक्षयोपचर्यते न परिमितत्वापेक्षया। तथा भेदव्यपदेशोऽपि ब्रह्मण उपाधिभेदापेक्षयैवोपचर्यते न स्वरूपभेदापेक्षया प्रकाशादिवदित्युपमोपादानं। यथैकस्य प्रकाशस्य सौर्यस्य चान्द्रमसस्य वोपाधियोगादुपजातविशेषस्योपाध्युपशमात् सम्बन्धव्यपदेशो भवति उपाधिभेदाच्च भेदव्यपदेशः। यथा वा *सूच्याकाशाकाशादिषूपाध्यपेक्षयैवैतौ भेदव्यपदेशौ भवतस्तद्वत्॥

उपपत्तेश्च ॥ ३५ ॥

उपपद्यते चात्रेदृश एव सम्बन्धो नान्यादृशः। यथा 'स्वमपीतो भवति' इति हि स्वरूपसम्बन्धमेनमामनन्ति। स्वरूपस्य

सम्बन्धभेदौ कल्पितौ न सत्यद्वितीयसाधकौ इत्याह। स्थानेति। स्थानमुपाधिबुद्ध्यादिः एकस्यैवोपाधिना भिन्नस्योपाधिशान्तौ सत्या सम्बन्ध उपचर्यते। यथा सौरालोकादेरङ्गुल्याद्युपाधिना भिन्नस्योपाधिवियोगे महालोकाद्यात्मना सम्बन्धोपचारस्तद्वत् तथा जीव्यचक्षुषोः स्थानयोर्भेदाद्धिरण्मयपुरुषभेदकल्पनेत्यर्थः॥

मुख्यावेव सम्बन्धभेदौ किं न स्यातामित्यत्र सूत्रं। उपपत्तेश्चेति॥

---

* सूची पाशाकाशेति वर्ध का०।

चानपायित्वात् न नरनगरन्यायेन सम्बन्धो घटते, उपाधिकृतस्वरूपतिरोभावात् तु 'स्वमपीतो भवति' इत्युपपद्यते। तथा भेदोऽपि नान्यादृशः सम्भवति, बहुतरश्रुतिप्रसिद्धैकेश्वरत्वविरोधात्। तथा च श्रुतिः एकस्याप्याकाशस्य स्थानकृतं भेदव्यपदेशमुपपादयति 'योऽयं बहिर्द्धा पुरुषादाकाशो योऽयमन्तःपुरुष आकाशो योऽयमन्तर्हृदय आकाशः' इति च॥

तथान्यप्रतिषेधात्॥ ३६॥

एवं सेत्वादिव्यपदेशान् परपक्षहेतूनुन्मथ्य सम्प्रति स्वपक्षं हेत्वन्तरेणोपसंहरति। तथा अन्यप्रतिषेधात् अपि न ब्रह्मणः परं वस्त्वन्तरमस्ति इति गम्यते। तथा हि 'स एवाधस्तादहमेवाधस्तादात्मैवाधस्तात् सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद ब्रह्मेदं सर्वमात्मैवेदं सर्वं नेह नानास्ति किञ्चन यस्मात् परं नापरमस्ति किञ्चित् तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' इत्येवमादिवाक्यानि स्वप्रकरणस्थान्यन्यार्थत्वेन परिणेतुमशक्यानि ब्रह्मव्यतिरिक्तं वस्त्वन्तरं वारयन्ति। सर्वान्तरश्रुतेश्च न परमात्मनोऽन्तरोऽन्य आत्मास्तीत्यवगम्यते।

स्वरूपेण ब्रह्मणा जीवस्य सम्बन्धो भेदनिवृत्तिरूपो युज्यते न मुख्यः संयोगादिः वस्तुद्वयासत्त्वात्, तथा भेदोऽपि न स्वत एकत्वश्रुतेरित[illegible]

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

अनेन सेत्वादिव्यपदेशनिराकरणेन अन्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति, अन्यथा हि तन्न सिध्येत्। सेत्वादिव्यपदेशेषु हि मुख्येष्वङ्गीक्रियमाणेषु परिच्छेद आत्मनः प्रसज्येत, सेत्वादीनामेवमात्मकत्वात्। तथान्यप्रतिषेधेऽप्यसति वस्तु वस्त्वन्तराद्व्यावर्तत इति परिच्छेद एवात्मनः प्रसज्येत। सर्वगतत्वञ्चास्यायामशब्दादिभ्योऽवगम्यते। आयामशब्दो व्याप्तिवचनः शब्दः 'यावान् वायमाकाशस्तावानेषोऽन्तर्हृदय आकाशः, 'आकाशवत् सर्वगतश्च नित्यः' ज्यायान् दिवो ज्यायानाकाशात्, नित्यः सर्वगतः स्थाणुरचलोऽयम्' इत्येवमादयो हि श्रुतिस्मृतिन्यायाः सर्वगतत्वमात्मनोऽवबोधयन्ति ॥

फलमत उपपत्तेः ॥ ३८ ॥

तस्यैव हि ब्रह्मणो व्यावहारिक्यामीशित्रीशितव्यविभागावस्थायामयमन्यः स्वभावो वर्ण्यते, यदेतदिष्टानिष्टव्यामिश्रलक्षणं कर्मफलं संसारगोचरं त्रिविधं प्रसिद्धं जन्तूनां, किमेतत् कर्मणो

ननु द्वितीयाभावे सर्वगतत्वश्रुतिविरोध इत्यत आह। अनेन सर्वगतत्वमिति। द्वितीयं सत्यञ्चेत् सेत्वादिवत् ब्रह्मणोऽल्पता स्यात् यत्रान्यत्पश्यति तदल्पमिति श्रुतेः। किञ्च निरवयवासङ्गब्रह्मणः सत्यप्रपञ्चसम्बन्धयोगात् तवैव सर्वगतत्वश्रुतिविरोध इति भावः। अधिष्ठानेनाध्यस्तं जगद्व्याप्तमध्यस्तत्वात् रज्ज्वा व्याप्तसर्ववदिति न्यायः॥

एवं तत्पदलक्ष्यं संशोध्य वाच्यार्थमाह। फलमत उपपत्तेः। निर्विशेषत्वादन्यः स्वभावः फलहेतुत्वाख्यः। इष्टं सुखं देवादीनां, अनिष्टं

भवति आहोस्विदीश्वरादिति भवति विचारणा। तत्र तावत् प्रतिपद्यते। फलमतः ईश्वराद्भवितुमर्हति। कुतः उपपत्तेः। स हि सर्वाध्यक्षः सृष्टिस्थितिसंहारान् विचित्रान् विदधद्देशकालविशेषाभिज्ञत्वात् कर्मिणां कर्मानुरूपं फलं सम्पादयतीत्युपपद्यते कर्मणस्त्वनुक्षणविनाशिनः कालान्तरभावि फलं भवतीत्यनुपपन्नं, अभावात् भावानुत्पत्तेः। स्यादेतत् कर्म विनश्यत् स्वकाल एव स्वानुरूपं फलं जनयित्वा विनश्यति, तत्फलं कालान्तरितं कर्ता भोक्ष्यत इति। तदपि न परिशुध्यति, प्राक् भोक्तृसम्बन्धात् फलत्वानुपपत्तेः। यत्कालं हि यत्सुखं दुःखं वात्मना भुज्यते तस्यैव लोके फलत्वं प्रसिद्धं। न ह्यसम्बद्धस्यात्मना सुखस्य दुःखस्य वा फलत्वं प्रतियन्ति लौकिकाः

दुःखं नारकीणां, व्यामिश्रं मनुष्याणां, असारो जन्ममृतिप्रवाहः संसारः गोचरः आश्रयो यस्य तत्संसारगोचरं। अत्र कर्मेश्वरयोः फलहेतुत्वश्रुतेः संशयमाह। किमिति। अत्र पूर्वपक्षे फलदातुरीश्वरस्य तत्पदवाच्यस्यासिद्धेर्लक्ष्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलभेदः। पूर्वोक्तनिर्विशेषत्वमुपजीव्य फलदातृत्वमपीश्वरस्य नास्ति, इति पूर्वपक्षोत्थानात् सङ्गतिः। यद्यपि सर्वगतत्ववत् फलदातृत्वं व्यवहारदशायां सिध्यति तथापि कर्मण एव फलदातृत्वमिति शङ्कानिरासेनोक्तलक्ष्यार्थनिर्वाहकवाक्यार्थनिर्णयार्थमस्याधिकरणस्यारम्भ इति मत्वा सिद्धान्तं तावदाह। तत्र तावदिति। स्वर्गादिकं विशिष्टदेशकालकर्माभिज्ञदातृकं कर्मफलत्वात् सेवाफलवत् इत्युपपत्तिः। यागादिक्रियाख्यं कर्म तावत् क्षणिकं तत् किं स्वनाशात् फलं जनयति उत फलं उत्पाद्य नश्यति आहोस्विदपूर्वात् फलसिद्धिः, नाद्य इत्याह। अभावादिति। द्वितीयं शङ्कते। स्यादिति। कर्मनाशक्षणमारभ्यानभिव्यक्तस्वर्गसुखादिसत्त्वे मानं नास्ति इति दूषयति। तदपीत्यादिना। तृतीयं

अथोच्येत कर्मकार्यादपूर्वात् फलमुत्पद्यत इति, तदपि नोपपद्यते, अपूर्वस्याचेतनस्य काष्ठलोष्टसमस्य चेतनेनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः। तदस्तित्वे एव प्रमाणाभावात्। अर्थापत्तिः प्रमाणमिति चेत्, न, ईश्वरसिद्धेरर्थापत्तिक्षयात्॥

श्रुतत्वाच्च॥ ३९॥

न केवलमुपपत्तेरेवेश्वरं फलहेतुं कल्पयामः किं तर्हि श्रुतत्वादपीश्वरमेव फलहेतुं मन्यामहे। तथा हि श्रुतिर्भवति 'स वा एष महानज आत्मान्नादो वसुदानः' इत्येवंजातीयका॥

धर्मं जैमिनिरत एव॥ ४०॥

जैमिनिस्त्वाचार्यो धर्मं फलस्य दातारं मन्यते। अत एव हेतोः श्रुतेरुपपत्तेश्च श्रूयते तावदयमर्थः 'स्वर्गकामो यजेत'

शङ्कते। अथेति। अपूर्वं किं स्वतन्त्रमेव फलदानाय प्रवर्तते चेतनाधिष्ठितं वा, नाद्य इत्याह। तदपीति। द्वितीये त्वदृष्टानभिज्ञजीवस्याधिष्ठातृत्वायोगात् ईश्वरस्याधिष्ठातृत्वसिद्धिरिति भावः। प्रौढवादेनापूर्वं नास्ति इत्याह। तदस्तित्व इति। क्षणिकयागादेः श्रुतस्वर्गादिहेतुत्वानुपपत्त्या स्थाय्यपूर्वसिद्धिरिति चेन्न, कर्मभिराराधितादीश्वरादेव स्थायिनः फलसिद्धेरित्यर्थः। केवलतर्केणापूर्वं न सिध्यतीति भावः॥

'ज्ञाता स्वप्नेऽनुशयवान्' इत्यत्रोदाहृताभिः 'य इह रमणीयचरणाः' इत्यादिश्रुतिस्मृतिभिरपूर्वसिद्धिश्चेत्ताभिरीश्वरस्यापि फलदातृत्वं स्वीकार्यमित्याह। श्रुतत्वाच्चेति सूत्रकारः। अन्नमासमन्तात् प्राणिभ्यो ददातीत्यन्नादः। वसुदानो अतो धनदाता, कर्मणोऽपूर्वस्य वा जडत्वेनोपकरणमात्रत्वात् स्वतन्त्र ईश्वर एव फलदातेति सिद्धान्तो दर्शितः॥

इदानीं पूर्वपक्षयति। धर्ममिति। विधिश्रुतिर्विध्यर्थः। तस्य लिङ-

इत्येवमादिषु वाक्येषु, तत्र च विधिश्रुतेर्विषयभावोपगमाद्यागः स्वर्गस्योत्पादक इति गम्यते, अन्यथा ह्यननुष्ठातृको याग आपद्येत तत्रास्योपदेशवैयर्थ्यं स्यात्। नन्वनुक्षणविनाशिनः कर्मणः फलं नोपपद्यत इति परित्यक्तोऽयं पक्षः, नैष दोषः। श्रुतिप्रामाण्यात्। श्रुतिश्चेत् प्रमाणं यथाऽयं कर्मफलसम्बन्धः श्रुत उपपद्यते तथा कल्पयितव्यः, न चानुत्पाद्य किमप्यपूर्वं कर्म विनश्यत् कालान्तरितं फलं दातुं शक्नोति, अतः कर्मणो वा सूक्ष्मा काचिदुत्तरावस्था फलस्य वा पूर्वावस्थाऽपूर्वं नामास्ति इति तर्क्यते उपपद्यते चायमर्थः उक्तेन प्रकारेण, ईश्वरस्तु फलं ददाति इत्यनुपपन्नं, अविचित्रस्य कारणस्य विचित्रकार्यानुपपत्तेर्वैषम्यनैर्घृण्यप्रसङ्गात् तदनुष्ठानवैयर्थ्यापत्तेश्च, तस्माद्धर्मादेव फलमिति॥

पूर्वं तु बादरायणो हेतुव्यपदेशात्॥४१॥

बादरायणस्त्वाचार्यः पूर्वोक्तमेवेश्वरं फलहेतुं मन्यते केव-

र्थस्य प्रेरणात्मनो यागो विषयस्तद्भावावगमाद्यागः स्वर्गसाधनमिति गम्यते। यागस्येष्टसाधनत्वाभावे प्रेरणानुपपत्तेरित्यर्थः। अपूर्वद्वारा कर्मणः फलमुपपद्यत इत्युक्त्वा सिद्धान्तं दूषयति। ईश्वरस्त्विति। ईश्वरः किं कर्मानपेक्षः फलं ददाति तत्सापेक्षो वा, आद्य आह। अविचित्रस्येत्यादिना। द्वितीये संवेष्टनसंस्कारमात्रात् कटादौ वेष्टनवत् कर्मापूर्वादेव फलसिद्धेः किमीश्वरेणेति भावः। अत्र वयं वदामः चन्दनकण्टकादिदृष्टसम्पत्त्यैव सुखादिसम्भवे कृतं धर्माधर्माभ्यामिति स्मृतिबलात् तदपेक्षायां ईश्वरेण किमपराद्धं। अतः ईश्वरानपेक्षात् केवलात् कर्मणः फलमित्ययुक्तमिति॥

सिद्धान्तयति। पूर्वन्त्विति। अचेतनस्य कर्मणः स्वतः स्वहृत्ययोगात्

त्वात् कर्मणोऽपूर्वाद्वा केवलात् फलमित्ययं पक्षस्तु शब्देन व्यावर्त्यते। कर्मापेक्षादपूर्वापेक्षाद्वा यथास्तु तथास्तु ईश्वरात्फलमिति सिद्धान्तः। कुतः, हेतुव्यपदेशात्। धर्माधर्मयोरपि हि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते। फलस्य च दातृत्वेन 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' इति। स्मर्यते चायमर्थो भगवद्गीतासु-

"यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हितान्"॥ इति।

सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते। तदेव चेश्वरस्य फलहेतुत्वं यत् स्वकर्मानुरूपाः प्रजाः सृजति, विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते।

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीशङ्करभगवत्पादकृतौ तृतीयाध्यायस्य द्वितीयः पादः॥ ० ॥

सवादिदृष्टान्तानुसारिश्रुतेर्बलीयस्त्वात् सर्ववेदान्तेष्वीश्वरस्य जगद्धेतुत्वश्रुतेश्चेश्वराधिष्ठितात् कर्मणो जगदन्तःपातिफलसिद्धिरिति समुदायार्थः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दभगवत्पादकृतौ शारीरकव्याख्यायां भाष्यरत्नप्रभायां तृतीयस्याध्यायस्य द्वितीयः पादः॥ * ॥

ॐ परमात्मने नमः।

सर्व्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्॥ १॥

व्याख्यातं विज्ञेयस्य ब्रह्मणस्तत्त्वमिदानीन्तु प्रतिवेदान्तं विज्ञानानि भिद्यन्ते न वेति विचार्य्यते। ननु विज्ञेयं ब्रह्म पूर्व्वापरादिभेदरहितं एकमेकरसं सैन्धवघनवदवधारितं, तत्र कुतो विज्ञानभेदाभेदचिन्तावतारः। न हि कर्म्मबहुत्ववत् ब्रह्मणो बहुत्वमपि वेदान्तेषु प्रतिपिपादयिषितमिति शक्यं वक्तुं, ब्रह्मण एकत्वात् एकरूपत्वाच्च। न चैकरूपे ब्रह्मण्यनेकरूपाणि

ॐ विघ्नविनाशाय नमः।

मार्त्तण्डं ध्वान्तनाशाय त्रिलोकस्वामिनं मुदे।
विघ्नेशं विघ्नविध्वस्त्यै प्रणमामि मुहुर्मुहुः॥

ब्रह्मस्वरूपं निर्धार्य तदज्ञानसाधनोपासनास्वरूपमाह। सर्व्ववेदान्तप्रत्ययं चोदनाद्यविशेषादिति। पादसङ्गतिमाह। व्याख्यातमिति। पूर्व्वपादे तत्त्वंपदार्थविवेकः कृतः इह तत्फलवाक्यार्थज्ञानमानन्दादयः प्रधानस्येति सूत्रेणापुनरुक्तोपेक्षितपदतद्वाक्यार्थोपसंहारेण निर्धार्य्यत इति फलफलिभावः सङ्गतिः। सगुणवाक्यार्थविद्याचिन्ता तु तद्विद्यानां चित्तैकाग्र्यद्वारा निर्गुणज्ञानसाधनत्वात् क्रियत इति मन्तव्यं सम्प्रति निर्गुणज्ञानं भेदाभेदविचारविषयत्वेनोक्तमिति मन्वान आक्षिपति। नन्विति। वेद्यभेदविद्याभेदचिन्ता स्यात् ब्रह्मणस्तु वेद्यस्यैक्यात् न चिन्तावसर इत्यर्थः। ब्रह्मैक्येऽपि धर्म्मभेदाच्चिन्ता इत्यत आह। एकरूपत्वाच्चेति। निर्धर्म्मत्वादित्यर्थः। एकरूपेऽपि ब्रह्मण्यनेकप्रकारस-

विज्ञानानि सम्भवन्ति, न ह्यन्यथार्थोऽन्यथाज्ञानमित्यभ्रान्तं भवति। यदि पुनरेकस्मिन् ब्रह्मणि बहूनि विज्ञानानि वेदान्तान्तरेषु प्रतिपिपादयिषितानि तेषामेकमभ्रान्तं भ्रान्तानीतराणीत्यनाश्वासप्रसङ्गो वेदान्तेषु, तस्मात् न तावत् प्रतिवेदान्तं ब्रह्मविज्ञानभेद आशङ्कितुं शक्यते, नाप्यस्य चोदनाद्यविशेषादभेद उच्यते, ब्रह्मविज्ञानस्याचोदनालक्षणत्वात्। अविधिप्रधानैर्हि वस्तुपर्यवसायिभिर्ब्रह्मवाक्यैर्ब्रह्मविज्ञानं जन्यत इत्यवोचदाचार्यः 'तत्तु समन्वयात्' [वे०अ०१।पा०१।सू०४] इत्यत्र। तत्कथमिमां भेदाभेदचिन्तामारभत इति, तदुच्यते। सगुणब्रह्मविषया प्राणादिविषया चेयं विज्ञान-

---

म्भवाभेदशङ्का इत्यत आह। न चेत्यादिना। पूर्वपक्षे ज्ञानभेदशङ्कानुपपत्तिमुक्त्वा चोदनाद्यभेदाज्ज्ञानाभेद इति सिद्धान्तोऽप्ययुक्त इत्याह। नाप्यस्येति। एवं पादारम्भमाक्षिप्य समाधत्ते। तदुच्यत इति। सगुणविद्यास्वेव भेदाभेदचिन्ता क्रियते निर्गुणविद्यायां त्वैक्यं सिद्धमिति वाच्यार्थरूपगुणोपसंहारमात्रं क्रियते वाक्यार्थनिर्णयायेति भावः। पञ्चाग्निप्राणा इह शाण्डिल्यवैश्वानरादिविद्या मिथोभिन्ना इति 'नानाशब्दादिभेदात्' इत्यत्र वक्ष्यते। अत्र तु मिथोभिन्नास्ताः किं प्रतिशाखं भिद्यन्ते न वेति नामादिभेदाचोदनाविशेषाच्च संशयः। पूर्वपक्षे विद्याभेदाद्गुणानुपसंहारः सिद्धान्ते त्वभेदादुपसंहार इति फलभेदः। पूर्वतन्त्रे शाखान्तराधिकरणपूर्वपक्षसूत्रं नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनात् शाखान्तरे कर्मभेदः स्यादिति। तत्रोक्ता हेतवो नामादयो विद्याभेदार्थमिहोच्यन्ते अथैष ज्योतिरथैष ज्योतिरेतेन सहस्रदक्षिणेन सर्वं यजेतेत्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणाख्यगुणविधिमाशङ्क्य ज्योतिरितिपदस्य कर्मान्तरनामत्वसम्भवे ज्योतिष्टोमलक्षकत्वायोगात् प्रकरणविच्छेदाच्च

भेदाभेदचिन्तेत्यदोषः। अत्र हि कर्मवदुपासनानां भेदाभेदौ सम्भवतः, कर्मवदेव चोपासनानि दृष्टफलान्यदृष्टफलानि चोच्यन्ते क्रममुक्तिफलानि च कानिचित् सम्यग्ज्ञानोत्पत्तिद्वारेण। तेष्वेषा चिन्ता सम्भवति किं प्रतिवेदान्तं विज्ञानभेद आहोस्वित् नेति। तत्र पूर्वपक्षहेतवस्तावदुपन्यस्यन्ते, नाम्नस्तावद्भेदप्रतिपत्तिहेतुत्वं प्रसिद्धं ज्योतिरादिषु, अस्ति चात्र वेदान्तान्तरविहितेषु विज्ञानेषु अन्यदन्यन्नाम तैत्तिरी-

---

ज्योतिष्टोमात् कर्मान्तरं विशिष्टदक्षिणाकं विधीयत इति नाम्नः कर्मभेदकत्वमुक्तं। ज्योतिरादिष्वित्यादिपदेनाध्वर्यवं हौत्रमिति संज्ञाभेदात् ज्योतिष्टोमात् कर्मभेदो ग्राह्यः। तप्तं क्षीरं दध्ना कठिनमामिक्षा, तत्र द्रवं जलरूपं वाजिनमिति भेदः, 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्र वैश्वदेवे आमिक्षायागे वाजिनाख्यगुणविधिः वाजिभ्य इति, वैश्वदेवानुवादादित्यत्र वैश्वदेवे, आमिक्षायागे वाजिनाख्यगुणविधिः वाजिभ्य इति, वैश्वेदेवानुवादादित्याशङ्क्यामिक्षां प्रत्युपसर्जनत्वेनोक्तविश्वेदेवानां वाजिभ्य इत्यनुवादायोगादुत्पत्तिशिष्टामिक्षावरुद्धे कर्मणि वाजिद्रव्यस्यानाकाङ्क्षितत्वस्य विध्ययोगाद्वाजिदेवताको वाजिनयागः कर्मान्तरमिति द्रव्यदेवतास्वरूपभेदात् कर्मभेदः सिद्धान्तितः। आदिपदात् 'ऐन्द्रं दध्यैन्द्रं पयः' इति द्रव्यभेदात् यागभेदो ग्राह्यः, एवमिहापि पञ्चाग्निषडग्निरूपभेदात् विद्याभेदो वाजिच्छन्दोगयोः तथा रेतोन्यूना वा ग्राह्याः छान्दोग्ये तत्पठिता वाजिनामिति प्राणविद्याभेदः, कारीरिवाक्याध्ययने तैत्तिरीयकाणां भूमौ भोजनं धर्मविशेषो नान्येषां, अग्न्यध्ययने केषाञ्चिदुपाध्यायार्थमुदकाहरणं धर्मो नान्येषां, अश्वमेधाध्ययनेऽश्वासानयनं केषाञ्चिदेव नान्येषां, न च तान्येव कारीर्यादीनि कर्माणि धर्मविशेषमपेक्षन्ते नापेक्षन्ते चेति युक्तं, अतो धर्मविशेषाच्छाखान्तरे कर्मभेदः शङ्कितस्तथात्रापि मुण्डकाध्ययने केषाञ्चिदेव शिरस्-

थकं वाजसनेयकं कौथुमकं कौषीतकं शाट्यायनकमित्येवमादि, तथा रूपभेदोऽपि कर्मभेदस्य प्रतिपादकः प्रसिद्धः 'वैश्वदेव्याऽऽमिक्षा वाजिभ्यो वाजिनम्' इत्येवमादिषु, अस्ति चात्र रूपभेदः, तद्यथा केचिच्छाखिनः पञ्चाग्निविद्यायां षष्ठमपरमग्निमामनन्ति, अपरे पुनः पञ्चैव पठन्ति, तथा प्राणसंवादादिषु केचिदूनान् वागादीनामनन्ति केचिदधिकान्, तथा धर्मविशेषोऽपि कर्मभेदस्य प्रतिपादक आशङ्कितः कार्या-

---

ङ्गारपात्रधारणरूपं व्रतं नान्येषामिति विद्याभेदः स्यात्, पुनरुक्तिरभ्यासः। 'समिधो यजति तनूनपातं यजति' इति यजत्यभ्यासात् प्रयाजानां भेद उक्तस्तथा शाखान्तरेऽभ्यासाद्विद्याभेदः, आदिपदान्निन्दादिग्रहः, 'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्' इत्यनुदितहोमस्य यदुदिते सूर्ये प्रातर्जुहुयात् 'यथातिथये प्रद्रुताय शून्यायावसथायाहार्यं हरन्ति तादृगेव तत्' इत्युदितहोमस्य च निन्दाश्रुतेर्भेदः, एकस्यैवोदितेऽनुदिते वानुष्ठानायोगात्, तयोदितानुदितहोमातिक्रमकृतप्रायश्चित्तादप्यग्निहोत्रभेदः शङ्कितः, एते निन्दाप्रायश्चित्ते वेदान्तविद्यासु न विद्येते इति नादाङ्क्रियेते, यथा सर्वशाखाविहितस्य कर्मणो ज्ञातुं कर्तुं वाऽशक्तेर्भेदस्तथा सर्ववेदान्ताध्ययनज्ञानाद्यशक्तेस्तद्वेदान्तविद्याभेदः स्यात्, तथा शाखानां सर्वासामेकरूपा समाप्तिर्नोच्यते किन्तु कस्याश्चित् क्वचित् कर्मणि समाप्तिरतः समाप्तिवचनभेदात् प्रतिशाखं कर्मभेदः शङ्कितः, तथा कस्यचिद्वेदान्तस्योङ्कारसार्वात्म्ये समाप्तिः कस्यचिदन्यत्रेति विद्याभेदः, अन्यार्थदर्शनमर्थवादस्तद्भेदात् कर्मभेदवद्विद्याभेद इति पूर्वपक्षसूत्रोक्ता हेतवो दर्शितास्ते केचित् सिद्धान्ते पूर्वपक्षे चात्रोपयुज्यन्त इति तथाशब्दान्तराभ्याससङ्ख्यागुणप्रक्रियानामधेयानि कर्मभेदकानि, तत्र नामधेयं गुणो रूपमभ्यासश्चेति त्रयं व्याख्यातं, यजेद्दद्यात् जुहुयादिति प्रकृतिशब्दभेदेन धात्वर्थभेदात् तदवच्छिन्नभावनाख्यकर्मभेद उक्तस्तथाऽत्र

दिषु, अस्ति चात्र धर्मविशेषः यथाऽऽथर्वणिकानां शिरोव्रतम् इति, एवं पुनरुक्तादयो भेदहेतवो यथासम्भवं वेदान्तान्तरेषु योजयितव्याः, तस्मात् प्रतिवेदान्तं विज्ञानभेद इति। एवं प्राप्ते ब्रूमः सर्ववेदान्तप्रत्ययानि विज्ञानानि तस्मिन् तस्मिन् वेदान्ते तानि तान्येव भवितुमर्हन्ति। कुतश्चोदनाद्यविशेषात्। आदिग्रहणेन शाखान्तराधिकरणसिद्धान्तसूत्रोदिता अभेदहेतव इहाक्षिप्यन्ते, संयोगरूपचोदनाख्याविशेषादित्यर्थः। यथैकस्मिन्नग्निहोत्रे शाखाभेदेऽपि पुरुषप्रयत्नः तादृश एव चोद्यते जुहुयादिति। एवं 'यो ह वै ज्येष्ठञ्च श्रेष्ठञ्च वेद' इति वाजसनेयिनां, छन्दोगानाञ्च तादृश्येव चोदना, प्रयोजनसंयोगोऽप्यविशिष्ट एव 'ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति' इति। रूपमप्युभयत्र

वेदोपास्त इत्यादिशब्दभेदात् विद्याभेदः, 'तिस्र आहुतीर्जुहोति' इति सङ्ख्यया कर्मभेदवद्वायुप्राणौ द्वौ संवर्गाविति द्वित्वसङ्ख्यया संवर्गविद्याभेदः स्यात्, नित्याग्निहोत्रप्रकरणात्, प्रकरणान्तरे कुण्डपायिनामयने 'मासमग्निहोत्रं जुह्वति' इति श्रुतमग्निहोत्रं प्रकरणान्तरस्थत्वात् कर्मान्तरमिति सिद्धान्तितं। तथा च वेदान्तभेदे प्रकरणभेदादुपास्तिभेद इति पूर्वपक्षः। सिद्धान्तयति। एवमिति। सर्ववेदान्तैः प्रतीयन्त इति सर्ववेदान्तप्रत्ययानि तैर्विहितानीत्यर्थः। उक्तनामादिभिरग्निहोत्रादिकर्मणां प्रतिशाखं भेदे प्राप्ते शाखान्तराधिकरणसिद्धान्तसूत्रं 'एकं वा संयोगरूपचोदनाख्याविशेषात्' इति। तत्र चोदनाविधायकः शब्दश्चोदितः प्रयत्नो वा, तस्याः अविशेषमाह। यथैकस्मिन्निति। एकधात्वर्थहोमावच्छिन्नप्रयत्नैक्यवदुपास्तिप्रयत्नैक्यमित्यर्थः। यथा ज्येष्ठत्वादिगुणकप्राणविद्या सर्वशाखास्वेका तथा पञ्चाग्निविद्याप्येका फलसंयोगाद्यविशेषात्, तथान्यापि विद्या भिन्नेत्याह। एवं पञ्चामीति। पूर्व-

तदेव विज्ञानस्य यदुत ज्येष्ठश्रेष्ठादिगुणविशेषणान्वितं प्राणतत्त्वं, यथा च द्रव्यदेवते यागस्य रूपं एवं विज्ञेयं रूपं विज्ञानस्य तेन हि तद्रूप्यते समाख्यापि सैव प्राणविद्येति, तस्मात् सर्ववेदान्तप्रत्ययत्वं विज्ञानानां। एवं पञ्चाग्निविद्यावैश्वानरविद्याशाण्डिल्यविद्येत्येवमादिषु योजयितव्यं। ये तु नामरूपादयो भेदहेत्वाभासास्ते प्रथम एव काण्डे 'न नाम्ना स्यादचोदनाभिधानत्वात्' इत्यारभ्य परिहृताः, इहापि कश्चिद्विशेषमाशङ्क्य परिहरति॥

भेदान्नेति चेन्नैकस्यामपि॥ २॥

स्यादेतत् सर्ववेदान्तप्रत्ययत्वं विज्ञानानां गुणभेदान्नोपपद्यते। तथा हि वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमपर-

---

पञ्चहेतून्निराचष्टे। ये त्विति। काठकमित्यादिनाम्ना कर्मभेदो न युक्तः, कुतः अचोदनाभिधानत्वात् काठकादिशब्दानां ग्रन्थनामतया कर्मवाचित्वाभावादतो भिन्ननामकशाखाग्रन्थभेदेऽपि तद्विहितं कर्मैकमेव, अल्परूपभेदोऽपि न कर्मैक्यविरोधी, धर्मविशेषस्त्वध्ययनाङ्गं न कर्माङ्गमतो न कर्म भेदकं शाखाभेदे पुनरुक्तिरसिद्धा, निन्दान्यार्थदर्शनयोरपि न भेदकत्वं तत्तद्विधिस्तुतिमात्रत्वात् बहुशाखाध्ययनाशक्तावपि स्वशाखानुक्तविशेषस्यापेक्षितस्यान्यतो ग्रहसम्भवादशक्तिरभेदिका एकस्मिन्नपि कर्मण्यङ्गत्वोत्पादिना प्रायश्चित्तं सम्भवति एवं समाप्तिवचनभेदोऽप्यप्रयोजक इत्येवं कर्माभेदप्रमाणप्राबल्ये भेदहेतवः परिहृता इत्यर्थः। तर्हि शाखान्तरन्यायेनैव कर्मैक्यवद्विद्यैक्यसिद्धेः पुनरुक्तिरित्यत आह। इहापीति॥

रूपस्योत्पत्तिशिष्टत्वं विशेषः पञ्चाग्नीन् वेदेत्याद्युपासनोत्पत्तिविधिस्थपञ्चाग्न्यादिरूपभेदादुपासनाभेदः स्यादामिक्षावाजिनरूपभे-

मग्निमामनन्ति 'तस्याग्निरेवाग्निर्भवति' इत्यादिना। छन्दोगास्तु तं नामनन्ति पञ्चसङ्ख्ययैव च उपसंहरन्ति 'अथ ह य एतानेवं पञ्चाग्नीन् वेद' इति। येषाञ्च सगुणोऽस्ति येषाञ्च नास्ति तेषां कथमुभयेषामेका विद्योपपद्येत, न चात्र गुणोपसंहारः शक्यते प्रत्येतुं पञ्चसङ्ख्याविरोधात्। तथा प्राणसंवादे श्रेष्ठादन्यांश्चतुरः प्राणान् वाक्चक्षुःश्रोत्रमनांसि छन्दोगा आमनन्ति। वाजसनेयिनस्तु पञ्चममप्यामनन्ति 'रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेद' इति। आवापोद्वापभेदाच्च वेद्यभेदो भवति वेद्यभेदाच्च विद्याभेदो द्रव्यदेवताभेदादिव यागस्येति चेत्, नैष दोषः, यत एकस्यामपि विद्यायामेवंजातीयको गुणभेद उपपद्यते। यद्यपि षष्ठस्याग्नेरुपसंहारो न सम्भवति तथापि द्युप्रभृतीनां पञ्चानामग्नीनां उभयत्र प्रत्यभिज्ञायमानत्वात् न विद्याभेदो भवितुमर्हति, न हि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यते। पठ्यतेऽपि च षष्ठोऽग्निश्छन्दोगैः 'तं प्रेतं दिष्टमितोऽ-

---

दात् कर्मभेदवदित्यधिकाशङ्कानिरासार्थत्वात् न पौनरुक्त्यमस्याधिकरणस्येति मत्वाशङ्कां व्याचष्टे। स्यादित्यादिना। अस्य पृथक्शास्त्रत्वात् कर्मन्यायानां मानसविद्यासु विना सूत्रं दुर्योगत्वाच्च पुनरुक्तिगन्धोऽपि नास्तीति मन्तव्यं। ननु तस्य मृतस्य दाहार्थमग्निरन्त्येष्टिगतः षष्ठो यः प्रसिद्धवद्वाजिभिरुक्तः स छान्दोग्ये उपसंहार्य इति न रूपभेदस्तत्राह। न चात्रेति। अस्तु प्रजननगुणवतो रेतसो वाजिनामावापश्छन्दोगानाञ्च तस्योद्वापस्ततः किमित्यत आह। आवापेति। छान्दोग्ये षष्ठाग्न्यभावमङ्गीकृत्याल्परूपभेदो न विद्यैक्यविरोधीति परिहरति। नैष इत्यादिना। अङ्गीकारं त्यजति। पठ्यतेऽपीति। इतोऽस्माल्लोकाद्दिष्टं लोकान्तरं प्रेतं गतं ध्वातयोऽग्नये हरन्तीत्यर्थः। ननु छा-

मय एव हरन्ति' इति । वाजसनेयिनस्तु साम्यादिकेषु पञ्च-स्वग्निष्वनुवृत्तायाः समिद्धूमादिकल्पनाया निवृत्तये 'तस्याग्नि-रेवाग्निर्भवति समित् समित्' इत्यादि समामनन्ति स नित्यानु-वादः। अथाप्युपासनार्थ एष वादस्तथापि स गुणः शक्यते छन्दो-गैरप्युपसंहर्तुं । न चात्र पञ्चसङ्ख्याविरोध आशङ्क्यः,साम्यादिका-न्यभिप्राया ह्येषा पञ्चसङ्ख्या नित्यानुवादभूता न विधिसमवा-यिनीत्यदोषः । एवं प्राणसंवादादिष्वप्यधिकस्य गुणस्येतरत्रोप-संहारो न विरुध्यते। न चावापोद्वापभेदाद्वेद्यभेदो विद्याभे-दश्चाशङ्क्यः कस्यचिद्वेद्यांशस्यावापोद्वापयोरपि भूयसो वेद्यवे-दिचोरभेदावगमात्, तस्मादैकविद्यमेव ॥

स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

यदप्युक्तमाथर्वणिकानां विद्यां प्रति शिरोव्रताद्यपेक्षणाद-

न्दोग्येऽग्निमात्रं श्रुतं वाजिभिस्तु समिदादिविशेषः पठ्यते इति रूप-भेदस्तदवस्थस्तत्राह । वाजसनेयिनस्त्विति । षष्ठाग्नेस्तद्विरोधस्य चानु-वादमात्रत्वेनानुपास्यत्वात् पञ्चाग्नय एवोपास्याः उभयत्रेति न रूप-भेद इत्यर्थः। सविशेषस्य षष्ठाग्नेरुपास्यत्वेन रूपभेद इत्याह । अथा-पीति । द्युलोकादीनां पञ्चानामग्नीनां अग्नित्वसम्पत्तिविधिनैवार्थात् षष्ठत्वं सम्पत्तिकल्पितानीनां सिद्धमनूद्यते न ध्येयत्वेन विधीयत इत्यर्थः। छन्दोगैर्वाजिशाखास्थं देत उपसंहर्तव्यमित्युक्ताऽनुपसंहारे-ऽपि न विद्याभेद इत्याह। न चावापेति ॥

एवं रूपभेदो न विद्याभेदक इत्युक्ता धर्मविशेषोऽपि न भेदक

न्येषां च तदनपेक्षणाद्विद्याभेद इति, तत्प्रत्युच्यते। स्वाध्यायस्यैष धर्मो न विद्यायाः, कथमिदमवगम्यते यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशपरे ग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन समाख्यातमिति समामनन्ति। नैतदचीर्णव्रतोऽधीते इति चाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एवैष इति निर्धार्यते। ननु च 'तेषामेवैतां ब्रह्मविद्यां वदेच्छिरोव्रतं विधिवद्यैस्तु चीर्णम्' इति ब्रह्मविद्यासंयोगश्रवणादेकैव सर्वत्र ब्रह्मविद्येति सङ्कीर्त्यतैष धर्मः, न, तत्राप्येतामिति प्रकृतपरामर्शात् प्रकृतत्वञ्च ब्रह्मविद्याया ग्रन्थविशेषापेक्षमिति ग्रन्थविशेषसंयोग्येवैष धर्मः। सर्ववच्च तन्नियम इति निदर्शननिर्देशः। यथा च सवाः होमाः सप्त सौर्यादयः शतौदनपर्यन्ता वेदान्तरोदितत्रेताग्न्यनभिसम्बन्धादाथर्वणोदितैकाग्न्यभिसम्बन्धाच्चाथर्वणिकानामेव नियम्यन्ते तथायमपि धर्मः स्वाध्यायविशेषसम्बन्धात् तत्रैव नियम्येत, तस्मादप्यनवद्यं विद्यैकत्वं॥

इत्याह। स्वाध्यायस्येति। गोदानवदध्ययनाङ्गत्वेन शिरोव्रतमाथर्वणिकानां सूत्रे विहितं न विद्याङ्गमित्यर्थः। अधिकाराच्चेति व्याचष्टे। नैतदिति। एतत्प्रकृतं मुण्डकमनर्नुष्ठितशिरोव्रतो नरो नाधीत इति श्रुतेर्मुण्डकाध्ययनाङ्गमेव शिरोव्रतमित्यर्थः। ननु विद्याङ्गत्वेनापि इदं व्रतं श्रुतमिति शङ्कते। नन्विति। सर्वशाखासु ब्रह्मविद्यैकैव चेद्विद्यासंयुक्तं व्रतमपि सर्वत्र सम्बध्येत। न च सम्बध्यत इति विद्याभेद इत्यर्थः। प्रकृतग्रन्थवाच्येतच्छब्दबलाद्ब्रह्मप्रकाशकग्रन्थपरो ब्रह्मविद्याशब्द इति परिहरति। नेति। तस्य शिरोव्रतस्य मुण्डकाध्ययने नियम इत्यत्र सववदिति दर्शननिर्देशः। सवाः होमाः आथर्वणैः स्वसूत्रे उदित एकोऽग्निरेकर्षिसंज्ञया प्रसिद्धस्तस्मिन्नमी कार्या इति यथा नियम्यन्ते तथेत्यर्थः॥

दर्शयति च ॥ ४ ॥

दर्शयति च वेदोऽपि विद्यैकत्वं, सर्ववेदान्तेषु वेद्यैकत्वोपदेशात् 'सर्वे वेदा यत्पदमामनन्ति' इति, तथैतमेव बह्वृचा महत्युक्थे मीमांसन्त 'एतमग्नावध्वर्यव एतं महाव्रते छन्दोगाः' इति। तथा महद्भयं वज्रमुद्यतम्' इति काठके। उक्तस्येश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शननिन्दार्थे परामर्शो दृश्यते 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदुषोऽमन्वानस्य' इति। तथा वाजसनेयके प्रादेशमात्रसम्पादितस्य वैश्वानरस्य छान्दोग्ये सिद्धवदुपादानं 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इति, तथा सर्ववेदान्तप्रत्ययत्वेनान्यत्र विहितानामुक्थादीनामन्यत्रोपासनविधानायोपादानात् प्रायदर्शनन्यायेनोपासनानामपि सर्ववेदान्तप्रत्ययत्वसिद्धिः ॥

किञ्च वेद्यैक्येन निर्गुणब्रह्मविद्यैक्यं तावच्छ्रुतिर्दर्शयति, तत्सन्निधिपाठात् सगुणविद्यानामपि सर्वशाखास्वैक्यसिद्धिरित्याह सूत्रकारः। दर्शयति चेति। सगुणमप्येकं वेदत्रयवेद्यं दर्शयतीत्याह। तथेति। किञ्च शाखान्तरोक्तपदार्थस्य शाखान्तरे सिद्धवत्परामर्शो विद्यैक्यं दर्शयतीत्याह। तथा महद्भयमित्यादिना। एष नर एतस्मिन्नद्वयेऽल्पमप्यन्तरं भेदं यदा यदा पश्यत्यथ तदा तस्य संसारभयं भवति, एवं तस्माद्विदुषो नरस्य भेददर्शिनस्तदेव ब्रह्म भयङ्करं भवति, ब्रह्मैवाहमित्यमन्वानस्येत्यर्थः। प्रादेशमात्रमुपास्त इति सिद्धवदुपादानं वैश्वानरविद्यैक्यं दर्शयतीत्याह। तथेति। किञ्च सर्वेषु वेदान्तेषूक्थादीनां प्रतीयमानत्वेन हेतुनैतदवगम्यते अन्यत्रोक्तानां तेषामन्यत्रोपास्त्यर्थमुपादानमिति, ततस्तदुपास्तीनामपि सर्ववेदान्तप्रमाणकत्वेनैक्यं बाहुल्येन सिध्यतीत्याह। तथेति। ब्रह्मविद्यैक्यवदुक्थादिविद्यैक्यमित्यर्थः ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥ ५ ॥

इदं प्रयोजनसूत्रम् ॥

स्थिते चैवं सर्ववेदान्तप्रत्ययत्वे विज्ञानानामन्यत्रोदितानां विज्ञानगुणानामन्यत्रापि समाने विज्ञाने उपसंहारो भवति, अर्थाभेदात्। य एव हि तेषां गुणानामेकत्रार्थो विशिष्टविज्ञानोपकारः स एवान्यत्रापि, उभयत्रापि हि तदेवैकं विज्ञानं तस्मादुपसंहारः विधिशेषवत्, यथा विधिशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादि कर्म सर्वत्रेत्यर्थाभेदादुपसंहार एवमिहापि। यदि हि विज्ञानभेदो भवेत् ततो विज्ञानान्तरनिबद्धत्वाद्गुणानां प्रकृतिविकृतिभावाभावाच्च न स्यादुपसंहारः, विज्ञानैकत्वे तु नैवमिति। अस्यैव च प्रयोजनसूत्रस्य प्रपञ्चः सर्वाभेदादित्यारभ्य भविष्यति ॥

सर्वशाखासु विद्यैक्यचिन्तायाः फलमाह। उपसंहार इति। शाखाभेदे समानविद्यायां श्रुता गुणा यथाश्रुति व्यवस्थिता उत एकत्राश्रुता इतरशाखात उपसंहर्तव्या इति सन्देहे विद्यैक्येऽपि तत्र तत्रोक्तैरेव गुणैर्विद्योपकारसिद्धेः शाखाभेदेन गुणा व्यवस्थिता इति प्राप्तः, तत्र विद्यैक्यचिन्तानैष्फल्यमिति फलसिद्धान्तत्वेन सूत्रं व्याचष्टे। स्थिते चेत्यादिना। गुणानां गुण्यविनाभावादेतच्छाखास्था विद्या शाखान्तरोक्ततद्विद्यागुणवती तदभिन्नत्वात् तद्विद्यावदित्यनुमानाद्विद्यैक्ये गुणोपसंहारसिद्धिरित्यर्थः। प्रधानैक्ये तदुपकारकाणामङ्गानामुपसंहारे दृष्टान्तमाह। विधिशेषवदिति। उक्तमेव व्यतिरेकमुखेनाह। यदि हीति। न चाग्नेययागावबद्धानां गुणानां ततोऽभिन्ने सौर्ये प्राप्तिवद्विद्यान्तरस्थगुणानां विद्यान्तरप्राप्तिः किं न स्यादित्यत आह। प्रकृतीति। प्रकृतिगुणानां विकारे प्राप्तिर्युक्ता विद्यानान्तु प्रकृतिविकृतिभावासिद्धेर्न तत्प्राप्तिरित्यर्थः। नैवमिति गुणानुपसंहारो नेत्यर्थः। उत्तरसूत्राणामनेन सूत्रेण पौनरुक्त्यं वारयति। अस्यैवेति ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

वाजसनेयके 'ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति ते ह वाचमूचुस्त्वं न उद्गायेति तथा' इति, प्रक्रम्य वागादीन् प्राणानासुरपाप्मविद्धत्वेन निन्दित्वा मुख्यप्राणपरिग्रहः पठ्यते 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' इति । तथा छान्दोग्येऽपि 'तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्यामः' इति प्रक्रम्येतरान् प्राणानासुरपाप्मविद्धत्वेन निन्दित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे' इति । उभयत्रापि च *प्राणप्रशंसया प्राणविद्याविधिरध्यवसीयते । तत्र संशयः कि-

पूर्वं चोदनाद्यविशेषादुत्सर्गतो विद्यैक्यमुक्तं तस्यापवादं वक्तुमाह । अन्यथात्वमिति । अत्र वाजिनामुद्गीथब्राह्मणं छन्दोगानामुद्गीथाध्यायश्च विषयमाह । वाजेत्यादिना । 'ते ह देवाः सात्त्विकवृत्तयः प्राणा अन्योन्यमूचुर्हन्तेदानीमस्मिन् यज्ञे उद्गीथेनौद्गात्रेण कर्मणा रजस्तमोवृत्तिरूपान् गुणानतीत्य देवत्वं गच्छामः' इति ते चैवं निर्दोषमुद्गीथकर्तारमुपास्यं निर्धारयितुं कृतसंवादाः प्रथमं वाच्यं परीक्ष्यास्ये भवं आसन्यं मुखमध्यस्थं प्राणमुपास्यं निर्धारितवन्त इत्यर्थः । तत्रान्योन्याभिभवात्मकयुद्धे प्रवृत्तवन्तस्त्वमौद्गात्रं नो स्वीकुर्विति तथा त्वयान्तं कृतं तथा प्राणचक्षुःश्रोत्रमनांस्यपि कामेनासुरपाप्मना ग्रस्तानीति निन्दित्वा आसन्यमुख्यं देवाः पूर्ववदुद्गीथमाहृतवन्तः, अनेनोद्गीथेनैतानसुरान् जयेमेत्यर्थः। भेदाभेदभानाभ्यां संशयमाह । तत्रेति । अत्र पूर्वाधिकरणसिद्धान्तन्यायेनोद्गीथविद्येति संज्ञैक्येन विद्यैक्यमिति पूर्वपक्षे मिथो गुणोपसंहारः फलं, सिद्धान्ते संज्ञैक्येऽपि विद्यैक्यापवादादनुपसंहार इति,एवं यच पूर्वन्यायेन पूर्वपक्षः तत्रापवादिकी सङ्गतिरिति मन्तव्यं,

* प्राणेति प्रतीकं वर्ध० पु० नास्ति ।

अत्र विद्याभेदः स्यादाहोस्वित् विद्यैकत्वमिति, किन्तावत् प्राप्तं पूर्वेण न्यायेन विद्यैकत्वमिति। ननु न युक्तं विद्यैकत्वं प्रक्रमभेदात्, अन्यथा हि प्रक्रमन्ते वाजसनेयिनः अन्यथा छन्दोगाः 'त्वं न उद्गाय' इति वाजसनेयिन उद्गीथस्य कर्तृत्वेन प्राणमामनन्ति, छन्दोगा उद्गीथत्वेन तमुद्गीथमुपासाञ्चक्रिरे इति तत्कथं विद्यैकत्वं स्यादिति चेत्। नैष दोषः, न ह्येतावता विशेषेण विद्यैकत्वमपगच्छति अविशेषस्याऽपि बहुतरस्य प्रतीयमानत्वात्। तथा हि देवासुरसङ्ग्रामोपक्रमत्वं असुरात्ययाभिप्राय उद्गीथोपन्यासवागादिसङ्कीर्तनं तन्निन्दया मुख्यप्राणव्यपाश्रयः, तद्वीर्याच्चासुरविध्वंसनमश्मस्त्लोष्टनिदर्शनेनेत्येवं बहवोऽर्था उभयत्राप्यविशिष्टाः प्रतीयन्ते। वाजसनेयकेऽपि चोद्गीथसामानाधिकरण्यं प्राणस्य श्रुतं 'एष उ वा उद्गीथः' इति। तस्माच्छान्दोग्येऽपि कर्तृत्वं लक्षयितव्यं, तस्माच्च विद्यैकत्वमिति॥

सूत्रस्थसिद्धान्तिशङ्काभागं व्याचष्टे। ननु न युक्तमिति। सम्पूर्णोद्गीथकर्मकर्ता प्राणो वाजिनामुपास्यः, उद्गीथेति कर्तृशब्दात् छन्दोगानान्तूद्गीथावयव ॐकारः प्राणदृष्ट्योपास्यः, ॐमित्येतदक्षरमुद्गीथमित्युपक्रम्य प्राणमुद्गीथमिति कर्मरूपत्वशब्दात्, तथा कर्तृकर्मणोरुपास्ययोर्भेदाद्धि ययोरन्यथात्वं भेद इति शङ्कार्थः, उद्गीथत्वेनेति ॐकारत्वेनेत्यर्थः। अल्परूपभेदो न विद्यैक्यविरोधीत्युक्तन्यायेन पर्वपक्षं परिहरति। नैष इति। असुरजयाभिप्रायः असुरजयार्थसंवादः, यथा स्थानं प्राप्य लोष्टो विध्वंसते तथा प्राणं हन्तुमागता असुरास्तस्य वीर्येण स्वयमेव ध्वस्ता इति श्रुतमुभयत्रेत्यर्थः। अल्परूपभेदमङ्गीकृत्यापि विद्यैक्यमुक्तं सोऽपि नास्तीत्याह। वाजेति। उद्गीथरूपत्वेन प्राणस्योभयत्र श्रुतत्वादेकत्र श्रुतं कर्तृत्वमप्युभयत्र द्रष्टव्यमित्यर्थः॥

नवा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

न वा विद्यैकत्वमत्र न्याय्यं, विद्याभेद एवात्र न्याय्यः, कस्मात् प्रकरणभेदात्, प्रक्रमभेदादित्यर्थः। तथा हि इह प्रक्रमभेदो दृश्यते छान्दोग्ये तावत् 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति, एवमुद्गीथावयवस्योङ्कारस्य उपास्यत्वं प्रस्तुत्य रसतमादिगुणोपव्याख्यानञ्च तत्र कृत्वा 'अथ खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति' इति, पुनरपि तमेवोद्गीथावयवमोङ्कारमनुवर्त्य देवासुराख्यायिकाद्वारेण तं प्राणमुद्गीथमुपासाञ्चक्रिरे इत्याह। तत्र यद्युद्गीथशब्देन सकला भक्तिरभिप्रेयेत तस्याश्च कर्त्तोद्गातर्त्विक् तत उपक्रमस्योपरुध्येत, लक्षणा च प्रसज्येत, उपक्रमतन्त्रेण चैकस्मिन् वाक्ये उपसंहारेण भवितव्यं, तस्मादत्र तावदुद्गीथावयवे ॐकारे प्राणदृष्टिरुपदिश्यते। वाजसनेयके तु

बहुविधद्रूपभेदात् न विद्यैक्यमिति सिद्धान्तयति। न वेति। अक्षरं विभिनष्टि। उद्गीथमिति। तदवयवमित्यर्थः। पृथिव्यादिरसानां रसतम ॐकारः, आप्तिः समृद्धिरिति गुणानुक्त्वा गुणवत्योङ्कारे प्राणदृष्टिविधानायाख्यायिका प्रस्तुतेत्याह। रसतमेति। ननु वाजिवाक्यैकवाक्यत्वार्थं छान्दोग्योपक्रमस्थमुद्गीथपदं सम्पूर्णसामभक्तिपरमस्तु, प्राणमुद्गीथमित्यत्राप्युद्गीथकर्ता प्राण उपास्य इति व्याख्यायतामित्यत आह। तत्र यद्युद्गीथेति। ॐकारोपास्त्युपक्रमभङ्ग उद्गीथपदे कर्तृलक्षणा चेति दोषद्वयं स्यादित्यर्थः। ननु सिद्धान्तेऽपि तत्पदेऽवयवलक्षणा स्वीकार्या ततो वरं कर्तृत्वलक्षणात् श्रुत्यन्तरानुग्रहात् तथा चोपसंहारे कर्तृप्राणोपास्तिनिश्चयादुपक्रमेऽपि तन्निश्चय इत्यत आह। उपक्रमेति। सन्दिग्धोपक्रमो हि वाक्यशेषात् निश्चीयते। यथोक्ताः शर्करा इत्यत्राञ्जन-

उद्गीथशब्देनावयवग्रहणकारणाभावात् सकलैव भक्तिरावेद्यते त्वं न उद्गायेत्यपि तस्याः कर्त्तोद्गातर्लिक् प्राणत्वेन निरूप्यत इति प्रस्थानान्तरं। यदपि तत्रोद्गीथसामानाधिकरण्यं प्राणस्य तदप्युद्गातृत्वेनैव दिदर्शयिषितस्य प्राणस्य सर्वात्मत्वप्रतिपादनार्थमिति न विद्यैकत्वमावहति, सकलभक्तिविषय एव च तत्राप्युद्गीथशब्द इति वैषम्यं। न च प्राणस्योद्गातृत्वमसम्भवेन हेतुना परित्यज्येत उद्गीथभाववदुद्गातृभावस्योपासनार्थत्वेनोपदिश्यमा-

---

श्रयसन्देहे तेजो घृतमिति शेषान्निश्चयः, इह तूपक्रमेऽक्षरस्योपास्यत्वं निश्चितं, तत्समानाधिकरणोद्गीथपदस्यावयवलक्षणा विनिश्चितेति प्राणमुद्गीथमित्युपसंहारस्तदेकार्थतया नेय इत्यर्थः। एवं छान्दोग्ये ॐकार उपास्य उक्तः इतरत्र तु प्राण इत्युपास्यभेदाद्विद्याभेद इत्याह। धाजेति। यदुक्तं वाजिश्रुतावपि प्राणस्योद्गीथरूपत्वश्रुतेरुपास्यैक्यमिति तद्दूषयति। यदपीत्यादिना। तत्रोद्गीथ उपास्यतया नोक्तः किन्तूद्गातृत्वं, किन्तूद्गीथत्वमेव वाजिभिरपि ग्राह्यमित्यैक्यमाशङ्क्याह। न चेति। स उद्गाता प्राणस्योपास्य इति यदुक्तं बहुतरार्थाविशेषाद्धि विद्यैक्यमिति तत्राह। न चेति। एकत्रोद्गाता प्राण उपास्योऽन्यत्रोङ्कार इत्यन्तरङ्गोपास्यरूपभेदे स्पष्टे सति वहिरङ्गार्थवादसाम्यमात्रेण नोपासनैक्यं युक्तमित्यर्थः। वाक्यसाम्यमात्रेणार्थैक्यं नास्तीत्यत्र दृष्टान्तमाह। तथाहीति। 'वि वा एतं प्रजया पशुभिर्वर्द्धयति व्यर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं प्राणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम्' इत्यभ्युदयवाक्यं। अस्यार्थः यस्य यजमानस्य चतुर्दश्यामेवामावास्याभ्रान्त्या दर्शकर्मार्थं प्रवृत्तस्य पुरस्तात् पूर्वं हविस्तण्डुलदधिपयोरूपं निरुप्तं दर्शदेवताभ्योऽग्न्यादिभ्यः सङ्कल्पितं चन्द्रमाश्च पश्चादभ्युदेति तमेतं यजमानं कालव्यत्ययापराधात् तदेव निरुप्तं हविः प्रयाजादिनर्द्ध-

नत्वात् प्राणवीर्य्येणैव चोद्गातोद्गात्रं कर्म करोति इति नास्त्यसम्भवः। तथा च तत्रैव श्रावितं 'वाचा च ह्येव स प्राणेन चोदगायत्' इति। न च विवक्षितार्थभेदे गम्यमाने वाक्यच्छायानुसारमात्रेण समानार्थत्वमध्यवसातुं युक्तं, तथा ह्यभ्युदयवाक्ये पशुकामवाक्ये च 'त्रेधा तण्डुलान् विभजेत्, पशुकामवाक्ये च 'ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्' इत्यादिनिर्देशसाम्येऽप्युपक्रमभेदादभ्युदयवाक्ये देवतापनयोऽध्यवसितः, पशुकामवाक्ये तु यागविधिः तथेहाप्युपक्रमभेदाद् विद्याभेदः, परोवरीयस्त्वादिवत्। यथा परमात्मदृष्ट्यध्याससाम्येऽपि 'आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोवरीयान्

यति वियोजयति शत्रुं चास्य वर्द्धयति यस्मात् कालभ्रान्तिमान् यजमानः, ये मध्यमादिभावेन त्रेधा भूतास्तण्डुला दध्यादिसहिता निरुप्तास्तान् विभजेदग्न्यादिभ्यो वियोजयेद्वियोज्य च दातृत्वादिगुणकाग्न्यादिभ्यो दर्शदेवभिन्नेभ्यो निर्वपेदिति दधन् दधनि स्थविष्ठतण्डुलचरुं शृते दुग्धनिष्ठचरुमित्यर्थः। अत्र कालापराधे देवान्तरयुक्तं प्रायश्चित्तरूपं दर्शाद्भिन्नं कर्म विधीयत इति प्राप्ते तण्डुलत्रेधात्वाद्यनुवादेन विभजेदिति हविषः प्रकृतदेववियोगेन तस्मिन्नेव दर्शकर्मणि देवतान्तरसम्बन्धमात्रविधानं न कर्मान्तरमिति सिद्धान्तितं, एवमभ्युदयवाक्ये कालापराधेनोपक्रमाद्दर्शकर्मण्येव हविषः पूर्वदेवताभ्योऽपनयो वियोगोऽध्यवसितः, पशुकामवाक्ये तु यद्यपि ये स्थविष्ठास्तानग्नये प्रदायतेऽष्टाकपालं निर्वपेद्ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुं ये क्षोदिष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुमिति निर्देशोऽभ्युदयवाक्ये समोऽस्ति, तथापि यः पशुकामः स्यात् सोऽमावस्यामिष्ट्वा वत्सानपाकुर्यादिति नित्यं दर्शकर्म समाप्य पुनर्दोहार्थं वत्सापाकरणविध्युपक्रमात् पशुकामस्य यागान्तरविधिरेव नाभ्युदयवाक्येनार्थैक्यमिति

उद्गीथः स एषोऽनन्तः' इति परोवरीयस्त्वादिगुणविशिष्टमुद्गीथोपासनं अक्ष्यादित्यगतहिरण्मयश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनाद्भिन्नं, न चेतरेतरगुणोपसंहार एकस्यामपि शाखायां, तद्वच्छाखान्तरस्थेष्वप्येवंजातीयकेषूपासनेष्विति॥

संज्ञातश्चेत् तदुक्तमस्ति तु तदपि॥ ८॥

अथोच्येत संज्ञैकत्वाद्विद्यैकत्वमत्र न्याय्यं उद्गीथविद्येत्युभयत्रापि एका संज्ञेति, तदपि नोपपद्यते, उक्तं ह्येतत् नवा प्रकरणभेदात् परोवरीयस्त्वादिवदिति, तदेव चात्र न्याय्यतरं, श्रुत्यक्षरानुगतं हि तत्, संज्ञैकत्वं तु श्रुत्यक्षरबाह्यमुद्गीथशब्दमात्रप्रयोगात् लौकिकैर्व्यवहर्तृभिरुपचर्यते। अस्ति चैतत् संज्ञैकत्वं प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेषूद्गीथविद्येति। तथा प्रसिद्धभेदानामपि अग्निहोत्रदर्शपूर्णमासादीनां काठकैकग्रन्थपरिपठितानां *काटकसंज्ञैकत्वं दृश्यते तथेहापि भविष्यति। यत्र तु नास्ति कश्चि-

---

तथा प्रकृतेऽपि निर्देशसाम्यं न विद्यैक्यप्रयोजकमित्यर्थः। वत्सानपाकुर्यान्मातृदेशात् देशान्तरं नयेदित्यर्थः। सूत्रोक्तं दृष्टान्तं व्याचष्टे। परोवरीयस्त्वादिवदिति। पर इति सकारान्तं परस्तात् परश्चासौ वरोऽत्र वरतर इति परोवरीयानित्येकं पदं। अनन्तश्च आकाशाख्यः परमात्मा न दृष्टालम्बनत्वादुद्गीथस्तथोक्त इत्यर्थः। आकाशात्मना हिरण्मयश्मश्रुपुरुषात्मना चोद्गीथोपास्तिसाम्येऽपि विद्याभेदवदिहापि भेद इत्यर्थः॥

संज्ञैक्यं पूर्वपक्षवीजमुद्भाव्य दूषयति। संज्ञात इति। उपास्यरूपभेदाद्विद्यानानात्वं यदुक्तं तच्छ्रुत्यक्षरानुगतं बलवत्, संज्ञा तु पौरुषेयी दुर्बलेत्यर्थः। संज्ञैक्यं कर्मैक्यव्यभिचारि चेत्याह। अस्ति चेति। किं

---

* काठकैकसंज्ञत्वमिति वर्ध०।

देवंजातीयको भेदहेतुस्तत्र भवतु संज्ञैकत्वादिविद्यैकत्वं यथा संवर्गविद्यादिषु ॥

व्याप्तेश्च समञ्जसं ॥ ९ ॥

'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणेऽध्यासापवादैकत्वविशेषणपक्षाणां प्रतिभानात् कतमोऽत्र पक्षो न्याय्यः स्यादिति विचारः। तत्राध्यासो नाम द्वयोर्वस्तुनोरनिवर्तितायामेवान्यतरबुद्धावन्यतरबुद्धिरध्यस्यते,यस्मिन्नितरबुद्धिरध्यस्यते अनुवर्तत एव तस्मिंस्तद्बुद्धिरध्यस्ता, इतरबुद्धावपि यथा नाम्नि ब्रह्मबुद्धौ *अध्यस्तायामप्यनुवर्तत एव नामबुद्धिर्न ब्रह्मबुद्ध्या निवर्त्यते। यथा वा प्रतिमादिषु विष्ण्वादिबुद्ध्यध्यास एवमिहाप्यक्षरे उद्गीथबुद्धिरध्यस्ता उत उद्गीथे वाऽक्षरबुद्धिरिति। अपवादो नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेर्निवर्तिका भवति, यथा देहेन्द्रियसङ्घाते आत्मबुद्धिरात्मन्येवात्मबुद्ध्या पश्चाद्भाविन्या 'तत्त्व-

---

संज्ञैक्यं सर्वत्राप्रमाणमेव नेत्याह। यत्र त्विति। असति बाधके संज्ञैक्यमपि मानं यथा संवर्गविद्येति संज्ञैक्यात् सर्वशाखासु तद्विद्यैक्यं, तथा पञ्चाग्न्यादिविद्यैक्यमित्याद्यसूत्रे दर्शितमित्यर्थः ॥

व्याप्तेश्च समञ्जसं सामानाधिकरण्यं विषयीकृत्य संशयमाह। ॐमित्येतदिति। अध्यासादिपदार्थान् व्याचष्टे। तत्राध्यास इत्यादिना। बुद्धिपूर्वकाभेदारोपोऽध्यासः, बाधोऽपवादः, एकत्वं वास्तवाभेदः, विशेषणं व्यावर्तकमिति विवेकः। पूर्वमुद्गाटकर्मात्मकोद्गीथावयवत्वमोङ्कारस्य

---

* अध्यस्यमानायामिति वर्ध०।

मपि' इत्यनया यथार्थबुद्ध्या निवर्त्यते, यथा वा दिग्भ्रान्तिबुद्धिर्दिग्याथार्थ्यबुद्ध्या निवर्त्यते एवमिहाप्यक्षरबुद्ध्योद्गीथबुद्धिर्निवर्त्येत उद्गीथबुद्ध्या वाऽक्षरबुद्धिः, एकत्वन्तु अक्षरोद्गीथशब्दयोरनतिरिक्तार्थवृत्तित्वं, यथा द्विजोत्तमो ब्राह्मणो भूमिदेव इति। विशेषणं पुनः सर्ववेदव्यापिनः ॐमित्येतस्याक्षरस्य ग्रहणप्रसङ्गे औद्गात्रविषयस्य समर्पणं, यथा नीलं यदुत्पलं तदानयेति, एवमिहाप्युद्गीथो य ॐकारस्तमुपासीतेति, एवमेतस्मिन् सामानाधिकरण्यवाक्ये विमृश्यमाणे एते पक्षाः प्रतिभान्ति, तत्रान्यतमनिर्धारणे कारणाभावादनिर्धारणप्राप्ताविदमुच्यते। व्याप्तेश्च समञ्जसमिति। चशब्दोऽयं तुशब्दस्यानन्तर्यवर्ती परपक्षत्रयव्यावर्तनप्रयोजनः। तदिह त्रयः पक्षाः सावद्या इति पर्य्युदस्यन्ते विशेषणपक्ष एवैको निरवद्य इत्युपादीयते, तत्राध्यासे तावत् या बुद्धिरितरत्राध्यस्यते तच्छब्दस्य लक्षणावृत्तित्वं प्रसज्येत फलञ्च कल्प्येत। श्रूयत एव फलं 'आपयिता ह वै कामानां भवतीत्यादि' इति चेत्, न, तस्यान्यफलत्वात्। *आप्त्यादि-

ध्येयस्य विशेषणं सिद्धवत्कृत्य ध्येयभेदाद्विद्याभेदः सिद्धान्तितः स न युक्त इत्याक्षेपसङ्गत्या पूर्वपक्षयति। तत्रेति। अत्र पूर्वपक्षे पूर्वोक्तसिद्धान्तासिद्धिः फलं सिद्धान्ते तत्सिद्धिरिति मत्वा सिद्धान्तसूत्रं व्याचष्टे। चशब्द इत्यादिना। पक्षत्रयस्य दुष्टत्वं प्रतिज्ञायाध्यासपक्षे दोषमाह। तत्राध्यास इति। यस्योद्गीथस्य बुद्धिरोङ्कारेऽध्यस्यते तद्वाचकोद्गीथशब्दस्योङ्कारे लक्षणा स्यात् तद्बुद्धिविषयत्वगुणपरत्वात् तथा सम्बन्धोऽप्यसिद्धः कल्पनीयः, प्रतीकोपास्तेः फलञ्च कल्प्यमिति गौरवं स्यादित्यर्थः। फलं न कल्प्यमिति शङ्कते। श्रूयत इति। आप्त्यादीति ॐकार

* व्याप्त्यादीति वर्ध०।

वृष्टिफलं हि तत्, नोद्गीथाध्यासफलं। अपवादेऽपि समानः फलाभावः। मिथ्याज्ञाननिवृत्तिः फलमिति चेत्, न, पुरुषार्थोपयोगानवगमात्। न च कदाचिदप्योङ्कारादोङ्कारबुद्धिर्निवर्तते उद्गीथादोद्गीथबुद्धिः। न चेदं वाक्यं वस्तुतत्त्वप्रतिपादनपरं उपासनविधिपरत्वात्। नाप्येकत्वपक्षः सङ्गच्छते, निष्प्रयोजनं हि तदा शब्दद्वयोच्चारणं स्यात्, एकेनैव विवक्षितार्थसमर्पणात्, न च हौत्रविषये वाऽऽध्वर्यवविषये वाऽक्षरे ॐकारशब्दवाच्ये उद्गीथप्रसिद्धिरस्ति, नापि सकलायां साम्नो द्वितीयायां भक्तावुद्गीथशब्दवाच्यायामोङ्कारशब्दप्रसिद्धिः, येनानतिरिक्तार्थता स्यात्। परिशेषाद्विशेषणपक्षः परिगृह्यते, व्याप्तेः सर्ववेदसाधारण्यात्। सर्वव्याप्यक्षरमिह मा प्रसञ्जीत्यत उद्गीथशब्देनाक्षरं विशिष्यते, कथं नामोद्गीथावयवभूत ॐकारो गृह्येत इति। नन्वस्मिन्नपि पक्षे समाना लक्षणा उद्गीथशब्दस्यावयव*लक्षणार्थ-

व्याप्तिः समृद्धिरिति, 'य उपास्ते स कामानाप्नोति' इति श्रुतं फलं नाध्यासस्येत्यर्थः। उद्गीथोङ्कारयोरन्यतरबुद्ध्यान्यतरबुद्ध्यपवादमङ्गीकृत्यान्यतरमिथ्याबुद्धिनिवृत्तिवैफल्यमुक्तं सम्प्रत्यन्यतरबुद्धेरभ्रान्तित्वान्नापवाद इत्याह। न च कदाचिदपीति। भ्रान्तिश्चेत् निवर्तेत न तु निवर्तत इत्यभ्रान्तिरित्यर्थः। किञ्च तत्त्वबोधकाद्वाक्याद्भ्रान्त्यपवादो भवति नेह वाक्यं तत्त्वपरत्वमित्याह। न चेति। घटकुम्भशब्दयोरिवोङ्कारोद्गीथशब्दयोः पर्यायत्वपक्षं दूषयति। नापीति। पर्यायत्वमपि नास्ति इत्याह। न चेति। परिशिष्टविशेषणपक्षे सूत्रं योजयति। व्याप्तेरिति। ॐमित्यक्षरमुपासीत इत्युक्ते सर्ववेदव्याप्योङ्कार इहोपास्ती प्रसज्येत तन्निरासार्थमुद्गीथावयवत्वं विशेषणं समञ्जसमित्यर्थः।

* लक्षणात्मादिति वर्ध० का०।

त्वात्। सत्यमेवमेतत्, लक्षणायामपि तु सन्निकर्षविप्रकर्षौ भवत एव, अध्यासपक्षे ह्यर्थान्तरबुद्धिरर्थान्तरे निक्षिप्यत इति विप्रकृष्टा लक्षणा, विशेषणपक्षे त्ववयववचनेन शब्देनावयवः समर्प्यत इति सन्निकृष्टा लक्षणा। समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तमाना दृष्टाः पटग्रामादिषु। अतश्च व्याप्तेश्चैतोरो*मित्येतस्योद्गीथमित्येतद्विशेषणमिति समञ्जसमेतन्निरवद्यमित्यर्थः॥

सर्वाभेदादन्यत्रेमे॥१०॥

वाजसनेयिनां छन्दोगानाञ्च प्राणसंवादे श्रैष्ठ्यगुणान्वितस्य प्राणस्योपास्यत्वमुक्तं वागादयोऽपि तत्र वसिष्ठत्वादिगुणान्विता उक्ताः, ते च गुणाः प्राणे पुनः प्रत्यर्पिताः 'यद्वा अहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसि' इत्यादिना। अन्येषामपि तु शाखिनां

अध्यासपक्षे तद्बुद्धिविषयत्वगुणयोगरूपः सम्बन्धः कल्प्य इति विप्रकृष्टा लक्षणा, अवयवलक्षणा तु सन्निकृष्टा अवयवावयविसम्बन्धस्य क्लृप्तत्वात्, पटावयवे दग्धे पटो दग्ध इति लोके प्रयोगाच्च। नामादौ ब्रह्मशब्दस्य त्वगत्या ब्रह्मबुद्धिग्राह्यत्वगुणलक्षणाऽऽश्रिता तत्र प्रतीकोपास्तेर्विवक्षितत्वात्, इह तु प्रतीकोपास्तिविधिकल्पने व्याप्त्यादिगुणकोङ्कारे प्राणदृष्टिविधाने च वाक्यभेदः स्यात्, अतः सर्ववेदव्याप्योङ्कारनिरासेनोङ्कारे प्राणदृष्टिविधानार्थं विशेषणमेव समञ्जसं कल्पनालाघवादिति सिद्धं॥

सर्वाभेदादन्यत्रेमे। विषयं वक्तुं सम्मतमर्थमाह। वाजसनेयिनामिति। वाचो वसिष्ठत्वं गुणः, वाग्मिनः सुखवासदर्शनात्, चक्षुषः प्रतिष्ठा गुणः चक्षुष्मतः पादप्रतिष्ठादर्शनात्। श्रोत्रं सम्पद्गुणकं श्रवणात् सर्वार्थसम्पत्तेः। मनश्चायतनत्वं गुणं तस्य वृत्तिद्वारा सर्वभोग्याश्रयत्वात्। ते

* ओमित्येतदक्षरमित्येतस्योद्गीथमित्येतदिति वर्ध॰।

कौषीतकिप्रभृतीनां प्राणसंवादेषु ‘अथातो निःश्रेयसादानमेता ह वै देवता अहंश्रेयसे विवदमानाः’ इत्येवञ्जातीयकेषु प्राणस्य श्रैष्ठ्यमुक्तं नत्विमे वसिष्ठत्वादयो गुणा उक्ताः। तत्र संशयः किमेते वसिष्ठत्वादयो गुणाः क्वचिदुक्ता अन्यत्राप्यस्येरन्नुत नास्येरन्निति। तत्र प्राप्तं तावन्नास्येरन्निति। कुतः, एवंशब्दप्रयोगात्। *‘तथा एवं विद्वान् प्राणे निःश्रेयसं विदित्वा’ इति हि तत्र तत्रैवंशब्देन वेद्यं वस्तु निवेद्यते, एवंशब्दश्च सन्निहितावलम्बनो न शाखान्तरपरिपठितमेवञ्जातीयकं गुणजातं शक्नोति निवेदयितुं, तस्मात् स्वप्रकरणस्थैरेव गुणैर्निराकाङ्क्षत्वमित्येवं प्राप्ते प्रत्याह, अस्येरन्निमे गुणाः क्वचिदुक्ता वसिष्ठत्वादयोऽन्यत्रापि, कुतः सर्वाभेदात्। सर्वत्रैव हि तदेवैकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायते प्राणसंवादादिसारूप्यात्,

च गुणाः प्राणस्य श्रैष्ठ्यं निश्चित्य वागादिभिस्तस्मिन्नपि ता इति शाखाद्वयसम्मतोऽर्थः। विषयमाह। अन्येषामित्यादिना। निःश्रेयसस्य श्रैष्ठ्यस्यादानं निर्धारणं प्रस्तूयत इत्यर्थः। देवता वागादयोऽहंश्रेयसे स्वश्रैष्ठ्यायेत्यर्थः। एवंशब्दाच्छ्रैष्ठ्यगुणकप्राणप्रत्यभिज्ञानाच्च संशयमाह। तत्रेति। गुणानामनुपसंहारोपसंहारावेव पूर्वोत्तरपक्षयोः फलं उद्गीथत्वविशेषणादोङ्कारस्य सर्ववेदव्याप्तिव्यावृत्तिवत् प्रकृतगुणमात्रग्राहकैवंशब्दाच्छाखान्तरगुणव्यावृत्तिरिति दृष्टान्तेन पूर्वपक्षयति। तत्र प्राप्तमिति। यथा वागादिभ्यः प्राणश्रैष्ठ्यं सिद्धमथो तथा य एवं श्रैष्ठ्यगुणं विद्वानुपास्ते स प्राणे श्रैष्ठ्यं विदित्वा ध्यात्वा श्रेष्ठो भवति इति श्रुत्यर्थः। एवंजातीयकविद्यैक्यात् प्राप्तमार्थिकं वसिष्ठत्वादिगुणजातमेवंशब्दो न रुणद्धि श्रुतावलम्बित्वादिति प्राप्ते सिद्धान्तयति। अस्येरन्निति।

* तथा हि अथो य एवं इति मु० पु०। अथो तथा य एवमिति तु टीकासम्मतं।

अभेदे च विज्ञानस्य कथमिमे गुणाः क्वचिदुक्ता अन्यत्र नास्येरन्। नन्वेवंशब्दस्तत्र तत्र भेदेनैवञ्जातीयकं गुणजातं वेद्यत्वाय समर्पयति इत्युक्तं, अत्रोच्यते। यद्यपि कौषीतकिब्राह्मणगतेनैवंशब्देन वाजसनेयिब्राह्मणगतं गुणजातमसंशब्दितमसन्निहितत्वात्, तथापि तस्मिन्नेव विज्ञाने वाजसनेयिब्राह्मणगतेनैवंशब्देन तत्संशब्दितमिति न परशाखागतमप्यभिन्नविज्ञानावबद्धं गुणजातं स्वशाखागताद्विशिष्यते। न चैवं सति श्रुतहानिरश्रुतकल्पना वा भवति। एकस्यामपि हि शाखायां श्रुता गुणाः श्रुता एव सर्वत्र भवन्ति गुणवतो भेदाभावात्। न हि देवदत्तः शौर्यादिगुणत्वेन स्वदेशे प्रसिद्धो देशान्तरगतस्तद्देशस्थैरविभावितशौर्यादिगुणोऽप्यतद्गुणो भवति, यथा च तत्र परिचयविशेषाद्देशान्तरेऽपि देवदत्तगुणा विभाव्यन्ते एवमभियोगविशेषाच्छाखान्तरेऽप्युपास्या गुणाः शाखान्तरेऽप्यस्येरन्। तस्मादेकप्रधानसम्बद्धा धर्मा एकत्राप्युच्यमानाः सर्वत्रैवोपसंहर्तव्या इति॥

वाजसनेयिब्राह्मणे तावदेवंशब्देन वसिष्ठत्वादिगुणजातस्य प्राणविद्यासम्बन्धः सिद्धः सैव विद्या कौषीतकिश्रुतौ प्रत्यभिज्ञायते, तथा च गुणानां गुण्यविनाभावेनार्थतः प्राणानामपि श्रुतगुणैरविरोधात् सहैव श्रुतमार्थञ्च गुणजातं श्रुत्यर्थाभ्यां सन्निहितत्वाविशेषात् कौषीतकिगतेनैवंशब्देन परामृश्यन्त इत्याह। तथापीति। कौषीतकिश्रुतिस्थः प्राणो वसिष्ठत्वादिगुणकः श्रेष्ठप्राणवत्। वाजिश्रुतिस्थप्राणवदित्यश्रुतगुणानुमाने सति श्रुतहानिर्नास्ति अविरोधादित्युक्तं स्पष्टयति। न चैवं सति इति। अपरिगणिता अपि गुणा श्रुता एवेत्यत्र दृष्टान्तमाह। न हीति। फलितमाह। तस्मादिति॥

आनन्दादयः प्रधानस्य ॥ ११ ॥

ब्रह्मस्वरूपप्रतिपादनपरासु श्रुतिष्वानन्दरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मकत्वमित्येवंजातीयका ब्रह्मणो धर्माः क्वचित् केचित् श्रूयन्ते। तेषु संशयः किमानन्दादयो ब्रह्मधर्मा यावन्तो यत्र श्रूयन्ते तावन्त एव तत्र प्रतिपत्तव्याः किं वा सर्वे सर्वत्रेति। तत्र यथा श्रुतिविभागं धर्मप्रतिपत्तौ प्राप्तायामिदमुच्यते, आनन्दादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्र प्रतिपत्तव्याः, कस्मात् सर्वाभेदादेव। सर्वत्र हि तदेवैकं प्रधानं विशेष्यं ब्रह्म न भिद्यते। तस्मात् सार्वत्रिकत्वं ब्रह्मधर्माणां तेनैव पूर्वाधिकरणोदितेन देवदत्तशौर्यादिनिदर्शनेन। नन्वेवं

आनन्दादयः प्रधानस्य। ब्रह्मणो ज्ञेयस्यैक्यात् निर्विशेषत्वाच्च संशयमाह। तेषु संशय इति। पूर्वपक्षे सत्यादिपदानुपसंहारादर्थानवधारणं, सिद्धान्ते त्ववधारणमिति फलं। प्राणस्य सविशेषत्वाद्युक्तः शाखान्तरीयवसिष्ठत्वाद्युपसंहारः, ब्रह्मणस्तु निर्विशेषत्वात् स्वशाखागतपदैरेव प्रमितिसिद्धेर्व्यर्थः पदान्तरोपसंहार इति प्रत्युदाहरणेन पूर्वपक्षः। सिद्धान्तमाह। इदमिति। आनन्दत्वसत्यत्वज्ञानत्वादिसामान्यानि ब्रह्मणि कल्पिता धर्मास्तेषां सर्वशाखासूपसंहारो नाम तद्वाचकानन्दादिपदानामेकवाक्यतयोच्चारणं आनन्दः सत्यं ज्ञानमनन्तं ब्रह्म शुद्धमद्वयमात्मेति तानि च समानाधिकरणानि पदानि विरुद्धधर्मत्वाङ्गेन सर्वाधिष्ठानभूतामेकामखण्डव्यक्तिं लक्षयन्ति। न चैकेनैव पदेन लक्ष्यसिद्धेः पदान्तरं व्यर्थमिति वाच्यं, एकस्मिन् पदे विरोधाभावेन लक्षणानवतारात्। यद्यपि पदद्वयेऽपि लक्षणाऽवतरति तथाप्यानन्दो ब्रह्मेत्युक्ते दुःखत्वाल्पत्वभ्रान्तिनिरासे व्यसनत्वजडत्वादिभ्रमो भवेत् अतस्तन्निरासार्थं सत्यज्ञानादिपदानि प्रयोक्तव्यानि। न च भ्रमस्यानव-

सति प्रियशिरस्त्वादयोऽपि धर्माः सर्वे सर्वत्र सङ्कीर्येरन्, तथा हि तैत्तिरीयके आनन्दमयमात्मानं प्रक्रम्याम्नायते 'तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा' इति, अत उत्तरं पठति ॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

प्रियशिरस्त्वादीनां धर्माणां तैत्तिरीयके आम्नातानां नास्त्यन्यत्र प्राप्तिः यत्कारणं प्रियं मोदः प्रमोद आनन्द इत्येते परस्परापेक्षया भोक्त्रन्तरापेक्षया *चोपचितापचितरूपा उपलभ्यन्ते, उपचयापचयौ च सति भेदे सम्भवतः, निर्भेदन्तु ब्रह्म 'एकमेवाद्वितीयम्' इत्यादिश्रुतिभ्यः। न चैते प्रियशिरस्त्वादयो ब्रह्मधर्माः कोशधर्मास्त्वेते इत्युपदिष्टमस्माभिः 'आनन्दमयोऽभ्यासात्' इत्यत्र [वे०सू०१।१।१२]। अपि च परस्मिन् ब्रह्मणि चित्तावतारोपायमात्रत्वेनैते परिकल्प्यन्ते न द्रष्टव्यत्वेन, एवमपि सुतरामन्यत्राप्राप्तिः प्रियशिरस्त्वादीनां। ब्रह्मधर्मांस्त्वेतान् कृत्वा

धित्वाद्वाक्यमयं पर्यवसितं स्यादिति वाच्यं, सच्चिदानन्दात्मकं सर्वधर्मशून्यमद्वयमविकल्पं ब्रह्माहमिति विशेषदर्शने सर्वभ्रमनिरासात्। तच्च विशेषदर्शनं यावद्भिः पदैर्भवति तावन्ति पदान्युपसंहर्तव्यानीति भावः ॥

ब्रह्मैक्याच्चेदानन्दत्वादिधर्माणां सर्वत्र प्राप्तिस्तर्हि सगुणब्रह्मविद्यागतधर्मप्राप्तिरपि स्यादिति शङ्कानिरासार्थं सूत्रं व्याचष्टे। प्रियेति। पुत्रदर्शनसुखं प्रियं तद्वार्तादिना मोदस्तस्य विद्यातिशये प्रमोद इत्येवं तारतम्यवन्तो धर्मास्त्वद्वये ज्ञेये न प्राप्नुवन्ति तेषामब्रह्मस्वरूपाणां ब्रह्मज्ञानानुपयोगादिति भावः। तेषां ब्रह्मधर्मत्वं चासिद्धमित्याह। न

---

* चोपेति वर्ध०।

न्यायमात्रमिदमाचार्येण दर्शितं प्रियशिरस्त्वाद्यप्राप्तिरिति, स च न्यायोऽन्येषु निश्चितेषु ब्रह्मधर्मेषूपासनायोपदिश्यमानेषु नेतव्यः सम्यद्वामत्वादिषु सत्यकामत्वादिषु च। तेषु हि सत्यप्युपास्यब्रह्मण एकत्वे प्रक्रमभेदादुपासनभेदे सति नान्योन्यधर्माणामन्योन्यत्र प्राप्तिः, यथा च द्वे भार्ये एकं नृपतिमुपासाते चामरेणान्या छत्रेणान्या, तत्र चोपास्यैकत्वेऽप्युपासनभेदे धर्मव्यवस्था च भवति एवमिहापीति। उपचितापचितगुणत्वं हि सति भेदव्यवहारे सगुणे ब्रह्मण्युपपद्यते न निर्गुणे परस्मिन् ब्रह्मणि, अतो न सत्यकामत्वादीनां धर्माणां क्वचिच्छ्रुतानां सर्वत्र प्राप्तिरित्यर्थः॥

इतरे त्वर्थसामान्यात्॥ १३॥

इतरे त्वानन्दादयो धर्माः ब्रह्मस्वरूपप्रतिपादनायैवोच्यमाना अर्थसामान्यात् प्रतिपाद्यस्य ब्रह्मणो धर्मिण एकत्वात् सर्वे सर्वत्र प्रतीयेरन्निति वैषम्यं, प्रतिपत्तिमात्रप्रयोजना हि त इति॥

चैत इति। ब्रह्मणि चित्तावतारोपायत्वेऽपि तेषां प्राप्तिः स्यादित्याशङ्क्याह। एवमपीति। अज्ञेयत्वादेषां न ज्ञेये ब्रह्मणि प्राप्तिरित्यर्थः। किमर्थं तर्हि सूत्रमित्यत आह। ब्रह्मधर्मांस्त्विति। ब्रह्मधर्मानिति कृत्वा चिन्ताफलमाह। स चेति। ज्ञेये वाह्यधर्माणामनुपयोगादप्राप्तिरिति न्यायात् सम्पद्वामत्वादीनामप्राप्तिरिति सूत्रं व्याख्येयमित्यर्थः। ज्ञानानुपयोगेऽपि ध्याने तेषां धर्माणामुपयोगादित्याशङ्क्याह। तेषु हीति। ध्यानविधिपरतन्त्राणां धर्माणां यथाविधि व्यवस्थेत्यर्थः॥

सम्पद्वामत्वादिधर्मेभ्य आनन्दादीनां वैषम्यं ज्ञानोपयोगित्वादित्याह। इतरे त्विति॥

आध्यानाय प्रयोजनाभावात्॥ १४॥

काठके पठ्यते 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' इत्यारभ्य 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' इति। तत्र संशयः किमिमे सर्वे एवार्थादयस्ततस्ततः परत्वेन प्रतिपाद्यन्ते उत पुरुष एवैभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति। तत्र तावत् सर्वेषामेवैषां परत्वेन प्रतिपादनमिति भवति मतिः। तथा हि श्रूयते 'इदमस्मात् परमिदमस्मात् परम्' इति। ननु बह्वर्थेषु परत्वेन प्रतिपिपादयिषितेषु वाक्यभेदः स्यात्। नैष दोषः, वाक्यबहुत्वोपपत्तेः। बहून्येव ह्येतानि वाक्यानि प्रभवन्ति बहूनर्थान् परत्वोपेतान् प्रतिपादयितुं, तस्मात् प्रत्येकमेषां परत्वप्रतिपादनमित्येवं प्राप्ते ब्रूमः, पुरुष एवैभ्यः सर्वेभ्यः परः प्रतिपाद्यत इति युक्तं न प्रत्येकमेषां परत्वप्रतिपादनं, कस्मात् प्रयोजनाभावात्। न ह्येतरेषु परत्वेन प्रतिपन्नेषु किञ्चित् प्रयोजनं दृश्यते श्रूयते वा, पुरुषे त्विन्द्रियादिभ्यः परस्मिन् सर्वानर्थ-

---

सत्यज्ञानानन्दात्मब्रह्मशब्दाः पञ्च सर्वत्रोपसंहर्तव्या इति सिद्धेः आध्यानाय वाक्यभेदाभेदानवधारणात् संशयमाह। तत्रेति। पूर्वपक्षे वाक्यभेदाद्विद्याभेदः सिद्धान्ते वाक्यैक्याद्विद्यैक्यमिति फलं। पूर्वत्र ब्रह्मस्वभावानामानन्दादीनामुपसंहार्याणां ब्रह्मज्ञानफलोपायत्वमुक्तं अत्र त्वब्रह्मभावस्यार्थादिपरत्वस्यानुपसंहार्थं स्यादपायत्वमुच्यत इत्येकफलकत्वं सङ्गतिः। तत्तत्परत्वविशिष्टत्वेनार्थादीनामपूर्वतया प्रतिपाद्यानां भेदात् वाक्यभेदो न दोष इति पूर्वपक्षः। 'उत' सूत्रसिद्धान्तं प्रतिज्ञाय। सौत्रं हेतुं व्याचष्टे। पुरुष एवेति। फलवत्त्वे सत्यपूर्वत्वात् पुरुषस्यैव प्राधान्येन प्रतिपाद्यत्वं अफलार्थादीनां परत्वं तु तच्छेषत्वेनोच्यत इत्यर्थः।

त्राताऽतीते प्रतिपन्ने दृश्यते प्रयोजनं मोक्षसिद्धिः। तथा च श्रुतिः 'निचाय्य तं मृत्युमुखात् प्रमुच्यते' इति। अपि च पर-प्रतिषेधेन काष्ठादिशब्देन च पुरुषविषयमादरं दर्शयन् पुरुष-प्रतिपत्त्यर्थैव पूर्वापरप्रवाहोक्तिरिति दर्शयति। आध्यानायेति। आध्यानपूर्वकाय सम्यग्दर्शनायेत्यर्थः। सम्यग्दर्शनार्थमेव हीहा-ध्यानमुपदिश्यते न त्वाध्यानमेव स्वप्रधानं॥

आत्मशब्दाच्च॥ १५॥

इतश्च पुरुषप्रतिपत्त्यर्थैवेयमिन्द्रियादिप्रवाहोक्तिः, यत्कारणं-

'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते।

दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः'॥ इति-प्रकृतं पुरुषमात्मेत्याह। अतश्चानात्मत्वमितरेषां विवक्षित-मिति गम्यते, तस्यैव च दुर्विज्ञानतां सुसंस्कृतमतिगम्यतां च दर्शयति, तद्विज्ञानायैव च 'यच्छेद्वाङ्मनसी प्राज्ञः' इत्याध्यानं विदधाति। तद्व्याख्यातं आनुमानिकमप्येकेषामित्यत्र [वे० सू० १।४।१]। एवमनेकप्रकार आशयातिशयः श्रुतेः पुरुषे लक्ष्यते

किञ्च 'पुरुषान्न परं किञ्चित् सा काष्ठा' इति वेदः परनिषेधलिङ्गेन सर्वबाधावधित्वलिङ्गेन च पुरुषे तात्पर्यं दर्शयन् पूर्वस्मात् पूर्वस्मादपर-स्यापरस्य परत्वोक्तिस्तदर्थेति दर्शयति इत्याह। अपि चेति। अर्था-दीनामत्रोक्तिराध्यानाय तत्तत्परत्वध्यानपूर्वकं पुरुषदर्शनायैव। स्वतः प्रयोजनाभावादिति सूत्रं योजयति। आध्यानायेति॥

आत्मत्वादिलिङ्गैश्च पुरुष एव प्रतिपाद्य इत्याह। आत्मशब्दाच्चेति। किञ्च 'तद्विष्णोः परमं पदं' 'पुरुषान्न परं किञ्चित्' इत्युपक्रमोपसंहार-

नेतरेषु। अपि च 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इत्युक्ते किन्तदध्वनः पारं विष्णोः परमं पदमित्यस्या-माकाङ्क्षायामिन्द्रियाद्यनुक्रमणात् परमपदप्रतिपत्त्यर्थ एवा-यमायास इत्यवसीयते॥

आत्मगृहीतिरितरवदुत्तरात्॥ १६॥

ऐतरेयके श्रूयते 'आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत् स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृज-ताम्भो मरीचीर्मरमापः' इत्यादि। तत्र संशयः किं पर एवात्मा इहात्मशब्देनाभिलप्यते उतान्यः कश्चिदिति। किं तावत् प्राप्तं न परमात्मेहात्मशब्दाभिलप्यो भवितुमर्हतीति। कस्मात्, वाक्या-न्वयदर्शनात्। ननु वाक्यान्वयः सुतरां परमात्मविषयो दृश्यते प्रागुत्पत्तेरात्मैकत्वावधारणात् ईक्षणपूर्वकस्रष्टृत्ववचनाच्च। नेत्यु-

---

योरैकरूप्यात् स्रष्टृत्ववदेकपुरुषपरत्वेनैकवाक्यत्वनिश्चये सति वाक्य-भेदफलभेदकल्पना न युक्ता गौरवादित्याह। अपि चेति॥

आत्मगृहीतिः। मिषत् चलत्। लोकानाह। अम्भ इति। अम्भः स्वर्गः, मरीचयोऽन्तरिक्षलोकः, मरो मर्त्यलोकः, आपः पाताललोक इत्यर्थः। आत्मशब्दस्य ब्रह्मणि सूत्रात्मनि च प्रयोगात् संशयमाह। तत्रेति। अत्र पूर्वपक्षे वाक्यस्य सूत्रोपास्तिपरत्वात् परब्रह्मधर्माणामानन्दा-दीनामैतरेयकेऽनुपसंहारः, सिद्धान्ते ब्रह्मपरत्वादुपसंहार इति फलं, पुरुषवाक्याद्भेदप्रसङ्गादर्थादिवाक्यानां नार्थादिप्रतिपादकत्वमित्युक्तं त-द्वदिहापि प्रजापते रेतो देवा इति पूर्वस्मात् प्रजापतिवाक्याद्भेदप्रस-ङ्गादात्मा वा इत्यादिवाक्यस्य न ब्रह्मपरत्वमिति दृष्टान्तेन पूर्वपक्ष-यति। न परमात्मेत्यादिना। वाक्यस्य प्रजापतौ तात्पर्यदर्शनादित्यर्थः। पूर्वपक्षमाक्षिप्य लोकस्रष्टृत्वलिङ्गात् प्रजापतौ वाक्यान्वय इत्याह।

च्यते लोकसृष्टिवचनात्, परमात्मनि हि स्रष्टरि परिगृह्यमाणे महाभूतसृष्टिरादौ वक्तव्या लोकसृष्टिस्त्विहादावुच्यते, लोकाश्च महाभूतसन्निवेशविशेषाः। तथा चाम्भःप्रभृतीन् लोकत्वेनैव निर्वक्ति 'अदोऽम्भः परेण दिवम्' इत्यादिना। लोकसृष्टिश्च परमेश्वराधिष्ठितेनापरेण केनचिदीश्वरेण क्रियत इति श्रुतिस्मृत्योरुपलभ्यते। तथा हि श्रुतिर्भवति 'आत्मैवेदमग्र आसीत् पुरुषविधः' इत्याद्या। स्मृतिरपि-

'स वै शरीरी प्रथमः स वै पुरुष उच्यते।
आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत'॥ इति।

ऐतरेयिणोऽपि 'अथातो रेतसः सृष्टिः प्रजापते रेतो देवाः' इत्यत्र पूर्वस्मिन् प्रकरणे प्रजापतिकर्तृकां विचित्रां सृष्टिमामनन्ति। आत्मशब्दोऽपि तस्मिन् प्रयुज्यमानो दृश्यते 'आत्मैवेदमग्र आसीत् पुरुषविधः' इत्यत्र। एकत्वावधारणमपि प्रागुत्पत्तेः स्वविकारापेक्षमुपपद्यते। ईक्षणमपि तस्य चेतनत्वाभ्युपगमादुप-

---

नन्वित्यादिना। लोका एव महाभूतानीत्यत आह। लोकाश्चेति। लोकशब्दस्य महाभूतेष्वरूढत्वात् भौतिका एव लोकाः। निर्वचनाच्चेत्याह। तथा चेति। अम्भो मरीचीर्मरमाप इति सूचयित्वा स्वयमेव श्रुतिर्व्याचष्टे। परेण दिवं, दिवः परस्तादिति। प्रतिष्ठितचन्द्रोऽम्भसा व्याप्तो यो लोकः तदम्भः अन्तरिक्षं, मरीचयः पृथिवी, मरो आप अधस्तात्ता आप इति। ननु लोकसृष्टिरपीश्वरादेवास्तु नेत्याह। लोकेति। पुरुषविधो नराकारः। आत्मा हिरण्यगर्भः, आपिपीलिकाभ्यः सर्वमसृजतेत्यर्थः। भूतानां लोकानामित्यर्थः। प्रकरणादपि लोकस्रष्टा प्रजापतिरित्याह। ऐतरेयिणोऽपीति। रेतः कार्यमिति यावत्। ब्रह्मलिङ्गानि प्रजापतौ योजयति। आत्मशब्दोऽपीत्यादिना। किञ्च प्रजाः सृष्ट्वा ताः प्रति भोगार्थं

पन्नं। अपि च ताभ्यो गामानयत् ताभ्योऽश्वमानयत् ताभ्यः पुरुषमानयत् ता अब्रुवन् इत्येवंजातीयको भूयान् व्यापारविशेषो लौकिकेषु विशेषवत्स्वात्मसु प्रसिद्ध इहानुगम्यते। तस्मात् विशेषवानेव कश्चिदिहात्मा स्यादित्येवं प्राप्ते ब्रूमः, पर एवात्मेहात्मशब्देन गृह्यते इतरवत्, यथेतरेषु सृष्टिश्रवणेषु 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्येवमादिषु परस्यात्मनो ग्रहणं, यथा चेतरस्मिन् लौकिकात्मशब्दप्रयोगे प्रत्यगात्मैव मुख्य आत्मशब्देन गृह्यते तथेहापि भवितुमर्हति। यत्र तु 'आत्मैवेदमग्र आसीत्' इत्येवमादौ पुरुषविध इत्येवमादि विशेषणान्तरं श्रूयते भवेत् तत्र विशेषवत आत्मनो ग्रहणं, अत्र पुनः परमात्मग्रहणानुगुणमेव विशेषणमप्युत्तरमुपलभ्यते 'स ईक्षत लोकान्नु सृजै' इति 'स इमाँल्लोकानसृजत' इत्येवमादि। तस्मात् तस्यैव ग्रहणमिति न्याय्यं॥

अन्वयादिति चेत् स्यादवधारणात्॥ १७॥

वाक्यान्वयदर्शनात् न परमात्मग्रहणमिति पुनर्यदुक्तं तत्परिहर्तव्यमिति, अत्रोच्यते। स्यादवधारणादिति। भवेदुपपन्नं पर-

---

गामानयल्लोकस्रष्टा तथाऽश्वमानयत् तास्तु गवाश्वप्राप्त्या न तृप्तास्ततः पुरुषशरीरे आनीते ता अब्रुवन् तृप्ताः स्म इति। अयञ्च व्यवहारो लोकस्रष्टुः प्रजापतित्वे लिङ्गमित्याह। अपि चेति। आत्मशब्दस्य चिदात्मनि मुख्यग्राह्यबाधकाभावादुत्तरस्येक्षणादेरनुकूलत्वात् परमात्मग्रहणमिति सिद्धान्तयति। एवं प्राप्त इति। महाभूतसृष्टिपूर्वकं लोकानसृजतेति श्रुतिर्व्याख्येयेति भावः॥

पूर्वपक्षबीजमनूद्य दूषयति। अन्वयादिति। 'आत्मा वा इदमेक

मात्मन इह ग्रहणं, कस्मादवधारणात्। परमात्मग्रहणं हि प्रागुत्पत्तेरात्मैकत्वावधारणमाञ्जसमवकल्पते, अन्यथा ह्यनाञ्जसं तत् परिकल्प्येत। लोकसृष्टिवचनं तु श्रुत्यन्तरप्रसिद्धमहाभूतसृष्ट्यनन्तरमिति योजयिष्यामि, यथा 'तत्तेजोऽसृजत' इत्येतच्छ्रुत्यन्तरप्रसिद्धवियद्वायुसृष्ट्यनन्तरमित्ययूयुजं एवमिहापि। श्रुत्यन्तरप्रसिद्धो हि समानविषयो विशेषः श्रुत्यन्तरेषूपसंहर्तव्यो भवति। योऽप्ययं व्यापारविशेषानुगमस्ताभ्यो गामानयदित्यादिः सोऽपि विवक्षितार्थावधारणानुगुण्येनैव ग्रहीतव्यः, न ह्ययं सकलः कथाप्रबन्धो विवक्षित इति शक्यते वक्तुं, तत्प्रतिपत्तौ पुरुषार्थाभावात्, ब्रह्मात्मत्वं त्विह विवक्षितं। तथा ह्यम्भःप्रभृतीनां लोकानां लोकपालानां चाग्न्यादीनां सृष्टिं शिष्ट्वा करणानि करणायतनञ्च शरीरं उपदिश्य स एव स्रष्टा कथं न्विदं मदृते स्यादिति वीक्ष्य इदं शरीरं प्रविवेशेति दर्शयति 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' इति। पुनश्च 'यदि

एवाग्र आसीत्' इति 'प्रज्ञानं ब्रह्म' इति चोपक्रमोपसंहारस्थात्मब्रह्मश्रुतिभ्यामेकत्वावधारणात्, प्रवेशादिलिङ्गैश्च लोकस्रष्टृत्वादिलिङ्गबाधेन प्रत्यग्ब्रह्म ग्राह्यमिति भावः। स परमेश्वरः। एतमेव सीमानं विदार्य छिद्रं कृत्वा। एतया ब्रह्मरन्ध्राख्यद्वारा। लिङ्गविशिष्टः प्रविष्टवानित्यर्थः। मां विना यदि वागादिभिः स्वस्वव्यापारः कृतः, अथ तदा त्वं क इति त्वंपदार्थं विचार्य स्वयमेतमेव शोधितमात्मानं ब्रह्म ततमं व्याप्ततममपश्यत्। तकारलोपः छान्दसः। प्रज्ञा चिदात्मा। नेत्रं नीयतेऽनेनेति निर्वामकं यस्य तत् प्रज्ञानेत्रं चिदात्मनियम्यमित्यर्थः। उक्तव्याख्याने गुणोपसंहारस्यास्फुटत्वात् न वादसङ्गतिरिति मत्वैव व्याख्यान्तरमाह।

वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितम्' इत्येवमादिना करण-व्यापारविवेचनपूर्वकं 'अथ कोऽहम्' इति वीक्ष्य 'स एतमेव पुरुषं ब्रह्मततममपश्यत्' इति ब्रह्मात्मत्वदर्शनमवधारयति। तथोपरिष्टादपि 'एष ब्रह्मैष इन्द्रः' इत्यादिना समस्तं भेदजातं सह महाभूतैरनुक्रम्य 'सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' इति ब्रह्मात्मत्वदर्शनमेवावधारयति, तस्मादिहात्मगृहीतिरित्यनपवादं। अपरा योजना, आत्मगृहीतिरितरवदुत्तरात्। वाजसनेयके 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' इत्यात्मशब्देनोपक्रम्य तस्यैव सर्वसङ्गविमुक्तत्वप्रतिपादनेन ब्रह्मात्मतामवधारयति, तथा ह्युपसंहरति 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म' इति। छान्दोग्ये तु 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यन्तरेणैवात्मशब्दमुप-क्रम्य 'उदर्के स आत्मा तत्त्वमसि' इति तादात्म्यमुपदिशति। तत्र संशयः, तुल्यार्थत्वं किमनयोराम्नानयोः स्यात् अतुल्यार्थत्वं वेति। अतुल्यार्थत्वमिति तावत् प्राप्तं अतुल्यत्वादाम्नानयोः, न

अपरेति। उदर्क उपसंहारः। सच्छब्दस्यात्मानात्मसाधारण्यात् संशय-माह। तत्रेति। पूर्वपक्षे सत्तासामान्ये ब्रह्मात्मत्वसम्पदुपास्तिः छान्दोग्ये वाजिश्रुतौ निर्गुणविद्येति भेदान्मिथोगुणानुपसंहारः सिद्धान्ते तू-भयत्र निर्गुणविद्यैक्यादुपसंहार इति फलभेदः। पदानां जातौ शक्ति-ग्रहात् सच्छब्दोऽपि सत्त्वजातिवाचीत्युपक्रमस्य निश्चितार्थत्वादसंजात-विरोध्युपक्रमबलेन तादात्म्योपदेशः सम्पत्तिपरतया नेय इति पूर्व-पक्षनिष्कर्षः। पूर्वत्र वाक्यैक्यादर्थादिपरत्वं त्यक्त्वा विद्यैक्यमुक्तं इह तु सदात्मशब्दाभ्यां जात्यात्मवाचिभ्यां उपक्रमभेदाद्वाक्यभेदे सति विद्या-

ह्यानानवैषम्ये सत्यर्थसाम्यं युक्तं प्रतिपत्तुं आम्नानतन्त्रत्वादर्थपरिग्रहस्य। वाजसनेयके चात्मशब्दोपक्रमादात्मतत्त्वोपदेश इति गम्यते, छान्दोग्ये तूपक्रमविपर्ययादुपदेशविपर्ययः। ननु च छन्दोगानामप्यस्ति उदर्के तादात्म्योपदेश इत्युक्तं, सत्यमुक्तमुपक्रमतन्त्रत्वादुपसंहारस्य न तादात्म्यसम्पत्तिः सेति मन्यते, तथा प्राप्तेऽभिधीयते। आत्मगृहीतिः 'सदेव सोम्येदमग्र आसीत्' इत्यत्र। छन्दोगानामपि भवितुमर्हति इतरवत्, यथा 'कतम आत्मा' इत्यत्र। वाजसनेयिनामात्मगृहीतिस्तथैव। कस्मात्, उत्तरात् तादात्म्योपदेशात्। अन्वयादिति चेत्, स्यादवधारणात्। यदुक्तं उपक्रमान्वयात् उपक्रमे चात्मशब्दश्रवणाभावात् नात्मगृहीतिरिति तस्य कः परिहार इति चेत, सोऽभिधीयते स्यादवधारणादिति। भवेदुपपन्नेहात्मगृहीतिः अवधारणात्, तथा हि 'येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातम्' इति एकविज्ञानेन सर्वविज्ञानमवधार्य तत्सम्पिपादयिषया सदेवेत्याह, तच्चात्मगृहीतौ सत्यां सम्पद्यते, अन्यथा हि योऽयं मुख्य आत्मा स न

भेद इति प्रत्युदाहरणसङ्गतिः। न चात्मशब्दो जातिवाचकः व्यात्मव्यक्त्यैक्याज्जात्यभावात् किन्तु सर्वान्तरवस्तुवाचकः कल्पितजातिवाचित्वेऽप्युपक्रमभेदः स्फुट एव सत्तात्मत्वयोर्भेदादिति मन्तव्यं। सिद्धान्तयति। तथेत्यादिना। उपक्रमान्वयादिति उपक्रमाधीनत्वादुपसंहारस्येत्यर्थः। तच्चावधारणं सत्पदेनात्मगृहीतौ सत्यां युज्यत इत्याह। तच्चेति। सदेकमेवेत्यवधारणं, अनेन जीवेनात्मन इति सद्देवताकर्तृको जीवस्यात्मशब्देन परामर्शः, सुप्तौ जीवः सत्तासम्पन्नो भवति, इति कथनं भूय एव मा भगवान् विज्ञापयत्विति परिचोदना। सदितिपदेन

*विज्ञायत इति नैव सर्वविज्ञानं सम्पद्येत। तथा प्रागुत्पत्तेरेकत्वावधारणं जीवस्य चात्मशब्देन परामर्शः, स्वापावस्थायां च तत्स्वभावसम्पत्तिकथनं परिचोदनापूर्वकञ्च पुनः पुनः 'तत्त्वमसि' इत्यवधारणमिति च सर्वमेतत् तादात्म्यप्रतिपादनायामेवावकल्पते न तादात्म्यसम्पादनायां। न चात्रोपक्रमतन्त्रतोपन्यासो न्याय्यः, न ह्युपक्रमे आत्मत्वसङ्कीर्तनमनात्मत्वसङ्कीर्तनं वास्ति, सामान्योपक्रमस्य न वाक्यशेषगतेन विशेषेण विरुध्यते विशेषाकाङ्क्षित्वात् सामान्यस्य, सच्छब्दार्थोऽपि च पर्यालोच्यमानो न मुख्यादात्मनोऽन्यः सम्भवति, अतोऽन्यस्य वस्तुजातस्यारम्भणशब्दादिभ्योऽनृतत्वोपपत्तेः आम्नानवैषम्यमपि नावश्यमर्थवैषम्यमावहति, आहर पात्रं पात्रमाहरेत्यादिष्वर्थसाम्येऽपि तद्दर्शनात्। तस्मादेवंजातीयकेषु वाक्येषु प्रतिपादनप्रकारभेदेऽपि प्रतिपाद्यार्थाभेद इति सिद्धं॥

सत्ताश्रय उच्यते न जातिमात्रं, कर्तृवाचिशतृप्रत्ययान्तत्वात्। तथा चोपक्रमे सत्ताश्रयसामान्योक्तौ कस्साश्रय इत्याकांक्षायां वाक्यशेषादात्मेति निश्चीयत इत्याह। न चेति। सच्छब्दस्यात्मसाधारण्यमुपेत्यात्तं तदपि नास्ति आत्मपदवत् सत्पदस्य व्यक्तिवाचित्वात् व्यक्तिश्च बाधायोग्या चिदात्मैवेति न वाजिछन्दोगयोरुपक्रमवैषम्यमित्याह। सच्छब्देति। वैषम्यमुपेत्याप्याह। आम्नानेति। वाजिवाक्ये त्वमर्थस्य तदर्थपर्यन्तस्य लक्ष्यस्य प्रतिपादनं छान्दोग्यवाक्ये तु तदर्थस्य त्वमर्थपर्यन्तस्य प्रतिपादनमिति प्रकारभेदेऽपि वाक्यार्थैक्यादिद्यैक्यमिति फलितमाह। तस्मादिति॥

---

* विज्ञात इति वर्ध० का० सो०।

कार्याख्यानादपूर्वम् ॥ १८ ॥

छन्दोगा वाजसनेयिनश्च प्राणसंवादे श्वादिमर्यादं प्राणस्यान्नं आम्नाय तस्यैवापो वास आमनन्ति। अनन्तरं च छन्दोगा आमनन्ति 'तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति' इति। वाजसनेयिनश्चामनन्ति 'तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्ति एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते' इति। तत्राचमनमनग्नताचिन्तनं च प्राणस्य प्रतीयते। तत् किमुभयमपि विधीयते उताचमनमेवोतानग्न-

---

कार्याख्यानादपूर्वम्। 'से किमन्नं किं वासः' इति प्राणेन पृष्टा वागादय ऊचुः 'यदिदं किं चाश्वभ्य आकृमिभ्यस्तत्तेऽन्नमापो वासः' इति सर्वं प्राणिभिर्भुज्यमानं यदिदं प्रसिद्धं श्वादिपर्यन्तमन्नं तत् प्राणस्य तवान्नं आप आच्छादनमित्युपासकेन चिन्तनीयमित्यर्थः। शाखाद्वयेऽप्यविशेषश्रुतिमुक्त्वा विशेषश्रुतिभेदमाह। अनन्तरं चेति। तस्मादपां प्राणवस्त्रत्वादशिष्यन्तोऽशनं कुर्वन्तः श्रोत्रिया एतत् कुर्वन्ति। किं तत्, भोजनात् पूर्वं ऊर्ध्वं चाचामन्ति इति यत् तदद्भिः प्राणं परिदधत्याच्छादयन्तीत्यर्थः। पूर्वोत्तराशनसम्बन्धिनोरप्सु प्राणवासस्त्वचिन्तनरूपमनग्नताध्यानं कार्यमिति भावः। तत् तस्मात, इति उक्तार्थं यथा पूर्वं विद्वांसोऽशनात् प्राक् ऊर्ध्वं चाचामन्त एतमेवान्नं प्राणं तत्तेनाचमनेनानग्नमाच्छादितं कुर्वन्तो मन्यन्ते चिन्तयन्ति, तस्मादेवंविदिदानीन्तनोऽप्युपासक एवं कुर्यादिति वाजिश्रुत्यर्थः। अत्रोभयोरप्यपूर्वत्वात् संशयमाह। तत्किमिति। सन्दिग्धतदुपक्रमस्य वाक्यशेषात् निर्णयवदाचामन्ति इति पदस्य विधित्वसन्देहे आचामेदिति वाक्यशेषाद्विधित्वनिर्णय इति दृष्टान्तसंगत्या पूर्वपक्षमाह। किं तावदिति। ज्ञानसाधनोपासनाङ्गविधिविचारात् पादसङ्गतिर्बोध्या। पूर्वपक्षे प्राणवि-

ताचिन्तनमेवेति विचार्यते। किं तावत् प्राप्तमुभयमपि विधीयते इति। कुतः उभयस्याप्यवगम्यमानत्वात्। उभयमपि चैतदपूर्वत्वाद्विधेयं, अथ वाचमनमेव विधीयते, विस्पष्टा हि तस्मिन् विधिविभक्तिः, तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदिति तस्यैव स्तुत्यर्थमनग्नतासङ्कीर्तनमित्येवं प्राप्ते ब्रूमः। नाचमनस्य विधेयत्वमुपपद्यते, कार्याख्यानात्, प्राप्तमेव हीदं कार्यत्वेनाचमनं प्रायत्यार्थं स्मृतिप्रसिद्धमन्वाख्यायते। नन्वियं श्रुतिस्तस्याः स्मृतेर्मूलं स्यात्, नेत्युच्यते विषयनानात्वात्। सामान्यविषया हि स्मृतिः पुरुषमात्रसम्बद्धं प्रायत्यार्थमाचमनं प्रापयति, श्रुतिस्तु प्राणविद्याप्रकरणपठिता तद्विषयमेवाचमनं विदधती विदध्यात्। न च भिन्नविषययोः श्रुतिस्मृत्योर्मूलमूलिभावोऽवकल्पते, नचेयं श्रुतिः प्राणविद्यासंयोग्यपूर्वमाचमनं विधास्यति इति शक्यमाश्रयितुं, पूर्वस्यैव पुरुषमात्रसंयोगिन आचमनस्येह प्रत्यभिज्ञायमानत्वात्, अत एव च नोभयविधानं, उभयविधाने च वाक्यं भिद्येत। तस्मात् प्राप्तमेवाशिशिषतामशितवताञ्च

याङ्गत्वेनापूर्वाचमनं विहितमन्यत्रोपसंहर्तव्यमिति फलं सिद्धान्ते तस्याविधेयत्वात् नाङ्गत्वेनोपसंहार इति विवेकः। उभयविधाने वाक्यभेदः स्यादित्यरुच्या पक्षान्तरमाह। अथ वेति। प्रशस्तं हीदमाचमनं यस्मादनेन प्राणमनग्नं मन्यन्त इति स्तुतिः। प्रसिद्धानुवादेनाप्रसिद्धं विधेयमिति न्यायेन सिद्धान्तयति। एवमिति। प्रयतस्य प्रयत्नवतो भावः प्रायत्यं शुद्धिस्तदर्थमित्यर्थः। स्मृत्या शुद्ध्यर्थं कार्यत्वेन विहिते सकलकर्माङ्गतया प्राप्ताचमनानुवादे नापूर्वमनग्नताध्यानमेव विधीयत इति सूत्रार्थः। स्मार्तमाचमनं श्रुत्या नानूद्यते किं त्वनया

उभयत आचमनमनूद्य 'एतमेव तदनग्नं कुर्वन्तो मन्यन्ते' इति प्राणस्यानग्नताकरणसङ्कल्पोऽनेन वाक्येनाचमनीयास्वप्सु प्राणविद्यासम्बन्धित्वेनापूर्व उपदिश्यते। न चायमनग्नतावाद आचमनस्तुत्यर्थ इति न्याय्यं आचमनस्याविधेयत्वात्, स्वयश्चानग्नतासङ्कल्पस्य विधेयत्वप्रतीतेः। न चैवं सत्येकस्याचमनस्योभयार्थताभ्युपगता भवति, प्रायत्यार्थता परिधानार्थता चेति क्रियान्तरत्वाभ्युपगमात्, क्रियान्तरमेव ह्याचमनं नाम प्रायत्यार्थं पुरुषस्याभ्युपगम्यते, तदीयासु त्वप्सु वासःसङ्कल्पनं नाम क्रियान्तरमेव परिधानार्थं प्राणस्याभ्युपगम्यत इत्यनवद्यं। अपि च 'यदिदं किं चाश्वभ्य आशकुनिभ्य आकृमिभ्य आकीटपतङ्गेभ्यस्तत्तेऽन्नमिति' अत्र तावन्न सर्वान्नाभ्यवहारश्चोद्यत इति शक्यते वक्तुं, अशब्दत्वादशक्यत्वाच्च, सर्वन्तु प्राणस्यान्नमितीयमन्नदृष्टिश्चोद्यते। तस्मादृचर्याचापो वास इत्यत्रापि नापामाचमनं चोद्यते, प्रसिद्धास्त्वेवाचमनीयास्वप्सु परिधानदृष्टिश्चोद्यत इति युक्तं।

श्रुत्या विहितं स्मृत्यानूद्यत इति शङ्कते। नन्विति। श्रुतिस्मृत्योरनयोर्न मूलमूलिभावः भिन्नविषयत्वादिति परिहरति। नेति। 'द्विजो नित्यमुपस्पृशेत्' इत्याद्या स्मृतिः। आचमनान्तरविधिमुपेत्य मूलमूलित्वं निरस्तं सम्प्रति विधिरसिद्ध इत्याह। न चेयं श्रुतिरिति। अत एवेति आचमनविध्यभावादेवेत्यर्थः। अप्सु प्राणवासस्त्वध्यानाख्यः सङ्कल्पः प्राणविद्याङ्गत्वेन विधीयत इत्याह। तस्मादिति। स्वयश्चेति अपूर्वत्वादित्यर्थः। शुद्ध्यर्थं विनियुक्तस्याचमनस्य प्राणाच्छादनार्थत्वं विरुद्धमित्याशङ्क्याह। न चैवं सतीति। आचमनस्याच्छादनार्थत्वमसिद्धमित्यर्थः। किञ्च यथा पूर्ववाक्ये प्राणस्यान्नध्यानमङ्गं विहितं तथात्र वासोध्यानं विधीयते, अन्यथाचमनविधौ पूर्वत्र ध्यानविधि-

न ह्यर्धवैशसं सम्भवति। अपि चाचामन्तीति वर्तमानापदेशित्वा-न्नायं शब्दो विधिक्षमः। ननु मन्यन्त इत्यत्रापि समानं वर्तमाना-पदेशत्वं, सत्यमेव तत्, अवश्यंविधयेत्वमन्यतरस्मिन् वासःकार्या-ख्यानात् अपां वासःसङ्कल्पनमेवापूर्वं विधीयते नाचमनं पूर्व-वद्धि तदित्युपपादितं। यदप्युक्तं विस्पष्टा चाचमने विधिविभक्ति-रिति, तदपि पूर्ववत्त्वेनैवाचमनस्य प्रत्युक्तं, अतएवाचमनस्यावि-धित्सितत्वादेतमेव तदनमनग्नं कुर्वन्तो मन्यन्त इत्यत्रैव काण्वाः पर्यवस्यन्ति नामनन्ति तस्मादेवंविदित्यादि। तस्मात् माध्य-न्दिनानामपि पाठे आचमनानुवादेन *एवंविदामेव प्रकृतप्राण-वासोविधित्वं विधीयत इति प्रतिपत्तव्यं। योऽप्ययमभ्युपगमः क्वचिदाचमनं †विधीयते क्वचिद्वासोविज्ञानमिति सोऽपि न

यत्तरत्र क्रियाविधिरित्यर्द्धवैशसं स्यादित्याह। अपि चेति। भक्षये-दिति शब्दाभावात् आद्यन्नस्य सर्वस्य मनुष्येणोपासकेन भोक्तुमशक्य-त्वाच्च न पूर्ववाक्ये क्रियाविधिरित्यर्थः। इतश्चाचमनमत्र न विधेरि-त्याह। अपि चेति। अनग्नं मन्यन्त इत्यत्र वासस्त्वध्यानमपि न विधेयं दोषसाम्यादिति शङ्कते। नन्विति। उभयोरप्यनुवादत्वे वैफल्या-दवश्यमेकानुवादेनैकं विधेयं तच्च विधेयं वासोध्यानमेव वासःकार्य-स्यानग्नत्वस्याख्यानादपूर्वत्वाच्च इति समाधानार्थः। पूर्ववदिति स्मृत्या प्राप्तमित्यर्थः। आचामेदिति न विधिः किन्तु विण्मूत्रपांसु यष्टव्य इति वदनुवाद इत्यत्र लिङ्गमाह। अत एवेति। तस्मादेवंविदशिष्य-न्नाचामेदशित्वा चाचामेदिति वाक्यस्याविधित्वे काण्वैरपठनं लिङ्ग-मित्यर्थः। तर्हि पाठबलान्माध्यन्दिने आचमनविधिरिति कस्यचि-न्मतं निराकरोति। योऽपीति॥

---

* एवंविन्त्वमेवेति वर्ध० का० से०। † विधीयतामिति का० वर्ध०।

साधुः, आपो वास इत्यादिकाया वाक्यप्रवृत्तेः सर्वत्रैवैकरूप्यात्। तस्माद्वासोविज्ञानमेवेह विधीयते नाचमनमिति न्याय्यं ॥

समान एवञ्चाभेदात्॥ १९ ॥

वाजसनेयिशाखायामग्निरहस्ये शाण्डिल्यनामाङ्किता विद्या विज्ञाता, तत्र गुणाः श्रूयन्ते 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपम्' इत्येवमादयः। तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते 'मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च' इति। तत्र संशयः, किमियमेका विद्याऽग्निरहस्यबृहदारण्यकयोर्गुणोपसंहारस्य उत द्वे इमे विद्ये गुणानुपसंहारश्चेति। किं तावत् प्राप्तं विद्याऽभेदो गुणव्यवस्था चेति,कुतः पौनरुक्त्यप्रसङ्गात्। भिन्नासु हि शाखास्वध्येतृवेदितृभेदात् पौनरुक्त्यपरिहारमालोच्य विद्यैकत्वमध्यवसाय एकत्रातिरिक्ता गुणा इतरत्रोपसंह्रियन्ते प्राणसंवादादिष्वित्युक्तं। एकस्यां पुनः शाखायामध्येतृवेदितृभेदाभावादशक्यपरिहारे पौन-

---

समानः। एवञ्चाभेदात् शाण्डिल्येन दृष्टा तन्नाम्नाऽङ्किता, अन्तर्हृदये व्रीह्यादिवत् सूक्ष्मं तिष्ठतीत्यर्थः। अभ्यासप्रत्यभिज्ञानाभ्यां संशयमाह। तत्रेति। गुणानुपसंहारोपसंहारौ पूर्वोत्तरपक्षयोः फलं, पूर्वत्र प्राप्ताचमनानुवादेनानग्नताध्यानविधिवत्तः इह त्वेकशाखायां विप्रकृष्टदेशस्थवाक्ययोरेकस्य विधित्वमन्यस्यानुवादत्वमित्यनिश्चयात् द्वयोरपि विद्याविधित्वमिति प्रत्युदाहरणेन पूर्वपक्षयति। किं तावदिति। यत्तु पुनरुक्तं

ह्यत्वेन विप्रकृष्टदेशस्यैका विद्या भवितुमर्हति। न चानेक-माम्नानं विद्याविधानार्थं अपरं गुणविधानार्थमिति विभागः सम्भवति। तदा व्यतिरिक्ता एव गुणा इतरत्रेतरत्र चाम्नायेरन्, असमानाः समाना अपि तु उभयत्राम्नायन्ते मनोमयत्वा-दयः, तस्मान्नान्योन्यगुणोपसंहार इत्येवं प्राप्ते ब्रूमहे, यथा भि-न्नासु शाखासु विद्यैकत्वं गुणोपसंहारश्च भवति एवमेकस्यामपि शाखायां भवितुमर्हति उपास्याभेदात्, तदेव हि ब्रह्म मनोमय-त्वादिगुणकमुभयत्राप्युपास्यमभिन्नं प्रत्यभिजानीमहे, उपास्यञ्च रूपं विद्यायाः नच विद्यमाने रूपाभेदे विद्याभेदमध्यवसातुं शक्नुमः, नापि विद्याऽभेदे गुणव्यवस्थानं। ननु पौनरुक्त्यप्रसङ्गात् विद्याभेदोऽध्यवसितः, नेत्युच्यते अर्थविभागोपपत्तेः, एकं ह्याम्नान विद्याविधानार्थं अपरं गुणविधानार्थं इति न किञ्चिन्नोपप-द्यते। नन्वेवं सति यदपठितमग्निरहस्ये तदेव बृहदारण्यके पठि-तव्यं 'स एष सर्वस्येशानः' इत्यादि। यत्तु पठितमेव मनोमयत्वादि तन्न पठितव्यं, नैष दोषः। तद्बलेनैव प्रदेशान्तरपठितविद्या-

---

तद्विद्यान्तरमिति न व्याप्तिः शाण्डिल्यशाग्न्यादिविद्यासु व्यभिचारादित्या-शङ्क्य शाखाभेदे पुनरुक्तिरसिद्धेत्युक्तमित्याह। यथा भिन्नास्विति। यथा-ऽग्निहोत्रवाक्यं कर्मणि विधिः, 'दध्ना जुहोति' इति वाक्यं गुणविधिस्त-थात्राप्यस्तु न विद्याभेद इत्याशङ्क्याह। न चानेकमिति। उक्तगुणानां पुन-रुक्तिर्वृथा स्यात् अतोऽभ्यासाद्विद्याभेदः प्रयाजभेदवदिति भावः, उक्त-गुणोक्तिर्न वृथा कतिपयगुणविशिष्टोपास्याभेदप्रत्यभिज्ञानार्थत्वादत उपास्यरूपाभेदात् भिन्नशाखास्विव समानशाखायामपि विद्यैक्यमिति

प्रत्यभिज्ञानात्। समानगुणाम्नानेन हि विप्रकृष्टदेशां शाण्डिल्य-विद्यां प्रत्यभिज्ञाप्य तस्यामीशानत्वाद्युपदिश्यते, अन्यथा हि कथं तस्यामयं गुणविधिरभिधीयते। अपि चाप्राप्तांशोपदेशे-नार्थवति वाक्ये सञ्जाते प्राप्तांशपरामर्शस्य नित्यानुवादतया-प्युपपद्यमानत्वात्, न तद्बलेन प्रत्यभिज्ञोपेक्षितुं शक्यते। तस्मा-दत्र समानायामपि शाखायां विद्यैकत्वं गुणोपसंहारस्त्वेत्युप-पन्नं ॥

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

बृहदारण्यके 'सत्यं ब्रह्म' इत्युपक्रम्य 'तद्यत्तत् सत्यमसौ स आदित्यो य एष तस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषः' इति तस्यैव सत्यस्य ब्रह्मणोऽधिदैवतमध्यात्मञ्चायतनविशेष-मुपदिश्य व्याहृतिशरीरत्वं च सम्पाद्य द्वे उपनिषदावुपदिश्येते, तस्योपनिषदहरित्यधिदैवतं, तस्योपनिषदहमित्यध्यात्मं। तत्र संशयः किमविभागेनैवोभे अप्युपनिषदावुभयत्रानुसन्धातव्ये

सिद्धान्तसूत्रं योजयति। यथेति। सौत्रस्तुकारोऽप्यर्थो व्याख्यातः। यत्र बहवो गुणाः श्रुतास्तत्र प्रधानविधिरन्यत्र तदनुवादेन गुणविधिरिति निश्चयार्दिमरहस्ये प्रधानविधिवदुत्तरत्र गुणविधिरिति भावः ॥

सम्बन्धादेवमन्यत्रापि। सद्भूतत्रयं त्यदाख्याकाशात्मकं, सत्यं परोक्ष-भूतात्मकं हिरण्यगर्भाख्यं ब्रह्मोपक्रम्य, तदुक्तं यत्सत् त्यं तत् स योऽसा-वादित्यः किं मण्डलं न तत्र स्थाने पुरुषः करणात्मकः स एवाध्यात्म-मक्षिस्थानस्थ इत्युपदिश्य तस्य भूरिति शिरो भुव इति बाहुः स्वरिति पादाविति व्याहृतिरूपं शारीरकमुक्त्वा द्वे उपनिषदौ रहस्यदेवता-नामनी उपदिश्येते तस्यादित्यमण्डलस्थस्याहरिति नाम प्रकाशकत्वात्

उत विभागेनैकाधिदैवतमेकाध्यात्ममिति। तत्र सूत्रेणैवोपक्रमते यथा शाण्डिल्यविद्यायां विभागेनाप्यधीतायां गुणोपसंहार उक्तः एवमन्यत्राप्येवंजातीयके विषये भवितुमर्हति एकविद्याभिसम्बन्धात्, एका हीयं सत्यविद्याऽधिदैवमाध्यात्मं चाधीता उपक्रमाभेदात् व्यतिषक्तपाठाच्च, कथं तस्यामुदितो धर्मस्तस्यामेव न स्यात्, यो ह्याचार्ये कश्चिदनुगमादिराचारश्चोदितः सङ्ग्रामगते अरण्यगते च तुल्यवदेव भवति। तस्मादुभयोरप्युपनिषदोरुभयत्र प्राप्तिरिति, एवं प्राप्ते प्रतिविधत्ते॥

न वा विशेषात्॥२१॥

नैवोभयोरुभयत्र प्राप्तिः, कस्माद्विशेषात्, उपासनस्थानविशेषोपनिबन्धादित्यर्थः। कथं स्थानविशेषोपनिबन्ध इति, उच्यते

तस्यान्निस्थस्याहमिति नाम प्रत्युक्तादिति इदं नामद्वयं विषयस्तत्र नामिनः सत्याख्यस्य ब्रह्मण एकत्वात् स्थानभेदोक्तेश्च संशयमाह। तत्रेति। पूर्वपक्षे प्रतिस्थानं नामद्वयानुष्ठानं सिद्धान्ते यथा प्रत्येकैकनामानुष्ठानमिति फलं। दृष्टान्तसङ्गत्या पूर्वपक्षसूत्रं व्याचष्टे। यथेति। यथा विद्यैक्यादुपसंहार उक्तः एवमन्यत्राप्येकविद्यायामुपसंहारो भवितुमर्हति इत्यर्थः। सत्यं ब्रह्मेत्युपक्रमाभेदस्तावेतावच्यादित्यपुरुषावन्योन्यस्मिन् प्रतिष्ठितौ, आदित्यरश्मीनाश्चक्षुषि चक्षुषश्चादित्ये प्रतिष्ठानादिति व्यतिषक्तपाठो मिथः संश्लेषपाठस्ताभ्यां विद्यैक्यसिद्धिः, विद्यैक्येऽपि किं स्यात् तत्राह। कथमिति। विद्यैक्येऽपि स्थानभेदादुपनिषदोरसङ्करः स्यादित्याशङ्कां दृष्टान्तेन परिहरति। यो हीति॥

नामैक्यात् नामसङ्करो युक्तः, तथा चाक्षिस्थोऽहरिति नामवान् सत्यब्रह्मत्वादादित्यस्थाहरितिनामवदिति प्राप्ते सिद्धान्तसूत्रं योजयति।

'य एष एतस्मिन्मण्डले पुरुषः' इति ह्याधिदैविकं पुरुषं प्रकृत्य तस्योपनिषदहरिति श्रावयति 'योऽयं दक्षिणेऽक्षन् पुरुषः' इति चाध्यात्मिकं पुरुषं प्रकृत्य तस्योपनिषदहमिति तस्येति चैतत् सन्निहितालम्बनं सर्वनाम तस्मादायतनविशेषव्यपाश्रयेणैवैते उपनिषदावुपदिश्येते कुत उभयोरुभयत्र प्राप्तिः। नन्वेक एवायमधिदैवतमध्यात्मञ्च पुरुषः, एकस्यैव सत्यस्य ब्रह्मण आयतनद्वयप्रतिपादनात्। सत्यमेवमेतत्, एकस्याऽपि त्ववस्थाविशेषोपादानेनैवोपनिषद्विशेषोपदेशात् तदवस्थस्यैव सा भवितुमर्हति। अस्ति चायं दृष्टान्तः सत्यप्याचार्यस्वरूपानपाये यदाचार्यस्यासीनस्यानुवर्तनमुक्तं न तत्तिष्ठतो भवति, यच्च तिष्ठत उक्तं न तदासीनस्येति। ग्रामारण्ययोस्त्वाचार्यस्वरूपानपायात् तत्स्वरूपानुबद्धस्य च धर्मस्य ग्रामारण्यकृतविशेषाभावादुभयत्र तुल्यवद्भाव इत्यदृष्टान्तः सः। तस्माद्व्यवस्थाऽनयोरुपनिषदोः॥

दर्शयति च॥ २२॥

अपि चैवंजातीयकानां धर्माणां व्यवस्थितिलिङ्गदर्शनं

स वेति। नाम्नोरुपासनस्थानविविक्तसम्बन्धित्वादित्यर्थः। तस्योपनिषदहरहमिति च वाक्यद्वयेन तच्छब्दपरामृष्टयोः सन्निहितस्थानविशिष्टयोः पुरुषयोर्नामसम्बन्धपरेणोपसंहारानुमानं बाध्यमिति भावः। विशिष्टैक्यान्नामसङ्कर इत्याशङ्क्य स्थानभेदेन विशिष्टपुरुषभेदात् नामव्यवस्थामाह। नन्वित्यादिना। विशिष्टसम्बन्धे दृष्टान्तमाह। अस्तीति। प्रतिदृष्टान्तस्य स्वरूपसम्बन्धित्वात् विशिष्टे ध्येये प्रकृते दृष्टान्तत्वं नास्ति इत्याह। ग्रामेति॥

भवति 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' इति। तस्यैतस्य तदेव रूपं यदमुष्य रूपं कथमस्य लिङ्गत्वं तदुच्यते, अक्ष्यादित्यस्थानभेदभिन्नान् धर्मानन्योन्यस्मिन्ननुपसंहार्यान् पश्यन्निहातिदेशेनादित्यपुरुषगतान् रूपादीनक्षिपुरुष उपसंहरति 'तस्यैतस्य तदेव रूपम्' इत्यादिना। तस्माद्व्यवस्थिते एवैते उपनिषदाविति निर्णयः॥

सम्भृतिद्युव्याप्त्यपि चातः॥२३॥

'ब्रह्मज्येष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान' इत्येवं राणायनीयानां खिलेषु वीर्यसम्भृतिद्युनिवेशप्रभृतयो ब्रह्मणो विभूतयः पठ्यन्ते। तेषामेव चोपनिषदि शाण्डिल्यविद्याप्रभृतयो ब्रह्मविद्याः पठ्यन्ते, तासु ब्रह्मविद्यासु ता ब्रह्मविभूतय उपसंह्रियेरन् न वेति विचारणायां ब्रह्मसम्बन्धादुपसंहारप्राप्तौ पठति, सम्भृतिद्युव्याप्तिप्रभृतयो विभूतयः शाण्डिल्यविद्याप्रभृतिषु नोपसंहर्तव्याः, अत एव चायतनविशेषयोगात्। तथा हि

उक्तनामव्यवस्थायामतिदेशो लिङ्गमित्याह। दर्शयति चेति। विद्यैक्यादेवोपसंहारसिद्धावतिदेशो वृथा स्यात् तस्मादेकविद्यायामपि स्थानभेदेनोक्तगुणानां विनातिदेशमनुपसंहार इति सिद्धं॥

सम्भृतिद्युव्याप्त्यपि चातः। ब्रह्मैव ज्येष्ठं कारणं येषां तानि ब्रह्मज्येष्ठानि, निलोपश्छान्दसः, वीर्याणि पराक्रमविशेषा आकाशोत्पादनादयः, तानि च वीर्याणि सम्भृतानि निर्विघ्नं सम्बद्धानि, सर्वनियन्तुः कार्ये विघ्नकर्तुरसत्त्वात्। तच्च ज्येष्ठं ब्रह्माग्रे देवाद्युत्पत्तेः प्रागेव दिवं स्वर्गमाततान व्याप्तवत् सदा सर्वव्यापकमित्यर्थः। सर्वप्राथम्यं स्पर्धा-

शाण्डिल्यविद्यायां हृदयायतनत्वं ब्रह्मण उक्तं 'एष आत्मान्तर्हृदयः' इति तद्वदेव दहरविद्यायामपि 'दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः' इति। उपकोशलविद्यायान्तु अक्ष्यायतनत्वं 'य एषोऽक्षिणि पुरुषो दृश्यते' इति। एवं तत्र तत्र तत्तदाध्यात्मिकमायतनमेतासु विद्यासु प्रतीयते, आधिदैविक्यस्त्वेता विभूतयः सम्भृतिद्युव्याप्तिप्रभृतयः, तासां कुत एतासु प्राप्तिः। नन्वेतास्वप्याधिदैविक्यो विभूतयः श्रूयन्ते 'ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्य एष उ एव भामनीरेष हि सर्वेषु भूतेषु भाति यावान् वायमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' इत्येवमाद्याः। सन्ति चान्या आयतनविशेषहीना अपि ब्रह्मविद्याः षोडशकलाद्याः, सत्यमेवैतत् तथाप्यत्र विद्यते विशेषः सम्भृत्याद्यनुपसंहारहेतुः,

---

मर्हत्वमिति वाक्यशेषस्था गुणाः प्रभवतिपदग्राह्याः। खिलेष्विति विधिनिषेधशून्यवाक्येष्वित्यर्थः। ब्रह्मसम्बन्धाद्विद्याभेदभानाच्च संशयमाह। तास्विति। अनारभ्याधीतब्रह्मविभूतीनां ब्रह्मसम्बन्धेन सर्वब्रह्मविद्यासु प्रत्यभिज्ञानादुपसंहार इति पूर्वपक्षः। सिद्धान्तमाह। सम्भृतीति। सम्भृतिश्च द्युव्याप्तिश्च सम्भृतिद्युव्याप्ति तदपि सर्वत्र नोपसंहर्तव्यमुपनिषदोरिव व्यवस्थापकविशेषयोगादिति सूत्रयोजना। आध्यात्मिकायतनविशेषयुक्तविद्यास्वाधिदैविकविभूतीनां प्रत्यभिज्ञाने हेत्वभावात् न प्राप्तिरित्युक्ते हेतुं शङ्कते। नन्वेतास्विति। आधिदैविकत्वसाम्यादाध्यात्मिकायतनहीनत्वसाम्याद्वा तत्तद्विद्यासु सम्भृत्यादीनां प्राप्तिरिति शङ्कार्थः। उक्तहेतुद्वयं न गुणप्रापकमधिदैविकविद्यानां शाण्डिल्यदहरादीनां आयतनहीनविद्यानाञ्च मिथो गुणसाङ्कर्यप्रसङ्गात्, तस्मात् कतिपयसमानगुणविशिष्टोपास्यरूपैक्यं विद्यैक्य-

समानगुणाम्नानेन हि प्रत्युपस्थापितासु विप्रकृष्टदेशास्वपि विद्यासु विप्रकृष्टदेशगुणा उपसंह्रियेरन्निति युक्तं, सम्भृत्यादयस्तु शाण्डिल्यादिवाक्यगोचराश्च गुणाः परस्परव्यावृत्तस्वरूपत्वात् न प्रदेशान्तरवर्तिविद्याप्रत्युपस्थापनक्षमाः। न च ब्रह्मसम्बन्धमात्रेण प्रदेशान्तरवर्तिविद्याप्रत्युपस्थापनमुच्यते, विद्याभेदेऽपि तदुपपत्तेः, एकमपि ब्रह्म विभूतिभेदैरनेकैरनेकधोपास्यत इति स्थितिः, परोवरीयस्त्वादिवद्भेददर्शनात्। तस्मात् वीर्यसम्भृत्यादीनां शाण्डिल्यविद्यादिष्वनुपसंहार इति॥

पुरुषविद्यायामिव चेतरेषामनाम्नानात्॥ २४॥

अस्ति ताण्डिनां पैङ्गिनाञ्च रहस्यब्राह्मणे पुरुषविद्या, तत्र पुरुषो यज्ञः कल्पितः, तदीयमायुस्त्रेधा विभज्य सवनत्रयं कल्पितं, अशिशिषादीनि च दीक्षादिभावेन कल्पितानि, अन्ये

मावश्चद्गुणप्राप्तिहेतुस्तदभावात् न प्राप्तिरिति परिहरति। सत्यमित्यादिना। स्थानविशिष्टभेदात् नाम्नोर्थवस्थावत् सम्भृत्यादिगुणविशिष्टस्य ब्रह्मणः शाण्डिल्यादिविद्योक्तगुणविशिष्टब्रह्मणश्च मिथो भेदेन रूपभेदात् सम्भृत्यादीनां नोपसंहार इत्युक्तन्यायातिदेशत्वादस्य न संगत्याद्यपेक्षा यथैकस्मिन्नुद्गीथे परोवरीयस्त्वादिगुणोपास्तेर्हिरण्यश्मश्रुत्वाद्युपास्तिर्भिद्यते तथैकस्मिन्नपि ब्रह्मणि विद्याभेदोपपत्तेः ब्रह्मप्रत्यभिज्ञा न गुणप्रापिकेत्याह। परोवरीयस्त्वादिवदिति। तस्मात् सम्भृत्यादिगुणविशिष्टविद्यान्तरविधिरिति सिद्धं॥

पुरुषविद्यायां छान्दोग्यस्थां विद्यामाह। अस्तीति। 'पुरुषो वा यज्ञस्तस्य यानि चतुर्विंशति वर्षाणि तत्प्रातःसवनमथ यानि चतुश्चत्वारिं-

च धर्मास्तत्र समधिगताश्चाशीर्मन्त्रप्रयोगादयः । तैत्तिरीयका अपि कञ्चित् पुरुषयज्ञं कल्पयन्ति 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी' इत्येतेनानुवाकेन । तत्र संशयः किमितरत्रोक्ताः पुरुषयज्ञस्य धर्मास्ते तैत्तिरीयकेषूपसंहर्तव्याः किं वा नोपसंहर्तव्या इति। पुरुषयज्ञत्वाविशेषादुपसंहारप्राप्तावाचक्ष्महे नोपसंहर्तव्या इति, कस्मात् तद्रूपप्रत्यभिज्ञानाभावात् । तदाहाचार्यः पुरुषविद्यायामिवेति । यथैकेषां शाखिनां ताण्डिनां पैङ्गिनां च पुरुषविद्यायामाम्नानं नैवमितरेषां तैत्तिरीयाणामाम्नानमस्ति, तेषां ह्रीतरविलक्षणमेव यज्ञसम्पादनं दृश्यते, पत्नीयजमानवेदवेदिवर्हिर्यूपाज्यपशृत्विगाद्यनुक्रमणात् । यदपि सवनसम्पादनं तदपीतरविलक्षणमेव 'यत्सायं प्रातर्मध्यन्दिनञ्च तानि सवनानि' इति । यदपि किञ्चिन्मरणावभृथत्वादिसामान्यं तदप्यल्पीयस्त्वाद्भूयसा वैलक्षण्येनाभिभूयमानं न प्रत्यभिज्ञापनक्षमं । न च तैत्तिरीयके पुरुषस्य

शृद्वर्षाणि तन्माध्यन्दिनं सवनमथ यान्यष्टाचत्वारिंशद्वर्षाणि तत्तृतीयं सवनम्' इति यज्ञसाम्यार्थं सवनत्रयं कल्पितं,'स यदशिशिषति यत्पिपासति यत् न रमते ता दीक्षा अथ यदश्नाति यत्पिवति यद्रमते ता उपसदः अथ यद्धसति यज्जक्षति यन्मैथुनं चरति तानि स्तुतशस्त्राणि अथ यत्तपोदानादि सा दक्षिणा मरणमेवावभृथः वस्वादिरूपा मे प्राणा इदं सवनत्रयं यावदायुरनुसन्तनुते' इत्याशीः, 'अक्षितमस्यच्युतमसि प्राणसंशितमसि' इति मन्त्रत्रयप्रयोगः । षोडशाधिकशतवर्षजीवित्वं फलमिति दर्शितं। संशयार्थं शाखान्तरीयपुरुषविद्यामाह। तैत्तिरीयका इति । अत्र विदुषो यज्ञस्येति षष्ठ्याः समानाधिकरण-

यज्ञत्वं श्रूयते विदुषो यज्ञस्येति हि न चैते समानाधिकरणे षष्ठ्यौ विद्वानेव यो यज्ञस्तस्येति। न हि पुरुषस्य मुख्यं यज्ञत्वमस्ति व्यधिकरणे त्वेते षष्ठ्यौ विदुषो यो यज्ञस्तस्येति। भवति हि पुरुषस्य मुख्यो यज्ञसम्बन्धः, सत्याञ्च गतौ मुख्य एवार्थ आश्रयितव्यो न भाक्तः। आत्मा यजमान इति च यजमानत्वं पुरुषस्य निर्ब्रुवन् वैयधिकरण्येनैवास्य यज्ञसम्बन्धं दर्शयति। अपि च तस्यैवंविदुष इति सिद्धवदनुवादश्रुतौ सत्यां पुरुषस्य यज्ञभावमात्मादीनाञ्च यजमानादिभावं प्रतिपित्समानस्य वाक्यभेदः स्यात्। अपि च ससंन्यासामात्मविद्यां पुरस्तादुपदिश्यानन्तरं तस्यैवंविदुष इत्याद्यनुक्रमणं पश्यन्तः पूर्वशेष एवैष आम्नायो न स्वतन्त्र इति प्रतीमः। तथा चैकमेव फलं उभयोरप्यनुवाक-

---

वैयधिकरण्यानिश्चयात् संशयमाह। तत्रेति। उपसंहारानुपसंहारा-वेव फलं। पूर्वत्रासाधारणगुणप्रत्यभिज्ञानाभावात् सम्भृत्यादौ विद्याभेद उक्तः इह त्वसाधारणावभृथगुणविशिष्टपुरुषयज्ञरूपैक्यप्रत्यभिज्ञानात् विद्यैक्यमिति प्रत्युदाहरणेन प्राप्ते सिद्धान्तयति। नोपसंहर्तव्या इति। 'तस्यैवंविदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदिः शिखा हृदयं यूपः कामः आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मूलो ब्रह्मा' इति बहुतरधर्मवैलक्षण्यात् न रूपैक्यप्रत्यभिज्ञेत्यर्थः। वेदः कुशमुष्टिः शमयिता दमो दक्षिणेत्यन्वयः। किञ्च छान्दोग्ये त्रिधाविभक्तायुषि सवनत्वकल्पना अत्र तु सायम्प्रातरादाविति वैरूप्यमाह। यदपीति। यन्मरणं तदवभृथो यद्गमते तदुपसद इति तित्तिरिश्रुतौ सारूप्यमपि भातीत्यत आह। यदपि किञ्चिदिति। गतास्वयोस्तु-ष्यात्त्वसारूप्यादिदं सारूप्यं नैक्यप्रयोजकमित्यर्थः। किञ्च छान्दोग्ये

योऽह्यलभामहे 'ब्रह्मणो महिमानमाप्नोति, इति। इतरेषा-न्त्वनन्यशेषः पुरुषविद्याम्नायः। आयुरभिवृद्धिफलो ह्यसौ 'एष ह षोडशवर्षशतं जीवतीति य एवं वेद' इति समभिव्याहारात्। तस्माच्छाखान्तराधीतानां पुरुषविद्याधर्माणामाशी-र्मन्त्रादीनामप्राप्तिस्तैत्तिरीयके॥

वेधाद्यर्थभेदात्॥ २५॥

अस्याथर्वणिकानामुपनिषदारम्भे मन्त्रसमाम्नायः 'सर्वं प्र-विध्य हृदयं प्रविध्य धमनीः*प्रवृज्य शिरोऽभिप्रवृज्य त्रिधा विपृ-क्तः' इत्यादिः। स ताण्डिनां 'देव सवितः प्रसुव यज्ञम्' इत्यादिः।

पुरुषयज्ञयोरैक्यं श्रुतं अत्र तु भेद इति वैरूप्यान्तरमाह। न चेति। यद्यपि निषादस्थपतिन्यायेन सामानाधिकरण्यं षष्ठ्यर्युक्तं तथाप्य-प्रसिद्धैक्यकल्पनागौरवाद्यज्ञस्यात्मेति भेदोक्तेरेकस्यैव यज्ञत्वयजमा-नत्वविरोधादात्मविदो यो यज्ञः प्रसिद्धस्तस्येति वैयधिकरण्यमेव युक्तं। किञ्च विद्वत्सम्बन्धियज्ञरूपविशेष्यानुवादेन विद्वदङ्गैरङ्गसम्प-द्विधावेकवाक्यता प्रतीयते तस्यां सत्यां विशेष्यस्याङ्गानां च पृथग्वि-धिवादिमतत्व वाक्यभेददोषः स्यादित्यर्थः। किञ्च सत्यादिभ्यो न्यास एवापरे च यदिति संन्यासमुक्त्वा सर्वैः सर्वमिदं जगदित्येवं तमात्मानं ज्ञात्वा भूयोऽवभृथमुपयाति विद्वानिति संन्यासाध्यायात्मविद्यां पुरस्तात् प्राजापत्यानुवाके उपदिश्यानन्तरानुवाके तस्यैवंविदुष इत्युक्तात्म-विद्यानुवादेन प्रसंशार्थत्वेन तच्छेषतया यज्ञसम्पत्तिः क्रियते फलै-क्यश्रुतेः, छन्दोगानां तु स्वतन्त्रविद्याविधिरित्याह। अपि च ससं-न्यासामिति। चिन्ताफलमाह। तस्मादिति॥

वेधाद्यर्थभेदात्। देवतामभिचारकर्ता प्रार्थयते। सर्वमिति। हे [illegible] ते मद्रिपोः सर्वमङ्गं प्रविध्य विदारय विशेषतस्त्व हृदयं भिन्धि धमनीः

---

* प्रवृश्चेति वर्ध० का०।

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥

'त्रयो धर्मस्कन्धाः' इत्यादयो ये शब्दा ऊर्द्धरेतसामाश्रमाणां सद्भावायोदाहृताः न ते तत्प्रतिपादनाय प्रभवन्ति, यतः परामर्शमेषु शब्देष्वाश्रमान्तराणां जैमिनिराचार्य्यो मन्यते न विधिं, कुतः, न ह्यत्र लिङादीनामन्यतमश्चोदनाशब्दोऽस्ति। अर्थान्तरपरत्वञ्चैतेषां प्रत्येकमुपलभ्यते, त्रयो धर्मस्कन्धा इत्यत्र तावद्यज्ञोऽध्ययनं दानमिति प्रथमः, तप एव द्वितीयः, ब्रह्मचार्य्याचार्य्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्य्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्तीति परामर्शपूर्वकमाश्रमाणामनात्यन्तिकफलत्वं सङ्कीर्त्यात्यन्तिकफलतया ब्रह्मसंस्थता स्तूयते 'ब्रह्मसंस्थोऽमृतत्वमेति' इति। ननु परामर्शेऽप्या-

१

पूर्वाधिकरणावान्तरसङ्गत्याक्षेपलक्षणां सङ्गतिं विवक्षन्नाक्षिपति। परामर्शमिति। ऊर्द्धरेतःशब्दितं पारिव्राज्यं नानुष्ठेयमनुष्ठेयं वेति भ्रान्तिप्रमाणमूलत्वाभ्यां सन्देहे पूर्वपक्षयति। त्रय इति। अत्र शास्त्रीयसम्यग्ज्ञानस्यान्तरङ्गसाधनप्रसङ्गादनुष्ठेयमुच्यत इति स्फुटा पादादिसङ्गतिः। पूर्वपक्षे पारिव्राजके विद्याप्रसिद्धेर्विभ्रमत्वात्तस्याः न स्वातन्त्र्यसिद्धिः, सिद्धान्ते तस्यास्तत्र प्रामाणिकत्वात् तत्सिद्धिरिति सोक्तत्य परामर्शं जैमिनिरिति व्याख्याय हेत्वाकाङ्क्षायामचोदनेति हेतुत्वेन व्याचष्टे। कुत इति। पूषा प्रपिष्टभाग इतिवत् कल्प्यतां विधिरित्याशङ्क्य ब्रह्मसंस्थतादिविधिपरत्वात् वाक्यजातस्य नैवमिति हिशब्दार्थमाह। अर्थान्तरेति। तत्र ब्रह्मसंस्थतादिविधिपरत्वं त्रय इत्यादिवाक्यस्य साधयति। त्रय इत्यादिना। अन्यत्र विहितस्यान्यत्र परामर्शादन्यत्र विधिकल्पनादिहैव कल्पना लघीयसीत्याशङ्क्य ननु इति। परामर्शस्यानुवादाख्यस्य पुरावादापेक्षत्वात् तदभावादाश्रमप्रती-



श्रमा गम्यन्ते एव, सत्यं गम्यन्ते, स्मृत्याचाराभ्यान्तु तेषां प्रसिद्धिर्न प्रत्यक्षायाः श्रुतेः, अतश्च प्रत्यक्षश्रुतिविरोधे सत्य-मादरणीयास्ते भविष्यन्त्यनधिकृतविषया वा। ननु गार्हस्थ्य-मपि सहैवोर्द्धरेतोभिः परामृष्टं यज्ञोऽध्ययनं दानमिति प्रथम इति, सत्यमेवं तथापि यो गृहस्थं प्रत्येवाग्निहोत्रादीनां कर्मणां विधानात् श्रुतिप्रसिद्धमेव तदस्तित्वं, तस्मात् स्तुत्यर्थ एवायं परामर्शो न चोदनार्थः। अपि चापवदति हि प्रत्यक्षा श्रुतिराश्रमान्तरं 'वीरहा वा एष देवानां योऽग्निमुद्वासयते आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीर्नापु-त्रस्य लोकोऽस्तीति तत् सर्वे पशवो विदुः' इत्येवमाद्या। तथा 'ये चेमेऽरण्ये श्रद्धातप इत्युपासते तपःश्रद्धे ये ह्युपवसन्त्यरण्ये'

तिमङ्गीकरोति। सत्यमिति। तर्हि तद्विषयश्रुतेरन्यत्राश्रितत्वात् गौरवमित्याशङ्क्याह। स्मृतीति। तयोरपि श्रुतिमूलत्वात् विधियुक्त-श्रुतिकल्पनादिहैव तत्कल्पने लाघवमित्याशङ्क्याह। अतश्चेति। प्रत्यक्षश्रुतिर्यावज्जीवादिश्रुतिः। निरालम्बनत्वात् कथमपि सालम्बनत्वं युक्तमिति कल्पनान्तरमाह। अनधिकृतेति। येऽन्धादयो नित्यादि-कर्मस्वनधिकृतास्तद्विषया आश्रमान्तरस्मृतयस्तदाचाराश्चेत्यर्थः। आ-श्रमान्तराणां परामर्शेऽपि गार्हस्थ्यवत् प्रामाणिकत्वसिद्धेरनुष्ठेयतेति शङ्कते। नन्विति। परामर्शसाम्यमङ्गीकरोति। सत्यमिति। तर्हि प्रामाणिकत्वे नानुष्ठेयत्वमपि तुल्यं स्यादित्याशङ्क्य न परामर्शमात्रात् गार्हस्थ्यसिद्धिरपि तु प्रत्यक्षश्रुतिविधानादिति विशेषमाह। तथा-पीति। गार्हस्थ्यमेकमेव श्रौतमिति स्थिते ब्रह्मसंस्थतास्तुत्यर्थमेव त्रय इत्याद्याश्रमान्तरवचनमित्युपसंहरति। तस्मादिति। निन्द्यमानत्वात् चाश्रमान्तरमननुष्ठेयमित्याह। अपि चेति। तत्र सूत्रावयवं योज-

इति च देवयानोपदेशो नाश्रमान्तरोपदेशः। सन्दिग्धश्चाश्रमान्तराभिधानं 'तप एव द्वितीयः' इत्येवमादिषु। तथा 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इति लोकसंस्तवोऽयं न पारिव्राज्यविधिः। ननु ब्रह्मचर्य्यादेव प्रव्रजेदिति विस्पष्टमिदं प्रत्यक्षं पारिव्राज्यविधानं जावालानां। सत्यमेवमेतत् अनपेक्ष्य त्वेतां श्रुतिमयं विचार इति द्रष्टव्यं॥

अनुष्ठेयं वादरायणः साम्यश्रुतेः॥१९॥

अनुष्ठेयमाश्रमान्तरं वादरायण आचार्य्यो मन्यते, वेदेषु श्रवणादग्निहोत्रादीनाञ्चावश्यानुष्ठेयत्वात्तद्विरोधादनधिकृतानुष्ठेयमाश्रमान्तरमिति हीमां मतिं निराकरोति गार्हस्थ्य-

---

यति। अपवदतीति। तत्र त्रय इत्यादिवाक्यस्यान्यार्थत्वमुक्त्वा वाक्यान्तरस्यापि तद्वदेवार्थान्तरपरत्वमाह। तथेति। ते विरजामभिसम्भवन्ति सूर्य्यद्वारेण ते विरजाः प्रयान्तीति वाक्यशेषाद्देवयानोक्तिपरं तदित्यर्थः। आश्रमवाचकशब्दाभावाच्चार्थान्तरपरत्वमित्याह। सन्दिग्धं चेति। प्रव्रजन्तीत्याश्रमवाचिशब्ददृष्टेरनुष्ठेयं पारिव्राज्यं इत्याशङ्क्याह। तथेति। एवं विशिष्टोऽयमात्मलोको येनेदं साक्षात्कर्तुमिच्छन्तो दुरनुष्ठेयामपि प्रव्रज्यां कुर्वन्तीति श्रुतिर्न तद्विषयो विधिर्वर्त्तमानोपदेशादित्यर्थः। पूर्वपक्षमाक्षिपति। नन्विति। प्रत्यक्षविधानमङ्गीकरोति। सत्यमिति। तर्हि पूर्वपक्षासिद्धिरित्याशङ्क्य नास्तीदं विधानमिति कृत्वा चिन्तेयमित्याह। अनपेक्ष्येति॥

सिद्धान्तसूत्रमवतार्य्य व्याकरोति। अनुष्ठेयमिति। पूर्वपक्षमनुभाष्य तन्निरासप्रतिज्ञां विवृणोति। वेद इति। तत्र प्रश्नपूर्वकं हेतुमाह। कुत इति। तस्याक्षरार्थमाह। समाना हीति। तस्यैव ता-

वदेवाश्रमान्तरमप्यनिच्छता प्रतिपत्तव्यमिति मन्यमानः। कुतः, साम्यश्रुतेः, समाना हि गार्हस्थ्येनाश्रमान्तरस्य परामर्शश्रुतिर्दृश्यते 'त्रयो धर्मस्कन्धाः' इत्याद्या, यथेह श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृष्टमेवमाश्रमान्तरमपीति प्रतिपत्तव्यं, यथा च शास्त्रान्तरप्राप्तयोरेव निवीतप्राचीनावीतयोः परामर्श उपवीतविधिपरे वाक्ये, तस्मात् तुल्यमनुष्ठेयत्वं गार्हस्थ्येनाश्रमान्तरस्य। तथा 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इत्यस्य वेदानुवचनादिभिः समभिव्याहारः 'ये चेमेऽरण्ये श्रद्धातप इत्युपासते' इत्यस्य च पञ्चाग्निविद्यया। यत्तूक्तं 'तप एव द्वितीयः' इत्यादिष्वाश्रमान्तराभिधानं सन्दिग्धमिति।

त्यर्थार्थमाह। यथेति। त्रयो धर्मस्कन्धा इत्यत्रोर्ध्वरेतस आश्रमाः श्रुत्यन्तरसिद्धा एव परामृश्यन्ते एतद्वाक्यपरामृष्टत्वात् गार्हस्थ्यवदित्यर्थः। परामर्शस्य विधिपूर्वकत्वे दृष्टान्तमाह। यथेति। निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत् कुरुत इत्यत्रोपवीतविधिपरे वाक्ये विध्यन्तरसिद्धयोरेव निवीतप्राचीनावीतयोर्यथा परामर्शः तथात्रापीत्यक्षरार्थः। निवीतं मनुष्याणामित्यादि दर्शपूर्णमासयोः श्रुतं, तत्रोपवीतं विधीयत एवेतरयोस्तु विधिरर्थवादो वेति संशये सत्यपूर्वार्थलाभात् मनुष्यशब्दस्य च मनुष्यप्राधान्यवादित्वादातिथ्ये कर्मणि निवीतं पित्र्ये च प्राचीनावीतमिति प्राप्ते मनुष्याणां क्रियासु सौकर्य्याय कण्ठलम्बिवस्त्रधारणस्य वा देहार्द्धबन्धनस्य वा निवीतस्य प्राप्तत्वात् प्राचीनावीतस्य च पितृयज्ञे वाक्यान्तरेण प्राप्तेस्तदनुवादेन निवीतमित्यादिः उपवीतं स्तोतुमर्थवाद इति प्राच्यां मीमांसायां स्थितं, तथैव परामर्शश्रुतावपि त्रय इत्याद्यायां गार्हस्थ्यवदाश्रमान्तरमपि विहितमेवान्यत्र परामृश्यते तस्य विध्यपेक्षत्वादित्यर्थः। साम्यश्रुतिफलमाह। तस्मादिति। त्रय इत्यत्राश्रमा-

नैष दोषः, निश्चयकारणसद्भावात्। त्रयो धर्मस्कन्धा इति हि स्कन्धत्रित्वं प्रतिज्ञातं न च यज्ञादयो भूयांसो धर्मा उत्पत्तिभिन्नाः सन्तोऽन्यत्राश्रमसम्बन्धात् त्रित्वेऽन्तर्भावयितुं शक्यन्ते। तत्र यज्ञादिलिङ्गो गृहाश्रम एको धर्मस्कन्धो निर्दिष्टः, ब्रह्मचारीति च स्पष्ट आश्रमनिर्देशः तप इत्यपि कोऽन्यस्तपःप्रधानादाश्रमाद्धर्मस्कन्धोऽभ्युपगम्येत 'ये चेमेऽरण्ये' इति चारण्यलिङ्गात् श्रद्धातपोभ्यामाश्रमगृहीतिः। तस्मात् परामर्शेऽप्यनुष्ठेयमाश्रमान्तरं॥

विधिर्वा धारणवत्॥ २०॥

विधिर्वायमाश्रमान्तरस्य न परामर्शमात्रं। ननु विधित्वा-

न्तरस्य गार्हस्थ्येन साम्यश्रुतिरुक्ता सम्प्रति पारिव्राज्यवाक्ये साम्यश्रुतिमाह। तथेति। अस्येति पारिव्राज्योक्तिः विधेयसाहित्यादस्यापि विधेयतेत्यर्थः। वाक्यान्तरेऽपि साम्यश्रुतिमाह। ये चेति। अस्येति वानप्रस्थोक्तिः। विधेयपञ्चाग्निविद्यया तस्य सहोक्तिरस्ति तेन तद्वदेव वानप्रस्थमनुष्ठेयमित्यर्थः। परोक्तिमुद्भाव्य प्रत्याह। यत्त्वित्यादिना। किं तन्निश्चयकरणं तदाह। त्रय इति। स्कन्धशब्दस्य समूहवाचित्वेऽपि त्रित्वप्रतिज्ञा स्यादित्याशङ्क्याह। न चेति। यजेत दद्यादित्याद्युत्पत्तिविधिभिन्नाः सन्तो बहवो धर्मा नाश्रमसम्बन्धमन्तरेण त्रित्वेऽन्तर्भावयितुं शक्यन्ते। यद्याश्रमपरः स्कन्धशब्दो न स्यान्न स्यात्ततो यज्ञादीनां त्रित्वं तेषां अधिकत्वादतः स्कन्धशब्दस्य समूहार्थयोगात् त्रित्वमेव स्कन्धानामाश्रमत्वनिश्चायकमित्यर्थः। कथं तर्हि तेषामाश्रमाणां विभागस्तत्राह। तत्रेति। वाक्यान्तरेऽपि निश्चायकं दर्शयति। ये चेति। परोक्तं निरस्य स्वमतमुपसंहरति। तस्मादिति॥

परामर्शमुपेत्यानुष्ठेयत्वमुक्तमिदानीं विधिरेवायमित्याह। विधि-

भ्युपगमे एकवाक्यताप्रतीतिरुपरुध्येत प्रतीयते चात्रैकवाक्यता पुण्यलोकफलास्त्रयो धर्मस्कन्धाः ब्रह्मसंस्थता त्वमृतत्वफलेति। सत्यमेतत्, सतीमपि त्वेकवाक्यताप्रतीतिं परित्यज्य विधिरेवाभ्युपगन्तव्यः, अपूर्वत्वाद्विध्यन्तरस्यादर्शनात् विस्पष्टाच्चाश्रमान्तरप्रत्ययात् गुणवादकल्पनयैकवाक्यत्वप्रयोजनानुपपत्तेः धारणवत्, यथा 'अधस्तात् समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति' इत्यत्र सत्यामप्यधोधारणेनैकवाक्यताप्रतीतौ विधीयत एवोपरिधारणमपूर्वत्वात्। तथा चोक्तं शेषलक्षणे 'वि-

---

वेति। प्रतिज्ञां विभजते। विधिरिति। स्मृत्याचारयोराश्रमचतुष्टयनिविष्टयोर्भ्रान्तित्वायोगात् मूलकल्पनायां विधियुक्तवाक्यकल्पनात् लघीयः त्रय इत्यादिष्वाश्रमविधिकल्पनमिति भावः। अल्पफलत्वेनाश्रमत्रयनिन्दया ब्रह्मसंस्थतास्तुतेरेकवाक्यत्वनिश्चयात् तद्भङ्गेनात्राश्रमविधिकल्पनमयुक्तमिति शङ्कते। नन्विति। एकवाक्यताधीरेव कथं तत्राह। प्रतीयते चेति। एकवाक्यत्वसम्भवे तद्भेदो न युक्तिमानित्यङ्गीकरोति। सत्यमिति। आश्रमाणां पूर्वसिद्धेरभावात् तत्परामर्शेन स्तुतेरयोगादेकवाक्यतैवात्रायुक्तेत्याह। सतीमपीति। किञ्च विधियुक्तवाक्यान्तरकल्पनायामाश्रमान्तराणां विहितत्वोपगमाप्रसक्त्या स्वपक्षहानात् तत्कल्पनादिहैवाभीष्टे वाक्ये विधिमात्रकल्पना युक्तेत्याह। विध्यन्तरस्येति। किञ्च मुख्यमाश्रमान्तरप्रत्ययन्त्यक्त्वा स्तुतिलक्षणैकवाक्यत्वकल्पनायोगात् वाक्यभेदेन विधिरेवायमित्याह। विस्पष्टाच्चेति। एकवाक्यताज्ञानेऽपि तत्त्यागेनापूर्वार्थविधौ दृष्टान्तमाह। धारणावदिति। महापितृयज्ञे दर्शगताग्निहोत्रे च श्रुतं वाक्यमुदाहरति। अधस्तादिति। उदाहरणव्याख्योपयोगित्वेन वाक्यस्याभीष्टमर्थमाह। अत्रेति। प्रकृते कर्मविशेषे स्रुचि प्रक्षिप्तं हविराहवनीयं प्रतिपदा नीयते तदा पित्र्ये होमे तस्य हविषोऽधस्तात् समिधं धारयन्ननुद्रवेदित्यत्राधोधारणस्य विहितत्वादुपरि हीति तच्छेषानु-

धिस्तु धारणेऽपूर्वत्वात्' इति, तद्वदिहाप्याश्रमपरामर्शश्रुतिविधिरेवेति कल्प्यते। यद्यपि परामर्श एवायमाश्रमान्तराणां तद्यापि ब्रह्मसंस्थता तावत्संस्तवसामर्थ्याद्वश्यविधेयाऽभ्युपगन्तव्या। सा च किं चतुर्ष्वाश्रमेषु यस्य कस्यचिदाहोस्वित् परिव्राजकस्यैवेति विवेक्तव्यं, यदि च ब्रह्मचार्यान्तेष्वाश्रमेषु परामृश्यमानेषु परिव्राजकोऽपि परामृष्टस्ततश्चतुर्णामप्याश्रमाणां परामृष्टत्वाविशेषादनाश्रमित्वानुपपत्तेश्च यः कश्चिच्चतुर्ष्वाश्रमेषु ब्र-

---

वादतया तदेकवाक्यत्वसिद्धावप्युपरिष्टात् समिद्धारणस्यापूर्वत्वात् दैवे होमे वाक्यभेदं कृत्वा तद्विधीयत इत्यर्थः। उक्तेऽर्थे तार्त्तीयं सूत्रमुदाहरति। तथेति। उपरि हि देवेभ्यो धारयतीत्यत्रोपरि धारणं विधीयते न वेति सन्देहे धारयतीति वर्त्तमानोपदेशादुपरि हीति हिशब्दश्रुतेश्चोपरि समिधः प्राप्तेर्हविषश्चाभ्यर्हितद्रव्यत्वेन येन केनाच्छादनप्राप्तौ स्रुग्दण्डे समिधमुपसंगृह्यानुद्रवतीति वाक्यान्तरप्राप्तसमिन्नियमनात् अनुवादो न विधिरिति प्राप्ते स्रुग्दण्डे समिधमुपसंगृह्येति हविषः प्राग्देशसमिद्धारणस्य प्राप्तत्वेऽपि तस्मादुपरि तद्धारणस्य अप्राप्तेर्भक्ता हिशब्दं पञ्चमलकारेण विधिरेवायमित्याह। विधिस्त्विति। दृष्टान्तमुक्ता दार्ष्टान्तिकमाह। तद्वदिति। परामर्शपक्षमेवावलम्ब्याश्रमाणां परामर्शेऽपि पारिव्राज्यस्य विधिरेष्टव्योऽन्यथा स्तुत्ययोगादित्याह। यद्येति। ब्रह्मसंस्थता यावत् स्तूयते तद्विधीयत इति न्यायात् विधेयत्वेऽपि पारिव्राज्यस्य किं स्यादित्याशङ्क्य तदर्थं विचारमवतारयति। सा चेति। पक्षद्वयस्य निर्बीजत्वात् नेदं विचार्यमित्याशङ्क्य विचार्यश्रुतौ परिव्राजकोऽपि परामृष्टो न वेति विकल्प्याद्यमनूद्य प्रथमपक्षव्याप्तिमाह। यदीति। परामृष्टत्वाविशेषाच्च चतुर्ष्वाश्रमेषु यः कश्चित् ब्रह्मसंस्थो भविष्यतीति सम्बन्धः। ब्रह्मसंस्थोऽनाश्रमी कस्मात् न स्यादित्याशङ्क्यानाश्रमित्वस्य निन्द्यमानत्वादित्याह। अनाश्रमित्वेति। द्वितीयमनूद्य तत्पक्षव्याप्ति-

ह्मसंस्थो भविष्यति अथ न परामृष्टस्ततः परिशिष्यमाणः परिव्राडेव ब्रह्मसंस्थ इति सेत्स्यति, तत्र तपःशब्देन वैखानसग्राहिणा परामृष्टः परिव्राडपीति केचित्, तदयुक्तं, न हि सत्यां गतौ वानप्रस्थविशेषणेन परिव्राजको ग्रहणमर्हति यथात्र ब्रह्मचारिगृहमेधिनावसाधारणेनैव स्वेन स्वेन विशेषणेन विशेषिताववेवं भिक्षुवैखानसावपीति युक्तं। तपस्त्वसाधारणो धर्मो वानप्रस्थानां कायक्लेशप्रधानत्वात्तपःशब्दस्य तत्र रूढेः, भिक्षोस्तु धर्म इन्द्रियसंयमादिलक्षणो नैव तपःशब्देनाभिलप्येत, चतुष्ट्वेन च प्रसिद्धा आश्रमास्त्रित्वेन परामृश्यन्त इत्यन्याय्यं। अपि च भेदव्यपदेशोऽत्र भवति 'त्रय एते पुण्यलोकभाजः एकोऽमृतत्वभाक्' इति। पृथक्त्वे च व्यपदेशोऽवकल्पते,

---

माह। अथेति। पक्षयोः सम्भावनया विचारारम्भमुक्त्वा पूर्वपक्षमाह। तत्रेति। परिव्राजकस्यापि यमनियमादितपःसम्भवादित्यर्थः। आश्रमाणामेकैकशो ऽसाधारणधर्मरूपदर्शनायोपक्रमस्तदनुसारेणोपसंहारस्य युक्तत्वात्तपःशब्देन नोभयग्रहणमिति दूषयति। तदिति। किं तर्हि युक्तं तदाह। यथेति। कस्तर्हि तपःशब्दार्थः तत्राह। तपस्त्वेति। तेषां तत्प्रधानत्वेऽपि तपःशब्दस्य साधारण्यं किन्न स्यात्तत्राह। तपःशब्दस्येति। तस्य कृच्छ्रादौ रूढेरन्यत्र तदभावात्तेन वानप्रस्थ एव परामृश्यत इत्यर्थः। कथं तर्हि परिव्राजकधर्मेऽपि तपःशब्दप्रयोगस्तत्राह। भिक्षोस्त्विति। इतश्च पूर्वं परिव्राजको नोक्त इत्याह। चतुष्ट्वेनेति। न हि प्रसिद्धसंख्याभेदेषु संख्यान्तरोक्तिर्युक्तेत्यर्थः। पृथगुक्तिसामर्थ्यादपि प्रकृताश्रमत्रयातिरिक्तो ब्रह्मसंस्थ इत्याह। अपि चेति। भेदव्यपदेशेऽपि कथं पृथक्त्वं तत्राह। पृथक्त्वे चेति। सर्व एते पुण्यलोका इत्यत्र भिक्षुरपि परामृष्टश्चेत्तस्य ब्रह्मसंस्थत्वाभावात् अमृतत्वमेवेति न पुण्यलोकत्वं

न ह्येवम्भवति देवदत्तयज्ञदत्तौ मन्दप्रज्ञावन्यतरस्तु तयोर्महाप्रज्ञ इति, भवति त्वेवं देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ विष्णुमित्रस्तु महाप्रज्ञ इति। तस्मात् पूर्वे त्रय आश्रमिणः पुण्यलोकभाजः परिशिष्यमाणः परिव्राडमृतत्वभाक्। कथं पुनर्ब्रह्मसंस्थशब्दो योगात् प्रवर्त्तमानः सर्वत्र सम्भवन् परिव्राजक एवावतिष्ठेत, रूढ्यभ्युपगमे वाश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसङ्ग इति। अत्रोच्यते। ब्रह्मसंस्थ इति हि ब्रह्मणि परिसमाप्तिरनन्यव्यापारतारूपं तन्निष्ठत्वमभिधीयते, तच्च त्रयाणामाश्रमाणां न सम्भवति स्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात्, परिव्राजकस्य तु सर्वकर्मसन्न्यासात् प्रत्यवायो न सम्भवति अननुष्ठाननिमित्तः। शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको न विरोधी। ब्रह्मनिष्ठत्वमेव हि तस्य

विरोधान्न च तपःशब्देन भिक्षोरपि ग्रहे तद्वर्जनं युक्तमेव इति प्रकृतानां कार्त्स्न्येन परामर्शात् तस्मात् भेदोक्त्या पृथक्त्वमेवेत्यर्थः। अपृथक्त्वे भेदोक्तिरयुक्तेत्यत्र दृष्टान्तमाह। न हीति। पृथक्त्वे तु तदुक्तिर्युक्तेत्याह। भवतीति। न चावस्थाभेदापेक्षया दृष्टान्तदार्ष्टान्तिकयोः सिद्धिः अपृथक्त्वेऽपि वाच्यं, सति कर्म्मित्वे मन्दप्रज्ञत्वे च ब्रह्मसंस्थताया महाप्रज्ञत्वस्य चायोगात् पृथक्त्वध्रौव्यादिति मत्वोपसंहरति। तस्मादिति। किमेष ब्रह्मसंस्थशब्दो यौगिको रूढो वेति विकल्प्याद्येन परिव्राजकमात्रविषयतेति शङ्कते। कथमिति। द्वितीयं निराह। रूढीति। यौगिकत्वमुपेत्य परिहरति। अत्रेति। यथोक्तं ब्रह्मसंस्थत्वमन्येषां अपि सिध्यतीत्याशङ्क्याह। तच्चेति। तुल्यं सन्न्यासिनोऽपि स्वाश्रमकर्माननुष्ठाने प्रत्यवायित्वं तत् कुतोऽस्य ब्रह्मसंस्थत्वं तत्राह। परिव्राजकस्येति। तस्यापि शमदमाद्यनुष्ठेयमिति

शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म, यज्ञादि चेतरेषां तद्व्यतिक्रमे च तस्य प्रत्यवायः। तथा च 'न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा' 'तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत्' 'वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः' इत्याद्याः श्रुतयः, स्मृतयश्च 'तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः' इत्याद्या ब्रह्मसंस्थस्य

कुतो ब्रह्मसंस्थतेत्याशङ्क्याह। शमेति। तत्र हेतुः, ब्रह्मेति। शमादेर्ब्रह्मसंस्थताङ्गत्वान्न तद्विरोधितेत्यर्थः। गृहस्थादीनामपि ब्रह्मसंस्थत्वाविरोध्येव स्वाश्रमविहितं कर्मेत्याशङ्क्याह। यज्ञेति। तानि हि रागाद्यात्मिकानि, न च रागादिमतां ब्रह्मसंस्थतेति भावः। शमदमाद्युपेतं ब्रह्मनिष्ठत्वमेव सन्न्यासिनः स्वाश्रमकर्मेत्युक्तं, तदकरणे तस्य प्रत्यवायित्वं त्वम्पदार्थविवेकायैवेति स्मृतेरित्याह। तदिति। चकारादितरेषामपि तत्तदाश्रमकर्मातिक्रमे प्रत्यवायित्वमकुर्वन् विहितं कर्मेत्यादिस्मृतिरपि सूच्यते। सन्न्यासिनः सर्वकर्मत्यागेन ब्रह्मसंस्थत्वमेव स्वाश्रमकर्मेत्यत्र मानमाह। तथा चेति। न्यासः सन्न्यासो ब्रह्मेति स्तूयते। तत्र हेतुमाह। ब्रह्मा हीति। हिरण्यगर्भो हि श्रुतिस्मृतिषु परोऽभीष्टः, तथापि कथं सन्न्यासस्तदात्मकस्तदाह। परो हीति। तस्य परत्वे हेतुः, ब्रह्मेति। तद्धीहेतुत्वात् परो यस्मात् एव सन्न्यासस्तस्मात् ब्रह्मेत्यर्थः। तस्य परत्वं स्फोरयति। तानीति। पूर्वोक्तानि सत्यादीनि प्रसिद्धानि तानि ज्ञानहीनान्यवराण्येतानि तपांसि निकृष्टत्वहेतुत्वात् न्यास एवैभ्योऽतिरिक्तः श्रेष्ठो ब्रह्मसंस्थताद्वाराऽमृतत्वहेतुत्वादित्यर्थः। तस्य कर्मान्तराभावे वाक्यान्तरमाह। वेदान्तेति। शुद्धबुद्धयो विरक्ताः सन्न्यासयोगात् वेदान्तविज्ञानेन सुनिश्चितार्थाः। मुच्यन्त इति वचनात् कर्मान्तराभावः सन्न्यासिनां भातीत्यर्थः। 'न कर्मणा न प्रजया' इत्याद्या भूयस्यः श्रुतयोऽत्र सन्तीति वक्तुमादिपदं। तस्मिन् ब्रह्मणि बुद्धिर्मनो येषां ते तथा। तदेव ब्रह्मात्मा स्वरूपं येषां ते तदात्मानः। तत्रैव निश्चयेन स्थितिमाह। तन्निष्ठा इति।

कर्माभावं दर्शयन्ति। तस्मात् परिव्राजकस्याश्रममात्रादमृतत्वप्राप्तेर्ज्ञानानर्थक्यप्रसङ्ग इत्येषोऽपि दोषो नावतरति। तदेवं परामर्शेऽपीतरेषामाश्रमाणां पारिव्राज्यं तावद्ब्रह्मसंस्थतालक्षणं लभ्यत एव। अनपेक्ष्यैव जाबालश्रुतिमाश्रमान्तरविधायिनीमयमाचार्य्येण विचारः प्रवर्त्तितः, विद्यते एव त्वाश्रमान्तरविधिश्रुतिः प्रत्यक्षा 'ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति। न चेयं श्रुतिरनधिकृतविषया शक्या वक्तुं, अविशेषश्रवणात् पृथग्विधानाच्चानधि-

---

विषयान्तरपरामृश्यं व्यावर्त्तयति। तदिति। 'यथोक्तान्यपि कर्माणि परिहाय' इत्यादिस्मृतिसंग्रहार्थमादिपदं। उक्तश्रुतिस्मृतितात्पर्य्यमाह। ब्रह्मेति। ब्रह्मसंस्थशब्दस्य परिव्राजके रूढिमुपेत्योपसंहरति। तस्मादिति। यथा गृहस्थशब्दस्य यौगिकत्वे सत्यतिप्रसङ्गपरिहारायाश्रमविशेषे रूढत्वेऽपि न गार्हस्थ्यमात्रात् पुण्यलोकप्राप्तिः किन्तु यथोक्ताग्निहोत्रादिकरणात् तथा परिव्राजकस्यापि ब्रह्मसंस्थस्य वाक्यार्थसाक्षात्कारद्वारेणैव मुख्यममृतत्वमिति कुतो ज्ञानानर्थक्यमित्यर्थः। एवमेकदेशिमतं प्रत्याख्याय ब्रह्मसंस्थशब्दस्य परिव्राजकविषयत्वे स्थिते संस्तवसामर्थ्यात् ब्रह्मसंस्थत्वं पारिव्राज्यमितरपरामर्शेऽपि विधेयमिति परमप्रकृतमुपसंहरति। तदेवमिति। शिष्यबुद्धिविकाशार्थं परामर्शश्रुतिमाश्रित्य कृत्वा चिन्तया। विचारं कृत्वा चिन्तामुद्घाटयति। अनपेक्ष्येति। यदि वेतरथेति ब्रह्मचर्य्ये स्थितस्यैव पारिव्राज्येच्छा गार्हस्थ्ये वैराग्य दैवयोगात् यदि स्यादित्यर्थः। यस्त्वनधिकृतान्धादिविषयः सन्न्यासः स्यादिति तत्राह। न चेति। अविशेषश्रुतेरसति बाधके न विशेषसङ्कोचमर्हतीत्यर्थः। इतश्चेदं वाक्यं नानधिकृतविषयमित्याह। पृथगिति। अनधिकृतानां सन्न्यासस्येति

कृतानां। 'अथ पुनरेव व्रती वाऽव्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा' इत्यादिना ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यस्य नानधिकृतविषयत्वं, तच्च दर्शयति 'अथ परिव्राट् विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति' इति। तस्मात् सिद्धा ऊर्द्ध्वरेतस आश्रमाः, सिद्धश्चोर्द्ध्वरेतःसु विधानाद्विद्यायाः स्वातन्त्र्यमिति ॥

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

'स एष रसानां रसतमः परमः परार्द्ध्योऽष्टमो यदुद्गीथः इयमेवर्गग्निः साम अयं वाव लोक एषोऽग्निस्थितः तदिद-

---

शेषः। व्रती गोदानादिवेदव्रतवान्, अव्रती तद्विपरीतः। स्नातको गुरुकुलनिवृत्तिरूपः स्नानानन्तरमपि गुरुशुश्रूषापरः, तद्विपरीतोऽस्नातकः। उत्सन्नाग्निर्मृतभार्यः पूर्वमेवाग्निपरिग्रहरहितो वा परिव्रजेदिति कर्माधिकारप्रतिपत्तिहीनानामपि सन्न्यासस्य पृथगुक्तेर्न वाक्यमनधिकृतविषयमित्यर्थः। सन्न्यासविधेरनधिकृताविषयत्वे हेत्वन्तरमाह। ब्रह्मेति। श्रवणादिद्वारा सन्न्यासस्य ब्रह्मज्ञानदार्ढ्यार्थत्वं प्रकरणादिसिद्धं तेन समर्थस्यैवाधिकारस्तस्मिन्नित्यर्थः। पारिव्राज्यस्य ब्रह्मधीदार्ढ्यार्थत्वे श्रुतिं प्रमाणयति। तच्चेति। ब्रह्मभूयाय तत्साक्षात्कारायेत्यर्थः। अन्तर्गर्भिताधिकरणार्थमुपसंहरति। तस्मादिति। प्रामाणिकत्वं तच्छब्दार्थः। तेषां प्रमितत्वेऽपि प्रकृते किं जातमित्याशङ्क्य प्रथमाधिकरणार्थं निगमयति। सिद्धश्चेति ॥

अनुष्ठेयसाम्यश्रुतेराश्रमान्तरमनुष्ठेयतया विधेयमित्युक्तं, सम्प्रति रसतमत्वादीनामङ्गाश्रितत्वेनेयमेव जुहूरित्यादिस्तुतितुल्यतया स्तुत्यर्थत्वमित्याशङ्क्य प्रत्याह। स्तुतीति। अधिकरणस्य विषयं वदन् वाक्यानि पठति। स इति। 'एषां भूतानां पृथिवी रसः पृथिव्या आपो-

मेवोक्थमियमेव पृथिवी' [छा॰उ॰] इत्येवंजातीयकाः श्रुतयः किमुद्गीथादिस्तुत्यर्था आहोस्विदुपासनविध्यर्था इत्यस्मिन् संशये स्तुत्यर्था इति युक्तं, उद्गीथादीनि कर्माङ्गान्युपादाय श्रवणात्, यथा 'इयमेव पृथिवी जुहूरादित्यः कूर्मः स्वर्लोक आहवनीयः' इत्याद्या जुह्वादिस्तुत्यर्थास्तद्वदिति चेन्नेत्याह। न स्तुतिमात्रमासां श्रुतीनां प्रयोजनं युक्तं, अपूर्वत्वात्, विध्यर्थतायां

ऽपामोषधय ओषधीनां पुरुषः पुरुषस्य वाग् वाच ऋगृचः साम साम्न उद्गीथो रसः' इत्युपक्रम्य श्रूयते 'स एष रसानां पृथिव्यादीनां सामान्यानां भूतेषूत्तरोत्तरसारत्वेनोक्तानामतिशयत्वेन सारो रसतमः परमः परमात्मप्रतीकत्वात् परस्य ब्रह्मणोऽर्द्धं स्थानं तदर्हतीति परार्द्ध्यं परब्रह्मवदुपास्य इत्यर्थः। पृथिव्याद्यपेक्षयाऽष्टमः कोऽसौ यदुद्गीथो य उद्गीथ ॐकार इत्यर्थः। उद्गीथाद्यङ्गावबद्धश्रुतीरधिकृत्य पर्णमयीत्वादावङ्गसम्बन्धे विध्युपलब्धेस्तथाविधेऽपि स्वर्गो लोक इत्यादौ स्तुत्युपलब्धेश्च संशयमाह। किमिति। अङ्गावबद्धानामपि बुद्धीनां स्तुतित्वाभावात् विधेयतया स्वातन्त्र्येण पुरुषार्थहेतुत्वे सत्यमनङ्गात्मधियः स्वतन्त्रतया फलवत्त्वमुपनिषदुत्पन्नायाः किं वक्तव्यमित्युक्तेरत्र पादादिसंगतिः। पूर्वपक्षे स्तुतित्वादङ्गधीष्वनुष्ठानासिद्धिः सिद्धान्ते तासां विधेयत्वात् तत्सिद्धिरित्यङ्गीकृत्य संशयमनूद्य पूर्वपक्षयति। इत्यस्मिन्निति। विमताः प्रत्ययाः स्तुतयः कर्माङ्गेषु उत्कृष्टपदार्थाध्यासप्रत्ययरूपत्वात् स्वर्गो लोक आहवनीय इत्यादिप्रत्ययवदित्यर्थः। जुहूरियमेव पृथिवीति स्तूयते कूर्मश्च नयनगतः सन्नादित्य इति आहवनीयोऽग्निः स्वर्गलोक इतिवत् स्तुतिरेवेत्यर्थः। स्तुतिकल्पनात् विधिकल्पनमेव युक्तमनुष्ठानफलाभावादिति परिहरति। नेत्यादिना। विमताः प्रत्ययाः न कर्माङ्गस्तुतयोऽपूर्वार्थत्वात् क्रत्वन्तरवदित्याह। नेति। विमता धियो न कर्माङ्गस्तुतयो विशिष्टफलसम्बन्धित्वात् सम्मतवदित्याह। विधीति। 'वायुर्वै क्षेपिष्ठा' इत्यादिवदुद्गीथादिश्रुतीनां

स्यापूर्वार्थो विहितो भवति, स्तुत्यर्थतायां त्वानर्थक्यमेव स्यात्, विधायकस्य हि शब्दस्य वाक्यशेषभावं प्रतिपद्यमाना स्तुतिरुपयुज्यत इत्युक्तं, 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरित्यत्र [मीमांसा]। प्रदेशान्तरविहितानां तूद्गीथादीनामियं प्रदेशान्तरपठिता स्तुतिर्वाक्यशेषभावमप्रतिपद्यमानाऽनर्थिकैव स्यात्, इयमेव जुहूरित्यादि तु विधिसन्निधावेवाम्नातमिति वैषम्यं। तस्माद्विध्यर्था एवंजातीयकाः श्रुतयः॥

भावशब्दाच्च॥ २२॥

'उद्गीथमुपासीत सामोपासीताहमुक्थमस्मि' इति [छा०उ०] विद्यादित्यादयश्च विस्पष्टा विधिशब्दाः श्रूयन्ते, ते च स्तुतिमात्रप्रयोजनतायां व्याहन्येरन्। तथा च न्यायविदां स्मरणं,

---

स्तुत्यर्थत्वेऽपि कस्मादर्थवत्त्वं न स्यादित्याशङ्क्याह। विधायकस्येति। अस्तु तर्हि विधायकशब्दशेषत्वेनैवोद्गीथादिश्रुतीनामपि स्तावकतयाऽर्थवादत्वं तच्च वाच्यं, किमुद्गीथादिप्रत्ययैरुद्गीथादिविधिः स्तूयते किं वा तदुपास्तिविधिरिति विकल्प्याद्यं दूषयति। प्रदेशान्तरेति। उद्गीथादिविधेः कर्मप्रकरणस्थत्वेन व्यवधानान्न तेनोद्गीथादिश्रुतीनामेकवाक्यता। विमता धियो न कर्माङ्गस्तुतयोऽतत्प्रकरणस्थत्वात् प्रकरणान्तरवदिति भावः। परोक्तं दृष्टान्तं विघटयति। इयमेवेति। अनुमानत्रयफलं निगमयति। तस्मादिति॥

न द्वितीयः, उपास्त्यविषयार्पणेन विध्यन्वययोगे लक्षणया स्तुत्यर्थत्वायोगादित्याह। भावेति। सन्निहितविधेर्विषयार्पणेनार्थवत्त्वे इत-

'कुर्यात् क्रियेत कर्त्तव्यं भवेत् स्यादिति पञ्चमं।

एतत् स्यात् सर्व्ववेदेषु नियतं विधिलक्षणम्'॥ इति।

लिङाद्यर्थो विधिरिति मन्यमानास्त एवं स्मरन्ति। प्रतिप्रकरणञ्च फलानि श्राव्यन्ते 'आपयिता ह वै कामानां भवति एष ह्येव कामागानस्येष्टे' 'कल्पन्ते ह्यस्मै लोका ऊर्द्धाश्चावृत्ताश्च' इत्येवमादीनि। तस्मादप्युपासनविधानार्था उद्गीथादिश्रुतयः॥

मादिवादानां सम्भवति तदीयस्तुतिपरत्वमपि तत्रायुक्तं स्तुत्यपेक्षया विषयार्पणस्यान्तरङ्गत्वात् तच्च कर्माङ्गस्तुतिपरत्वं नेति किमु वक्तव्यमिति मन्वानो व्याचष्टे। उद्गीथमिति। निमन्त्रणादिष्वपि लिङादिस्मरणात् कथमुपासीतेत्यादिशब्दस्य विधिपरतेत्याशङ्क्याह। तथा चेति। धातूनामनेकत्वेऽपि डु कृञ् करणे भू सत्तायां अस भुवीति त्रीनेव धातून् भावनासामान्यवाचिनः सर्व्वव्याप्त्यर्थमुदाहरति। कुर्यादिति। आक्षिप्तकर्तृका भावना कुर्य्यादित्युक्ता सैवाक्षिप्तकर्मिका क्रियेतेत्युदाहृता सैव कर्त्तव्यमिति धात्वर्थोपसर्जनभूताऽभिहितेति भावः। भवेदित्यत्रापि भूयेत भवितव्यमित्युदाहार्य्यं, भवतेरस्तेश्चैकार्थ्येऽपि प्राप्त्याद्यर्थं भवतिं दृष्ट्वा पृथगस्तिमुदाहरति। स्यादिति। यथापूर्व्वमुदाहरणमिहापि द्रष्टव्यं। पाठक्रममनुसृत्य पञ्चममित्युक्तं। एतद्धात्वनुगतप्रत्ययैः सर्व्वभावनानुगतः श्रेयःसाधनत्वरूपो विधिरुच्यते न तु प्रति धातुं प्रति प्रत्ययं च भावनाभेदोऽस्तीति मत्वाह। एतदिति। कथं तर्हि निमन्त्रणादिषु लिङादिस्मरणं मिथोविरोधादित्याशङ्क्योत्सर्गतो वेदे विधिपरा लिङादयोऽपवादादन्यथात्वमित्यभिप्रेत्याह। लिङादीति। उद्गीथादिश्रुतीनां स्तुत्यर्थत्वाभावे हेत्वन्तरञ्चकारसूचितमाह। प्रतीति। फलभेदश्रवणमुपसंहरति। तस्मादिति। पूर्व्वोक्तापूर्व्ववत्त्वादिसमुच्चयार्थमपीत्युक्तं॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च' 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम' 'जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस' इत्येवमादिषु वेदान्तपठितेष्वाख्यानेषु संशयः किमिमानि पारिप्लवप्रयोगार्थान्याहोस्वित् सन्निहितविद्याप्रतिपत्त्यर्थानीति। पारिप्लवार्था इमा आख्यानश्रुतयः, आख्यानसामा-

---

उद्गीथादिश्रुतेरुपास्तिविषयार्थकत्वं न्यायो रसतमत्वादेरित्युक्तं, अधुनाऽऽख्यानानामपि विद्यास्तुतेः सकाशात् पारिप्लवशेषत्वं न्यायोऽनुष्ठानावसानयोगादित्याशङ्क्य परिहरति। पारिप्लवेति। विषयोक्तिपूर्वकमाख्यानत्वसाम्यात् विद्यासन्निधेश्च संशयमाह। अथेत्यादि। पारिप्लवप्रयोगो नामाश्वमेधे पुत्रामात्यपरिवृताय राज्ञे पारिप्लवमाचक्षीतेत्यादि नानाविद्याख्यानकथनं विहितं, अत्र चोपनिषद्गताख्यानानां तादर्थ्यनिरासेन तत्र तत्र सन्निहितस्वतन्त्रपुरुषार्थहेतुविद्यार्थत्वसमर्थनात् पादादिसङ्गतिः। पूर्वपक्षे प्रयोगशेषत्वात् आख्यानानां वेदान्तगतानामपि तद्भावात् विद्याप्राधान्यासिद्धिः सिद्धान्ते विशेषणात् उपनिषदाख्यानानां व्यवच्छेदात् तेषामप्रयोगशेषत्वात् विद्याप्रधानत्वसिद्धिरिति स्फोरते पूर्वपक्षयति। पारिप्लवेति। गुरुशिष्यसमाचारप्रदर्शनेन बुद्धिसौकर्यद्वारा च विद्याशेषत्वं सामर्थ्यलिङ्गादौ संसिद्धमित्याशङ्क्य पारिप्लवश्रुतिविरोधे लिङ्गमप्रयोजकमित्याह। आख्यानेति। 'यस्याश्विने शस्यमाने सूर्योऽभ्युदियादपि सर्वा दाशतयीरनुब्रूयात्' इति सर्वासामृचामस्मिन् शस्त्रशंसने पूर्वश्रुत्या विनियुक्तानामपि प्रातिस्विकविनियोगवदाख्यानानां पारिप्लवे पारिप्लवमाचक्षीतेति चोदितानामेतेन लिङ्गेन सन्निधेर्वा विद्यायां विनियोगः स्यात् इत्याशङ्क्य प्रातिस्विकविनियोगस्य समुदायविनियोगस्य च श्रौतत्वेन

न्यादाख्यानप्रयोगस्य च पारिप्लवे चोदितत्वात्, ततश्च विद्याप्रधानत्वं वेदान्तानां न स्यात्, मन्त्रवत्प्रयोगशेषत्वादिति चेत् तन्न, कस्मात् विशेषितत्वात्। *तथा हि 'पारिप्लवमाचक्षीत' इति हि प्रकृत्य 'मनुर्वैवस्वतो राजा' इत्येवमादीनि कानिचिदेवाख्यानानि तत्र विशेष्यन्ते आख्यानसामान्यात् चेत् सर्वग्रहीतिः स्यादनर्थकमेवेदं विशेषणं भवेत्, तस्मान्न पारिप्लवार्था एता आख्यानश्रुतयः॥

तुल्यत्वात् प्रकृते च तदभावात् मैवमित्याह। ततश्चेति। आख्यानानां प्रयोगसिद्धत्वेऽपि सर्वेषां वेदान्तानां अतच्छेषत्वात् युक्तं विद्याप्रधानत्वमित्याशङ्क्याह। मन्त्रवदिति। 'देवस्य त्वा' इत्यादिमन्त्रे कस्यचिद्देवपदस्य समवेतार्थतया प्रयोगशेषत्वे सिद्धे तदेकवाक्यतया पदान्तराणामपि तच्छेषत्वमिष्टं तथाख्यानानां प्रयोगशेषत्वे तदेकवाक्यत्वेन सर्वोपनिषदां तच्छेषत्वान्न विद्याप्रधानतेत्यर्थः। सामान्यश्रुतेर्विशेषोक्त्या तत्परत्वान्न तया लिङ्गादिबाधोऽस्तीति सिद्धान्तयति। तन्नेत्यादिना। अश्वमेधे प्रथमेऽहनि 'मनुर्वैवस्वतो राजा' इत्याह, द्वितीयेऽहनि 'यमो वैवस्वतः' इति, तृतीयेऽहनि 'वरुण आदित्यः' इत्याद्याख्यानविशेषा वाक्यशेषे श्रुतास्तद्बलात् उपक्रमस्य सङ्कोचो युक्तः। न चोपक्रमस्थसर्वशब्दादुपसंहारस्थविशेषोक्तिरुपलक्षणार्थेति वाच्यं, आदौ सर्वाण्याख्यानानि पारिप्लवे शंसतीत्युक्ता पारिप्लवमाचक्षीतेति च विधाय मनुर्वैवस्वत इत्यादि पठ्यते तत्र पुनर्विधानं वाक्यशेषस्याख्यानमध्यस्थ कतिपयप्रयोगमात्रेणापरमं व्यावर्त्तयितुमित्यर्थवानिति मत्वा सिद्धान्तं विवृणोति। पारिप्लवमिति। यत्त्वाख्यानसामान्यात् पारिप्लवार्था इमा श्रुतय इति तत्राह। आख्यानेति। विशेषणफलं निगमयति। तस्मादिति॥

---

* तथा हीति वर्धं॰ नास्ति।

तथा चैकवाक्यतोपबन्धात्॥ २४॥

असति च पारिप्लवार्थत्वे आख्यानानां सन्निहितविद्याप्रतिपादनोपयोगितैव न्याय्या एकवाक्यतोपबन्धनात्, तथा हि तत्र तत्र सन्निहिताभिर्विद्याभिरेकवाक्यता दृश्यते, प्ररोचनोपयोगात् प्रतिपत्तिसौकर्योपयोगाच्च, *मैत्रेयीब्राह्मणे तावत् 'आत्मा वा अरे द्रष्टव्यः' इत्याद्यया विद्ययैकवाक्यता दृश्यते, प्रातर्दनेऽपि 'प्राणोऽस्मि प्रज्ञात्मा' इत्याद्यया, 'जानश्रुतिः' इत्यत्रापि 'वायुर्वाव संवर्गः' इत्याद्यया यथा च 'स आत्मनो वपामुदखिदत्' इत्येवमादीनां कर्मश्रुतिगतानामाख्यानानां सन्निहितविधिस्तुत्यर्थता तद्वत, तस्मान्न पारिप्लवार्थत्वं॥

अत एव चाग्नीन्धनाद्यनपेक्षा॥ २५॥

'पुरुषार्थोऽतःशब्दात्' [वे० सू०३।४।१] इत्येतद्व्यवहितमपि

तर्हि कुत्राख्यानान्युपयुक्तानीत्याशङ्क्य विशेषणाश्रुत्या सर्वश्रुतौ भमायां निर्बंधः सन्निधिविद्यास्वेवोपनिषदाख्यानानि विनियुज्यन्तेत्याह। तथा चेति। सूत्रार्थं विवृणोति। असतीति। एकवाक्यतोपसम्बन्धं विभजते। तथा हीति। प्ररोचनमनुरागजननं। सन्निहिताभिर्विद्याभिराख्यानानामेकवाक्यताप्रतीतिमुदाहरति। मैत्रेयीति। आख्यानत्वेऽपि पारिप्लवार्थत्वादर्शनाच्च न तादर्थ्यं प्रकृताख्यानानामित्याह। यथेति। उदखिदुद्धृतवान् होमायेति यावत्। श्रुतिलिङ्गसन्निधिभिर्विद्यार्थत्वे सिद्धं फलितमुपसंहरति। तस्मादिति॥

कथानां विद्याशेषत्वे दर्शिते कर्मणामपि तर्हि तच्छेषत्वं तच्छेषत्वाभावेऽपि स्यादित्याशङ्क्य प्रसङ्गागतं विचारं परिसमाप्य पुरुषार्थाधिकरणस्य फलमाह। अत इति। ब्रह्मविद्या मोक्षे कर्माणीति

* मैत्रेयीब्राह्मण इति पाठ०।

सम्भवादत इति परामृश्यते, अत एव च विद्यायाः पुरुषार्थहेतुत्वादग्नीन्धनादीन्याश्रमकर्माणि विद्यया स्वार्थसिद्धौ नापेक्षितव्यानीत्याद्यस्यैवाधिकरणस्य फलमुपसंहरत्यधिकविवक्षया॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्॥ २६॥

इदमिदानीञ्चिन्त्यते किं विद्याया अत्यन्तमेवानपेक्षाश्रमकर्मणामुतास्ति काचिदपेक्षेति, तत्रात एवाग्नीन्धनादीन्या-

---

कर्त्तव्यत्वेनापेक्ष्यन्ते न वेति वादिविप्रतिपत्तेः सन्देहे 'यज्ञेन' इति विविदिषायां विनियुक्तयज्ञादीनां विषयसौन्दर्य्यलभ्यायां तस्यामनन्वयात् तद्विषयज्ञानसाध्यमोक्षान्वयस्य युक्तत्वादपेक्ष्यन्तेति पूर्वपक्षे 'काष्ठैः पचति' इत्यत्र पाकसाधनज्वालाजनककाष्ठानां पाकहेतुत्वदर्शनात् ज्ञानेच्छाजनकान्तःकरणशुद्धिहेतुत्वेन यज्ञादीनां ज्ञानेच्छाहेतुत्वसिद्धेः साक्षादेव मोक्षान्वये च यज्ञेनेत्यादिकरणविभक्तिभङ्गात् पारम्पर्य्यस्यैवोपेयत्वात् नापेक्ष्य इति सिद्धान्तः। एतदभिप्रेत्य सन्निहितस्यातःशब्दपरामर्शयोग्यस्याभावादतःपदानुपपत्तिमाशङ्क्य सूत्राक्षराणि योजयति। पुरुषार्थ इति। आद्याधिकरणे यथा विद्यायाः स्वातन्त्र्येण पुमर्थहेतुत्वमुक्तं तच्च तथैवानूद्यते, तथा चाग्नेयादिष्वदर्शनात् न पुरुषार्थहेतुत्वं कर्मापेक्षाविरोधीति निरस्तं। न चात्र पादादिसङ्गतिर्वक्तव्या, प्रथमाधिकरणस्यैव तत्फलविषयस्य तस्याः सुगमत्वात्, फलमपि पूर्वोत्तरपक्षयोस्तदर्देवेत्यभिप्रेत्याह। आद्यस्येति। स्वार्थसिद्धावेवानपेक्षा न तु स्वसिद्धौ तत्र तदपेक्षास्तीत्यनन्तराधिकरणे निर्देष्टुमुपसंहार इति तत् फलमाह। अधिकेति॥

ब्रह्मविद्या स्वफले न कर्मापेक्षा प्रमात्वात् सम्मतवदित्युक्तं, तर्हि तस्योत्पत्तावपि तदपेक्षा प्रमात्वात् तद्वदेवेत्याशङ्क्याह। सर्वेति। अधिकविवक्षयेत्युक्तं व्यक्तीकुर्वन् ब्रह्मविद्यामधिकृत्य पूर्वाधिकरणन्यायात् विविदिषाश्रुतेश्च संशयमाह। इदमिति। अत्र च स्वतन्त्रपुरुषार्थ-

आश्रमकर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्ष्यन्ते इत्येवमत्यन्तमेवानपेक्षायां प्राप्तायामिदमुच्यते, सर्वापेक्षा चेति। अपेक्षते च विद्या सर्वाण्याश्रमकर्माणि नात्यन्तमनपेक्षैव। ननु विरुद्धमिदं वचनमपेक्षते चाश्रमकर्माणि विद्या नापेक्षते चेति। नेति ब्रूमः। उत्पन्ना हि विद्या फलसिद्धिं प्रति न किञ्चिदन्यदपेक्षते उत्पत्तिं प्रति त्वपेक्षते, कुतः यज्ञादिश्रुतेः। तथा हि श्रुतिः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति यज्ञादीनां विद्यासाधनभावं दर्शयति, विविदिषासंयोगाच्चैषामुत्पत्तिसाधनभावोऽवसीयते। 'अथ यत् यज्ञ इत्याचक्षते ब्रह्मचर्य्यमेव तत्' इत्यत्र च

हेत्वौपनिषदात्मज्ञानोत्पत्तौ यज्ञादीनां शमादीनाञ्च विविदिषावाक्याय विनियोगोक्तेरस्ति पादादिसङ्गतिः। पूर्वपक्षे यज्ञादीनां विज्ञानान्वये तत्फलेऽपि तत्प्रसक्त्या समुच्चयसिद्धिः, सिद्धान्ते परम्परया तेषां ज्ञानान्वयेऽपि तत्फलान्वये हेत्वभावात् तदसिद्ध्या ज्ञानस्यैव तत्तद्धेतुतासिद्धिरित्यङ्गीकृत्य पूर्वपक्षयति। तन्नेति। अपरोक्षधियो मानमात्रायतत्वात् प्रामाणिकज्ञानस्य मानहेतुषु सत्सु कर्माद्यभावेनानुदयादर्शनात् केवलव्यतिरेकाभावे च यज्ञादीनां हेतुत्वकल्पनायोगात् विविदिषाश्रुतेश्च वर्त्तमानापदेशित्वात् विनियोजकत्वायोगात् ज्ञानस्य फलवदुत्पत्तावपि नान्वयस्तेषामिति भावः। विविदिषावाक्ये वर्त्तमानापदेशेऽपि 'यस्य पर्णमयी' इत्यादाविवापूर्वत्वात् पञ्चमलकारेण ब्रह्मानुभवकामो यज्ञादीनि कुर्य्यादिति विध्युपगमादागमस्य केवलव्यतिरेकानपेक्षत्वात् विषयसौन्दर्य्यलभ्यायामिच्छायां साक्षादन्वयायोगात् तत्फले ज्ञाने यज्ञान्वयसिद्धेर्यज्ञेनेत्यादिकरणश्रुत्या च तेषामिष्यमाणापरोक्षधीसाधनत्वदृष्टेर्ज्ञानस्य च मानायत्ततया साक्षात् यज्ञाद्यसाध्यत्वेऽपि तेषां चित्तशुद्ध्या प्रत्यक्प्रवणताम्-

विद्यासाधनभूतस्य ब्रह्मचर्य्यस्य यज्ञादिभिः संस्तवाद्यज्ञादीनामपि साधनभावः सूच्यते, 'सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योम्' इत्येवमाद्या च श्रुतिराश्रमकर्मणां विद्यासाधनभावं सूचयति। स्मृतिरपि,

'कषायपक्तिः कर्माणि ज्ञानन्तु परमा गतिः।
कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तते'॥

इत्येवमाद्या। अश्ववदिति योग्यतानिदर्शनं, यथा योग्यतावशेनाश्वो न लाङ्गलाकर्षणे युज्यते रथचर्य्यायान्तु युज्यते

त्वाद्यापरोक्षज्ञाने पर्य्यवसानात् पारम्पर्य्येऽपि 'पचति काष्ठैः' इतिवत् करणविभक्तिसम्भवात् उत्पत्तौ ज्ञानस्य कर्मापेक्षास्तीति सिद्धान्तयति। इदमिति। आपातेन पूर्वापरविरोधप्रतीतिं शङ्कते। नन्विति। विभागोक्त्या प्रत्याह। नेतीति। उक्तव्यवस्थायां प्रश्नपूर्वकं हेतुमाह। कुत इति। हेतुं विवृणोति। तथा हीति। नन्वत्र विविदिषासंयोगो यज्ञादीनां ज्ञायते, यदि तस्यां विषयसान्दर्य्यलभ्यायां तेषामन्वयायोगात् इष्यमाणे ज्ञानेऽन्वयोऽभ्युपगम्यते तर्हि ज्ञानस्य मानाधीनत्वात् कर्मणां तत्रान्वयासिद्धेः श्रुतत्यागेन तत्फले मोक्षे किमन्वयो नेष्यते तत्राह। विविदिषेति। मोक्षहेतुत्वकल्पनायां 'नास्त्यकृतः कृतेन' इत्यादिविरोधात् परम्परयापि हेतुत्वे बाधाभावात् बुद्धिशुद्ध्या तदुत्पत्तावेवान्वयो यज्ञादीनामित्यर्थः। यज्ञादिश्रुतेरिति वाक्यान्तरमपि ग्रहीतव्यमित्याह। अथेति। तत्र यज्ञादीनां ज्ञानसाधनत्वे विज्ञानं लिङ्गमाह। अत्रेति। तत्रैव लिङ्गान्तरमाह। सर्व इति। परम्परया कर्मणां धीहेतुत्वे स्मृतिमपि दर्शयति। स्मृतिरिति। उत्पत्ताविव फलेऽपि ज्ञानस्य कर्मापेक्षा किं न स्यादित्याशङ्क्य दृष्टान्तमामादाय व्याकरोति। अश्ववदित्यादिना॥

एवमाश्रमकर्माणि विद्यया फलसिद्धौ नापेक्ष्यन्ते उत्पत्तौ त्वपेक्ष्यन्ते इति ॥

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥

यदि कश्चिन्मन्येत न यज्ञादीनां विद्यासाधनभावो न्याय्यः विध्यभावात्, 'यज्ञेन विविदिषन्ति' *इत्येवमादिका हि श्रुतिरनुवादस्वरूपा विद्यास्तुतिपरा न यज्ञादिविधिपरा, इत्थं महाभागा विद्या यत् यज्ञादिभिरेवैतामवाप्तुमिच्छन्तीति, तथापि तु शमदमाद्युपेतः स्याद्विद्यार्थी 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति'

ज्ञानोत्पत्तौ बहिरङ्गमुक्त्वा तत्रैवान्तरङ्गमुपदिशति। शमादीति। तत्र व्यावर्त्त्यांशङ्कामाह। यदीति। विद्यास्तावकत्वेनापि सम्भवत्यर्थवत्त्वे वर्त्तमानताभङ्गेन विधिकल्पनमयुक्तं वाक्यभेदप्रसङ्गादतः शब्दमात्रलभ्या विद्येति भावः। एवं तवाभिप्रायेऽपि हेत्वन्तरमवश्यमनुष्ठेयं न शब्दमात्रलभ्या विद्येति सूत्रयोजनया परिहरति। तथापीति। विविदिषावाक्यतुल्यतया शमादिवाक्यस्य नास्ति विधिपरतेति शङ्कते। नन्विति। यस्मादेवमात्मानं विदित्वा पापेन कर्मणा न लिप्यते तस्मादेवं विद्यार्थी शमाद्युपेतो भूत्वा विचरेदिति गम्यते विधिरित्याह। नेतीति। विध्यभावे तत्प्रशंसावैयर्थ्यादुक्तविधिसिद्धिरित्यर्थः। काण्वपाठे विधिमुक्त्वा माध्यन्दिनपाठे विध्यभावशङ्कापि नास्तीत्याह। पश्येदिति चेति। विधिफलमाह। तस्मादिति। यज्ञादीनामसाधनत्वशङ्कामापाततोऽभ्युपेत्य साधनान्तरापेक्षोक्त्येदानीं तदसाधनत्वशङ्कापि न युक्तेत्याह। यज्ञादीनीति। उक्तं स्मारयित्वा परिहरति। नन्वि-

* इत्येवञ्जातीयका हि श्रुतिरर्थवादस्वरूपेति वर्ध० का०।

इति विद्यासाधनत्वेन शमदमादीनां विधानात्, विहितानाञ्चावश्यानुष्ठेयत्वात्। नन्वत्रापि शमाद्युपेतो भूत्वा पश्यतीति वर्त्तमानापदेश उपलभ्यते न विधिः। नेति ब्रूमः, तस्मादिति प्रकृतप्रशंसापरिग्रहाद्विधित्वप्रतीतेः, पश्येदिति च माध्यन्दिना विस्पष्टमेव विधिमधीयते। तस्माद्यज्ञाद्यनपेक्षायामपि शमादीन्यपेक्षितव्यानि। *यज्ञादीन्यपि त्वपेक्षितव्यानि यज्ञादिश्रुतेरेव। ननूक्तं 'यज्ञादिभिर्विविदिषन्ति' इत्यत्र न विधिरुपलभ्यत इति। सत्यमुक्तं, तथापि त्वपूर्वत्वात् संयोगस्य विधिः परिकल्प्यते, न ह्ययं यज्ञादीनां† विविदिषासम्बन्धः पूर्वं प्राप्तो येनानूद्येत। 'तस्मात् पूषा प्रपिष्टभागोऽदन्तको हीति' एवमादिषु चाश्रुतविधिकेष्वपि वाक्येष्वपूर्वत्वाद्विधिं परिकल्प्य पौष्णं पेषणं विकृतौ प्रतीयेतेत्यादिविचारः प्रथमे तन्त्रे प्रवर्त्तितः। तथा चोक्तं 'विधिर्वा धारणवत्' इति [जै०सू०]। स्मृतिष्वपि

त्यादिना। संयोगस्यापूर्ववत्त्वमेव स्पष्टयति। न हीति। इत्यपि महावाक्यैरनुष्ठानयोग्यापूर्वार्थविधिरवान्तरवाक्येन क्रियते न तत्र वाक्यभेदो दोषः इत्यत्र पूर्वतन्त्रसम्मतिमाह। तस्मादिति। दर्शपूर्णमासयोः श्रुतं 'तस्मात् पूषा' इत्यादि। तत्र पुष्णः प्रपिष्टद्रव्यसम्बन्धः सामासिकः। न च पुषा देवता पिष्टभागो द्रव्यं दर्शपूर्णमासयोरस्ति तेन तदेकवाक्यतायोगात् कालत्रयास्पृष्टद्रव्यदेवतासम्बन्धस्याविनाभावेन यागविध्युपस्थापकत्वात् व्यवहारसिद्धये विधिपदमध्याहृत्य प्रकरणादुत्कर्षेण पूषोद्देशेन पिष्टभागः कर्त्तव्य इति विकृतौ सम्बन्धः 'पौष्णं पेषणं विकृतौ प्रतीयेताचोदना प्रकृतौ' [जै०सू०] इत्यत्र विचारित इत्यर्थः। अवान्तरवाक्यभेदेन सूत्रकृतापि स्वीकृतो विधिरित्याह। तथा

* तथा यज्ञेति वर्ध० का०। † विविदिषासंयोग इति वर्ध०।

भगवद्गीतासु अनभिसन्धाय फलमनुष्ठितानि यज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवन्तीति प्रपञ्चितं, तस्माद्यज्ञादीनि शमादीनि च यथाश्रमं सर्वाण्येवाश्रमकर्माणि विद्योत्पत्तावपेक्षितव्यानि। तत्राप्येवंविदिति विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यं॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥ २८॥

प्राणसंवादे श्रूयते छन्दोगानां 'न ह वा एवंविदि किञ्चनानन्नं भवति' इति, तथा वाजसनेयिनां 'न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं' इति सर्वमस्यादनीयमेव भवतीत्यर्थः। किमिदं सर्वान्नानुज्ञानं शमादिवद्विद्याङ्गं विधीयते उत

चेति। स्मृत्यनुसारेणाप्यवान्तरवाक्यस्य विधायकत्वं वाच्यमित्याह। स्मृतिश्चेति। कर्मणां ज्ञानोत्पत्तिहेतुत्वे श्रुतिस्मृतिन्यायसिद्धे फलितमाह। तस्मादिति। यज्ञादीनामपि श्रुतिस्मृतिन्यायेभ्योऽनुष्ठेयत्वे शमादीनां तेभ्योऽविशेषाभावात् यावद्विद्योदयमविशेषेणानुष्ठानं स्यादित्याशङ्क्याह। तत्रापीति॥

यज्ञादीनां शमादीनाञ्च विद्यासन्निहितानां तच्छेषतोक्ता तत्प्रसङ्गात् विद्यासन्निधुक्तसर्वान्नाभ्यनुज्ञानस्यापि विद्याशेषतामाशङ्क्य प्रत्याह। सर्वान्नेति। प्राणविदः सर्वान्नानुज्ञानं विषयं वक्तुं शाखाद्वयस्थां श्रुतिमाह। प्राणेति। जग्धं भक्षितं। विषयवाक्यार्थं संगृह्णाति। सर्वमिति। अपूर्वत्वाद्विधिश्रुतेश्च संशयमाह। किमिति। तत्र प्राणविद्यायाः स्वतन्त्रपुरुषार्थज्ञानोपयुक्तायाः स्तुत्यर्थं सर्वान्नानुज्ञानकीर्त्तनमिति कथनात् पादादिसङ्गतिः। पूर्वपक्षे प्राणविदो भक्ष्याभक्ष्यविभागासिद्धिः, सिद्धान्ते विदुषोऽविदुषश्चापदि तत्सिद्धिरिति

स्तुत्यर्थं सङ्कीर्त्यत इति संशये विधिरिति तावत् प्राप्तं, तथा हि प्रवृत्तिविशेषकर उपदेशो भवति, अतः प्राणविद्यासन्निधानात्तदङ्गत्वेनेयं नियमनिवृत्तिरुपदिश्यते। नन्वेवं सति भक्ष्याभक्ष्यविभागशास्त्रव्याघातः स्यात्। नैष दोषः, सामान्यविशेषभावाद्बाधोपपत्तेः। यथा प्राणिहिंसाप्रतिषेधस्य पशुसंज्ञपनविधिना बाधः, यथा च 'न काञ्चन परिहरेत्तद्व्रतम्' इत्यनेन वामदेव्यविद्याविषयेण सर्वस्त्रीपरिहारवचनेन सामान्यविषयं गम्यागम्यविभागशास्त्रं बाध्यते, एवमनेनापि प्राणविद्याविषयेण सर्वान्नभक्षणवचनेन भक्ष्याभक्ष्यविभागशास्त्रं बाध्येतेत्येवं प्राप्ते ब्रूमः, नेदं सर्वान्नानुज्ञानं विधीयत इति, न ह्यत्र विधायकः शब्द उपलभ्यते 'न ह वा एवंविदि किञ्चनानन्नं

मन्वानः संशयमनूद्य पूर्वपक्षयति। इतीति। विधिपक्षेऽनुष्ठानविशेषलाभं हेतुमाह। तथा हीति। सर्वान्नानुज्ञानं स्वतन्त्रमेव विधीयतामित्याशङ्क्य सन्निधिविरोधान्नैवमित्याह। अत इति। सर्वान्नात्त्वं प्राणविद्याङ्गं चेत् तर्हि 'न कलञ्जं भक्षयेत्' इत्यादि शास्त्रं विरुध्येतेति शङ्कते। नन्विति। प्राणविदतिरिक्तविषयं तदिति विरोधं परिहरति। नेत्यादिना। उपपत्तिमेव कर्मविषयदृष्टान्तेनोदाहरति। यथेति। तत्रैव विद्याविषयं दृष्टान्तमाह। यथा चेति। 'यदुपमन्त्रयते स हिङ्कारः' इत्यादिना ग्राम्यव्यापारगतचेष्टासु हिङ्कारादिदृष्टिर्विहिता, सा वामदेव्यविद्या तत्रोपमन्त्रणं सङ्केतकरणं दृष्टान्तयोरर्थं दार्ष्टान्तिके योजयति। एवमिति। विविदिषावाक्ये वर्तमानापदेशेऽप्यपूर्वत्वात् पञ्चमलकाराङ्गीकारेण विधिकल्पनावत् न हेत्यादौ वर्तमानापूर्वत्वात् विधिरिति मतमनूद्य सूत्राद्बहिरेव सिद्धान्तमाह। एवमिति। तत्र हेतुमाह। न हीति। 'यस्य पर्णमयी' इत्यादाविव वर्त-

भवति' इति वर्तमानापदेशात्, न चासत्यामपि विधिप्रतीतौ प्रवृत्तिविशेषकरत्वलाभेनैव विधिरभ्युपगन्तुं शक्यते। अपि च श्वादिमर्यादं प्राणस्यान्नमित्युक्त्वेदमुच्यते 'नैवंविदि किञ्चिदनन्नं भवति' इति, न च श्वादिमर्यादमन्नं मनुष्यदेहेनोपभोक्तुं शक्यते, शक्यते तु प्राणस्यान्नमिदं सर्वमिति विचिन्तयितुं, तस्मात् प्राणान्नविज्ञानप्रशंसार्थोऽयमर्थवादो न सर्वान्नानुज्ञानविधिः। तद्दर्शयति 'सर्वान्नानुमतिश्च प्राणात्यये' इति। एतदुक्तं भवति प्राणात्यय एव हि परस्यामापदि सर्वमन्नमदनीयत्वेनाभ्यनुज्ञायते तद्दर्शनात्, तथा हि श्रुतिश्चाक्रायणस्य ऋषेः कष्टायामवस्थायामभक्ष्यभक्षणे प्रवृत्तिं दर्शयति 'मटचीहतेषु कुरुषु' इत्यस्मिन् ब्राह्मणे 'चाक्रायणः किल ऋषिरापद्गत इभ्येन सामिखादितान् कुल्माषांश्चखादानुपानन्तु

मानापदेशेऽपि कल्प्यो विधिरित्याशङ्क्याह। न चेति। सामान्यविधिबाधकत्वं श्रुतविशेषविधेरिष्टं विशेषकल्पना सामान्यविधिना बाध्या कल्पनाया विरोधाभावापेक्षत्वादित्यर्थः। इतश्च स्तुत्यर्थमेवेदं वचो न विधिरित्याह। अपि चेति। 'आश्वभ्य आशकुनिभ्य आकीटपतङ्गेभ्यस्तत्तेऽन्नम्' इति श्ववादशक्यविषयो विधिर्न सम्भवतीत्याह। न चेति। तर्हि वचनवैयर्थ्यमित्याशङ्क्य सर्वं प्राणस्यान्नमिति धीस्तुत्यर्थत्वान्नैवमित्याह। शक्यते त्विति। उक्तार्थे सूत्रमादत्ते। तदिति। तदक्षराणि व्याकरोति। एतदिति। मटचोऽशनयः पाषाणवृष्टयो रक्तवर्णा क्षुद्रपक्षिविशेषा वा तैर्हतेषु कुरुषु तद्देशस्थसस्येष्विति यावत्। आख्यायिकार्थमाह। चाक्रायण इति। स हि दुर्भिक्षे जाते जायया ऽनुपजातपयोधरादिस्त्रीव्यञ्जनया सह देशान्तरं प्रतिष्ठक्रमे स कदाचित् इभ्यग्रामे निवसन् इभ्येन हस्त्यारोहेण सामिभोजितानर्द्धभक्षितान्

तदीयमुच्छिष्टदोषात् प्रत्याचचचे, कारणञ्चाचोवाच 'न वा अजीविष्यमिमानखादन्' इति 'कामो म उदपानम्' इति च पुनस्तोत्तरेद्युस्तानेव स्वपरोच्छिष्टपर्य्युषितान् कुल्माषान् भक्षयाम्बभूव' इति। तदेतदुच्छिष्टोच्छिष्टपर्य्युषितभक्षणं दर्शयन्त्याः श्रुतेराशयातिशयो लक्ष्यते प्राणात्ययप्रसङ्गे प्राणसन्धारणायाभक्ष्यमपि भक्षयितव्यमिति, स्वस्थावस्थायान्तु तन्न कर्त्तव्यं विद्यावतापीत्यनुपानप्रत्याख्यानाद्गम्यते, तस्मादर्थवादो 'न ह वा एवंविदि' इत्येवमादिः॥

अबाधाच्च ॥ २९॥

एवञ्च सत्याहारशुद्धौ सत्त्वशुद्धिरित्येवमादि भक्ष्याभक्ष्यविभागशास्त्रमबाधितं भविष्यति॥

कुल्माषान् कुत्सितान् माषान् भक्षितवानित्यर्थः। अनुपानं गृहाणेत्युक्ते सत्युच्छिष्टं मे पीतं स्यादिति प्रतिषिध्य किमेतेऽप्युच्छिष्टा नेति परेणोक्ते कारणञ्चानुपाननिषेधे कथितवान् इत्याह। अनुपानन्त्विति। कुल्माषास्वेन्न भक्ष्यन्ते जीवनमेव मे न स्यात् कामः स्वेच्छातो मे तडागादिषु उदकपानं भविष्यतीत्यर्थः। स्वयं खादित्वा शिष्टान् जायार्थमाजहार तया च भर्तृस्वभावज्ञया निहितानुत्तरदिने प्रातरेव भक्षितवानित्याह। पुनस्तेति। कुल्माषभक्षणश्रुतेरभिप्रायमाह। तदिति। अनुपाननिषेधश्रुतेस्तात्पर्य्यमाह। स्वस्थेति। सर्वान्नभक्षणस्य निरङ्कुशत्वाभावे फलितमाह। तस्मादिति॥

तस्यार्थवादत्वे हेत्वन्तरमाह। अबाधाच्चेति। सामान्यशास्त्रविरोधात् न कल्प्यो विशेषविधिरित्युक्तं, अधुना सामान्यशास्त्रं दर्शयन् सूत्रं योजयति। एवञ्चेति। स्वस्थावस्थायां भक्ष्याभक्ष्यभेदे सतीति यावत्॥

अपि च स्मर्यते ॥ ३० ॥

अपि च आपदि सर्वान्नभक्षणमपि स्मर्यते विदुषोऽविदुषश्चाविशेषेण।

'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा'॥ इति।

तथा 'मद्यं नित्यं ब्राह्मणः सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः सुरापास्ते सुरापाः कृमयो भवन्त्यभक्ष्यभक्षणात्' इति च स्मर्यते वर्जनमनन्नस्य॥

शब्दश्चातोऽकामकारे॥ ३१॥

शब्दश्चानन्नस्य प्रतिषेधकः कामकारनिवृत्तिप्रयोजनः कठानां संहितायां श्रूयते 'तस्माद्ब्राह्मणः सुरां न पिबेत्' इति सोऽपि 'न ह वा एवंविदि' इत्यस्यार्थवादत्वादुपपन्नतरो भवति तस्मादेवंजातीयका अर्थवादा न विधय इति॥

आपदवस्थायामभक्ष्यभक्षणानुज्ञाने स्मृतिं संवादयति। अपीति स्मृतिरपि विद्वदविषयेत्याशङ्क्याह। अपि चेति। सुरापानमवस्थात्रयेऽपि न कार्यमित्याह। तथेति। ब्राह्मणो वर्जयेदिति शेषः। जीवितात्ययकृत्वा सुरापि तदत्यये पातव्येत्याशङ्क्याह। सुरापस्येति। उष्णां सुरामिति शेषः। उष्णामग्नितप्तामिति यावत्। मरणान्तिकप्रायश्चित्तदर्शनात्प्रसक्तेऽपि सा न पातव्येत्यर्थः। इतश्च सा सदा न पेयेत्याह सुरापा इति। तत्र हेतुरभक्ष्येति। मद्यमित्यादिस्मृतेस्तात्पर्यमाह वर्जनमिति॥

स्मृतिप्रामाण्यार्थं तन्मूलश्रुतिमाह। शब्दश्चेति। तस्मात् ब्राह्मणः सुरापस्य मरणान्तिकप्रायश्चित्तदर्शनादिति यावत्। श्रौतनिषेधप्रसक्तोपयोगमाह। सोऽपीति। श्रुतिस्मृतिसिद्धमर्थमुपसंहरन् अतःशब्दं व्याचष्टे। तस्मादिति॥

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

'सर्वापेक्षा च' [वे०सू०३।४।२६] इत्यत्राश्रमकर्मणां विद्यासाधनत्वमवधारितं, इदानीन्तु किममुमुक्षोरप्याश्रममात्रनिष्ठस्य विद्यामकामयमानस्य तान्यनुष्ठेयान्युताहो नेति चिन्त्यते, तत्र 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिनाऽऽश्रमकर्मणां विद्यासाधनत्वेन विहितत्वाद्विद्यामनिच्छतः फलान्तरं कामयमानस्य नित्यान्यननुष्ठेयानि, अथ तस्याप्यनुष्ठेयानि न तर्ह्येषां विद्यासाधनत्वं नित्यानित्यसंयोगविरोधादित्यस्यां प्राप्तौ पठति आश्रममात्रनिष्ठस्याप्यमुमुक्षोः कर्त्तव्यान्येव नित्यानि कर्माणि 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिना विहितत्वात्। न हि वचनस्यातिभारो नाम

सर्वान्नत्वोक्तिः शास्त्रान्तरविरोधे स्तुतिरित्युक्तं, एवं विद्यार्थत्वोक्तिर्यज्ञादीनां स्तुतिर्नित्यत्वश्रुतिविरोधादित्याशङ्क्याह। विहितत्वाच्चेति। व्यवहितेन सम्बन्धमाह। सर्वापेक्षेति। अग्निहोत्रादिकर्माण्यधिकृत्य विहितत्वादिनियुक्तविनियोगायोगाच्च संशयमाह। इदानीन्त्विति। तत्राग्निहोत्रादीनामुभयथात्वोक्त्या स्वतन्त्रपुमर्थहेतुशास्त्रोत्यात्मविद्योपायोपवर्णनात् पादादिसङ्गतिः। पूर्वपक्षे विद्याहेतुत्वोक्तेः स्तुतित्वात् विविदिषावाक्यस्य विवक्षितार्थत्वासिद्धिः, सिद्धान्ते योगपृथक्त्वन्यायात् कर्मणामुभयत्वसम्भवात् तत्सिद्धिरित्यभिप्रेत्य पूर्वपक्षमाह। तत्रेति। यावज्जीवश्रुतेरमुमुक्षोरपि तान्यनुष्ठेयानीत्याशङ्क्याह। अथेति। विविदिषाश्रुतेर्विद्यासंयोगोऽपि तेषामवश्यम्भावीत्याशङ्क्याह। नित्येति। आवश्यकत्वाभावात् विद्याकामनायाः काम्यतया कर्मणामनावश्यकत्वं नित्यतया चावश्यकत्वमित्येकत्रैवावश्यकत्वानावश्यकत्वे विरुद्धे स्यातामतो विद्योपायत्वोक्तिः श्रुतिरेवेत्यर्थः। सिद्धान्तसूत्रमवतार्य व्याकरोति। अस्यामिति। नित्यतया विहितानां विद्यार्थतया

कश्चिदस्ति। अथ यदुक्तं नैवं सति विद्यासाधनत्वमेषां स्यादित्यत उत्तरं पठति॥

सहकारित्वेन च॥ ३३॥

विद्यासहकारीणि चैतानि स्युः विहितत्वादेव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिना। तदुक्तं 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति [वे० सू० ३।४।२६]। न चेदं विद्यासहकारित्ववचनमाश्रमकर्मणां प्रयाजादिवत् विद्याफलविषयं मन्तव्यं अविधिलक्षणत्वाद्विद्यायाः असाध्यत्वाच्च विद्याफलस्य। विधिलक्षणं हि साधनं दर्शपूर्णमासादि स्वर्गफलसिषाधयिषया सहकारिसाधनान्तरमाकाङ्क्षते नैवं विद्या। तथा चोक्तं 'अत एव चाग्नीन्धनाद्यनपेक्षा' इति [वे० सू० ३।४।२५]। तस्मादुत्पत्ति-

---

विधानं गौरवादयुक्तमित्याशङ्क्याह। न हीति। उक्तमनूद्योत्तरत्वेन सूत्रमवतारयति। अथेत्यादिना॥

नित्यत्वेऽपि विद्यासंयुक्तत्वमग्निहोत्रादीनां विधिवशादेष्टव्यमिति व्याचष्टे। विद्येति। विविदिषासंयोगमात्रमत्र श्रुतं कुतो विद्यासंयुक्तत्वं तत्राह। तदुक्तमिति। सहकारित्वोक्त्या फलं प्रत्येवोपकारित्वमाचार्याभीष्टं कर्मणामित्याशङ्क्याह। न चेति। शास्त्रीयमन्वयव्यतिरेकसिद्धं चोपकारकत्वं न चात्रोभयमस्तीत्याह। असाध्यत्वादिति। अविधिलक्षणत्वं व्यतिरेकोदाहरणेन प्रपञ्चयति। विधीति। अङ्गभावस्य ग्राहकप्रकरणपूर्वकत्वाद्विधेर्ग्राहकत्वात् विहितं दर्शपूर्णमासादि प्रयाजादिभिर्ग्राहकग्रहीतिरङ्गैर्युज्यते नाविहिता विद्येत्यर्थः, तथापि कथमसाध्यफलत्वेन विद्यायां कर्मणामन्वयराहित्यं तदाह। तथा चेति। कथं तर्हि सहकारित्ववचनं तदाह। तस्मादिति। सह पुंभिर्भारं वहति गर्दभीतिवत् कर्मसु सत्स्वेव विद्या स्वकार्याय व्याप्रियत इत्यभिप्रेत्य सह-

साधनत्व एवैषां सहकारित्ववाचो युक्तिः। न चात्र नित्यानित्यसंयोगविरोध आशङ्क्यः, कर्माभेदेऽपि संयोगभेदात्। नित्यो ह्येकः संयोगो यावज्जीवादिवाक्यकल्पितो न तस्य विद्याफलत्वं, अनित्यस्त्वपरः संयोगः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिवाक्यकल्पितः, तस्य विद्याफलत्वं यथा एकस्यापि खादिरस्य नित्येन संयोगेन क्रत्वर्थता अनित्येन संयोगेन पुरुषार्थता च तद्वत्॥

सर्वथापि त एवोभयलिङ्गात्॥ ३४॥

सर्वथाप्याश्रमधर्मत्वपक्षे विद्यासहकारित्वपक्षे च त एवाग्निहोत्रादयो धर्मा अनुष्ठेयाः, त एवेत्यवधारयन्नाचार्य्यः किं निवर्त्तयति, कर्मभेदाशङ्कामिति ब्रूमः। यथा कुण्डपा-

---

कारित्वोक्तिरित्यर्थः। परोक्तमुद्भाव्य प्रत्याह। न चेति। संयोगभेदं विशदयति। नित्यो हीति। तुल्यबलश्रुतिद्वयेन पृथगेव सम्बन्धविधिः संयोगभेदः तस्मादुभयथात्वमविरुद्धमित्यर्थः। एकस्य तूभयत्वे संयोगपृथक्त्वमित्यत्रैतच्चिन्तितमित्युदाहरणेन दर्शयति। यथेति। वैल्वो वा खादिरो वा पालाशो वा इत्येको नित्यः संयोगस्तेन क्रत्वर्थस्य खादिरत्वस्य खादिरं वीर्य्यकामस्येत्यपरः संयोगोऽनित्यस्तेन पुरुषार्थतेत्येकस्य खादिरत्वस्योभयार्थत्वे संयोगपृथक्त्वं हेतुस्तथा कर्मस्वभेदेऽपि संयोगभेदादुभयथात्वमित्यर्थः॥

ननु प्रकरणान्तरस्थेभ्यो नित्यकर्मभ्यो भिन्नान्येव कर्माणि विविदिषावाक्ये विद्यासंयुक्ततया विधीयन्ते प्रकरणभेदस्य भेदकत्वात् तत् कथं तस्योभयत्वं तत्राह। सर्वथेति। प्रतिज्ञां व्याचष्टे। सर्वथापीति। एवकारव्यावर्त्त्यं शङ्कया दर्शयति। त एवेतीति। भेदशङ्कानिवृत्तिं व्यतिरेकदृष्टान्तेन स्पष्टयति। यथेति। कुण्डपायिनामयनगताग्निहोत्रस्य प्रकरणभेदात् प्रसिद्धाग्निहोत्रात् कर्मान्तरत्ववत् विविदिषन्तीति

यिनामयने 'मासमग्निहोत्रं जुह्वति' इत्यत्र नित्यादग्निहोत्रात् कर्मान्तरमुपदिश्यते नैवमिह कर्मभेदोऽस्तीत्यर्थः। कुतः उभयलिङ्गात् श्रुतिलिङ्गात् स्मृतिलिङ्गाच्च। श्रुतिलिङ्गं तावत् 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति सिद्धवदुत्पन्नरूपाण्येव यज्ञादीनि विविदिषायां विनियुङ्क्ते न जुह्वति इत्यादिवदपूर्वमेषां रूपमुत्पादयतीति। स्मृतिलिङ्गमपि 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः' इति विज्ञातकर्त्तव्यताकमेव कर्म विद्योत्पत्त्यर्थं दर्शयति। यस्यैते अष्टाचत्वारिंशत्संस्कारा इत्याद्या च संस्कारप्रसिद्धिर्वैदिकेषु कर्मसु तत्संस्कृतस्य विद्योत्पत्तिमभिप्रेत्य स्मृतौ भवति, तस्मात् साध्विदमभेदावधारणं॥

विद्यासंयुक्ततया विहितानामपि कर्मणां प्रकरणभेदादेव कर्मान्तरत्वशङ्कायां दृष्टान्ते जुह्वतीति होमविधिश्रुतेर्मासाख्यकालस्य चानुपादेयत्वेनाविधेयत्वादग्निहोत्रशब्दस्य चाख्यातपारतन्त्र्यादाख्यातस्य च जुहोतेः सन्निहितरूपवत् कर्म हित्वा व्यवहितनैयमिकाग्निहोत्रपरामर्शित्वायोगादाख्यातार्थवाचिनोऽग्निहोत्रशब्दस्यापि कर्मान्तरविषयत्वमेवेति युक्तं। विविदिषायामेव विधिश्रवणात् प्रसिद्धानामेव यज्ञादीनां यज्ञादिशब्दैरनुवादात् विद्यासंयोगमात्रं विधीयते तेषामिति न कर्मान्तरतेत्यर्थः। उक्तमेवार्थं प्रश्नद्वारा हेतुमवतार्य स्फोरयति। कुत इत्यादीना। प्रसिद्धकर्मसु संस्कारत्वप्रसिद्धिरपि तेषां चित्तमलनिरासेन ज्ञानोत्पत्तावुपकारकत्वमावेदयन्ती कर्माभेदं सूचयतीत्याह। यस्येति। गर्भाधानादयः सहधर्मचारिणीसंयोगान्ताः चतुर्दश, पञ्च महायज्ञाः, सप्त सोमसंस्थाः, सप्त हविःसंस्थाः, सप्त पाकसंस्थाः, अनश्नन् संहिताध्ययनं, प्रायणं कर्म, जपः, उत्क्रमणं, दैहिकं, भस्मसमूहनं, अस्थिसञ्चयनं, आह्वानीत्यष्टेत्येवमष्टाचत्वारिंशत्संस्काराः। कर्मभेदाशङ्कायोगे फलितमाह। तस्मादिति॥

अनभिभवञ्च दर्शयति ॥ ३५ ॥

सहकारित्वस्यैवैतदुपोद्वलकं लिङ्गदर्शनं अनभिभवञ्च दर्शयति श्रुतिर्ब्रह्मचर्य्यादिसाधनसम्पन्नस्य रागादिभिः क्लेशैः 'एष ह्यात्मा न नश्यति यं ब्रह्मचर्य्येणानुविन्दते' इत्यादिना, तस्माद्यज्ञादीन्याश्रमकर्माणि च भवन्ति विद्यासहकारीणि चेति स्थितं ॥

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

विधुरादीनां द्रव्यादिसम्पद्रहितानाञ्चान्यतमाश्रमप्रतिपत्तिहीनानामन्तरालवर्त्तिनां किं विद्यायामधिकारोऽस्ति किं वा नास्तीति संशये नास्तीति तावत् प्राप्तं, आश्रमकर्मणां विद्याहेतुत्वावधारणात् आश्रमकर्मासम्भवाच्चैतेषामित्येवं प्राप्ते

नित्यानि कर्माणि स्वतः पुण्यलोकावाप्तिफलान्यपि ज्ञानकामेनानुष्ठितानि ज्ञानार्थानीत्युक्तं इदानीं ब्रह्मचर्य्यादीनामाश्रमकर्मणां क्लेशतनूकरणेन विद्योदये हेतुतेत्यत्र लिङ्गमाह। अनभिभवञ्चेति। सूत्रस्य तात्पर्य्योक्तिपूर्वकमक्षरार्थं कथयति। सहकारित्वस्येति। उभयविध्यधीनमर्थमुपसंहरति। तस्मादिति॥

आश्रमकर्मणां विद्योपायत्वे सत्यनाश्रमकर्मणां नैवमिति मन्वानं प्रत्याह। अन्तरेति। अनाश्रमिणो विधुरादीन् विषयीकृत्य तेषां कर्मित्वप्रसिद्धेर्निन्दाप्रसिद्धेश्च संशयमाह। विधुरेति। अत्रानाश्रमकर्मणामुक्तविद्याहेतुत्वोक्त्या पादादिसङ्गतिः। पूर्वपक्षे यथा विधुरकर्मणां विद्याहेतुत्वासिद्धिः तथैवाश्रमकर्मणामपि विद्याहेतुत्वासिद्धिः। सिद्धान्ते त्वाश्रमित्वस्य ज्यायस्त्वात् कर्मणां तत्सिद्धिरिति मन्वानः संशयमनूद्य पूर्वपक्षमाह। नास्तीत्यादिना। विविदिषावाक्ये यज्ञा-

इदमाह, अन्तरा चापि तु, अनाश्रमित्वेनान्तराले वर्तमानोऽपि विद्यायामधिक्रियते, कुतः तद्दृष्टेः, *रैक्ववाचक्नवीप्रभृतीनामेवम्भूतानामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः ॥

अपि च स्मर्यते ॥ ३७ ॥

संवर्तप्रभृतीनाञ्च नग्नचर्यादियोगादनपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यते इतिहासे। ननु लिङ्गमिदं श्रुतिस्मृतिदर्शनमुपन्यस्तं का नु खलु प्राप्तिरिति साऽभिधीयते ॥

विशेषानुग्रहश्च ॥ ३८ ॥

तेषामपि विधुरादीनामविरुद्धैः पुरुषमात्रसम्बन्धिभिर्ज-

दिषु प्रत्येकं करणविभक्तिश्रुतेराश्रमकर्माभावेऽपि वर्णमात्रधर्माणां दानादीनां सम्भवात् विधुरादीनामपि विद्याधिकारः स्यादित्याशङ्क्य केवलवर्णधर्माणां विद्यासाधनत्वे सत्याश्रमकर्मणां वैयर्थ्यादनाश्रमिणामनधिकारो विद्यायामित्याह। आश्रमेति। अनाश्रमकर्माणां न विद्याहेतुतेति पूर्वपक्षमनूद्य सिद्धान्तयति। एवमिति। प्रतिज्ञां व्याकरोति। अनाश्रमित्वेनेति। तद्दृष्टेरिति व्याचष्टे। रैक्वेति ॥

श्रौतीं दृष्टिं शिष्ट्वा स्मार्तीमपि दर्शयति। अपीति। श्रुतिस्मृतिभ्यां सिद्धे सिद्धान्तेऽनन्तरसूत्रनिरस्यशङ्कामाह। नन्विति। जन्मान्तरकृतादपि कर्मणो रैक्वादीनां विद्यासम्भवात् वर्णाश्रमाधावृक्तात् कर्मणो विद्येत्यत्र श्रुतिस्मृत्योरनियामकत्वात् नियामकान्तरं वक्तव्यमित्यर्थः। आश्रमधर्माभावेऽपि वर्णधर्मविशेषैरनुगृहीता विद्योदेष्यतीति सूत्रेण समाधत्ते। सेति ॥

अविरुद्धैरनाश्रमित्वाविरोधिभिरिति यावत्। अत एव पुरुषमात्रसम्बन्धिभिरित्युक्तं। आश्रमधर्मशून्यानां जपादिष्वपि शूद्रादिवन्नाधि-

---

* रैक्वेति वर्ध०।

पोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः सम्भवति। तथा च स्मृतिः—

'जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः।
कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते'॥

इत्यसम्भवादाश्रमकर्मणोऽपि जपेऽधिकारं दर्शयति। जन्मान्तरानुष्ठितैरपि चाश्रमकर्मभिः सम्भवत्येव विद्याया अनुग्रहः। तथाच स्मृतिः—

'अनेकजन्मसंसिद्धस्ततो याति पराङ्गतिं'।

इति जन्मान्तरसञ्चितानपि संस्कारविशेषाननुग्रहीतॄन् विद्याया दर्शयति। दृष्टार्था च विद्या प्रतिषेधाभावमात्रेणाप्यर्थिनमधिकरोति श्रवणादिषु, तस्माद्विधुरादीनामप्यधिकारो न विरुध्यते॥

कारोऽस्तीत्याशङ्क्याह। तथा चेति। मैत्रो मित्रे भवः सर्वभूताहिंसको दयावानित्यर्थः। किञ्च नैयोगिकफलेषु कर्मणामानन्तर्यस्याचोदितत्वाद-नियतकालत्वे नैयोगिककर्माभावेऽप्यामुष्मिकैरेव कर्मभिर्विद्या भविष्यतीति सूत्रस्य व्याख्यान्तरमाह। जन्मान्तरेति। जन्मान्तरे सञ्चितकर्मणां विद्यानुग्राहकत्वे मानमाह। तथा चेति। अनेकेषु जन्मसु सञ्चितसंस्कारैः सिद्धः सम्यग्धीपरिपाकवानित्यर्थः। यथाऽस्मिन् जन्मन्यधीतवेदो धर्मजिज्ञासाधिकारी, तथास्मिन्नेव जन्मन्याश्रमधर्मवत्त्वादितर्विविदिषो विद्याधिकारी स्यादित्याशङ्क्याह। दृष्टार्थेति। अविद्यानिवृत्तेर्दृष्टफलत्वात् नियमापेक्षाभावात् विघातकनिषेधस्याभावमात्रेण तत्र पुरुषस्य प्रवृत्तिरित्यर्थः। श्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति। तस्मादिति॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अतस्त्वन्तरालवर्तित्वादितरदाश्रमवर्तित्वं ज्यायो विद्या-साधनं श्रुतिस्मृतिसंदृष्टत्वात् श्रुतिलिङ्गाच्च 'तेनेति ब्रह्मवित् पुण्यकृत् तैजसश्च' इति। 'अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः संवत्सरमनाश्रमी स्थित्वा कृच्छ्रमेकञ्चरेत्' इति च स्मृति-लिङ्गात् ॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपा-भावेभ्यः ॥ ४० ॥

सन्त्यूर्द्ध्वरेतस आश्रमाः इति स्थापितं, तांस्तु प्राप्तस्य कथञ्चि-त्ततः प्रच्युतिरस्ति नास्ति वेति संशयः, पूर्वधर्मेष्वनुष्ठानचिकी-र्षया रागादिवशेन वा प्रच्युतोऽपि स्यात् विशेषाभावादित्येवं

वर्णोपाधावुक्तधर्ममात्रादपि विद्योत्पद्यते चेदाश्रमित्वमनर्थकमि-त्याशङ्क्याह। अतस्त्विति। विद्यायाश्चिराचिरव्यक्तिहेतुतयाश्रमि-त्वानाश्रमित्वयोर्विशेषान्न वैयर्थ्यमिति मत्वा व्याचष्टे। अत इति। साधनोपचयादचिरेण विद्याहेतुत्वं ज्यायस्त्वं। आश्रमित्वस्य ज्या-यस्त्वे श्रुतिस्मृत्यनुगृहीतत्वं हेतुमाह। श्रुतीति। श्रुतौ पुण्यकृत्त्ववि-शेषणलिङ्गाच्च श्रेष्ठमाश्रमित्वमित्याह। श्रुतीति। तेन ज्ञानमार्गेण ब्रह्मविदेति गच्छति ब्रह्म प्राप्नोति, स च पुण्यं स्वाश्रमोक्तं कर्म करो-तीति पुण्यकृदुच्यते। तेजसि परमात्मन्यात्मत्वेन वर्तत इति तैजसस्तत्र पुण्यकृत्त्वविशेषणादाश्रमित्वं ब्रह्मप्राप्तिहेतुतया श्रेष्ठं सिद्धमित्यर्थः। आश्रमित्वस्य श्रेष्ठत्वे स्मार्तमपि लिङ्गमनुकूलयति। अनाश्रमीति॥

अनाश्रमिणां कर्मापि विद्याहेतुरेवेदाढ्यति, तस्य पूर्वाश्रमप्राप्तस्य धीपूर्वकं प्रच्युतस्य कर्म किमु वाच्यमित्याशङ्क्याह। तद्भूतस्येति। वृत्ता-नुवादेन विषयं सूचयति। सन्तीति। तानाश्रमान् प्राप्तस्य धीपूर्वं

प्राप्ते उच्यते। तद्भूतस्य तु प्रतिपन्नोर्द्ध्वरेतोभावस्य न कथञ्चिदप्यतद्भावो न ततः प्रच्युतिः स्यात्, कुतः, नियमातद्रूपाभावेभ्यः। तथा हि अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्निति अरण्यमियादिति पदन्ततो न पुनरेयादित्युपनिषदिति—

'आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमं।

आविमोचात् शरीरस्य सोऽनुतिष्ठेद्यथाविधि'॥

इति चैवंजातीयको नियमः प्रच्युत्यभावं दर्शयति। यथा च 'ब्रह्मचर्यं समाप्य गृही भवेत् ब्रह्मचर्यादेव प्रव्रजेत्' इति चैवमादीन्यारोहरूपाणि वचांस्युपलभ्यन्ते नैवं प्रत्यवरोहरूपाणि, न चैवमाचाराः शिष्टा विद्यन्ते। यत्तु पूर्वधर्मस्वनुष्ठानचिकीर्षया प्रत्यवरोहणमिति, तदसत्, 'श्रेयान्

प्रच्युतस्य कर्मविषयस्तत् किं विद्याहेतुर्न वेति संशयं सिद्धवत्कृत्य तद्धेतुमाह। तांस्त्विति। कथञ्चिद्रागादुद्रेकादित्यर्थः। सा मानवती न वेति विमर्शार्थः। ऊर्द्ध्वरेतसां बुद्धिपूर्वप्रच्युतानां कर्म यथोक्तविद्याहेतुर्नेत्युक्त्या पादादिसङ्गतिः। पूर्वपक्षे पूर्वोक्ताश्रमित्वश्रेष्ठ्यासिद्धिः,सिद्धान्ते प्रच्युतेरप्रामाणिकत्वात् तत्सिद्धिरिति स्वीकृत्य पूर्वपक्षयति। पूर्वेति। पूर्वाश्रमोक्तयागादिधर्मः सुखेन शक्योऽनुष्ठातुमिति तच्चिकीर्षया रागद्वेषवशेन च प्रत्यवरोहोऽपि प्रामाणिकः स्यात्, तथा चानाश्रमि कर्म निन्दितमपि यथा विद्यासाधनमुक्तं, तथा प्रत्यवरूढस्यापि कर्म विद्याहेतुराश्रमावरोहोऽनुष्ठेयस्तदारोहावरोहयोरन्यतरत्वात् तदारोहवदित्यवरोहस्य प्रामाणिकत्वादित्यर्थः। सिद्धान्तसूत्रमवतार्य व्याकरोति। एवमिति। उत्तराश्रमं प्राप्तस्य पूर्वाश्रमप्राप्तिरप्रामाणिकीत्यत्र प्रश्नपूर्वकं हेतुत्रयमाह। कुत इति। तत्र नियमं व्याचष्टे। तथा हीति। अरण्यमित्येकान्तोपलक्षितमूर्द्ध्वरेतस्त्वं तदियात् गच्छेदिति, पदं शास्त्रमार्गस्ततस्तस्मात् अरण्यान्न पुनरियात् पुनर्नागच्छेत् न प्रवत्यरोहेदित्युपनिषद्रहस्यमित्यर्थः। स्मार्तमपि नि-

स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्' इति स्मरणात्, न्यायाच्च यो हि यं प्रति विधीयते स तस्य धर्मो न तु यो येन स्वनुष्ठातुं शक्यते, चोदनालक्षणत्वाद्धर्मस्य। न च रागादिवशात् प्रच्युतिः, नियमशास्त्रस्य बलीयस्त्वात्। जैमिनेरपीत्यपिशब्देन जैमिनि-बादरायणयोरत्र संप्रतिपत्तिं शास्ति प्रतिपत्तिदार्ढ्याय॥

न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥ ४१॥

यदि नैष्ठिको ब्रह्मचारी प्रमादादवकीर्येत किं तस्य 'ब्रह्म-चार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' इत्येतत् प्रायश्चित्तं स्या-दुत नेति। नेत्युच्यते, यदप्यधिकारलक्षणे निर्णीतं प्रायश्चित्तं

यमं कथयति। आचार्येणेति। उक्तनियमतात्पर्यमाह। एवमिति। अतद्रूपमप्रत्यवरोहं व्याकरोति। यथा चेति। अभावं शिष्टाचारा-भावं व्याचष्टे। न चेति। परोक्तमनुमानमनूद्य स्मृतिविरोधेन दूष-यति। यत्त्विति। इतस्त्वानुमानमयुक्तमित्याह। न्यायाच्चेति। यत्तु रागादिवशात् प्रत्यवरोहणमिति तत्राह। न चेति। ततो न पुनरि-त्यादि नियमशास्त्रं। अर्थशेषं सूत्रावयवं व्याचष्टे। जैमिनेरिति। अत्रेति प्रामाणिकप्रच्युत्यभावोक्तिः। उभयसम्प्रतिपत्तिफलमाह। प्रतिपत्तीति॥

प्रत्यवरोहणमशास्त्रीयमित्युक्तं, सम्प्रति प्रमादात् प्रत्यवरोहे प्राय-श्चित्तमस्तीति वक्तुं पूर्वपक्षमाह। न चेति। ऊर्द्ध्वरेतसो धीपूर्वच्युत-ब्रह्मचर्यं विषयस्तेषां किं नास्ति प्रायश्चित्तं उतास्तीति प्रायश्चित्ता-भावस्मृतेर्महापातकेष्वनुक्तेश्च संशयमाह। यदीति। प्रमादादित्यधी-पूर्वच्युतब्रह्मचर्याणामेवोर्द्ध्वरेतसां प्रायश्चित्तचिन्तेयमिति द्योतयति। अवकीर्येत योनौ रेतः सिञ्चेदवकीर्णी योनौ क्षिप्तं रेतो यस्यास्तीत्यव-कीर्णी। प्रमादाच्च्युतब्रह्मचर्याणामूर्द्ध्वरेतसां कृतप्रायश्चित्तानां कर्म वि-

अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वादिति तदपि न नैष्ठिकस्य भवितुमर्हति। किं कारणं,

'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः।

प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा'॥

इत्यप्रतिसमाधेयपतनस्मरणात् छिन्नशिरस इव प्रतिक्रियानुपपत्तेः। उपकुर्वाणस्य तु तादृक्पतनस्मरणाभावादुपपद्यते तत् प्रायश्चित्तं॥

याहेतुरित्युक्त्या पादादिसङ्गतिः। पूर्वपक्षे प्रमादिनामूर्द्धरेतसामात्यन्तिकादधःपातात् पुमर्थासिद्धिः, सिद्धान्ते तेषामपि प्रायश्चित्तेन पतनसमाधानात् तत्सिद्धिरित्युपेत्य पूर्वपक्षसूत्रमवतार्य योजयति। उच्यत इति। तदेव षष्ठाध्याये निर्धारितं प्रायश्चित्तमुदाहरति। अवकीर्णीति। ब्रह्मचार्यवकीर्णीत्यत्र पशुहोमार्थमाधानं कर्तव्यं, किं वा लौकिकेष्वेवाग्निषु तत्कर्मेति सन्देहे पूर्वाधिकरणे यदाहवनीये जुहोति तेन सूर्योऽस्याभीष्टः प्रीतो भवतीत्याहवनीयस्य सर्वहोमार्थत्वादाहवनीये तावदुपनयनहोमा कार्या इति प्राप्य जातपुत्रोऽग्नीनादधीतेति कृतदारस्याग्न्याधानविधानादुपनयनकाले दाराभावादाधानस्याप्राप्तकालत्वात् आहवनीयाभावात् लौकिकाग्निषु उपनयनहोमा इति राद्धान्तिते, ब्रह्मचारी ययाऽवकीर्णी सैव तस्य भार्या स्यात् ततोऽग्न्याधानमित्यधिकशङ्कां निराकर्तुमतिदेशाधिकरणमवकीर्णिपशुश्चेति। यथोपनयनकाले लौकिकाग्नौ होमस्तथावकीर्णिपशुश्च तत्रैव होतव्यः। आधानस्य पत्नीपरिग्रहोत्तरकालतया पूर्वप्राप्त्यभावादितरस्याश्च परपरिग्रहभूताया भार्यात्वकल्पनयाऽऽधाने मानाभावादित्यर्थः। यदधिकारलक्षणे निर्णीतमधिकारिकं प्रायश्चित्तं तदपि नैष्ठिकस्य भवितुं नार्हतीति सम्बन्धः। प्रश्नपूर्वकं हेतुमाह। किमित्यादिना। किंविषयं तर्हि प्रायश्चित्तवचनं ब्रह्मचारित्वाविशेषादुपकुर्वाणस्यापि तद्योगात् तत्राह। उपेति। तादृगित्यप्रतिसमाधेयत्वोक्तिः॥

उपपूर्वमपि त्वेके भावमशनवत्तदुक्तं॥ ४२ ॥

अपि त्वेके आचार्या उपपातकमेवैतदिति मन्यन्ते यन्नैष्ठिकस्य गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यं विशीर्यते न तन्महापातकं भवति गुरुतल्पादिषु महापातकेष्वपरिगणनात्। तस्मादुपकुर्वाणवन्नैष्ठिकस्यापि प्रायश्चित्तभावमिच्छन्ति ब्रह्मचारित्वाविशेषादवकीर्णित्वाविशेषाच्च अशनवत्, यथा ब्रह्मचारिणो मधुमांसाशने व्रतलोपः पुनः संस्कारश्चैवमिति। ये हि प्रायश्चित्ताभावमिच्छन्ति न तेषां मूलमुपलभ्यते, ये तु भावमिच्छन्ति तेषां ब्रह्मचार्यवकीर्णीत्येतदविशेषश्रवणं मूलं। तस्माद्भावो युक्ततरः। तदुक्तं प्रमाणलक्षणे, 'समा विप्रतिपत्तिः स्यात् शास्त्रस्था वा तन्निमित्तत्वात्' इति। प्रायश्चित्ताभावस्मरणन्त्वेवं

सिद्धान्तयति। उपपूर्वमिति। उपपदं पूर्वं यस्य पतनस्य तदुपपूर्वमिति व्याकरोति। अपि त्विति। प्रायश्चित्ताभावं व्यावर्त्तयितुमपीति प्रत्युक्तं। एवकारार्थमाह। नेति। नैष्ठिकव्रतलोपस्योपपातकत्वेऽपि प्रायश्चित्तसत्त्वे किञ्जातमित्याशङ्क्य उपपातकसामान्यप्रायश्चित्तं स्यादिति सूत्रावयवं व्याकुर्वन्नाह। तस्मादिति। उक्तमर्थं दृष्टान्तमवतार्य स्पष्टयति। अशनवदिति। प्रायश्चित्तं न पश्यामीति श्रवणात् कथं तद्भावधीरित्याशङ्क्याह। ये हीति। प्रायश्चित्तं नास्तीति स्मरणाभावात् न पश्यामीति दर्शनाभावमात्रस्मरणादित्यर्थः। भाववादिनामपि तुल्या मूलानुपलब्धिरित्याशङ्क्याह। ये त्विति। ननु न पश्यामीति स्मरणस्य प्रायश्चित्तनिषेधार्थत्वमनुमाय तदर्थश्रुतिकल्पनात् तद्विरोधे सामान्यश्रुत्या प्रायश्चित्तसत्ता नाभ्युपगम्यते तत्राह। तस्मादिति। यावद्दर्शनाभावस्मरणस्य प्रायश्चित्तनिषेधार्थत्वकल्पनया तदर्थश्रुतिरनुमीयते तावदतिशीघ्रश्रुत्या प्रायश्चित्तं श्रुतिर्गमयतीति न स्मृत्या

मति यत्नगौरवोत्पादनार्थमिति व्याख्यातव्यं। एवं भिक्षुवै-खानसयोरपि वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रञ्चरित्वा

प्रायश्चित्ताभावधीरिति भावः। उक्तेऽर्थे यववराहाधिकरणसम्मति-माह। तदुक्तमिति। यवमयश्चरुर्वाराही उपानहावित्यत्र यववराह-शब्दाभ्यां प्रियङ्गुकृष्णशकुनिग्रहो वा दीर्घशूकशूकरग्रहो वेति सन्देहे पूर्वपक्षमाह। समेति। केचिद्दीर्घशूके यवशब्दं प्रयुञ्जते, प्रियङ्गुषु चापरे, वराहशब्दमपि शूकरे केचिदाहुः, कृष्णशकुनौ चान्ये, तेन प्रयोगसाम्यात् समा तुल्या विकल्पेन प्रतिपत्तिः स्यादित्यर्थः। सिद्धान्तमाह। शास्त्रस्था वेति। वाशब्दः पक्षव्यावृत्त्यर्थः। या शास्त्रमूला धीः सैव ग्राह्या शास्त्रनिमित्तत्वात् तद्धर्मादिज्ञानस्य, शास्त्रञ्च 'यदा च अन्या ओषधयो म्लायन्ति अथैते मोदमानास्तिष्ठन्ति वराहं गावोऽनुधावन्ति' इति च यववराहशब्दयोर्दीर्घशूकशूकरविषयत्वं, तस्मात् धीसाम्याभावात् विकल्पासिद्धेर्या शास्त्रमूला प्रसिद्धिः सैव ग्राह्येति प्रथमेऽध्याये सिद्धं, तथात्रापि शास्त्रमूलत्वात् प्रायश्चित्ताभावसिद्धेस्तत्सत्त्वं युक्तमित्यर्थः, प्रायश्चित्तं न पश्यामि इति स्मृतेः, तर्हि का गतिस्तत्राह। प्रायश्चित्तेति। एवं सति सामान्यश्रुत्या प्रायश्चित्तसत्त्वे निश्चिते सतीत्यर्थः। यदि कथञ्चिन्नैष्ठिकस्य ब्रह्मचर्यं लुप्येत तदा न प्रायश्चित्तं दृश्यते, तेन नैष्ठिकेन ब्रह्मचर्ये यत्नवता भाव्यमिति तद्विषयस्य यत्नस्याप्रमादेन सदा कार्यतारूपं गौरवमुत्पादयितुं प्रायश्चित्ताभावस्मरणमित्यर्थः। नैष्ठिके हि दर्शितन्यायमितरयोरतिदिशति। एवमिति। विशेषतोऽपि प्रायश्चित्तविधेस्तयोरस्ति प्रामादिके व्रतलोपे प्रायश्चित्तमित्याह। वानप्रस्थ इति। दीक्षाभेदे व्रतलोपे प्रमादतो ब्रह्मचर्यभङ्गे कृच्छ्रं चरित्वा महाकक्षं बहुतृणकाष्ठं देशं वर्द्धयेदिति सम्बन्धः। कृच्छ्रं विशिनष्टि। द्वादशेति। दिनत्रयमेकवारभोजनं, दिनत्रयं रात्रिभोजनं, दिनत्रयमयाचितं, दिनत्रयमुपवासकरणमित्येवंरूपमित्यर्थः। पारिव्राजकोऽपि प्रमादतो व्रतलोपे तुल्यं कृच्छ्रानुष्ठानमित्याह। भिक्षुरिति। सोमस्य यज्ञाङ्गत्वात् तदभिवृद्धिमनादृत्य महाकक्षं वर्द्धयेदित्याह। सोमेति।

महाकचं वर्द्धयेत्, भिक्षुर्वानप्रस्थवत् सोमवृद्धिवर्जं स्वशास्त्र-संस्कारस्येत्येवमादिप्रायश्चित्तस्मरणमनुसर्तव्यं ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥

यद्यूर्द्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकं, यदि वोपपातकमुभयथापि शिष्टैस्ते बहिः कर्तव्याः ।

'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा' ॥ इति

'सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतं ।
पुनः स पूतो भवति पङ्क्तिपावन एव च ॥
मनोवाक्कायजान् दोषान् ज्ञानोत्थांश्च प्रमादजान् ।
सर्वान् दहति योगाग्निस्तूलराशिमिवानलः ॥
उपपातेषु सर्वेषु पातकेषु महत्सु च ।
प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेत् ॥
नित्यमेव तु कुर्वीत प्राणायामांस्तु षोडश ।
अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः' ॥

इत्यादि परिव्राजकविषयं शास्त्रं । तेनाभिहितः संस्कारो ध्यानादिः स च कर्तव्यो भिक्षुणेत्याह । स्वशास्त्रेति । ऊर्द्ध्वरेतसां प्रमादच्युतब्रह्मचर्याणां कृतप्रायश्चित्तानां अधिकारोऽस्ति विद्यायामिति भावः ॥

कृतप्रायश्चित्तानामपि तेषां शिष्टाव्यवहार्यत्वमाह । बहिस्त्विति । कृतप्रायश्चित्तैः सह शिष्टाचाररूपं कर्म विषयस्तत् किं विद्याङ्गं किं वा नेति संशये प्रागुक्तप्रायश्चित्तैरेव तेषां व्यवहार्यतासिद्धेरङ्गमिति प्राप्ते सिद्धान्तमाह । यदीति । प्रतिज्ञार्थमुक्त्वा हेतुद्वयं व्याकरोति । आरूढ इत्यादिना । दुश्चरिताचरणकृतमेनो लोकद्वयेऽपि कर्तुरशुद्धिमादधाति, तत्र प्रायश्चित्तेन लोकद्वयेऽपि कस्यचिदशुद्धिरपनीयते कस्यचित्तु पारलौकिकाशुद्धिरपाक्रियते ऐहिकाशुद्धिरनुवर्तते । उक्तं हि

'आरूढपतितं विप्रं मण्डलाच्च विनिःसृतं।

उद्बद्धं कृमिदष्टञ्च स्पृष्ट्वा चान्द्रायणं चरेत्'॥ इति चैवमादिनिन्दातिशयस्मृतिभ्यः शिष्टाचाराच्च। न हि यज्ञाध्ययनविवाहादीनि तैः सहाचरन्ति शिष्टाः॥

स्वामिनः फलश्रुतेरित्यात्रेयः॥ ४४॥

अङ्गेषूपासनेषु संशयः किन्तानि यजमानकर्माणि आहोस्विदृत्विक्कर्माणि, किन्तावत् प्राप्तं यजमानकर्माणीति, कुतः

'बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः।

शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवदेत्'॥ इति।

तथेहाप्यारूढो नैष्ठिकमित्यादिस्मृतिलिङ्गादाचाराच्च परलोकाशुद्धेरपनीतत्वेऽपि अव्यवहार्यत्वावगमान्न तैर्व्यवहाररूपाचारस्य विद्याङ्गत्वं, तदेवमुक्ताचारस्योक्तविद्याङ्गत्वाभिधानात् प्रासङ्गिकी पादादिसङ्गतिः। पूर्वपक्षे बालघ्नानित्यादिस्मृतिविरोधः, सिद्धान्ते तदानुगुण्यमिति भावः॥

चान्यस्मिन् पापकारिणि तेन व्यवहारादन्यस्य लपकारवदन्यस्मिन् उपास्तिकर्तरि तेन व्यवहारात् फललक्षणोपकारमन्ययजमानस्य दर्शयन् पूर्वपक्षयति। स्वामिन इति। कर्माङ्गसङ्गान्युपासनानि विषयास्तेषूभयकर्तृत्वधिया संशयमाह। अङ्गेष्विति। शास्त्रीयाङ्गाश्रितोपास्तीनां स्वतन्त्रफलानामृत्विक्कर्तृकत्वेऽपि यजमानगामिफलत्वोक्तेरस्ति पादादिसङ्गतिः। पूर्वपक्षे कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यासिद्धिः, सिद्धान्ते प्रकृतस्य कर्तुरस्वातन्त्र्यात् तस्य यजमानाधीनत्वात्तत्कर्तृत्वमपि तदधीनमित्यैकाधिकरण्यस्याविरुद्धतेति सिद्धवत्कृत्य प्रश्नपूर्वकं पूर्वपक्षमाह। किमिति। तत्र हेतुं प्रश्नद्वारा दर्श-

फलश्रुतेः। फलं हि श्रूयते 'वर्षति हास्मै वर्षयति ह एतदेवं विद्वान् वृष्टौ पञ्चविधं सामोपास्ते' इत्यादि [छा०उ०]। तच्च स्वामिगामि न्याय्यं तस्य साङ्गे प्रयोगे, अधिकृतत्वादधिकृताधिकारत्वाच्चैवंजातीयकस्य। फलञ्च कर्तर्युपासनानां श्रूयते 'वर्षत्यस्मै य उपास्ते' इत्यादि [छा०उ०]। ननु ऋत्विजोऽपि फलं दृष्टं 'आत्मने वा यजमानाय वाऽयं कामं कामयते तमागायतीति'। न, तस्य वाचनिकत्वात्। तस्मात् स्वामिन एव फलवत्सूपासनेषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४५ ॥

नैतदस्ति स्वामिकर्माण्युपासनानीति, ऋत्विक्कर्माण्येतानि

यति। कुत इति। फलश्रुतिमेव विशदयति। फलं हीति। श्रुतमपि फलमृत्विग्गतं किन्न स्यात्तत्राह। तच्चेति। तत्र हेतुः। तस्येति। उद्गीथाद्युपास्तिविधीनां प्राप्तोद्देशनत्वात् क्रत्वधिकारिण एव प्राप्तेस्तस्यैवोद्देशनयोगात् तदाश्रितोपास्तीनां गोदोहनवदधिकृताधिकारित्वात् क्रत्वधिकारिण एव गोदोहनफलवतः विद्याफलेन सङ्गतिरित्याह। अधिकृतेति। तथापि कथं उपास्तीनां याजमानत्वं तत्राह। फलञ्चेति। अकर्तृत्वे फलितत्वमपि यजमानस्य न स्यात् कर्तृत्वभोक्तृत्वयोरैकाधिकरण्यादित्यर्थः। यजमानगामि फलमित्यत्र व्यभिचारं शङ्कते। नन्विति। उत्सर्गतो याजमानं फलं वचनात् क्वचिदपवादः स्यादित्याह। न, तस्येति। वाचनिकापवादाभावे तूत्सर्गस्थितिरित्युपसंहरति। तस्मादिति॥

अङ्गोपास्तीनां याजमानत्वात् न स्वतन्त्रफलतेति प्राप्ते सिद्धान्तयति। आर्त्विज्यमिति। तच्च प्रतिज्ञां विभजते। नैतदिति। अन्य-

स्युरित्यौडुलोमिराचार्यो मन्यते, किं कारणं, तस्मै हि साङ्गाय कर्मणे ऋत्विक् परिक्रीयते, तत्प्रयोगान्तःपातीनि चोद्गीथाद्युपासनानि अधिकृताधिकारत्वात्। तस्माद्गोदोहनादिकर्मनियमवदेव ऋत्विग्भिर्निर्वर्त्येरन्। तथा च 'तं ह बको दाल्भ्यो विदाञ्चकार स ह नैमिषीयाणामुद्गाता बभूव' इत्युद्गातृकर्तृकतां विज्ञानस्य दर्शयति। यत्तूक्तं कर्त्राश्रयं फलं श्रूयत इति, नैष दोषः, परार्थत्वादृत्विजोऽन्यत्र वचनात् फलसम्बन्धानुपपत्तेः॥

श्रुतेश्च॥ ४६॥

'यां वै काञ्चन यज्ञ ऋत्विज आशिषमाशासत इति यजमानायैव तामाशासत इति होवाचेति तस्मादु हैवंविदुद्गाता ब्रूयात् कं ते काममागायानि' इति [छा० उ०] चर्त्विक्कर्तृकस्य

कर्तृकत्वे कथमन्यस्य फलमिति शङ्कते। किं कारणमिति। सूत्रावयवेनोत्तरमाह। तस्मै हीति। ऋत्विजो यजमानेन स्वगामिने फलाय क्रीतत्वान्नानुपपत्तिरित्यर्थः। स्वाङ्गकर्मार्थं क्रीतत्वेऽपि ध्यानार्थमक्रीतत्वात् कथमुपास्तीनामृत्विक्कर्मत्वं तत्राह। तदिति। अङ्गोपास्तीनामधिकृताधिकारित्वे फलितमाह। तस्मादिति। तासामृत्विक्कर्तृत्वे श्रौतं लिङ्गमाह। तथा चेति। तमुद्गीथाख्यं प्रणवं प्राणादिदृष्टिविशिष्टं बको नामतो दल्भास्यापत्यं दाल्भ्यो विदाञ्चकार विदितवान्, विदित्वा च नैमिषीयाणां सत्रियाणामुद्गाताऽऽसीदित्यर्थः। पूर्वपक्षबीजमनुवदति। यत्त्विति। उत्सर्गतो याजमानत्वेऽपि फलस्य वचनादपवादो यत्र नैवं तत्रोत्सर्गस्थितिरित्युक्तमित्याह। नेत्यादिना॥

इतश्चोपास्तीनां ऋत्विक्कर्तृत्वं यजमानफलगामित्वं चेत्याह। श्रुतेश्चेति। उत्सर्गतः श्रुतिलिङ्गैश्च सिद्धमर्थमुपसंहरति। तस्मादिति।

विज्ञानस्य यजमानगामि फलं दर्शयति, तस्मादङ्गोपासनाना-मृत्विक्कर्मत्वसिद्धिः ॥

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्या-दिवत् ॥ ४७ ॥

'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यञ्च पाण्डित्यञ्च निर्विद्याथ मुनिरमौनञ्च मौनञ्च निर्विद्याथ ब्राह्मणः' इति बृहदारण्यके श्रूयते, तत्र संशयः मौनं विधीयते न वेति। न विधीयत इति तावत् प्राप्तं, बाल्येन तिष्ठासेदित्यत्रैव

सिद्धे चोपास्तीनां ऋत्विक्कर्तृत्वे तन्निर्धारणानियमन्यायेन स्वतन्त्र-फलत्वसिद्धिरिति भावः ॥

विदुरप्रभृतीनां मन्दाधिकारिणां धीसाधनोक्तिप्रसङ्गेनाङ्गोपासन-मधमधीसाधनमेवं निर्धार्य पुनरुत्तममध्यमधीसाधनं वक्तुमारभते। सह कार्यन्तरेति। विषयवाक्यमुदाहरति। तस्मादिति। यस्मात् पूर्वे ब्राह्मणा विदित्वाऽऽत्मानमेव एषणाभ्यो व्युत्थायाथ भिक्षाचर्यं चरन्ति स्म तस्मात् अधुनातनोऽपि ब्राह्मणः पाण्डित्यं षडङ्गाऽध्ययनजा ब्रह्मबुद्धि-स्तद्वान् पण्डितः तस्य कृत्यं पाण्डित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलभावेन युक्तितोऽसम्भावनानिरासरूपमननेन शुद्धधी-त्वेन वा तिष्ठासेत् स्थातुमिच्छेत्। उक्तदार्ढ्यार्थं बाल्यं चेत्यादिरनुवादः, श्रवणमननानन्तरं मुनिर्मननशीलो निदिध्यासनपरः स्यान्मौनात् अन्य-द्बाल्यं पाण्डित्यं चामौनं च निदिध्यासनं निश्चयेन लब्धो उक्तहेतु-त्रयस्य ब्रह्मधीहेतुत्वात् ब्रह्माहमित्यवगच्छतीति ब्राह्मणः साक्षात्कृत-ब्रह्म भवतीत्यर्थः। तत्र श्रुतं मौनं विषयीकृत्य मौनशब्दस्य सिद्धे पारिव्राज्ये साध्ये च ज्ञानाभ्यासे प्रयोगसिद्धेः संशयमाह। तत्रेति। निरुपाधिविद्यान्तरङ्गसाधनमौनविधिसाधनात् पादादिसङ्गतिः। पूर्व-

विधेरवसितत्वात्। न ह्यत्र मुनिरित्यत्र विधायिका विभक्तिरुपलभ्यते, तस्मादयमनुवादो युक्तः। कुतः प्राप्तिरिति चेत् मुनिपण्डितशब्दयोर्ज्ञानार्थत्वात्, पाण्डित्यं निर्विद्येत्येव प्राप्तं मौनं। अपि च अमौनञ्च मौनञ्च निर्विद्याथ ब्राह्मण इत्यत्र तावद् ब्राह्मणत्वं न विधीयते, प्रागेव प्राप्तत्वात्, तस्मादथ ब्राह्मण इति प्रशंसावादः, तथैवाथ मुनिरित्यपि भवितुमर्हति समाननिर्देशत्वादित्येवं प्राप्ते ब्रूमः, सहकार्यन्तरविधिरिति। विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवद्विधिरेवाश्रयितव्यः अपूर्व-

---

पक्षे मौनस्यानुष्ठेयत्वासिद्धिः, सिद्धान्ते तस्यानुष्ठेयत्वसिद्धिरिति मत्वा तं हेत्यादिवाक्यशेषादङ्गोपासनस्त्विकर्मेतिवत् अथ ब्राह्मण इति विधिहीनवाक्यशेषादथ मुनिरित्येषोऽपि न विधिरिति पूर्वपक्षयति। नेत्यादिना। ननु बाल्येनेत्युपक्रमे विधिश्रुतेर्मौनेऽपि विधिरस्तु नेत्याह। बाल्येनेति। तदेवोपपादयति। न हीति। यद्यत्रापि विधेयत्वं तर्हि विधिः श्रूयेत बाल्यवन्न च श्रूयते अतः श्रोतव्यत्वे सत्यश्रवणाद्विध्यभावसिद्धिरित्यर्थः। तर्हि मौनवाक्यस्य का गतिरस्ति तत्राह। तस्मादिति। अनधिगतस्यानुवादायोगादन्यत्र विध्यनुपलब्धेर्विधिरेवायमिति शङ्कते। कुत इति। पाण्डित्यविधानादेव मौनमपि सिद्धं तस्यैव मौनत्वादित्याह।.मुनीति। मुनिशब्दस्य भिक्षुवचनत्वेऽपि तस्यान्यत्र विधानादत्रानुवाद एवेति मत्वा मौनस्य अविधेयत्वे हेत्वन्तरमाह। अपि चेति। एकवाक्यतानुरोधात् मौनवाक्येऽपि न विधिरित्यर्थः। यदा पाण्डित्येन मौनस्य प्राप्तिस्तदा विधीयमानबाल्यस्येयं प्रशंसा, न हि पाण्डित्यं स्वरूपेण ज्ञानं किन्तु बाल्येऽनुष्ठितेऽनन्तरं मननापरपर्यायं पाण्डित्यं कृतं स्यात्, तस्मात् बाल्यं प्रशस्तं, यदा मौनस्योत्तमाश्रमस्य विध्यन्तरप्राप्तस्य अनुवादस्तदा बाल्यमात्रानुष्ठानवानुत्तमाश्रमित्वेन स्तूयत इति व्यक्ता स्तुतिरिति मत्वाह। तस्मादिति। बाल्यपाण्डित्यातिरिक्तस्य मौनस्याविधेयत्वात् न तत् मुमुक्षोरनुष्ठेयमिति प्राप्तं पक्षमनूद्य

त्वात्। ननु पाण्डित्यशब्देनैव मौनस्यावगतत्वमुक्तं, नैष दोषः, मुनिशब्दस्य ज्ञानातिशयार्थत्वान्मननान्मुनिरिति च व्युत्पत्तिसम्भवात् 'मुनीनामप्यहं व्यासः' इति च प्रयोगदर्शनात्। ननु मुनिशब्द उत्तमाश्रमवचनोऽपि दृश्यते 'गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यम्' इत्यत्र। न, 'वाल्मीकिर्मुनिपुङ्गवः' इत्यादिषु व्यभिचारदर्शनात्, इतराश्रमसन्निधानाच्च, पारिशेष्यात् तत्रोत्तमाश्रमोपादानं, ज्ञानप्रधानत्वादुत्तमाश्रमस्य। तस्माद्बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते। यत्तु बाल्य एव विधेः पर्यवसानमिति, तथाप्यपूर्वत्वान्मुनित्वस्य विधेयत्वमाश्रीयते, मुनिः स्यादिति निर्वेदनीयत्वनिर्देशादपि मौनस्य बाल्यपाण्डित्यवद्विधेयत्वाश्रयणं, तद्वतो विद्यावतः सन्न्या-

---

सिद्धान्तमाह। एवमिति। अपूर्वत्वमसिद्धमिति शङ्कते। नन्विति। पण्डितशब्दस्य ज्ञानमात्रार्थत्वात् मुनिशब्दस्य तदतिशयगामित्वात् अर्थभेदान्न पाण्डित्यशब्देन मुनिशब्दस्य प्राप्त्यर्थतेत्याह। नेत्यादिना वृद्धप्रयोगाभावे कथं तदर्थत्वं तत्राह। मुनीनामिति। आश्रमेऽपि प्रयोगदर्शनात् अनियतज्ञानातिशयवाचित्वं, तस्य चाचाविधानादनुवादत्वमेवेति शङ्कते। नन्विति। उत्तमाश्रमे मुनिशब्दोऽसाधारणः साधारणो वेति विकल्प्याद्यं प्रत्याह। नेति। असाधारणत्वं त्वेकस्यानेकार्थत्वयोगात् अयुक्तमित्यभिप्रेत्य प्रयोगस्य अन्यथासिद्धिमाह इतरेति। मौनस्यापूर्वत्वमुपपाद्य तृतीयमिति पदं व्याकुर्वन् फलितमाह। तस्मादिति। वाक्यभेदप्रसङ्गात् एकत्रैव विधिरित्युक्तं तत्राह यत्त्विति। उपरिधारणवत् मौनं वाक्यभेदेन विधेयमित्यत्रैव हेत्वन्तरमाह। निर्वेदनीये त्विति। कस्येदं मौनं विद्यासहकारितया विधीयते तत्राह। तद्वत इति। विशेषणप्रापकं एच्छति। कथमिति

निनः। कथं विद्यावतः सन्न्यासिन इत्यवगम्यते तदधिकारात् 'आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति। ननु सति विद्यावत्त्वे प्राप्नोत्येव तत्र विद्यातिशयः किं मौनविधिना इत्यत आह। पक्षेणेति। एतदुक्तं भवति यस्मिन् पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन्नेष विधिरिति। विध्यादिवत् यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्येवंजातीयके विध्यादौ सहकारित्वेना*ऽग्न्याधानादिकमङ्गजातं विधीयते एवमविधिप्रधानेऽप्यस्मिन् विद्यावाक्ये मौनविधिरित्यर्थः। एवं बाल्यादिविशिष्टे कैवल्याश्रमे श्रुतिसिद्धे विद्यमाने कस्मा-

प्रकरणं तथेत्याह। तदिति। पक्षेणेति पदं शङ्कोत्तरत्वेनावतारयति। नन्वित्यादिना। ब्रह्मैव प्रत्यगद्वयं वस्तु द्वैतं सर्वमविद्यामयमिति शास्त्रयुक्तिभ्यां सिद्धे तत्साक्षात्कारसाधनाभ्यासे स्वयं एव पुरुषस्योन्मुख्यादनर्थको विधिरिति चोदिते सन्न्यासप्रकरणात् तद्धर्मस्य श्रवणादेः साक्षात्कारहेतुभावस्यापूर्वत्वादेष्टव्यस्तद्विधिरिति समाधिः। विद्यावन्तमधिकारिविशेषं प्रति विधेरानर्थक्यमयुक्तमित्याशङ्क्य विद्यावत इति विद्यातिशययुक्तो नोच्यते किन्तु विद्योदयाय तदुपायाभ्यासे प्रवृत्तः, तेनास्य पक्षे कदाचिद्भेददर्शनं प्राप्नोत्यतो विधेरर्थवत्तेति सूत्रपदार्थं विवृणोति। एतदिति। अतन्निष्ठवाक्यस्य तद्विधायकत्वे दृष्टान्तमाह। विध्यादिवदिति। तदेव व्याचष्टे। यथेति। आदिर्मुख्यं प्रधानं, विधेरादिर्विध्यादिर्दर्शपूर्णमासविधिः, समिदादिस्तु विध्यन्तस्तत्राश्रुतविधिकेऽपि विधिराश्रीयते इत्यर्थः। दृष्टान्तस्थमर्थं दार्ष्टान्तिके योजयति। एवमिति। बाल्यादिप्रधानसन्न्यासो यद्यनुष्ठेयस्तर्हि कस्मात् गार्हस्थ्येनोपसंहरति। श्रुतिरिति। अनन्तरसूत्रव्यावर्त्यमाह। एवमिति। गृहिणोपसंहारेऽपि कैवल्याश्रमस्य किञ्ज्ञातमित्याशङ्क्यामा-

* अग्न्याभ्नेति वर्ध० का०।

छान्दोग्ये गृहिणोपसंहारः 'अभिसमावृत्य कुटुम्बे' इत्यत्र, तेन ह्युपसंहरन् तद्विषयमादरं दर्शयतीत्यत उत्तरं पठति॥

कृत्स्नभावात् तु गृहिणोपसंहारः॥ ४८॥

तुशब्दो विशेषणार्थः, कृत्स्नभावोऽस्य विशिष्यते, बहुलायासानि हि बहून्याश्रमकर्माणि यज्ञादीनि तं प्रति कर्तव्यतयोपदिष्टानि आश्रमान्तरकर्माणि च यथासम्भवमहिंसेन्द्रियसंयमादीनि तस्याऽपि विद्यन्ते, तस्मात् गृहमेधिनोपसंहारो न विरुध्यते॥

मौनवदितरेषामप्युपदेशात्॥ ४९॥

यथा मौनं गार्हस्थ्यं चैतावाश्रमौ श्रुतिमन्तावेवमितरावपि वानप्रस्थगुरुकुलवासौ। दर्शिता हि पुरस्तात् श्रुतिः 'तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः' इत्याद्या।

स्याविषयत्वं प्राप्तमित्याह। तेनेति। बहुलायाससाध्यकर्मबाहुल्यात् तेनोपसंहारो न तेनैव समापनादित्याह। अत इति॥

सूत्रं व्याचष्टे। तुशब्द इति। ननु यथा गृहिणो यज्ञादीनि कर्तव्यत्वेन उक्तानि तथाऽऽश्रमान्तराणामपि करणसंयमादीनि कर्माण्युच्यन्ते, तथा च कोऽस्य विशेषस्तत्राह। आश्रमान्तरेति। गृहमेधिनि विशेषे सिद्धे फलितमाह। तस्मादिति॥

मौनं गार्हस्थ्यमित्याश्रमद्वयोक्तेरितराश्रमाभावशङ्का कस्यचिद्भवेत् तन्निरासार्थमाह। मौनवदिति। कथं तयोः श्रुतिमत्त्वं तत्राह। दर्शितेति। श्रुतिमत्त्वाविशेषे फलितमाह। तस्मादिति। इतरेषामिति बहुत्वम् गार्हस्थ्यस्यापि परामर्शो न तु सिद्धवत् उपन्यास इत्याशयेनाह। इतरेषामिति। गायत्रः, ब्राह्मः, प्राजापत्यः, बृहन् इति ब्रह्मचारी चतुर्विधः। गृहस्थोऽपि वार्तावृत्तिः, शालीनवृत्तिः, यायावरः,

तस्माच्चतुर्णामप्याश्रमाणामुपदेशाविशेषात् तुल्यवत् विकल्प-समुच्चयाभ्यां प्रतिपत्तिः, इतरेषामिति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदापेक्षयानुष्ठानभेदापेक्षया वेति द्रष्टव्यम्॥

अनाविष्कुर्वन्नन्वयात्॥ ५०॥

'तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इति बाल्यमनुष्ठेयतया श्रूयते। तत्र बालस्य भावः कर्म वा बाल्यमिति तद्धिते सति बालभावस्य वयोविशेषस्येच्छया सम्पादयितुमशक्यत्वात् यथोपपादमूत्रपुरीषत्वादिबालचरितमन्तर्गता वा

घोरसन्न्यासी इति चतुर्विधः। वानप्रस्थस्य वैखानसौदुम्बरबालखिल्य-फेनपप्रभेदैश्चतुर्विधः। तथा परिव्राडपि कुटीचकबहूदकहंसपरम-हंसप्रभेदैश्चतुर्विध इति षोडश प्रभेदास्तावदाश्रमास्तत्तद्धर्मविशेषयुक्ताः श्रुतिस्मृतिप्रसिद्धास्ततो ब्रह्मचारिणि वानप्रस्थे चानुष्ठानभेदमनु-ष्ठानभेदं वाऽपेक्ष्य बहुक्तिर्न गार्हस्थ्यमपेक्ष्य, तस्य प्रागेवासन्दिग्धत्वे-नोक्तत्वादित्यर्थः॥

बाल्यस्य विधेयत्वमपेत्यावान्तरवाक्यभेदेन मौनमपि विधेयत्वात् मुमुक्षुणा कार्यमित्युक्तमिदानीं किन्तत् बाल्यमिति वीक्षायामाह। अनाविष्कुर्वन्निति। अनुष्ठेयत्वेन श्रुतं बाल्यं विषयत्वेनोदाहरति। तस्मादिति। तत्र बाल्ये विषये संशय इति सम्बन्धः। संशयकारणमाह। बालस्येति। तर्हि बालभावो वयोविशेषोऽपि कल्प्यतामित्याशङ्क्य तदयुक्तं हेतुमाह। बालेति। तद्धितश्रुत्या परिशिष्टं बाल्यमाश्रित्य संशयमभिनयति। यथेति। बाल्यशब्दार्थविवेचनेन स्वतन्त्र-पुमर्थहेतुविद्यान्तरगतस्यैवाश्रापि निरूपणात् पादादिसङ्गतिः। पूर्व-पक्षे तिष्ठन्मूत्रत्वाद्यपि विदुषोऽनुष्ठेयं सिध्यति, सिद्धान्ते बाल्यस्याप्रकटेन्द्रियत्वादिरूपभावशुद्धेरनुष्ठेयत्वात् न विदुषो यथेष्टचेष्टा-सिद्धिरिति मत्वा प्रश्नपूर्वकं पूर्वपक्षमाह। किन्तावदिति। चरणं

भावविशुद्धिर्दम्भदर्पप्रकृष्टेन्द्रियत्वादिरहितता वा बाल्यं स्या-
दिति संशयः, किं तावत् प्राप्तं कामचारवादभक्षता यथोप-
पादमूत्रपुरीषत्वञ्च प्रसिद्धतरं लोके बाल्यमिति तद्ग्रहणं युक्तं।
ननु पतितत्वादिदोषप्राप्तेर्न युक्तं कामचारताद्याचरणं न
विद्यावतः सन्न्यासिनो वचनसामर्थ्याद्दोषनिवृत्तेः पशुहिंसा-
दिष्विवेत्येवं प्राप्तेऽभिधीयते। न, वचनस्य गत्यन्तरसम्भवात्।
अविरुद्धे ह्यन्यस्मिन् बाल्यशब्दाभिलप्ये लभ्यमाने न विध्यन्तर-
व्याघातकल्पना युक्ता। प्रधानोपकाराय चाङ्गं विधीयते ज्ञा-
नाभ्यासस्य प्रधानमिह यतीनामनुष्ठेयं, न च सकलायां बाल-

चारो वदनं वादो भक्षणं भक्ष्यते कामतो यस्य स तथा तस्य भाव-
स्तत्ता। यथोपपादं यथासम्भवं, यत्र क्वापि मूत्रं पुरीषं चास्येति यथो-
क्तस्य भावस्त्वं। तत्र लोकप्रसिद्धिं हेतुमाह। प्रसिद्धेति। शास्त्रा-
चारविरोधादयुक्तमुक्तविधबाल्यस्य विधेयत्वमिति शङ्कते। नन्विति।
आदिशब्देन शिश्नगर्त्ता गृह्यते। सामान्यशास्त्रसङ्कोचो विशेषविधेः
स्यादित्याह। नेत्यादिना। समानविधेर्विशेषविधिना सङ्कोचे दृष्टान्त-
माह। पश्विति। विदुषो यथेष्टचेष्टायामपि न दोषोऽस्तीति प्राप्त-
मनूद्य सिद्धान्तमाह। एवमिति। विदुषो यथेष्टचेष्टा न विधेया
शास्त्रान्तरविरोधादिति प्रतिजानीते। नेति। सामान्यशास्त्रस्योक्तः
सङ्कोचो बाल्येन विष्ठासेर्दिति वचनादित्याशङ्क्याह। वचनस्येति।
सामान्यप्रवृत्तविधिशास्त्राविरुद्धेऽर्थे सम्भवति तद्विरुद्धार्थकल्पनायो-
गात् न कामचारादि विधेयमित्युक्तमेव व्यनक्ति। अविरुद्धे हीति।
इतश्च कामचारादि न विधेयमित्याह। प्रधानेति। किन्तत् प्रधानं
यदङ्गत्वेन बाल्यादि विधीयते तदाह। ज्ञानेति। उक्तप्रधानोपकारि-
त्वाभावात् न कामचारादि विधेयमित्युक्तं तद्विरोधित्वाच्च तदविधेय-
मित्याह। न चेति। किन्तर्हि विधेयं बाल्यं तदाह। तस्मादिति।

चर्यायामङ्गीक्रियमाणायां ज्ञानाभ्यासः सम्भाव्यते, तस्मादान्तरो भावविशेषो बालस्याप्ररूढेन्द्रियत्वादिरिह बाल्यमाश्रीयते। तदाह अनाविष्कुर्वन्निति। ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानमविख्यापयन् दम्भदर्पादिरहितो भवेत् यथा बालोऽप्ररूढेन्द्रियतया न परेष्वात्मानमाविष्कर्तुमीहते तद्वत्। एवं ह्यस्य वाक्यस्य *प्रधानोपकार्यर्थानुगम उपपद्यते। तथा चोक्तं स्मृतिकारैः।

'यन्न सन्तं नचासन्तं नाश्रुतं न बहुश्रुतं।
न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स ब्राह्मणः॥
गूढधर्माश्रितो विद्वान्, अज्ञातचरितं चरेत्।
अन्धवत् जडवच्चापि मूकवच्च महीञ्चरेत्'॥

'अव्यक्तलिङ्गोऽव्यक्ताचारः' इति चैवमादि॥

इहेति प्रकृतवाक्योक्तिः। उक्तेऽर्थे सूत्रमादाय योजयति। तदाहेति। कथं यथोक्तेऽर्थे बाल्यशब्दः प्रयुज्यते तत्राह। यथेति। अन्यथादिति पदं व्याकरोति। एवं हीति। अप्ररूढेन्द्रियत्वादिरूपभावशुद्धिलक्षणबाल्यस्य प्रधानोपकारित्वे मानमाह। तथा चेति। कुलीनत्वप्रकटनं सत्त्वं, तद्वैपरीत्यमसत्त्वं, शास्त्रार्थज्ञानराहित्यमश्रुतत्वं, तद्वैपरीत्यं बहुश्रुतत्वं, सदाचारनिरतत्वं सुवृत्तत्वं, दुराचारनिष्ठत्वं दुर्वृत्तत्वं इति भेदः। तत्किमिदानीं ब्रह्मयोग्यस्य मुमुक्षोर्नास्त्येव किञ्चित् अनुष्ठेयं तत्राह। गूढेति। चक्षुरिन्द्रियपारवश्यं निरसितुं अन्धवदित्युक्तं। रसनादिपारवश्यं निरस्यति। जडवदिति। ज्ञानेन्द्रियपारवश्यं परिहृत्य कर्मेन्द्रियपारवश्यं परिहरति। मूकवदिति। धर्मध्वजित्वाप्रकटनमव्यक्तलिङ्गत्वं, तदेवं मुमुक्षोरुपरतसर्वेन्द्रियस्य श्रवणादिपरस्य मोक्षसाधनं तत्त्वज्ञानं अवश्यम्भावीति भावः॥

---

* प्रधानोपकार्थत्वानुगम इति वर्ध॰ का॰।

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥

सर्वापेक्षा च यज्ञादिश्रुतेरित्यत आरभ्योच्चावचं विद्यासाधनमवधारितं तत्फलं विद्या सिध्यन्ती किमिहैव जन्मनि सिध्यति उत कदाचिदमुत्रापीति चिन्त्यते, किं तावत् प्राप्तं इहैवेति। किं कारणं, श्रवणादिपूर्विका हि विद्या न च कश्चिदमुत्र विद्या मे जायतामित्यभिसन्धाय श्रवणादिषु प्रवर्तते, समान एव तु जन्मनि विद्याजन्माभिसन्धाय तेषु प्रवर्तमानो दृश्यते। यज्ञादीन्यपि श्रवणादिद्वारेणैव विद्यां जनयन्ति प्रमाणजन्य-

---

बाल्यान्तमुच्चावचं विद्याहेतुमुक्त्वा तत्फलं विद्याजन्मकालं निरूपयति। ऐहिकमिति। उक्तहेत्वधीनधीजन्मविषये कारीर्यादिफले चित्रादिफले चोभयोपलब्धेर्वृत्तानुवादपूर्वकं संशयमाह। सर्वेति। श्रवणादिसामग्रीप्रतिबन्धशून्या विशिष्टधीप्रसवभूमिरित्युक्तेरत्र पादादिसङ्गतिः। पूर्वपक्षे श्रवणादीनां विद्योपायत्वनियमासिद्धिः, सिद्धान्ते प्रतिबन्धाभावापेक्षया तेषां तन्नियमसिद्धिरित्युपेत्य प्रश्नपूर्वकमैहिकत्वनियमं पूर्वपक्षमाह। किमिति। फलत्रैविध्योपलब्धौ तन्नियमे नास्ति हेतुरिति शङ्कते। किमिति। तत्र कारणमाह। श्रवणादीति। चित्रादिवदमुत्रापि धीहेतुत्वं श्रवणादेः स्यादित्याशङ्क्याह। न चेति। कथं तर्हि तेषु प्रवृत्तिरित्याशङ्क्य तेषां कारीर्यादितुल्यत्वमाह। समान इति। श्रवणादीनां चक्षुरादिवत्तद्धीसाधनत्वात् कालान्तरीयकुम्भोपलम्भाय चक्षुरुन्मीलनाभाववत् जन्मान्तरीयविद्यायै श्रवणादिषु प्रवृत्त्ययोगात् उपलभ्यमानसंसारदुःखनिवृत्तये च विद्यासाधनत्वात् कारीर्यादिवत्तुल्यजन्मन्येव विद्याजन्मेत्यर्थः। यज्ञादीनां जन्मान्तरीयफलानां धीहेतुत्वस्य विविदिषावाक्यीयत्वाज्जन्मान्तरे धीजन्मेत्याशङ्क्याह। यज्ञेति। तेषां धीशुद्ध्या श्रवणादिघटकत्वात्

त्वादिद्याया:। तस्मादैहिकमेव विद्याजन्मेत्येवं प्राप्ते वदामः, ऐहिकं विद्याजन्म भवति असति प्रस्तुतप्रतिबन्धे इति। एतदुक्तं भवति यदा प्रक्रान्तस्य विद्यासाधनस्य कश्चित् प्रतिबन्धो न क्रियते उपस्थितविपाकेन कर्मान्तरेण तदैव विद्या *उपपद्यते, यदा तु खलु प्रतिबन्धः क्रियते तदाऽमुत्रेति। उपस्थितविपाकत्वञ्च कर्मणो देशकालनिमित्तोपनिपाताद्भवति। यानि चैकस्य कर्मणो विपाचकानि देशकालनिमित्तानि न तान्येवान्यस्यापीति नियन्तुं शक्यते यतो विरुद्धफलान्यपि कर्माणि भवन्ति, शास्त्रमप्यस्य कर्मण इदं फलमित्येतावति पर्यवसितं न देशकालनिमित्तविशेषमपि सङ्कीर्तयति। साध-

घटितेषु धियावश्यम्भाव्यमित्यैहिकत्वनियम इत्यर्थः। श्रवणादीनां कारीर्यादितुल्यत्वे फलितमाह। तस्मादिति। श्रवणादिषु कृतेष्वपि न चेदत्र धीः स्यात् तेषामतदुपायतैवेति प्राप्तमनूद्य चित्रावदनियतफलधीसाधनमिति सिद्धान्तमाह। एवमिति। कृतेष्वपि श्रवणादिषु कदाचिद्विद्या नोत्पद्यते चेत्तर्हि तेषां तदुपायत्वमनियतं स्यादित्याशङ्काह। एतदिति। कृतेष्वपि श्रवणादिषु अत्र विद्यानुदये कारीर्यादाविव प्रतिबन्धो वा पौष्कल्याभावो वा तेषां कल्पनीयः, प्रतिबन्धहीना हि सामग्री कार्ये हेतुर्न चैतावता तद्धेतुत्वहतिरित्यर्थः। उपस्थितविपाकश्रवणादिविरोधात् कर्मण एव प्रतिबन्धमाशङ्काह। उपस्थितेति। तैरेव देशादिभिर्विद्यार्थमेव श्रवणादिकर्म किमिति न विपच्यते तत्राह। यानीति। भोगार्थस्य कर्मणो ज्ञानार्थस्य च श्रवणादेर्देशकालनिमित्तैकरूप्याभावे हेतुमाह। यत इति। कर्मणा श्रवणादीनां प्रतिबन्धे तेभ्यो विद्योत्पत्तेरादिशास्त्रं व्याहन्येतेत्याशङ्काह। शास्त्रमिति। तथापि कर्मण एव प्रतिबन्धकत्वं न श्रवणादीनामिति कुतो नियमस्तत्राह। साधनेति। यत्त्विह विद्याभावे कारीर्यादिवत्

* विपच्यत इति का० वर्ध०।

नवीर्यविशेषात्त्वतीन्द्रिया हि कस्यचित् शक्तिराविर्भवतीति तत्प्रतिबद्धा परस्य तिष्ठति। न चाविशेषेण विद्यायामभिसन्धिर्नोत्पद्येत इहामुत्र वा मे विद्या जायतामित्यभिसन्धेर्निरङ्कुशत्वात्। श्रवणादिद्वारेणापि विद्योत्पद्यमाना प्रतिबन्धक्षयापेक्षयैवोत्पद्यते। तथा च श्रुतिः दुर्बोधत्वमात्मनो दर्शयति—

'श्रवणायापि बहुभिर्यो न लभ्यः

शृण्वन्तोऽपि बहवो यन्न विद्युः।

आश्चर्यो वक्ता कुशलोऽस्य लब्धा

आश्चर्यो ज्ञाता कुशलानुशिष्टः'॥ इति।

गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभावमिति वदन्ती

प्रतिबन्धादिसत्त्वकल्पनेन धिय आमुष्मिकत्वकल्पनमयुक्तमिहैव मे विद्या स्यादित्यभिसन्धिदृष्टेरिति तत्राह। न चेति। दृश्यमानसंसारदुःखस्यानेकजन्मगामित्वं जानतो यदा कदाचिदनर्थनिवृत्तिः स्यादित्यभिसन्धेः साधनसामर्थ्यानुसारेण सम्भावितत्वादित्याह। अभिसन्धेरिति। यत्तु श्रवणादीनां चक्षुरादिवद्दृष्टफलत्वमिति तत्राह। श्रवणादीति। तेषां विधानाददृष्टद्वारापि साधनत्वमवघातवदवगतं यज्ञादीनामनियतफलानां न साधनत्वविधेस्ते विद्योत्पत्तेरनियतत्वमित्यर्थः। यत्तु ज्ञानादीनां घटकत्वात् घटितेषु श्रवणादिषु विद्याऽवश्यम्भाविनीति, तत्र प्रतिबन्धसत्त्वस्य श्रौतलिङ्गसिद्धत्वान्नैवमित्याह। तथा चेति। आत्मनः श्रवणमपि दुष्करं बहूनामित्याह। श्रवणायेति। कथञ्चन श्रवणेऽपि तत्फलज्ञानं दुर्लभमित्याह। शृण्वन्त इति। तत्र हेतुः। आश्चर्य इति। यथावदस्यात्मनो वक्ताऽऽश्चर्योऽद्भुतवत् कश्चिदेव सम्भवति सम्यगाचार्यसिद्धावपि तच्छ्रुत्वा लब्धा साक्षात्कर्ताऽस्याश्चर्यस्तिष्ठतु साक्षात्कारः कुशलेनाचार्येणानुशिष्टोऽपि शास्त्रात् परोक्षतो ज्ञाताऽप्याश्चर्य एवेत्यर्थः। सम्प्रत्यामुष्मिकत्वे धियो लिङ्गमाह। गर्भस्थ

जन्मान्तरसञ्चितात् साधनादपि जन्मान्तरे विद्योत्पत्तिं दर्शयति। न हि गर्भस्थस्यैवैहिकं किञ्चित् साधनं सम्भाव्यते। स्मृतावपि 'अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति' इत्यर्जुनेन पृष्टो भगवान् वासुदेवः 'न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति' इत्युक्त्वा पुनस्तस्य पुण्यलोकप्राप्तिं साधुकुले सम्भूतिञ्चाभिधाय, अनन्तरं 'तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम्' इत्यादिना 'अनेकजन्मसंसिद्धस्ततो याति परां गतिम्' इत्यन्तेनैतदेव दर्शयति। तस्मादैहिकमामुष्मिकं वाविद्याजन्म प्रतिबन्धक्षयापेक्षयेति स्थितं ॥

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५२ ॥

यथा मुमुक्षोर्विद्यासाधनावलम्बिनः साधनवीर्यविशेषात् विद्यालक्षणे फले ऐहिकामुष्मिकफलत्वकृतो विशेषप्रतिनियमो दृष्टः, एवं मुक्तिलक्षणेऽप्युत्कर्षापकर्षकृतः कश्चिद्विशेषप्रतिनि-

---

इति। कयानुपपत्त्या श्रुतिरिममर्थं दर्शयति तत्राह। न हीति। जन्मान्तरसञ्चितं साधनं जन्मान्तरेऽपि धियं साधयतीत्यत्र स्मृतिमाह। स्मृताविति। श्रवणादीनां पौष्कल्येऽपि श्रुतिस्मृतिलिङ्गात् पश्वादिफलचित्रादिवदनियतकालत्वसिद्धेर्नानैकान्तिकफलत्वं तेषामित्युपसंहरति। तस्मादिति ॥

विद्याख्ये फले कालोत्कर्षापकर्षकृतो विशेषनियमो दर्शितः, सम्प्रति विद्याफलमोक्षे कस्यचिदपि विशेषनियमस्याभावं दर्शयति। एवमिति। विद्याफलं मुक्तिर्विषयः, सा किं विद्यावदुत्कर्षापकर्षकृतविशेषवती

यमः स्यादित्याशङ्क्याह । एवं मुक्तिफलानियम इति । न खलु मुक्तिफले कश्चिदेवम्भूतो विशेषप्रतिनियम आशङ्कितव्यः, कुतः, तदवस्थावधृतेः । मुक्त्यवस्था हि सर्ववेदान्तेष्वेकरूपैवावधार्यते, ब्रह्मैव हि मुक्त्यवस्था, न च ब्रह्मणोऽनेकाकारयोगोऽस्ति एकलिङ्गत्वावधारणात् 'अस्थूलमनणु' 'स एष नेति नेत्यात्मा' 'यत्र नान्यत् पश्यति ब्रह्मैवेदममृतं पुरस्तात् इदं सर्वं यदयमात्मा' 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कम्पश्येत्' इत्यादि

किं वा नेति फलस्योभयथादृष्टेः संशये प्रकृतविद्याफलस्य प्रसङ्गतो निरतिशयतोक्त्या पादादिसङ्गतिः । पूर्वपक्षे मोक्षस्य कर्मसाध्यतया पुरुषार्थाधिकरणासिद्धिः, सिद्धान्ते तस्य ज्ञानैक्यसाध्यत्वात् तत्सिद्धिरित्यभिप्रेत्य पूर्वपक्षमाह । यथेति । मुक्तिरुपचयापचयवती फलत्वात् विद्यावदित्यनुमानात् तस्याः कर्मसाध्यत्वाधिगमात् पुरुषार्थाधिकरणत्वमयुक्तमित्याशङ्क्य सिद्धान्तमवतार्य प्रतिज्ञां विभजते । न खल्विति । उक्तेऽनुमाने जाग्रति कथमाशङ्का निरवकाशेति शङ्कते । कुत इति । मुक्तिस्वरूपब्रह्मैकरूप्यावधारणशास्त्रविरोधात् नानुमेति मत्वा सूत्रावयवमादाय व्याचष्टे । तदवस्थेति । मुक्तिर्नाम काचिदवस्था विद्यते चेत् अद्वितीयत्वविरोधादवस्थात्वात् जाग्रदवस्थावत् असावपि निवृत्तिमती स्यादित्याशङ्क्याह । ब्रह्मैवेति । कथमेतावता मुक्तेरुत्कर्षकृतविशेषराहित्यमित्याशङ्क्याह । न चेति । न स्थानतोऽपीत्यधिकरणे निर्विशेषत्वमस्थूलादिश्रुत्या ब्रह्मणो निरूपितमिति स्मारयति । एकेति । इतश्च मुक्तेर्निरतिशयत्वमित्याह । अपि चेति । काष्ठोपचयापचयाभ्यां ज्वालोपचयापचयदृष्टेरन्तरङ्गबहिरङ्गतदभ्यासादिसाधनोपचयापचयाभ्यां विद्योपचयापचयसम्भवात् तत्फले मुक्तावपि तौ स्यातामित्याशङ्क्य हेत्वन्तरं स्फोरयति । न विद्येति । विद्यैव सातिशया स्वसाध्येऽपि कथञ्चिदतिशयमादध्यादित्याशङ्क्याह । तद्धीति ।

श्रुतिभ्यः। अपि च विद्यासाधनं स्ववीर्यविशेषात् स्वफल एव विद्यायां कञ्चिदतिशयमासञ्जयेत् न विद्याफले मुक्तौ तद्धि साध्यं नित्यसिद्धस्वभावभूतमेव विद्ययाधिगम्यत इत्यसकृद्वादिष्म। न च तस्यामप्युत्कर्षनिकर्षात्मकोऽतिशय उपपद्यते, निकृष्टाया विद्यात्वाभावात्, उत्कृष्टैव हि विद्या भवति, तस्मात् तस्याञ्चिराचिरोत्पत्तिरूपो विशेषो भवेत् न तु मुक्तौ कश्चिदतिशयसम्भवोऽस्ति। विद्याभेदाभावादपि तत्फलभेदनियमाभावः कर्मफलवत्, न हि मुक्तिसाधनभूताया विद्यायाः कर्मणामिव भेदोऽस्ति। सगुणासु तु विद्यासु 'मनोमयः प्राणशरीरः' इत्याद्यासु गुणावापोद्वापवशात् भेदोपपत्तौ सत्यामुपपद्यते यथास्वं फलभेदनियमः कर्मफलवत्। तथा च लिङ्गदर्शनं 'तं यथा यथोपासते तदेव भवति' इति नैवं निर्गुणायां

तर्हि मुमुक्षूणां विद्यार्थिनां प्रवृत्त्यानर्थक्यं तत्राह। विद्ययेति। तस्यामतिशयमाश्रित्य मुक्तौ नातिशयोऽस्तीत्युक्तमिदानीं विद्यापि मोक्षहेतुतत्त्वसाक्षात्कारलक्षणाऽतिशयवतीत्याह। न चेति। कथं तर्हि पूर्वाधिकरणे विद्याया विशेषो दर्शितस्तत्राह। तस्मादिति। मुक्तावपि तर्हि तादृशोऽतिशयो भविष्यति तत्राह। न त्विति। विद्योत्पत्तिर्मोक्षानन्तरीयकत्वेनाविद्यानिवृत्तिरूपाया मुक्तेरावश्यकत्वादित्यर्थः। मुक्तेर्निर्विशेषत्वे हेत्वन्तरमाह। विद्येति। एकरूपत्वादात्मनस्तदाकारविद्यायां विशेषाभावादनेकरूपे फलोत्पादकत्वायोगात् तत्फले विशेषासिद्धिरित्यर्थः। विद्यायां भेदाभावं प्रपञ्चयति। न हीति। स्वगुणविद्यावत् विद्यात्वादात्मविद्यायां भेदः स्यादित्याशङ्क्य विषयभेदात् तत्र भेदेऽपि नात्र विषयभेदोऽस्तीत्याह। सगुणास्विति। तत्र फलभेदे मानमाह। तथा चेति। दार्ष्टान्तिके विशेषमाह। नैवमिति। तत्त्वविद्याविशेषे गुणाभावे स्मृतिमाह। तथा चेति। कस्यचित् निर्गुणवि-

विद्यायां, गुणाभावात्। तथा च स्मृतिः। 'न हि गतिरधिकास्ति कस्यचित् सति हि गुणे प्रवदन्त्यतुल्यताम्' इति। तदवस्थावधृतेस्तदवस्थावधृतेरिति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति॥

इति श्रीशारीरकमीमांसाभाष्ये श्रीमच्छङ्करभगवत्पादकृतौ तृतीयाध्यायस्य चतुर्थः पादः।

तृतीयाध्यायः समाप्तः।

यावतः पुरुषस्य गतिः फलमिति यावत्। तत्र न्यूनाधिकभावाभावे हेतुमाह। सति हीति। पुनरुक्तेरर्थवत्त्वमाह। तदवस्थेति। तदेवं मुक्तेर्निरतिशयत्वात् न कर्मसाध्यतेति युक्तं पुरुषार्थाधिकरणमिति भावः॥

इति श्रीशुद्धानन्दशिष्यभगवदानन्दज्ञानकृतौ शारीरकभाष्यव्याख्याने तृतीयाध्यायस्य चतुर्थः पादः॥

अध्यायस्य समाप्तः।

ॐ परमात्मने नमः।



आवृत्तिरसकृदुपदेशात्॥ १॥

तृतीयेऽध्याये परापरासु विद्यासु साधनाश्रयो विचारः प्रायेणात्यगात्, अथेह चतुर्थेऽध्याये फलाश्रय आगमिष्यति, प्रसङ्गागतञ्चान्यदपि किञ्चित् चिन्तयिष्यते, प्रथमं तावत् कतिभिश्चिदधिकरणैः साधनाश्रयविचारविशेषमेवानुसरामः। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत' 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इति चैवमादिश्रवणेषु संशयः, किं सकृत्प्रत्ययः कर्तव्य आहोस्विदा-

---

ॐ रामचन्द्राय नमः।

यज्ज्ञानाज्जीवतो मुक्तिरुत्क्रान्तिगतिवर्ज्जिता।
लभ्यते तत्परं ब्रह्म रामनामास्मि निर्भयं॥ १॥

ॐ। आवृत्तिरसकृदुपदेशात्। साधनं निरूप्य फलं निरूप्यत इत्यध्याययोर्हेतुफलभावं सङ्गतिमाह। तृतीय इति। फलप्रसङ्गेनोत्क्रान्तिरर्च्चिरादिमार्गश्च विचारार्थ इत्याह। प्रसङ्गेति। पूर्वं साक्षादेव प्रयुक्तं सन्न्यासादि साधनं चिन्तितं, सम्प्रति फलार्थापत्तिगम्यमावृत्त्यादिकं यथाऽस्मिन्नधिकरणात् प्राक् चिन्त्यते, तदारभ्य जीवन्मुक्तिस्ततो द्वि-

वृत्त्येति, किं तावत् प्राप्तं सकृत्प्रत्ययः स्यात् प्रयाजादिवत्, तावता शास्त्रस्य कृतार्थत्वात्, अश्रूयमाणायां ह्यावृत्तौ क्रियमाणायामशास्त्रार्थः कृतो भवेत्। नन्वसकृदुपदेशा उदाहृताः 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादयः। एवमपि यावच्छब्दमावर्तयेत् सकृच्छ्रवणं सकृन्मननं सकृन्निदिध्यासनञ्चेति नातिरिक्तं, सकृदुपदेशेषु तु वेद उपासीतेत्यादिष्वनावृत्तिरित्येवं प्राप्ते ब्रूमः, प्रत्ययावृत्तिः कर्तव्या। कुतः, असकृदुपदेशात्। 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्येवंजातीयको ह्यसकृदुपदेशः प्रत्ययावृत्तिं सूचयति। नन्वुक्तं यावच्छब्दमे-

---

तीयपादे उत्क्रान्तिस्तृतीये अर्चिरादिमार्गस्य गन्तव्यस्य च निर्णयश्चतुर्थे ज्ञानोपासनयोः फलनिर्णय इति पादार्थविवेकः। आद्याधिकरणस्य श्रवणादिसाधनं विषयमनूद्य द्वेधानुष्ठानदर्शनात् संशयमाह। आत्मा वा इति। श्रौतात्मधीसाधनफलविचारात्मकत्वात् सर्वाधिकरणानां श्रुतिशास्त्राध्यायसङ्गतयः उक्तास्तत्पादार्थसम्बन्धात् तत्तत्पादसङ्गतिः, मोक्षे विशेषाभाववत् श्रवणादावावृत्तिविशेषो नास्तीति दृष्टान्तलक्षणावान्तरसङ्गत्या पूर्वपक्षमाह। किं तावदिति। अत्र पूर्वपक्षे श्रवणादेः प्रयाजवददृष्टार्थत्वात् सकृदनुष्ठानफलं,सिद्धान्ते त्ववघातवत् दृष्टार्थत्वात् यावत्फलमावृत्तिरिति भेदः। असकृदुपदेशान्यथानुपपत्त्या साधनवृत्तौ शास्त्रस्य तात्पर्यमिति शङ्कते। नन्वसकृदिति। श्रवणादीनां समुच्चयसिद्धार्थत्वेनासकृदुक्तेरन्यार्थोपपत्तेर्नावृत्तौ तात्पर्यमित्याह। एवमपीति। सगुणसाक्षात्कारसाधनेष्वप्यनावृत्तिमाह। सकृदिति। यद्यप्यसकृदुपदेश आवृत्तिसमुच्चययोरन्यतरसूचकत्वेनान्यथासिद्धः, तथापि दृष्टे सम्भवत्यदृष्टमात्रकल्पनानुपपत्तेः श्रवणादेरावृत्तिद्वारा साक्षात्कारफलस्य षड्जादौ दृष्टत्वादसकृदुक्तिरावृत्तिं सूचयति। दृष्टार्थत्वादिति। न्यायानुग्रहादि-

वावर्तयेन्नाधिकमिति। न, दर्शनपर्यवसानत्वादेषां। दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति, यथाऽवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि तद्वत् अपि चोपासनं निदिध्यासनं चेत्यन्तर्णीतावृत्तिगुणैव क्रियाऽभिधीयते। तथा हि लोके गुरुमुपास्ते राजानमुपास्त इति च यस्तात्पर्येण गुर्वादीननुवर्तते स एवमुच्यते। तथा ध्यायति प्रोषितनाथा पतिमिति या निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा सैवमभिधीयते। विद्युपास्त्योश्च वेदान्तेषु व्यतिकरेण प्रयोगो दृश्यते, क्वचिद्विदिनोपक्रम्योपास्तिनोपसंहरति, यथा 'यस्तद्वेद यत् स वेद स मयैतदुक्तः' इत्यत्र 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' इति। क्वचिच्चोपास्तिनोपक्रम्य विदिनोपसंहरति 'यथा मनो ब्रह्मेत्युपासीत' इत्यत्र 'भाति च तपति

त्याह। न दर्शनपर्यवसानत्वादिति। ध्यानस्य त्वावृत्तेर्वेदोपासीतेति शब्दे श्रुतत्वात् न केवलार्थिकत्वमित्याह। अपि चेति। अस्त्युपास्तिशब्दस्यावृत्तिवाचित्वं तथापि वेदेतिशब्दात्कवेदनेष्वहंग्रहेषु कथमावृत्तिसिद्धिरित्यत आह। विद्युपास्त्योश्चेति। शब्दयोरेकार्थत्वमुदाहरति। क्वचिदिति। स रैक्को यद्वेद तत् प्राणतत्त्वं रैक्कादन्योऽपि यः कश्चिद्वेद तत्फले सर्वोऽन्तर्भवतीत्येतदुक्तं इत्थं मयोत्कृष्टत्वेन स रैक्क उक्तः इति हंसं प्रति हंसान्तरवचनं, तच्छ्रुत्वा रैक्कं गत्वोवाच जानश्रुतिः, हे भगव एतां रैक्कविदितां देवतां मेऽनुशाधि मह्यमुपदिशेत्यर्थः। एवं सगुणनिर्गुणसाक्षात्कारसाधनस्यावृत्तिः श्रौती चार्थसिद्धा च दृष्टार्थत्वात्, श्रवणमननयोस्त्वसकृदुपदेशादर्थसिद्धैवावृत्तिरिति विशेषः। आदित्यस्यैकस्यैवोद्गीथे सम्पाद्योपासनात् मम त्वमेक एव पुत्रोऽसीति

च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' इति। तस्मात् सकृदुपदेशेष्वप्यावृत्तिसिद्धिः। असकृदुपदेशस्त्वावृत्तेः सूचकः॥

लिङ्गाच्च॥२॥

लिङ्गमपि प्रत्ययावृत्तिं प्रत्याययति। तथा हि उद्गीथविज्ञानं प्रस्तुत्य 'आदित्य उद्गीथः' [छा॰उ॰] इत्येतदेकपुत्त्रतादोषेणापोद्य 'रश्मींस्त्वं पर्यावर्तयात्' इति [छा॰उ॰] रश्मिबहुत्वविज्ञानं बहुपुत्त्रतायै विदधत् सिद्धवत् प्रत्ययावृत्तिं दर्शयति। तस्मात् तत्सामान्यात् सर्वप्रत्ययेष्वावृत्तिसिद्धिः। अत्राह भवतु नाम साध्यफलेषु प्रत्ययेष्वावृत्तिः तेष्वावृत्तिसाध्यस्यातिशयस्य सम्भवात्। यस्तु परब्रह्मविषयः प्रत्ययो नित्यशुद्धबुद्धमुक्तस्वभावमेवात्मभूतं परं ब्रह्म *समर्थयति तत्र किमर्थावृत्तिरिति। सकृच्छ्रुतौ ब्रह्मात्मत्वप्रतीत्यनुपपत्तेरावृत्त्यभ्युपगम इति चेत्, न

कौषीतकिः पुत्त्रमुवाच अतस्त्वं तथा माऽऽत्थाः किन्तु बह्वन् रश्मीनादित्यश्च पर्यावर्तय तान् पृथगावर्तयस्वेत्यर्थः। तत्रोपच्छान्दसः॥

अत्र पर्यावृत्तिशब्दात् सिद्धवदुद्गीथध्यानस्यावृत्तिरुक्ता ततो ध्यानत्वसामान्यात् फलपर्यन्तत्वसामान्यात् वा लिङ्गात् सर्वत्र श्रवणमननध्यानेष्वावृत्तिसिद्धिरित्याह। लिङ्गाच्चेति। एवं तावत् गुणनिर्गुणसाक्षात्कारसाधनेष्वावृत्तिरुक्ता तत्र सगुणध्यानादेरावृत्तिमङ्गीकृत्य निर्गुणश्रवणादिष्वावृत्तिमाक्षिपति। अत्राहेत्यादिना। वाक्यं निर्गुणसाक्षात्कारजनने शक्तं न वा, आद्ये सकृत्श्रुतवाक्यात् साक्षात्कारसिद्धेरावृत्तिर्व्यर्थेत्युक्त्वा द्वितीयं शङ्कते। सकृदिति। अशक्तस्यावृत्तावपि फलानुपपत्तिरित्याह। नेति। तथापीति स्वतोऽशक्तस्य युक्तिसाहित्यात् शक्तावपीत्यर्थः। वाक्ययुक्तिभ्यां परोक्षज्ञाने जाते-

* समर्पयतीति वर्ध॰ का॰।

आवृत्तावपि तदनुपपत्तेः। यदि हि ‘तत्त्वमसि’ इत्येवंजातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत् ततस्तदेव चावर्तमानमुत्पादयिष्यति इति का प्रत्याशा स्यात्। अथोच्येत न केवलं वाक्यं कञ्चिदर्थं साक्षात्कर्तुं शक्नोत्यतो युक्त्यपेक्षं वाक्यमनुभावयिष्यति ब्रह्मात्मत्वमिति, तथाप्यावृत्त्यानर्थक्यमेव, साऽपि हि युक्तिः सकृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति। अथापि स्यात् युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयं, यथाऽस्ति मे हृदये शूलमित्यतो वाक्यात् गात्रकम्पादिलिङ्गाच्च शूलसद्भावसामान्यमेव परः प्रतिपद्यते न विशेषमनुभवति, यथा स एव शूली विशेषानुभवस्याविद्याया निवर्तकः तदर्थावृत्तिरिति चेत्, न, असकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसम्भवात्, न हि सकृत्प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्यामवगन्तुं शक्यते, तस्मात् यदि शास्त्रयुक्तिभ्यां विशेषः प्रतिपाद्येत यदि वा सामान्यमेवोभयथापि

ऽप्यपरोक्षज्ञानार्थमावृत्तिरिति शङ्कते। अथापि स्यादिति। तयोः परोक्षज्ञानहेतुत्वस्वाभाव्यात् आवृत्तावपि न साक्षात्कारः स्यादिति परिहरति। नासकृदपीति। यदि तयोः साक्षात्कारसामर्थ्यं यदि वा परोक्षज्ञानसामर्थ्यं उभयथा आवृत्त्यनपेक्षेत्याह। तस्मादिति। प्रमातृवैचित्र्यादप्यावृत्त्यनियम इत्याह। न चेति। प्रमेयस्यानंशत्वाच्च तथेत्याह। अपि चेति। द्विविधो ह्यधिकारी स्यात् कश्चित् जन्मान्तराभ्यासात् निरस्तसमस्तासम्भावनादिप्रतिबन्धः कश्चित्तु प्रतिबन्धवानिति। अत्राद्यं

सकृत्प्रवृत्ते एव ते स्वकार्यं कुरुत इत्यावृत्त्यनुपयोगः। न च सकृत्प्रयुक्ते शास्त्रयुक्ती कस्यचिदप्यनुभवं नोत्पादयत इति शक्यते नियन्तुं, विचित्रप्रज्ञत्वात् प्रतिपत्तॄणां। अपि चानेकांशोपेते लौकिके पदार्थे सामान्यविशेषवति एकेनावधानेनैकमंशमवधारयत्यपरेणापरमिति *स्यादप्यभ्यासोपयोगो यथा दीर्घप्रपाठकग्रहणादिषु न तु निर्विशेषे ब्रह्मणि सामान्यरहिते चैतन्यमात्रात्मके प्रमोत्पत्तावभ्यासापेक्षा युक्तेति। अत्रोच्यते, भवेदावृत्त्यानर्थक्यं तं प्रति यस्तत्त्वमसि इति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात् यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः, तथा हि छान्दोग्ये 'तत्त्वमसि श्वेतकेतो' इत्युपदिश्य 'भूय एव मा भगवान् विज्ञापयतु' इति पुनः पुनः परिचोद्यमानस्तत्तदाशङ्काकारणं निराकृत्य तत्त्वमसि इत्येवासकृदुपदिशति। तथा च 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादि दर्शितं। ननूक्तं सकृच्छ्रुतं चेत् तत्त्वमसिवाक्यं स्वमर्थमनुभावयितुं न शक्नोति ततः आवर्त्यमानमपि नैव शक्ष्यतीति।

प्रत्यावृत्तेरानर्थक्यमिष्टं, द्वितीयस्य तु प्रतिबन्धनिरासाय तदपेक्षेति समाधत्ते। अत्रोच्यते इति। आवृत्तेः प्रतिबन्धनिरासार्थत्वे लिङ्गमाह। तथा हीति। यथा षड्जादिस्वरभेदसाक्षात्कारशक्तमपि श्रोत्रमभ्यासमपेक्षते तथा ब्रह्मात्मसाक्षात्कारशक्तं वाक्यं तदपेक्षमित्यनुभवमाश्रित्याह। न हि दृष्टेऽनुपपन्नं नामेति। तत्त्वंपदलक्ष्यार्थस्य दुर्बोधत्वादज्ञानप्रयुक्तसंशयादिप्रतिबन्धसम्भवात् तद्ध्वंसाय आवृत्तिरेष्टव्येति वाच्यलक्ष्यविवेकपूर्वकमाह। अपि चेत्यादिना।

---

* स्यादप्यावृत्त्युपयोग इति वर्ध०।

नैष दोषः, न हि दृष्टेऽनुपपन्नं नाम, दृश्यन्ते हि सकृच्छ्रुतात् वाक्यात् मन्दप्रतीतं वाक्यार्थमावर्तयन्तस्तत्तदाभासव्युदासेन सम्यक् प्रतिपद्यमानाः। अपि च तत्त्वमसीत्येतद्वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे, तत्पदेन च प्रकृतं सत् ब्रह्मेक्षितृ जगतो जन्मादिकारणमभिधीयते, 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म' 'अदृष्टं द्रष्टृ अविज्ञातं विज्ञातृ अजं अजरममरमस्थूलमनण्वह्रस्वमदीर्घम्' इत्यादिशास्त्रप्रसिद्धं। तत्राजादिशब्दैर्जन्मादयो भावविकाराः निवर्तिताः, अस्थूलादिशब्दैश्च स्थौल्यादयो द्रव्यधर्माः, विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मकत्वमुक्तं, एष व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धस्तथा त्वंपदार्थोऽपि प्रत्यगात्मा द्रष्टा श्रोता देहादारभ्य प्रत्यगात्मतया सम्भाव्यमानश्चैतन्यपर्यन्तत्वेनावधारितः। तत्र येषामेतौ पदार्थावज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां तत्त्वमसीत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति पदार्थज्ञानपूर्वकत्वात् वाक्यार्थज्ञानस्येत्यतस्तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः। यद्यपि च प्रतिपत्तव्य आत्मा निरंशस्तथापि अध्या-

---

यदुक्तमनंशत्वात् प्रमेयस्यावृत्त्यानर्थक्यमिति तत्राह। यद्यपीति। आरोपितांशनिरासाय न मे देहो नेन्द्रियं इत्यभ्यासो युक्त इत्यर्थः। वाक्यार्थज्ञाने सति कथमभ्यासनियमः प्रमाणज्ञानस्याभ्यासायोगात् ज्ञानिनः श्रवणादिनियमायोगाच्च इत्यत आह। तत्त्विति। ज्ञानात् प्रागेव श्रवणादिव्यापारनियमनं क्रियत इत्यर्थः। अधिकं शङ्कितुमुक्त-

रोपितं तस्मिन् बर्हिंशलं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणं तत्रैकेनावधानेनैकमंशमपोहति अपरेणापरमिति युज्यते तत्र क्रमवती प्रतिपत्तिः, तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः। येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान् प्रत्यावृत्त्यानर्थक्यमिष्टमेव, सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयति इति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते। सत्यमेवं युज्येत यदि कस्यचिदेवं प्रतिपत्तिर्भवेत्, बलवती ह्यात्मनो दुःखित्वादिप्रतिपत्तिः, अतो न दुःखित्वाद्यभावं कश्चित् प्रतिपद्यत इति चेत्। न, देहाद्यभिमानवत् दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः। प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने चाऽहं छिद्ये दह्ये इति च मिथ्याभिमानो दृष्टः, तथा बाह्यतरेष्वपि पुत्रमित्रादिषु सन्तप्यमानेषु अहमेव सन्तप्ये इत्यध्यारोपो दृष्टः, तथा दुःखित्वाद्यभिमानोऽपि स्यात् देहादिवदेव चैतन्याद्बहिरुपलभ्यमानत्वात् दुःखित्वादीनां,सुषुप्तादिषु चाननुवृत्तेः,चैतन्यस्य तु सुषुप्तेऽप्यनुवृत्ति-

---

मनुवदति। येषामिति। अधिकं शङ्कते। सत्यमिति। दुःखित्वप्रत्यक्षविरोधात् वाक्यादैक्यधीर्नोदेति इत्यर्थः। प्रत्यक्षस्य भ्रान्तित्वादविरोध इत्याह। नेत्यादिना। दुःखादयो नात्मधर्माः दृश्यत्वात् देहादिवत्, नाप्यात्मस्वरूपाः आत्मनि सत्यप्यननुवृत्तित्वात् व्यतिरेकेण चैतन्यवदित्यर्थः। निर्दुःखचिदात्मनि दुःखादिधियो भ्रान्तित्वात् वाक्यार्थानुभवो न विरुध्यत इत्याह। तस्मादिति। अनुभवे जातेऽप्यावृत्त्याद्यनुष्ठानं किं न स्यादित्यत आह। न चैवमिति। रतिः कामः आत्मकाम-

मामनन्ति 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति' इत्यादिना । तस्मात् सर्वदुःखविमुक्तैकचैतन्यात्मकोऽहमित्येष आत्मानुभवः । न चैवमात्मानमनुभवतः किञ्चिदन्यत् कृत्यमवशिष्यते । तथा च श्रुतिः 'किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः' इत्यात्मविदः कर्तव्याभावं दर्शयति । स्मृतिरपि—

'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते' ॥ इति ।

यस्य तु नैषोऽनुभवो द्रागिव जायते तं प्रत्यनुभवार्थ एवावृत्त्यभ्युपगमः । तत्रापि न तत्त्वमसिवाक्यार्थात् प्रच्याव्यावृत्तौ प्रवर्तयेत्, न हि वरघाताय कन्यामुद्वाहयन्ति । नियुक्तस्य चास्मिन्नधिकृतोऽहं कर्ता मयेदं कर्तव्यमित्यवश्यं ब्रह्मप्रत्ययविपरीतप्रत्यय उत्पद्यते । यस्तु स्वयमेव मन्दमतिरप्रतिभानात् वाक्यार्थं जिज्ञासेत् तस्यैतस्मिन्नेव वाक्यार्थे स्थिरीकार आवृत्त्यादिवाचो युक्त्याऽभ्युपेयते, तस्मात् परब्रह्मविषयेऽपि प्रत्यये तदुपायोपदेशेष्वावृत्तिसिद्धिः ॥

तथा तृप्तिर्विषयः तृष्णाक्षयः तेन सन्तोषे आत्मानन्दानुभवः इति भेदः । नन्वावृत्तौ नियोगात् प्रवृत्तिर्वाच्या तथा च नियुक्तत्वबुद्धेरकर्त्रात्मधीर्न स्यादित्यत आह । तत्रापीति । आवृत्त्यभ्युपगमेऽप्यकर्ताहमित्यनुभवात् प्रच्याव्य गुरुरन्यो वा नियोगात् न प्रवर्तयेदुक्तदोषादित्यर्थः । कथं तर्हि प्रवृत्तिरित्यत आह । यस्त्विति । अप्रतिभानादसम्भावनादिनेत्यर्थः । शिष्यबुद्ध्यनुसारेण श्रोतव्यादिवचोभिः प्रधानसिद्ध्यर्थमावृत्त्यादौ प्रवर्तयेदित्यर्थः ॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च॥ ३॥

यः शास्त्रोक्तविशेषणः परमात्मा स किं अहमिति ग्रहीतव्यः किं वा मदन्य इति तावद्विचारयति। कथं पुनरात्मशब्दे प्रत्यगात्मविषये श्रूयमाणे संशय इति। उच्यते, अयमात्मशब्दो मुख्यः शक्यतेऽभ्युपगन्तुं सति जीवेश्वरयोरभेदसम्भवे, इतरथा तु गौणोऽयमभ्युपगन्तव्य इति मन्यते। किं तावत् प्राप्तं नाहमिति ग्राह्यः, न ह्यपहतपाप्मत्वादिगुणो विपरीतगुणत्वेन शक्यते ग्रहीतुं, विपरीतगुणो वाऽपहतपाप्मत्वादिगुणत्वेन, अपहतपाप्मत्वादिगुणश्च परमेश्वरः, तद्विपरीतगुणस्तु शारीरः, ईश्वरस्य च संसार्यात्मत्वे ईश्वराभावप्रसङ्गः, ततः शास्त्रानर्थक्यं। संसारिणोऽपीश्वरात्मत्वेऽधिकार्यभावात् शास्त्रानर्थक्यमेव प्रत्यक्षादिविरोधश्च। अन्यत्वेऽपि तादात्म्यदर्शनं शास्त्रात् कर्तव्यं, प्रतिमादिष्विव विष्ण्वादिदर्शनमिति चेत्, काममेवं भवतु न तु संसारिणो मुख्य *आत्मेश्वरभाव इत्येतावन्नः प्रापयितव्यमित्येवं प्राप्ते ब्रूमः। आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः, तथा

आत्मेति तूपगच्छन्ति ग्राहयन्ति च। पूर्वत्र ध्यानादेरावृत्तिरुक्ता तामुपजीव्य तत्त्वज्ञानार्थं ध्यानावृत्तिकाले किमहं ब्रह्मेति ध्यातव्यं उत मत्स्वामीश्वर इत्यैक्यभेदमानाभ्यां संशयमाह। य इति। शब्दादेरप्रमित इत्यादावयमात्मा ब्रह्मेत्यादिश्रुतिभिरैक्यनिर्णयात् संशयमाक्षिपति। कथमिति। भेदश्रुत्यनुग्रहात् भेदप्रत्यक्षादिप्राधान्यमालम्ब्य संशय इत्याह। उच्यत इति। अभेदश्रुतीनां गौणत्वमुख्यत्वे उभयत्र फलं, यद्यप्ययं प्रत्यक्षादिविरोधाद्यभेदपरिहारो द्वितीयाध्यायसङ्गत-

---

* आत्मेश्वर इतीति वर्ध० का०।

हि परमेश्वरप्रक्रियायां जाबाला आत्मत्वेनैवैनमुपगच्छन्ति 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि देवते' इति। तथाऽन्येऽपि 'अहं ब्रह्मास्मि' इत्येवमादय आत्मत्वोपगमा द्रष्टव्याः। ग्राहयन्ति चात्मत्वेनैवेश्वरं वेदान्तवाक्यानि 'एष त आत्मा सर्वान्तर एष त आत्मान्तर्याम्यमृतस्तत् सत्यं स आत्मा तत्त्वमसि' इत्येवमादीनि। यदुक्तं प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यति इति। तदयुक्तं, गौणत्वप्रसङ्गात् वाक्यवैरूप्याच्च। यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति 'यथा मनो ब्रह्मेत्यादित्यो ब्रह्म' इत्यादि। इह पुनस्त्वमहमस्म्यहञ्च त्वमसीत्याह, अतः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिर्भेददृष्ट्यपवादाच्च। तथा हि 'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि' इति 'न स वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति सर्वन्तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' इत्येवमाद्या भूयसी श्रुतिर्भेददर्शनमपवदति। यत्तूक्तं न विरुद्धगुणयोरन्योन्यात्मत्वसम्भव इति। नायं दोषः, विरुद्धगुण-

---

त्तथाप्यैक्यश्रुतेरविरुद्धत्वनिश्चयस्य समाधावन्तरङ्गत्वादिह सङ्गतिः। विरुद्धयोरैक्यदृष्टिरसिद्धेत्याह। नाहमिति। किञ्च किमीश्वरस्य जीवमात्रत्वमैक्यं जीवस्येश्वरमात्रत्वं वेति विकल्प्य क्रमेण दूषयति। ईश्वरस्य चेत्यादिना। एकत्वश्रुतिप्रामाण्यादैक्यध्यानं कार्यमिति शङ्कते। अन्यत्वेऽपीति। एकत्वध्यानमस्मदिष्टमेव। एकत्वन्तु नास्तीत्याह। काममिति। अभेदश्रुतीनां फलवदपूर्वार्थतात्पर्येण गौणत्वायोगाद् भेदश्रुतीनां कल्पितभेदानुवादित्वात् प्रत्यक्षादेरपि तद्विषयत्वात् विम्बप्रतिबिम्बयोरिव विरुद्धधर्माणां मिथ्यात्वात् मुख्यमैक्यमिति सिद्धान्तयति। एवमित्यादिना। ईश्वरस्य जीवत्वं न प्रतिपाद्यं येनेश्वराभाव

ताया मिथ्यात्वोपपत्तेः। यत्पुनरुक्तं ईश्वराभावप्रसङ्ग इति। तदसत्, शास्त्रप्रामाण्यादनभ्युपगमाच्च। न ह्यीश्वरस्य संसार्यात्मत्वं प्रतिपाद्यते इत्यभ्युपगच्छामः किं तर्हि संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितमिति, एवं च सत्यद्वैतेश्वरस्यापहतपाप्मत्वादिगुणता, विपरीतगुणता तु ईश्वरस्य मिथ्येति व्यवतिष्ठते। यदप्युक्तमधिकार्यभावः प्रत्यक्षादिविरोधश्चेति। तदप्यसत्, प्राक् प्रबोधात् संसारित्वाभ्युपगमात् तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य। यत्र त्वस्य 'सर्वमात्मैवाभूत् तत्केन कम्पश्येत्' इत्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति, प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्ग इति चेत्, न, इष्टत्वात्, अत्र 'पिताऽपिता भवति' इति ह्युपक्रम्य 'वेदा अवेदाः' इति वचनादिष्यत एवास्माभिः श्रुतेरप्यभावः प्रबोधे। कस्य पुनरयमप्रबोध इति चेद्यस्त्वं पृच्छसि तस्य ते इति वदामः। नन्वहमीश्वर एवोक्तः श्रुत्या यद्येवं प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रबोधः। योऽपि दोषश्चोद्यते

स्यात् किन्तु जीवेश्वरत्वं। न चैवमधिकार्यभावः एकत्वप्रबोधात् प्रागधिकारिभेदाङ्गीकारादित्याह। यत्पुनरुक्तमित्यादिना। वेदसत्यत्वश्रद्धालुः शङ्कते। प्रत्यक्षाद्यभाव इति। वर्णेषु क्रमस्वरयोरभावादुपलब्धश्च निश्चयोरारोपो वाच्यस्तथा चारोपितक्रमस्वरविशिष्टवर्णात्मकवेदस्य मिथ्यात्वं दुर्वारं, वादिनां सर्वैत्वाग्रहस्त्वविद्याविजृम्भित इति वेदसत्यत्वाभावो न दोष इत्याह। नेति। अविद्यामाक्षिपति। कस्येति। प्रश्नलिङ्गेन त्वय्येव तस्याः सिद्धत्वादाक्षेपानुपपत्तिरित्याह। यस्त्विति। अज्ञानमूलत्वात् प्रश्नादेरिति भावः। सर्वज्ञाभिन्ने मयि कथमज्ञानमिति शङ्कते। नन्विति। अभेदज्ञानात् प्राक् चिन्मात्रस्य तवैवा-

कैश्चिदविद्यया किल्वात्मनः सद्वितीयत्वादद्वैतानुपपत्तिरिति सोऽप्येतेन प्रत्युक्तस्तस्मादात्मन्येवेश्वरे मनो दधीत॥


न प्रतीकेन हि सः॥४॥

'मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्म' [छा०।३।१८] इति, तथा 'आदित्यो ब्रह्मेत्यादेशः' [छा०।३।१९] 'स यो नाम ब्रह्मेत्युपास्ते' [छा०।७।५] इत्येवमादिषु प्रतीकोपासनेषु संशयः, किन्तेष्वप्यात्मग्रहः कर्तव्यो न वेति। किं तावत् प्राप्तं तेष्वप्यात्मग्रह एव युक्तः, कस्मात्, ब्रह्मणः श्रुतिष्वात्मत्वेन प्रसिद्धत्वात्। प्रतीकानामपि ब्रह्मविकारत्वात् ब्रह्मत्वे सत्यात्मत्वोपपत्तेरित्येवं प्राप्ते ब्रूमः। न प्रतीकेष्वात्ममतिं बध्नीयात्, न हि स उपासकः प्रतीकानि व्यस्तान्यात्मत्वेनाकलयेत्। यत्पुनर्ब्रह्मविकारत्वात् प्रतीकानां ब्रह्मत्वं ततश्चात्म-

---

ज्ञानाश्रयत्वमनुभवसिद्धाज्ज्ञानस्यापलापायोगात्। ज्ञाने त्वनिर्वाच्यस्य तस्य बाधान्नाश्रयापेक्षेत्याह। यद्येवमिति। अनिर्वाच्यत्वे दोषान्तरमपि निरस्तमित्याह। योऽपीति॥

न प्रतीकेन हि सः। उभयथा ज्ञानसम्भवात् संशयः, यथा ब्रह्मण्यभेदसत्त्वादहंग्रह उक्तः एवं प्रतीकेष्वपि ब्रह्मविकारितया जीवाभिन्नब्रह्माभिन्नत्वात् जीवाभेदसत्त्वेनाहंग्राहः कार्य इति दृष्टान्तेन पूर्वपक्षः। अत्र प्रतीकोपास्तीनामहंग्रहोपास्तिभिरविशेषः। सिद्धान्ते तु विशेषसिद्धिरिति फलं। एतदारभ्याधिकरणत्रयस्य प्रासङ्गिकी पादसङ्गतिः। ब्रह्मैक्यध्यानप्रसङ्गागतत्वादिति विवेकः। किं प्रतीकेष्वात्मत्वानुभवबलादहंग्रह उत वस्तुतः, जीवाभेदसत्त्वात् नाद्य इत्याह। न हि स इति। नानुभवति इत्यर्थः। द्वितीयमप्यसिद्ध्या दूषयति। यत्पुनरित्यादिना। विकारस्य ब्रह्मणा स्वरूपैक्यायोगात् बाधेनैक्यं वाच्यं प्रतीकबाधे चोपास्तिविधिर्न स्यादित्यर्थः। किंच कर्तृत्वाद्युबाधेनो-



त्वमिति। तदसत्, प्रतीकाभावप्रसङ्गात्। विकारस्वरूपोपमर्देन हि नामादिजातस्य ब्रह्मत्वमेवाश्रितं भवति, स्वरूपोपमर्दे च नामादीनां कुतः प्रतीकत्वमात्मग्रहो वा, न च ब्रह्मण आत्मत्वात् ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिः कल्प्या, कर्तृत्वाद्यनिराकरणात्, कर्तृत्वादिसर्वसंसारधर्मनिराकरणेन हि ब्रह्मण आत्मत्वोपदेशस्तदनिराकरणेन चोपासनाविधानं, अतश्चोपासकस्य प्रतीकैः समत्वादात्मग्रहो नोपपद्यते, न हि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति, सुवर्णात्मनैव तु ब्रह्मात्मत्वेनैकत्वे प्रतीकाभावप्रसङ्गमवोचाम। अतो न प्रतीकेष्वात्मदृष्टिः क्रियते॥

ब्रह्मदृष्टिरुत्कर्षात्॥ ५॥

तेष्वेवोदाहरणेषु अन्यः संशयः, किमादित्यादिदृष्टयो ब्रह्मण्यध्यसितव्याः किं वा ब्रह्मदृष्टिरादित्यादिष्विति। कुतः संशयः, सामानाधिकरण्ये कारणानवधारणात्। अत्र हि ब्रह्मशब्दस्या-

---

पास्तिविधिप्रवृत्तिर्बाध्यबाधे तदयोगात्। तथा च बाधमूलब्रह्मैक्यज्ञानं हारीकृत्य प्रतीकेष्वहंग्रहोपास्तिकल्पना न युक्ता, बाधविरोधादित्याह। न च ब्रह्मण इति। अतो जीवप्रतीकयोः स्वरूपभेदादहंग्रहे विध्यश्रवणाच्च नाहंग्रह इति फलितमाह। अतश्चेति। यथा रुचकस्वस्तिकयोः सुवर्णात्मनैक्येऽपि मिथोऽनैक्यं तथा जीवप्रतीकयोः ब्रह्मात्मनैक्येऽपि भेदः समः। यदि च धर्मिव्यतिरेकेण तयोरभावनिश्चयात् वस्त्वैक्यं तदोपासनोच्छेद उक्त इत्यर्थः॥

ब्रह्मदृष्टिरुत्कर्षात्। एकविषयत्वं सङ्गतिः। प्रश्नपूर्वकं संशयबीजमाह। कुत इत्यादिना। सामानाधिकरण्यं श्रुतं तच्च तावन्मुख्यं, ब्रह्मविकारयोर्गवाश्वयोरिवाभेदायोगात्, नापि प्रकृतिविकारभावनिब-

दित्यादिशब्दैः सामानाधिकरण्यमुपलभ्यते, 'आदित्यो ब्रह्म प्राणो ब्रह्म विद्युद्ब्रह्म' इत्यादिसमानविभक्तिनिर्देशात्। न चात्राञ्जसं सामानाधिकरण्यमवकल्पते, अर्थान्तरवचनत्वात् ब्रह्मादित्यादिशब्दानां, न हि भवति गौरश्व इति सामानाधिकरण्यं। ननु प्रकृतिविकारभावात् ब्रह्मादित्यादीनां मृच्छरावादिवत् सामानाधिकरण्यं स्यात्, नेत्युच्यते, विकारप्रविलयो ह्येवं प्रकृतिसामानाधिकरण्यात् स्यात्, ततश्च प्रतीकाभावप्रसङ्गमवोचाम, परमात्मवाक्यञ्चेदन्तदानीं स्यात्, ततश्चोपासनाधिकारो बाध्येत, परिमितविकारोपादानञ्च व्यर्थं। तस्मात् ब्राह्मणोऽग्निर्वैश्वानर इत्यादिवदन्यतरत्रान्यतरदृष्ट्यध्यासे सति क्व किंदृष्टिरध्यस्यतामिति संशयः, तत्रानियमः, नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्तं। अथवाऽऽदित्यादिदृष्टय एव ब्रह्मणि कर्तव्या इत्येवं प्राप्तं। एवं हि आदित्यादिदृष्टिभिर्ब्रह्मोपासनञ्च फलवदिति शास्त्रमर्यादा। तस्मात् न ब्रह्मदृष्टिरादित्यादिष्वित्येवं प्राप्ते ब्रूमः। ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति। कस्मात्, उत्कर्षात्, एवमुत्कर्षेणादित्यादयो दृष्टा भवन्त्युत्कृष्टदृष्टेस्तेष्वध्यासात्।

न्धनं, वाक्यस्य विकारबाधेन ब्रह्मपरत्वापातात्। न चेष्टापत्तिर्नाम ब्रह्मेत्युपासीतेति विधिश्रुतिविरोधात्, परिमितनामग्रहणार्थैक्यापाताच्च। ब्रह्मपरत्वे सर्वं ब्रह्मेति वक्तव्यत्वादतः परिशेषादध्यास एव सामानाधिकरण्यकारणं, अध्यासे च नियामकाभावात् संशय इत्यर्थः। उत्कृष्टनिकृष्टयोर्निकृष्टमप्युपास्यं फलवत्त्वादिति न्यायो नियामक इत्यरुचेराह। अथ वेति। अत्र विकारदृष्टिभिर्ब्रह्मोपास्तिसिद्धिः फलं, सिद्धान्ते तु विकारदृष्ट्या ब्रह्मण उपास्यत्वे निकर्षप्राप्ता

तथा च लौकिको न्यायोऽनुगतो भवति, उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः। यथा राजदृष्टिः क्षत्तरि, स चानुगन्तव्यो विपर्यये प्रत्यवायप्रसङ्गात्। न हि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात्। ननु शास्त्रप्रामाण्यादनाशङ्कनीयोऽत्र प्रत्यवायप्रसङ्गः, न च लौकिकेन न्यायेन शास्त्रीया दृष्टिर्नियन्तुं युक्तेति। अत्रोच्यते, निर्द्धारिते शास्त्रार्थे एतदेवं स्यात्, सन्दिग्धे तु तस्मिन् तन्निर्णयं प्रति लौकिकोऽपि न्याय आश्रीयमाणो न विरुध्यते,तेन चोत्कृष्टदृष्ट्याध्यासे शास्त्रार्थेऽवधार्यमाणे निकृष्टदृष्टिमध्यस्य प्रत्यवेयादिति श्लिष्यते। प्राथम्याच्चादित्यादिशब्दानां मुख्यार्थत्वमविरोधात् ग्रहीतव्यं। तैः स्वार्थवृत्तिभिरवरुद्धायां बुद्धौ पश्चादवतरतो ब्रह्मशब्दस्य मुख्यवृत्त्या सामानाधिकरण्यासम्भवात् ब्रह्मदृष्टिविधानार्थतैवावतिष्ठते। *इतिपरत्वादपि ब्रह्मशब्दस्यैष एवार्थो न्याय्यः। तथा हि ब्रह्मेत्यादेशः ब्रह्मेत्युपासीत ब्रह्मेत्युपास्त इति च सर्वत्रेतिपरं ब्रह्मशब्दमुच्चारयति शुद्धांस्त्वादित्यादिशब्दान्। ततश्च यथा शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्ति-

सत्यां फलवत्त्वासिद्धेर्विकारा एवोत्कृष्टब्रह्मदृष्ट्योपास्या इति फलं। किञ्च लौकिकन्यायाविरुद्धार्थसम्भवे विरुद्धार्थो न ग्राह्यः, प्रत्यवायप्रसङ्गात्, किञ्च प्रथमश्रुतानामादित्यादिपदानामसञ्जातविरोधितया मुख्यार्थत्वग्रहो न्याय्यः, ब्रह्मशब्दे च दृष्टिलक्षणाग्रहः, तथा चादित्यादयो ब्रह्मदृष्ट्योपास्या इत्येव वाक्यार्थ इत्याह। प्राथम्याच्चेति। ब्रह्मशब्दस्यैव दृष्ट्यर्थत्वे हेत्वन्तरमाह। इतिपरत्वादिति। इतिशब्दशिरस्कः शब्दः समभिव्याहृतक्रियालक्षक इति लोके प्रसिद्धमित्यर्थः।

* इतिशब्देति वर्ध०।

वचन एव शुक्तिकाशब्दः, रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति, एवमत्राप्यादित्यादीन् ब्रह्मेति प्रतीयादिति गम्यते। वाक्यशेषोऽपि च द्वितीयानिर्देशेनादित्यादीनेवोपास्तिक्रियया व्याप्यमानान् दर्शयति 'स य एतदेवं विद्वानादित्यं ब्रह्मेत्युपास्ते' [छा०।३।१९] 'यो वाचं ब्रह्मेत्युपास्ते' [छा०] 'यः सङ्कल्पं ब्रह्मेत्युपास्ते' [छा०] इति। यत्तूक्तं ब्रह्मोपासनमेवात्रादरणीयं फलवत्त्वायेति, तदयुक्तं, उक्तेन न्यायेनादित्यादीनामेवोपास्यत्वावगमात्। फलन्त्वतिथ्याद्युपासन इवादित्याद्युपासनेऽपि ब्रह्मैव दास्यति सर्वाध्यक्षत्वात्। वर्णितञ्चैतत्, 'फलं अत उपपत्तेः' इत्यत्र [वे०सू०।३।२।३८]। ईदृशञ्चात्र ब्रह्मण उपास्यत्वं यत्प्रतीकेषु तद्दृष्ट्याध्यारोपणं प्रतिमादिष्विव विष्ण्वादीनां॥

आदित्यादिमतयश्चाङ्ग उपपत्तेः॥ ६॥

'य एवासौ तपति तमुद्गीथमुपासीत' [छा०।१।३] 'लोकेषु पञ्चविधं सामोपासीत' [छा०।२।२] 'वाचि सप्तविधं सामोपा-

---

द्वितीयाश्रुतेश्चादित्यादीनामेवोपास्तिकर्मत्वमित्याह। वाक्यशेषोऽपीति। उत्कृष्टमेवोपास्यमिति न्यायमुक्तमनुवदति। यत्तूक्तमिति। द्वितीयेति श्रुतिभ्यां लौकिकन्यायाच्चोक्तन्यायबाध इत्याह। तदिति। ब्रह्मणोऽनुपास्यत्वे कथं फलदातृत्वं तत्राह। फलन्त्विति। किञ्च यत् दृष्ट्या विकारस्योत्कर्षः तस्य ब्रह्मणोऽप्युपासनाविशेषणत्वेऽप्युपास्यत्वं चास्तीत्याह। ईदृशञ्चेति॥

आदित्यादि। पृथिव्यग्न्यन्तरीक्षादित्यद्युसञ्ज्ञेषु लोकेषु हिंकारप्रस्तावोद्गीथप्रतीहारनिधनैरंशैः पञ्चांशं साम, तैरेवादिरिति उपद्रव

मीत' [छा०।१।८] 'इयमेवर्गग्निः साम' [छा०।६।१] इत्येवमादिष्वङ्गावबद्धेषूपासनेषु संशयः, किमादित्यादिषु उद्गीथादिदृष्टयो विधीयन्ते किं वोद्गीथादिष्वादित्यादिदृष्टय इति, तत्रानियमः नियमकारणाभावादिति प्राप्तं। न ह्यत्र ब्रह्मण इव कस्यचिदुत्कर्षविशेषोऽवधार्यते। ब्रह्म हि समस्तजगत्कारणत्वादपहतपाप्मत्वादिगुणयोगाच्चादित्यादिभ्य उत्कृष्टमिति शक्यतेऽवधारयितुं, न त्वादित्योद्गीथादीनां विकारत्वाविशेषात् किञ्चिदुत्कर्षविशेषावधारणमस्ति। अथवा नियमेनैवोद्गीथादिमतय आदित्यादिष्वध्यस्येरन्। कस्मात्, कर्मात्मकत्वादुद्गीथादीनां, कर्मणश्च फलप्राप्तिप्रसिद्धेरुद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मात्मकाः सन्तः फलहेतवो भविष्यन्ति। तथा च 'इयमेवर्गग्निः साम' इत्यत्र 'तदेतदेतस्यामृच्यध्यूढं साम' [छा०।६।१] इत्यृक्शब्देन पृथिवीं निर्दिशति, सामशब्देनाग्निं, तच्च पृथिव्यग्न्योर्ऋक्सामदृष्टिचिकीर्षायामवक-

---

इति च भक्तिद्वयाधिक्यैः सप्तांशं सामेति भेदः। अत्र विशेषाज्ञानात् संशयः। पूर्ववदुत्कर्षानवधारणादनियम इति प्रत्युदाहरणेन पूर्वपक्षमाह। नत्वेति। सिद्धरूपादित्यादिभ्यः कर्मरूपोद्गीथादीनां फलसन्निकर्षेणोत्कर्षात् ब्रह्मवदितरविशेषणत्वनियम इति दृष्टान्तेन मुख्यं पूर्वपक्षमाह। अथ वेति। तत्तत्पक्षसिद्धिरेव पूर्वोत्तरपक्षफलं मन्तव्यं। किञ्चानङ्गेष्वेवाङ्गदृष्टिरित्यत्र तेष्वङ्गवाचिपदप्रयोगं लिङ्गमाह। तथा चेयमेवेति। तदेतदग्न्याख्यं साम एतस्यां पृथिवीरूपायामृच्यध्यूढमुपरिस्थितमित्यर्थः, ऋचि सामवत् पृथिव्यामग्निर्दृश्यते, अतः साम्यात् पृथिव्येवर्गग्निः सामेति ध्यानं विहितं, तत्र यदि ऋक्सामात्मकयोः कर्माङ्गयोः पृथिव्यग्निदृष्टिः स्यात्, तदा पृथिव्यग्न्यृक्सा-

ल्पते, न ऋक्सामयोः पृथिव्यग्निदृष्टिचिकीर्षायां। क्षत्तरि राजदृष्टिकरणाद्राजशब्दमुपचर्यते न राजनि क्षत्तृशब्दः। अपि च 'लोकेषु पञ्चविधं सामोपासीत' [छा०।२।२] इत्यधिकरणनिर्देशाल्लोकेषु सामाध्यसितव्यं इति प्रतीयते। 'एतद्गायत्रं प्राणेषु प्रोतम्' [छा०।२।७] इति चैतद्दर्शयति। प्रथमनिर्दिष्टेषु चादित्यादिषु चरमनिर्दिष्टं ब्रह्माध्यस्तं 'आदित्यो ब्रह्मेत्यादेशः' [छा०।३।१९] इत्यादिषु। प्रथमनिर्दिष्टाश्च पृथिव्यादयश्चरमनिर्दिष्टा हिंकारादयः 'पृथिवी हिंकारः' [छा०।२।२] इत्यादिश्रुतिषु। अतोऽनङ्गेष्वादित्यादिषु अङ्गमतिक्षेप इत्येवं प्राप्ते ब्रूमः। आदित्यादिमतय एवाङ्गेषूद्गीथादिषु प्रतिक्षिप्येरन्। कुतः, उपपत्तेः। उपपद्यते ह्येवमपूर्वसन्निकर्षादादित्यादिमतिभिः संस्क्रियमाणेषूद्गीथादिषु कर्मसमृद्धिः। 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' [छा०उ०] इति च विद्यायाः कर्मसमृद्धि-

---

मपदप्रयोगो न स्यादित्यत्र दृष्टान्तमाह। क्षत्तरीति। अतः प्रयोगान्यथानुपपत्त्या पृथिव्यग्न्योः ऋक्सामदृष्टिरित्यर्थः। विषयसप्तम्या चैवमेवेत्याह। अपि चेति। गायत्रसंज्ञं साम। किञ्च पूर्वाधिकरणसिद्धान्तन्यायेनाप्येवमित्याह। प्रथमेति। अनङ्गबुद्ध्याङ्गान्युपास्यानीति सिद्धान्तयति। एवमिति। उपास्तीनां हि कर्मसमृद्धिः फलं श्रूयते, सा च ताभिरङ्गेषु संस्क्रियमाणेषु उपपद्यते, अङ्गानां समृद्ध्यनुकूलप्रकृतकर्मापूर्वजनकत्वादित्यर्थः। ननु यत्रोपास्तीनां प्रकृतकर्मापूर्वसन्निकृष्टाङ्गद्वारापेक्षं फलं श्रुतं, तत्र फलोपपत्तये अङ्गानामुपास्यत्वं भवतु तदनपेक्षलोकादिफलेषु तूपासनेषु कथमुपास्यविवेक इति शङ्कते। भवत्विति। यथा स्वतन्त्रपशुफलस्यापि गोदोहनस्य अङ्गद्वारापेक्षयैव

हेतुतां दर्शयति। भवतु कर्मसमृद्धिफलेष्वेवं, स्वतन्त्रफलेषु तु कथं 'य एतदेवं विद्वान् लोकेषु पञ्चविधं सामोपास्ते' [छा०उ०] इत्यादिषु, तेष्वप्यधिकृताधिकारात् प्रकृतापूर्वसन्निकर्षेणैव फलकल्पना युक्ता, गोदोहनादिनियमवत् फलात्मकत्वादित्यादीनामुद्गीथादिभ्यः कर्मात्मकेभ्य उत्कर्षोपपत्तेः। आदित्यादिप्राप्तिलक्षणं कर्मफलं श्रूयते श्रुतिषु। अपि च 'ओमित्येतदक्षरमुद्गीथमुपासीत खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति' [छा०१।१] इति चोद्गीथमेवोपास्यत्वेनोपक्रम्यादित्यादिमतीर्विदधाति। यत्तूक्तं उद्गीथादिमतिभिरुपास्यमाना आदित्यादयः कर्मभूयं भूत्वा फलं करिष्यन्तीति। तदयुक्तं, स्वयमेवोपासनस्य कर्मत्वात् फलवत्त्वोपपत्तेः,आदित्यादिभावेनापि च दृश्यमानानामुद्गीथादीनां कर्मात्मकत्वानपायात्। 'तदेतदेतस्यामृच्यध्यूढं साम' इति तु लाक्षणिक एष पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगः। लक्षणा च यथा-

---

फलमिष्टं तद्वत् लौकिकादिफलेषूपासनेष्वपि कर्मापूर्वाङ्गद्वारैव फलकल्पना युक्ता। कर्माधिकृतस्यैवाङ्गाश्रितोपासनेष्वधिकारादतोऽङ्गानामेवोपास्यत्वमिति समाधत्ते। तेष्वपीति। उत्कर्षानवधारणादनियम इत्युक्तं निरस्यति। फलात्मेति। उपक्रमबलाच्चाङ्गमुपास्यमित्याह। अपि चेति। रसतमत्वादिगुणाद्युपसङ्ख्यानमित्यर्थः। द्वितीयं पूर्वपक्षं दूषयति। यत्तूक्तमित्यादिना। कर्मभूयं कर्मात्मकत्वं प्राप्येत्यर्थः। सिद्धाऽऽदित्याद्यात्मना कर्मणां दृष्टौ कर्मत्वहानिः स्यादित्यत आह। आदित्यादिभावेनेति। प्रयोगानुपपत्तिमुक्त्वा निरस्यति। तदेतदिति। लक्षणाबीजं सम्बन्धमाह। लक्षणा चेति। गङ्गायां घोष इत्यत्र सन्निकृष्टसंयोगसम्बन्धेन तीरलक्षणा, अग्निर्माणवक इत्यत्र अग्निनिष्ठशुचित्वादिगुणवत्त्वरूपपरम्परासम्बन्धेन लक्षणा दृष्टा, तथा चात्र ऋक्सामयोः पृथिव्यग्निदृष्टिपक्षेऽपि ऋक्सामपदाभ्यां स्ववाच्यार्थे द्रष्टव्यताख्यपरम्परा-

सम्भवं सन्निकृष्टेन विप्रकृष्टेन वा स्वार्थसम्बन्धेन प्रवर्तते। तत्र यद्यपि ऋक्सामयोः पृथिव्यग्निदृष्टिं चिकीर्षा तथापि प्रसिद्धयोर्ऋक्सामयोर्भेदेनानुकीर्तनात् पृथिव्यग्न्योश्च सन्निधानात् तयोरेवैष ऋक्सामशब्दप्रयोगः ऋक्सामसम्बन्धादिति निश्चीयते। क्षत्तृशब्दोऽपि हि कुतश्चित् कारणाद्राजानमुपसर्पन्न निवारयितुं पार्यते। 'इयमेवर्क्' इति च यथाक्षरन्यासमृच एव पृथिवीत्वमवधारयति। पृथिव्या हि ऋक्त्वेऽवधार्यमाणे इयमृगेवेत्यक्षरन्यासः स्यात्। 'य एवं विद्वान् साम गायति' [छा॰उ॰] इति चाङ्गाश्रयमेव विज्ञानमुपसंहरति न पृथिव्याद्याश्रयं। तथा 'लोकेषु पञ्चविधं सामोपासीत' [छा॰उ॰] इति यद्यपि सप्तमीनिर्दिष्टा लोकास्तथापि सामन्येव ते अध्यस्येरन्, द्वितीया-

---

सम्बन्धेन पृथिव्यग्निलक्षणा युक्ता इत्यर्थः। ननु प्रतीकवाचिपदस्य ध्येयेऽर्थे लक्षणा न युक्ता, क्षत्तृपदस्य राजन्यप्रयोगादिति शङ्कते। तत्र यद्यपीति। तथापि ऋक्सामसम्बन्धात् पृथिव्यग्न्योरेवैतस्यामध्यूढं सामेत्येष ऋक्सामपदप्रयोग इत्यन्वयः। ननु मुख्यार्थ एव न कुतो गृह्यते तत्राह। प्रसिद्धयोरिति। तस्मादृच्यध्यूढं सामेति मुख्ययोः पृथगुक्तेस्तदेतस्यामित्यत्रापि तयोर्ग्रहे पुनरुक्तिः स्यात्, अतः प्रतीकाभेददृष्ट्या पृथिव्यग्न्योः प्रतीकसन्निधानात् तयोरेव प्रतीकपदप्रयोगः कुतस्तदभेददाढ्यायेत्यर्थः। तर्हि क्षत्तृशब्दोऽपि राजनि स्यादित्यत आह। क्षत्त्रिति। स्थितप्रयोगस्य निमित्तं किमपि वाच्यं न तु निमित्तमस्ति इति प्रयोग आपाद्य इति भावः। क्षत्ता सूतः, तस्य कार्यं रथचर्यादि यदा राजैव करोति तदा क्षत्तृशब्दो राजन्यप्यस्ति इत्यक्षरार्थः। ऋगादावेव पृथिव्यादिदृष्टिः इत्यत्र हेत्वन्तरमाह। इयमिति। सप्तम्या लोकानामुपास्यत्वमुक्तं निरस्यति। तथा लोकेष्विति। सामात्मना लोकानुपासीतेति द्वितीयासप्तम्योर्भङ्गस्त्वया कार्यस्ततो वरं लोकात्मना सामोपासीतेति सप्तमीभङ्गमात्र इत्यर्थः। एतेनेति एक-

निर्देशेन साम्न उपास्यत्वावगमात्। सामनि हि लोकेष्वध्यस्यमानेषु साम लोकात्मनोपासितं भवति, अन्यथा पुनर्लोकाः सामात्मनोपासिताः स्युः। एतेन 'एतद्गायत्रं प्राणेषु प्रोतम्' [छा०।२।११] इत्यादि व्याख्यातं। यत्रापि तुल्यो द्वितीयानिर्देशः 'अथ खल्वमुमादित्यं सप्तविधं सामोपासीत' [छा०।२।६] इति तत्रापि समस्तस्य खलु साम्न उपासनं साधु, 'इति तु पञ्चविधस्य' 'अथ सप्तविधस्य' [छा०।२।७] इति च साम्न एवोपास्यत्वोपक्रमात् तस्मिन्नेवादित्याध्यासः। एतस्मादेव च साम्न उपास्यत्वावगमात् 'पृथिवी हिङ्कारः' [छा० २।७] इत्यादिनिर्देशविपर्ययेऽपि हिङ्कारादिष्वेव पृथिव्यादिदृष्टिः। तस्मादनङ्गाश्रया आदित्यादिमतयोऽङ्गेषूद्गीथादिषु क्षिप्येरन्निति सिद्धम्॥

आसीनः सम्भवात्॥७॥

कर्माङ्गसम्बन्धिषु तावदुपासनेषु कर्मतन्त्रत्वान्नासनादिचिन्ता नापि सम्यग्दर्शने, वस्तुतन्त्रत्वात् ज्ञानस्य। इतरेषु तूपासनेषु

विभक्तिभङ्गलाघवेन प्राणात्मना गायत्रं सामोपास्यमिति व्याख्यातमित्यर्थः। ननु विभक्तिसाम्ये कथं निर्णयस्तत्राह। यत्रापीति। साम्न उपासनं साध्वित्युपक्रम्य पृथिवी हिङ्कार इत्यादिना हिङ्कारादिपञ्चावयवस्य साम्न उपासनं उक्त्वा इति तु पञ्चविधस्योपासनमित्युपसंहृत्य, अथेति सप्तविधस्य साम्न उपासनं प्रक्रम्य प्रपञ्चितमतः साम्न एवोपास्यत्वमित्यर्थः। यदुक्तं प्राथम्यात् पृथिव्यादेरुपास्यत्वमिति तत्राह। एतस्मादेवेति। यद्यपि हिङ्कारोद्देशेन पृथिवीत्वविधेरुद्देश्यस्य प्रथमनिर्देशो वाच्यस्तथा न्यायबलात् प्रत्ययो ग्राह्य इत्यर्थः॥

कर्मणा उत्थितेनोपविष्टेन वानेकधानुष्ठानदर्शनात् संशयः, कर्माङ्गा-

किमनियमेन तिष्ठन्नासीनः शयानो वा प्रवर्त्तेतात नियमेनासीन एवेति चिन्तयति। तत्र मानसत्वादुपासनस्यानियमः शरीरस्थितेरित्येवं प्राप्ते ब्रवीति, आसीन एवोपासीतेति। कुतः, सम्भवात्। उपासनं नाम समानप्रत्ययप्रवाहकरणं, न च तद्गच्छतो धावतो वा सम्भवति, गत्यादीनां चित्तविक्षेपकरत्वात्। तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमम्भवति। शयानस्याप्यकस्मादेव निद्रयाऽभिभूयते, आसीनस्य त्वेवंजातीयको भूयान्दोषः सुपरिहर इति सम्भवति तस्योपासनम्॥

ध्यानाच्च ॥ ८ ॥

अपि च ध्यायत्यर्थ एष यत् समानप्रत्ययप्रवाहकरणं, ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते, ध्यायति बको ध्यायति प्रोषितबन्धुरित्यासीनस्यानायासो भवति। *तस्मादर्थादासीनकर्म उपासनम्॥

अचलत्वञ्चापेक्ष्य ॥ ९ ॥

अपि च 'ध्यायतीव पृथिवी' इत्यत्र पृथिव्यादिष्वचलत्वमेवापेक्ष्य ध्यायतिवादो भवति, तच्च लिङ्गमुपासनस्यासीनकर्मत्वे ॥

श्रितोपासनानामासननियमानपेक्षाणामनुष्ठानप्रकार उक्तस्तदङ्गानाश्रितोपासनेष्वप्यनियम इति पूर्वपक्षयति। तत्रेति। अत्रासनाभ्यासासिद्धिः, सिद्धान्ते तु मनोदेहयोर्भिन्नत्वेऽपि देहचाञ्चल्ये मनसोऽनवस्थानस्य अनुभवसिद्धत्वात् मनोव्यापारेषूपासनेषु देहस्थैर्यार्थमासननियमापेक्षेति फलभेदः। तिष्ठत उत्थितस्य॥

किञ्च ध्यातार आसीना एव स्युः ध्यायतिशब्दार्हत्वात् वकादिवदित्याह। ध्यानाच्चेति॥

---

* तस्माद्ध्यासीनेति मु०।

स्मरन्ति च ॥ १० ॥

स्मरन्त्यपि च शिष्टा उपासनाङ्गत्वेनासनं 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' इत्यादिना। अत एव च पद्मकादीनामासनविशेषाणामुपदेशो योगशास्त्रे ॥

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

दिग्देशकालेषु संशयः, किमस्ति कश्चिन्नियमो नास्ति वेति। प्रायेण वैदिकेष्वारम्भेषु दिगादिनियमदर्शनात् स्यादिहापि कश्चिन्नियम इति यस्य मतिस्तं प्रत्याह। दिग्देशकालेष्वर्थलक्षण एव नियमः, यत्रैवास्य दिशि देशे काले वा मनसः सौकर्येणैकाग्रता भवति तत्रैवोपासीत, प्राचीदिक्पूर्वाह्णप्राचीनप्रवणादिवत् विशेषाश्रवणादेकाग्रताया इष्टायाः सर्वत्राविशेषात्। ननु विशेषमपि केचिदामनन्ति—

'समे शुचौ शर्करावह्निवालुका-

विवर्जिते शब्दजलाश्रयादिभिः।

अत्रैव श्रौतं दृष्टान्तमाह। अचलत्वञ्चेति ॥

बाह्यस्य शारीरस्य वाऽऽसनस्य स्मरणात् नियम इत्याह। स्मरन्ति चेति ॥

यत्रैकाग्रता तत्र विशेषात् तेष्वेवाङ्गानाश्रितोपासनेषु प्राच्यादिदिशि तीर्थादिदेशे प्रदोषादिकाले नियमोऽस्ति न वेत्युभयथासम्भवात् संशयः, एकविषयत्वं सङ्गतिरुपास्तीनां विहितत्वात् यागादिवदस्ति दिगादिनियम इति पूर्वपक्षः। अत्र दिगादिष्वादरः फलं, सिद्धान्ते त्वनादरः। ध्येये चित्तैकाग्र्यस्य प्राधान्यात् प्रधानाच्चित्तदेशादिग्रहणस्योचितत्वादिविवेकः अर्थलक्षणा एवेति ऐकाग्र्यफललिङ्गक एवेत्यर्थः। प्राचीनप्रवणे प्राग्देशे निम्नस्थाने वैश्वदेवं कुर्यादितिवदत्र दिगादिविशेषो न श्रूयते अतोऽनुमानमप्रयोजकमिति भावः। विशे-

मनोऽनुकूले न तु चक्षुःपीडने
*गुहानिवाताश्रयणे प्रयोजयेत्' इति।

†सत्यमस्त्येवंजातीयको नियमः, सति त्वेतस्मिंस्तद्गतेषु विशेषेषु अनियम इति सुहृद्भूत्वा आचार्य आचष्टे। 'मनोऽनुकूले' इति चैषा श्रुतिर्यत्रैकाग्रता ‡तत्रैवेत्येतदेव दर्शयति॥

आप्रायणात् तत्रापि हि दृष्टम्॥ १२॥

आवृत्तिः सर्वोपासनेष्वादर्तव्येति स्थितमाद्येऽधिकरणे, तत्र यानि तावत् सम्यग्दर्शनार्थान्युपासनानि तान्यवघातादिवत् कार्यपर्यवसानानीति ज्ञातमेवैषामावृत्तिपरिमाणं, न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किञ्चिच्छासितुं शक्यं, अनियोज्यब्रह्मात्मत्वप्रतीतेः शास्त्रस्याविषयत्वात्, यानि पुनरभ्युदयफलानि तेष्वेषा चिन्ता, किं कियन्तञ्चित्कालं प्रत्ययमावर्त्योपरमेदुत यावज्जीवमावर्तयेदिति। किं तावत् प्राप्तं कियन्तञ्चित्कालं प्रत्ययमभ्यस्योत्सृजेत्, आवृत्तिविशिष्टस्योपासन-

---

शास्त्रवणमसिद्धमिति शङ्कते। ननु विशेषमपीति। शर्कराः सूक्ष्मपाषाणाः। जलाश्रयवर्जनं शीतनिवृत्त्यर्थं। चक्षुःपीडना मशकाः। वाचनिकं समदेशादिनियममङ्गीकृत्य चित्तैकाग्र्यहेतुषु देशादिगतेषु प्राचीनप्रवणत्वादिष्वनादर इति सुहृद्भावेन सूत्रकृदुपदिशति॥

देशाद्याग्रहे चित्तविक्षेपात् समाधिभङ्गः स्यात् स माभूदिति आप्रायणात् व्यवहितेनास्य सम्बन्धमाह। आवृत्तिरिति। अनियोज्ये ब्रह्मण्यात्मत्वप्रतिपत्तिर्यस्य तस्य विदुष इत्यर्थः। अहंग्रहोपासनेष्वनुष्ठानस्योभयथादृष्टेः संशयमाह। यानि पुनरिति। यथा दिगादिनियमस्य विधेरनादरस्तद्वदामरणमुपास्यावृत्तेः अविधानाद-

---

* गुहानिवाताश्रयणेन योजयेदिति वर्ध०। † उच्यते सत्यमिति मु०।
‡ तत्रेत्येतावदेवेति वर्ध०।

शब्दार्थस्य कृतत्वादित्येवं प्राप्ते ब्रूमः। आप्रायणादेवावर्तयेत् प्रत्ययं, अन्त्यप्रत्ययवशाददृष्टफलप्राप्तेः। कर्माण्यपि हि जन्मान्तरोपभोग्यं फलमारभमाणानि तदनुरूपं भावनाविज्ञानं प्रायणकाले आक्षिपन्ति, 'सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासङ्कल्पितं लोकं नयति' इति चैवमादिश्रुतिभ्यः, तृणजलायूकानिदर्शनाच्च। प्रत्ययास्त्वेते स्वरूपानुवृत्तिं मुक्त्वा किमन्यत् प्रायणकाले भावनाविज्ञानमपेक्षेरन्। तस्माद्ये प्रतिपत्तव्यफलभावनात्मकाः प्रत्ययास्तेष्वाप्रायणादावृत्तिः। तथा च श्रुतिः "*स यावत्क्रतुरस्माल्लोकात् प्रैति' इति प्रायणकालेऽपि प्रत्ययानुवृत्तिं दर्शयति। स्मृतिरपि-

'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः'॥ इति

नियम इति पूर्वपक्षः। मरणपर्यन्तमावृत्तिरिति सिद्धान्तयति। एवमिति। उपास्तीनां कर्मणाञ्चान्त्यकाले प्राप्तव्यफलमूर्तिद्वारा फलहेतुत्वे मानमाह। सविज्ञान इति। भावनामयं विज्ञानं फलस्फुरणं तेन सहितः सविज्ञानो विज्ञानं स्फुरितफलं सविज्ञानमित्यर्थः। यस्मिन् लोके चित्तं सङ्कल्पोऽस्येति यच्चित्तस्तेन सङ्कल्पितेन सह फलस्फूर्त्यनन्तरं मनः प्राणे लीयते इति यावत्। तेज उपादानं, आत्मा जीवः। जलौकादृष्टान्तश्रुतेश्च भाविफलस्फूर्तिरस्ति इत्यर्थः। अस्त्विदमन्त्यफलविज्ञानं कर्मणामिवादृष्टद्वारोपास्तीनां ततः कुत आमरणमावृत्तिरित्यत आह। प्रत्ययास्त्विति। उपास्तिप्रत्ययानामधारावाहिकतया स्वरूपानिवृत्तिरेवान्त्यं विज्ञानं, नत्वदृष्टद्वारकमन्यदपेक्षितं सर्वभावानामेव स्वसमानजातीयद्वारानपेक्षतया प्रत्ययानां प्रत्यया-

---

* स यावत्क्रतुरयमस्मादिति म० :

'प्रयाणकाले मनसाऽचलेन' [भ०गी०] इति च। 'सोऽन्तवेलायामेतत् त्रयं प्रतिपद्येत' इति च मरणवेलायां कर्तव्यशेषं श्रावयति॥

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥ १३॥

गतस्तृतीयशेषः, अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रजायते, ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न वा क्षीयत इति संशयः। किं तावत् प्राप्तं फलार्थत्वात् कर्मणः फलमदत्त्वा न सम्भाव्यते क्षयः। फलदायिनी ह्यस्य शक्तिः श्रुत्या समधिगता। यदि तदन्तरेणैव फलोपभोगमुपमृद्येत श्रुतिः कदर्थिता स्यात्। स्मरन्ति च 'न हि कर्माणि क्षीयन्ते' [म०भा०]इति। नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोति। नैष दोषः, प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्गृहदाहेष्ट्यादिवत्। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानात् भवेदपि दोषक्षपणार्थता, नत्वेवं ब्रह्मविद्याया विधानमस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये तत्फलस्यावश्यभोक्तव्यत्वादनिर्मोक्षः स्यात्। नेत्युच्यते, देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भविष्यति। तस्मात् न

न्तरापेक्षायोगात्, कर्मणान्तु दृष्टद्वाराऽन्यधीफलत्वानुपपत्तेः अदृष्टद्वारकल्पनेति भावः। क्रतुर्ध्यानं उपासक एतत्त्रयं। अक्षितमसि, अच्युतमसि, प्राणसंसितमसि, इति मन्त्रत्रयं मरणकालेऽपि स्मरेदित्यर्थः॥

यथोपासकानां यावज्जीवं कर्तव्यमस्ति न तथात्मविदामिति कर्मक्षयलक्षणां जीवन्मुक्तिमाह। तदधिगम इति। ज्ञानसाधनेषु फलाधिक्यार्थं फलाध्यायेऽपि साधनविचारः कृतः, सम्प्रति फलाध्यायस्था

ब्रह्मविद्याधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते ब्रूमः। तदधिगमे। ब्रह्माधिगमे सत्युत्तरपूर्वाघयोरश्लेषविनाशौ भवतः, उत्तरस्याश्लेषः, पूर्वस्य विनाशः। कस्मात्, तद्व्यपदेशात्। तथा हि ब्रह्मविद्याप्रक्रियायां सम्भाव्यमानसम्बन्धस्यागामिनो दुरितस्यानभिसम्बन्धं विदुषो व्यपदिशति 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' इति। तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति। अयमपरः कर्मक्षयव्यपदेशो भवति।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति।

यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकदर्थनं स्यादिति। नैष दोषः, न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे, विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः। शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियेत, न प्रतिबन्धाप्रतिबन्धयोरपि। न हि कर्म क्षीयत इत्येतदपि

फलचिन्ता क्रियत इत्याह। गत इति। कर्मणां फलान्तत्वशास्त्रात् ज्ञाननाश्यत्वशास्त्राच्च संशयः, पूर्वपक्षे ज्ञानिनोऽपि सञ्चितपापभोगानन्तरं मुक्तिः, सिद्धान्ते तु ज्ञानसमकालं पापनाशाज्जीवन्मुक्तिरिति फलं। न हि स्यादित्यादिर्निषेधश्रुत्या दुरितादृष्टस्य दुःखदायिनी शक्तिरधिगता 'नाभुक्तं क्षीयते कर्म' इति च स्मरन्ति। फलान्तमेव पापं न मध्ये नश्यतीति पूर्वपक्षः। ननु तर्हि तन्नाशार्थं प्रायश्चित्तविधिर्न स्यादिति चेत्। न, यथा आहिताग्नेर्गृहदाहे निमित्ते सति 'अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्' इति इष्टिविधिस्तद्दहोषे नि-

स्मरणमौत्सर्गिकं न हि भोगादृते कर्म क्षीयते तदर्थत्वादिति, इष्यत एव प्रायश्चित्तादिना दुरितस्य क्षयः। 'सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद' इत्यादि श्रुतिस्मृतिभ्यः। यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि भविष्यन्ति इति। तदसत्, दोषसंयोगेन चोद्यमानानामेषां दोष*निर्घातफलसम्भवे फलान्तरकल्पनानुपपत्तेः। यत्पुनरेतदुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीति। अत्र ब्रूमः। सगुणासु तावद्विद्यासु विद्यत एव विधानं, तासु च वाक्यशेषे ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते, तयोश्चाविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते। निर्गुणायान्तु विद्यायां यद्यपि विधानं नास्ति तथाप्यकर्त्रात्मत्वबोधात् कर्मप्रदाहसिद्धिः। अश्लेष इति चागामिषु

मित्तमात्रे सति प्रायश्चित्तविधेर्दोषनाशार्थत्वासिद्धेः। ननु विषम उपन्यासः, युक्तं गृहदाहस्य सिद्धत्वादयोग्यत्वाच्च फलतया निमित्तमात्रत्वं दोषवान् प्रायश्चित्तं कुर्यादित्यत्र तु मलिनः स्नायादितिवद्दोषपदस्य निवृत्तिद्वारा फलकारत्वसम्भवात् 'तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इति प्रायश्चित्तात् पापनिवृत्तिश्रुतेश्चायुक्तं प्रायश्चित्तस्य नैमित्तिकत्वमित्याह। अपि चेति। ज्ञानस्य दोषनाशार्थतया विधानं नास्ति 'क्षीयन्ते चास्य कर्माणि' इत्यादेर्ज्ञानस्तावकमात्रत्वादित्यर्थः। कर्मभोगानन्तरं देशकालान्तरे मोक्षो भविष्यति शास्त्रप्रामाण्यादित्याह। नेत्युच्यत इति। ज्ञानात् कर्मक्षयस्यापूर्वत्वान्मानान्तराविरुद्धत्वाच्च तत्परानेकवाक्यानां स्तावकत्वायोगात् तस्यास्तित्वमिति सिद्धान्तयति। एव मित्यादिना। पापक्रियातो पूर्वानुत्पत्तिरश्लेषः। सगुणब्रह्मविद्यायां व्यपदेशमुक्त्वा निर्गुणायान्तमाह। अयमपर इति। पूर्वोक्तं दूषयति।

* दोषनिर्घातफलेति वर्ध० का०।

कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति। अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिपेद इव तथापि विद्यासामर्थ्यात् मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रलीयन्त इत्याह, विनाश इति। पूर्वप्रसिद्धकर्तृत्वभोक्तृत्वस्वरूपविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भोक्ता वाऽहमासं नेदानीं नापि भविष्यति काले इति ब्रह्मविदवगच्छति। एवमेव च मोक्ष उपपद्यते, अन्यथा ह्यनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात्। न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवत् भवितुमर्हति, अनित्यत्वप्रसङ्गात् परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य। तस्मात् ब्रह्माधिगमे दुरितक्षय इति स्थितम्॥

इतरस्याप्येवमसंश्लेषः पाते तु॥ १४॥

पूर्वस्मिन्नधिकरणे बन्धहेतोरघस्य स्वाभाविकस्याश्लेषविनाशौ

यदुक्तमित्यादिना। विधिनिषेधशास्त्रं 'नाभुक्तं क्षीयते' इत्यादि, स्मृतिश्च कर्मणः फलशक्तौ प्रमाणतः शक्तस्याऽपि कुतश्चित् नाशाङ्गीकारेण शास्त्रविरोध इत्यर्थः। तत्त्वज्ञानमात्मन्यशेषदुरितनाशकं तन्मूलाध्यासबाधकत्वात् स्वप्नदुरितमूलकर्तृत्वाध्यासबाधकजाग्रद्बोधवदित्याह। तथाप्यकर्त्रात्मबोधादिति। श्रुतार्थमेव युक्त्या द्रढयति। अश्लेष इति। मूलाध्यासानुत्पत्तेः पापस्याश्लेषः, तन्नाशात् तद्विनाश इत्यर्थः। अध्यासाभावे विद्वदनुभवमाह। पूर्वेति। मोक्षशास्त्रबलाच्च ज्ञानात् कर्मक्षयसिद्धिरित्याह। एवमेवेति। ज्ञानात् कर्मक्षये सत्येवेत्यर्थः। मोक्षस्य कर्मफलसाम्यमुक्तं निरस्यति। न चेति॥

इतरस्याऽपि तु। अतिदेशत्वात् न सङ्गत्याद्यपेक्षा, ज्ञानात् पुण्यं

ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ, धर्मस्य पुनः शास्त्रीयत्वात् शास्त्रीयेण ज्ञानेनाविरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते। इतरस्याऽपि पुण्यस्य कर्मण एवमघवदसंश्लेषो विनाशश्च ज्ञानवतो भवतः। कुतः, तस्याऽपि स्वफलहेतुत्वेन ज्ञानफलप्रतिबन्धित्वप्रसङ्गात्। 'उभे उ हैवैष एतेन तरति' इत्यादिश्रुतिषु दुष्कृतवत्सुकृतस्याऽपि प्रणाशव्यपदेशात् अकर्त्रात्मबोधनिमित्तस्य च कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् 'क्षीयन्ते चास्य कर्माणि' इति चाविशेषश्रुतेः। यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यं, ज्ञानापेक्षया निकृष्टफलत्वात्। अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः 'नैनं सेतुमहोरात्रे तरतः' इत्यत्र सह दुष्कृतेन सुकृतमप्यनुक्रम्य सर्वे पाप्मानोऽतो निवर्तन्त इत्यविशेषेणैव प्रकृतेषु पाप्मशब्दप्रयोगात्। पाते त्विति। तुशब्दोऽवधारणार्थः। एवं धर्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यम्भाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति॥

क्षीयते न वेति पूर्ववत् सन्देहे ज्ञानं न पुण्यनाशकं शास्त्रीयत्वात् पुण्यवदित्यधिकाशङ्कामुक्त्वातिदेशं व्याचष्टे। धर्मस्येत्यादिना। ज्ञानं पुण्यनाशकं तन्मूलाविद्याघातित्वादिति न्यायोपेतागमबाधितं अनुमानमिति भावः। ननु क्षीयन्ते चेत्यविशेषश्रुतिः पापविषया सर्वं पाप्मानं तरति इति विशेषश्रुतेरित्यत आह। यत्रापि केवल इति। पापपुण्यक्षयसूत्राधिकरणद्वयस्य फलमाह। पाते त्विति॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥१५॥

पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः, स किमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति विचार्यते। तत्र 'उभे उ हैवैष एतेन तरति' इत्येवमादिश्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह। अनारब्धकार्ये एव त्विति। अप्रवृत्तफले एव पूर्वे जन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राक् ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्ये सामिभुक्तफले याभ्यामेतत् ब्रह्मज्ञानायतनं जन्म निर्मितं। कुत एतत्, 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति शरीरपातावधिकरणात् क्षेमप्राप्तेः, इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत। ननु वस्तुबलेनैवायमकर्त्रात्मबोधः कर्माणि क्षपयन् कथं कानिचित् क्षपयेत् कानिचिच्चोपेक्षेत, न हि समानेऽग्निबीजसम्पर्के केषाञ्चिद्बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्तु-

---

अनारब्धकार्ये एव तु। उक्तकर्मक्षयं विषयीकृत्य क्षीयन्ते चास्य-विशेषश्रुतेस्तस्य तावदेव चिरमिति श्रुतेश्च संशयमाह। पूर्वयोरिति। जीवन्मुक्त्यसिद्धिस्तत्सिद्धिश्चेत्युभयत्र फलं, पूर्वसिद्धान्तन्यायेन पूर्वपक्षप्राप्तौ उक्तोत्सर्गतः कर्मक्षतिः प्रारब्धान्यकर्मविषयेत्यपवादं सिद्धान्तयति। एवमिति। सामिशब्दोऽर्द्धवाचकः, प्रारब्धाद्यावन्न विमुच्यते तावानेव विलम्बः, तन्मोक्षे ब्रह्म सम्पद्यत इति श्रुत्यर्थः। देहपातावधिलिङ्गात् तत्त्वविदां याज्ञवल्क्यादीनां देहधारण-

मिति। उच्यते, न तावदनाश्रित्यारब्धकार्यं कर्माशयं ज्ञानोत्पत्तिरुपपद्यते, आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्याऽन्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनं, अकर्त्रात्मत्वबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति, बाधितमपि मिथ्याज्ञानं द्विचन्द्रादिज्ञानवत् संस्कारवशात् कञ्चित्कालमनुवर्तत एव। अपि च नैवात्र विवदितव्यं ब्रह्मविदः कञ्चित्कालं शरीरं ध्रियते न ध्रियत इति। कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणञ्चापरेण प्रतिक्षेप्तुं शक्येत। श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरुच्यते। तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्णयः॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥ १६॥

पुण्यस्याप्यश्लेषविनाशयोरघन्यायोऽतिदिष्टः, सोऽतिदेशः सर्वपुण्यविषय इत्याशङ्क्य प्रतिवक्ति, अग्निहोत्रादि त्विति। तुशब्द आशङ्कामपनुदति। यन्नित्यं कर्म वैदिकमग्निहोत्रादि

श्रुतिस्मृतिलिङ्गाच्च प्रारब्धकर्मणस्तत्त्वज्ञानं प्रति हेतुत्वेनोपजीव्यत्वाच्च प्राबल्यसिद्धेस्तत्प्रतिबद्धं तत्त्वज्ञानं तत्सिद्ध्यर्थं अविद्यांशं विक्षेपशक्त्याख्यं विहायावरकाविद्यांशं नाशयतीत्याह। उच्यते न तावदिति। विक्षेपकाविद्यालेश एव तत्संस्कारः। शिष्यान् प्रति जीवन्मुक्तौ स्वानुभवमाह। अपि च नैवेति॥

अग्निहोत्रादि तु। नित्यं नैमित्तिकं कर्म ज्ञानात् नश्यति न वेति सन्देहे उभे पुण्यपापे तरति इत्यविशेषश्रुतेर्नश्यतीत्याशङ्क्येतरस्याऽपीत्युक्तातिदेशस्य नित्याद्यतिरिक्तकाम्यपुण्यविषयत्वेनाचापवादं सि-

तत्तत्कार्यायैव भवति ज्ञानस्य यत्कार्यन्तदेवास्य कार्यमित्यर्थः। कुतः, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन' इत्यादिदर्शनात्। ननु ज्ञानकर्मणोर्विलक्षणकार्यत्वात् कार्यैकत्वानुपपत्तिः। नैष दोषः, ज्वरमरणकार्ययोरपि दधिविषयोर्गुडमन्त्रसंयुक्तयोस्तृप्तिपुष्टिकार्यदर्शनात्, तद्वत् कर्मणोऽपि ज्ञानसंयुक्तस्य मोक्षकार्यत्वोपपत्तेः। नन्वनारभ्यो मोक्षः कथमस्य कर्मकार्यत्वमुच्यते। नैष दोषः, आरादुपकारकत्वात् कर्मणः। ज्ञानस्यैव हि प्रापकं सत्कर्म प्रणाड्या मोक्षकारणमित्युपचर्यते। अत एव चातिक्रान्तविषयमेतत् कार्यैकत्वाभिधानं। न हि ब्रह्मविद आगाम्यग्निहोत्रादि सम्भवति, अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात्। सगुणासु तु विद्यासु कर्तृत्वानतिवृत्तेः सम्भवत्यागाम्यप्यग्निहोत्रादि। तस्याऽपि निरभिसन्धिनः कार्यान्तराभावात् वेदविद्यासङ्गत्युपपत्तिः। किंविषयं पुनरिदमश्लेषविनाशवचनं किंविषयं वा वेदविनियोगवचनमेकेषां शाखिनां 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इत्यत उत्तरं पठति॥

क्रान्तयति। पुण्यस्येत्यादिना। अत्र पूर्वपक्षे ज्ञानार्थं नित्याद्यनुष्ठानासिद्धिः पङ्कप्रक्षालनन्यायात्, सिद्धान्ते तु ज्ञानोत्पत्त्यर्थत्वात् तत्सिद्धिरिति विवेकः। अत्र भाष्ये ज्ञानकर्मणोः साक्षादेककार्यत्वं परमतेनोक्ता साक्षात्पारम्पर्याभ्यां मोक्षहेतुत्वं स्वमतमुक्तमिति मन्तव्यम्। अत एवेति ज्ञानादूर्द्ध्वं कर्माभावात् पूर्वकर्मविषयमित्यर्थः। निर्गुणविद्यायां कर्मसाहित्यं तृप्तिं प्रति भोजनस्य साङ्गत्वेनेव दर्शितं, सम्प्रति सगुणविद्यापरत्वेन सूत्रस्याऽऽशयमाह। सगुणास्विति। उत्तरसूत्रार्थं शङ्कते। किमित्यादिना॥

अतोऽन्याऽपि ह्येकेषामुभयोः ॥ १७ ॥

अतोऽग्निहोत्रादेर्नित्यात् कर्मणोऽन्यापि ह्यस्ति साधुकृत्या या फलमभिसन्धाय क्रियते, तस्या एष विनियोग उक्त एकेषां शाखिनां 'सुहृदः साधुकृत्यामुपयन्ति' इति। तस्या एव चेदमघवदश्लेषविनाशनिरूपणम्, इतरस्याप्येवमसंश्लेषः इति। तथा एवंजातीयकस्य काम्यस्य कर्मणो विद्यां प्रत्यनुपकारकत्वे सम्प्रतिपत्तिरुभयोरपि जैमिनिबादरायणयोराचार्ययोः ॥

यदेव विद्ययेति हि ॥ १८ ॥

समधिगतमेतदनन्तराधिकरणे नित्यमग्निहोत्रादिकं कर्म मुमुक्षुणा मोक्षप्रयोजनोद्देशेन कृतमुपात्तदुरितक्षयहेतुत्वद्वारेण सत्त्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजनब्रह्माधिगमनिमित्तत्वेन ब्रह्मविद्यया सहैककार्यं भवति इति। तत्राऽग्निहोत्रादि कर्माङ्गव्यपाश्रयविद्यासंयुक्तं केवलञ्चास्ति। 'य एवं विद्वान् यजति य एवं विद्वान् जुहोति य एवं विद्वाञ्छंसति य एवं विद्वानुद्गायति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नेनोभौ कुरुतः यश्चैतदेवं वेद यश्च न वेद' [छा०] इत्यादिवचनेभ्यो विद्यासंयुक्तं केवलमप्यस्ति। तत्रेदं विचार्यते किं विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्म मुमुक्षोर्विद्याहेतुत्वेन तया सहैककार्यत्वं प्रतिपद्यते न केवलं उत विद्यासंयुक्तं केवलञ्चाविशेषेणेति।

यत्प्रारब्धादन्यत् काम्यं पुण्यं पापञ्च तदेव विद्वत्सुहृद्विषतोः स्वसमानजातीयं कर्म जनयति स्वयञ्च ज्ञानान्नश्यति इति भावः ॥

यदेव विद्ययेति हि। उक्तनित्यादिकं विषयमुपजीव्य सबीजं संशयमुक्त्वा पूर्वपक्षमाह। विद्यासंयुक्तमेवेति। अत्र पूर्वपक्षे कर्माङ्गोपासि-

कुतः संशयः, 'तमेतमात्मानं यज्ञेन विविदिषन्ति' इति यज्ञादीनामविशेषेणात्मवेदनाङ्गत्वेन श्रवणात्, विद्यासंयुक्तस्य चाग्निहोत्रादेर्विशिष्टत्वावगमात्। *किं तावत् प्राप्तं, विद्यासंयुक्तमेव कर्माग्निहोत्राद्यात्मविद्याशेषत्वं प्रतिपद्यते न विद्याविहीनं विद्योपेतस्य विशिष्टत्वावगमात् विद्याविहीनात्, 'यदहरेव जुहोति तदहः पुनर्मृत्युमपजयति एवंविद्वान्' इत्यादिश्रुतिभ्यः,

'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि।
दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय'॥ [भ०गी०]

इत्यादिस्मृतिभ्यश्च। इत्येवं प्राप्ते प्रतिपद्यते। यदेव विद्ययेति हि सत्यमेतत् विद्यासंयुक्तं कर्माग्निहोत्रादिकं विद्याविहीनात् कर्मणोऽग्निहोत्रादेर्विशिष्टं विद्वानिव ब्राह्मणो विद्याविहीनात् ब्राह्मणात्, तथापि नात्यन्तमनपेक्षं विद्यारहितं कर्माऽग्निहोत्रादिकं, कस्मात् तमेतमात्मानं यज्ञेन विविदिषन्ति इत्यत्राविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात्। ननु विद्यासंयुक्तस्याऽग्निहोत्रादेर्विद्याविहीनात् विशिष्टत्वावगमात् विद्याविहीनमग्निहोत्राद्यात्मविद्याहेतुत्वेनानपेक्षमेवेति युक्तं। नैतदेवं, विद्यासहायस्याग्निहोत्रादेर्विद्यानिमित्तेन सामर्थ्यातिशयेन योगादात्मज्ञानं प्रति कश्चित् कारणत्वातिशयो भविष्यति न तथा

हीनकर्मणो ज्ञानार्थत्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति भेदः। भवतु विद्याविशिष्टस्य कर्मणो ज्ञानं प्रति शीघ्रकारित्वाख्यः कश्चिदतिशयो विद्यासामर्थ्यात्। नैतावता केवलस्य वैयर्थ्यं विविदिषाश्रुतिविरोधात्।

---

* किं तावदित्यादि विशिष्टत्वावगमादित्यन्तं मुद्रितादर्शपुस्तकयोर्भ्रंशपतितम्।

विद्याविहीनस्येति युक्तं कल्पयितुं, न तु 'यज्ञेन विविदिषन्ति' इत्यविशेषेणात्मज्ञानाङ्गत्वेन श्रुतस्याग्निहोत्रादेरनङ्गत्वं शक्यमभ्युपगन्तुं। तथा हि श्रुतिः 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति विद्यासंयुक्तस्य कर्मणोऽग्निहोत्रादेर्वीर्यवत्तरत्वाभिधानेन स्वकार्यं प्रति कञ्चिदतिशयं ब्रुवाणा विद्याविहीनस्य तस्यैव तत्प्रयोजनं प्रति वीर्यवत्त्वं दर्शयति। कर्मणश्च वीर्यवत्त्वं तत् यत् स्वप्रयोजनसाधनप्रसहत्वं। तस्मात् विद्यासंयुक्तं नित्यमग्निहोत्रादि विद्याविहीनञ्चोभयमपि मुमुक्षुणा मोक्षप्रयोजनोद्देशेन इह जन्मनि जन्मान्तरे च प्राक् ज्ञानोत्पत्तेः कृतं यत् तत् यथासामर्थ्यं ब्रह्माधिगमप्रतिबन्धकारणोपात्तदुरितक्षयहेतुद्वारेण ब्रह्माधिगमकारणत्वं प्रतिपद्यमानं श्रवणमननश्रद्धाध्यानतात्पर्याद्यन्तरङ्गकारणापेक्षं ब्रह्मविद्यया सहैककार्यं भवतीति स्थितं॥

भोगेन त्वितरे क्षपयित्वा सम्पद्यते॥ १९॥

अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात् क्षय उक्तः, इतरे त्वारब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्प-

---

न च तत्र श्रुतौ यज्ञादिशब्दानां विद्योपेतकर्मपरतया सङ्कोचो युक्तः। हि यतः। 'यदेव विद्यया' इति श्रुतिः केवलस्यापि वीर्यवत्त्वं गमयति इति सिद्धान्तग्रन्थार्थः॥

भोगेन त्वितरे क्षपयित्वा सम्पद्यते। तत्त्वविदत्र विषयः, स किं प्रारब्धक्षयानन्तरं संसरत्युत नेति निमित्तभावाभावाभ्यां संशये सिद्धान्तमुपक्रमते। अनारब्धेति। अनारब्धकार्ययोः क्षयोक्त्यारब्धस्य कथं क्षय

द्यते, 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति 'ब्रह्मैव सन् ब्रह्माप्येति' इति चैवमादिश्रुतिभ्यः। ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवृत्तमेवं पश्चादप्यनुवर्तेत। न, निमित्ताभावात्। उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं, न च तादृशमत्र किञ्चिदस्ति। नन्वपरः कर्माशयोऽभिनवमुपभोगमारप्स्यते। न, तस्य दग्धबीजत्वात्। मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते उपभोगान्तरमारभते, तच्च मिथ्याज्ञानं *सम्यग्ज्ञानेन दग्धमित्यतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यम्भावीति॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छङ्करभगवत्पादकृतौ चतुर्थाध्यायस्य प्रथमः पादः॥ * ॥

इत्याकाङ्क्षायामस्योत्थानात् सङ्गतिः। पूर्वपक्षे विदेहकैवल्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः। देहपातोत्तरमपि तत्त्ववित् संसरति संसारयोग्यत्वात् यथा देहपातात् पूर्वमित्यनारब्धाधिकरणदृष्टान्तेन पूर्वपक्षमाह। नन्विति। भोगनिमित्तकर्माभावाद्भेदत्वसिद्धिः। यत्तु सञ्चितं कर्मान्तरं तन्न निमित्तं फलस्य, दग्धमूलत्वात्। अविद्यादयो हि क्लेशाः कर्मणस्तत्फलस्य च मूलं। तदुक्तं योगशास्त्रे 'क्लेशमूलः कर्माशयः सति मूले तद्विपाकः' इति तच्च, मूलं ज्ञानाग्निना दग्धमिति कुतः पुनः संसारः तस्माद्देहपाते कैवल्यमिति सिद्धम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दभगवत्पादकृतौ भाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य प्रथमः पादः॥ * ॥

---

* सम्यग्दर्शनेनेति वर्ध० का०।

ॐ परमात्मने नमः ।

वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

अथापरासु विद्यासु फलप्राप्तये देवयानं पन्थानमवतारयिष्यन् प्रथमं तावत् यथाशास्त्रमुत्क्रान्तिक्रममाचष्टे; समाना हि विद्वदविदुषोरुत्क्रान्तिरिति वक्ष्यति। अस्ति प्रायणविषया श्रुतिः 'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां' इति। किमिह वाच एव वृत्तिमत्या मनसि सम्पत्तिरुच्यते, उत वाग्वृत्तेरिति विषयः। तत्र वागेव तावन्मनसि सम्पद्यत इति प्राप्तं, तथा हि श्रुतिरनुगृहीता भवति, इतरथा लक्षणा स्यात्, श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा, तस्माद्वाच

ॐ ब्रह्मणे नमः ।

वाङ्मनसि दर्शनात् शब्दाच्च । ज्ञानफलोक्त्यनन्तरमुपासनफलं ब्रह्मलोकस्थं वक्तव्यं तच्चार्चिरादिमार्गप्राप्यं, मार्गप्राप्तिश्चोत्क्रान्तिसाध्या, तस्मादुपास्तिफलाक्षिप्तोत्क्रान्तिपादस्यास्याध्यायसङ्गतिः। युक्तं चास्य पूर्वपादानन्तर्यं ज्ञानफलोक्त्यनन्तरं वक्तव्योपास्तिफलेनाक्षिप्तत्वात् इत्याह। अथेति। ज्ञानिन इवोपासकस्याप्युत्क्रान्तिर्नेत्यत आह। समानेति। विद्वानुपासकः, तस्यानुपासकवदुत्क्रान्तिरस्ति, अमृतत्वादिति वक्ष्यत इत्यर्थः। प्रयतो म्रियमाणस्येत्यर्थः। वाक्पदस्य करणभाव-

एवायं मनसि प्रविलय इत्येवं प्राप्ते ब्रूमः, वागवृत्तिर्मनसि सम्पद्यत इति। कथं वागवृत्तिरिति व्याख्यायते, यावता वाङ्मनसीत्येवमाचार्यः पठति। सत्यमेतत्, पठिष्यति तु परस्तात् 'अविभागो वचनात्' [वे०सू०।४।२।१६।] इति। तस्मादत्र वृत्त्युपशममात्रं विवक्षितमिति गम्यते। तत्त्वप्रलयविवक्षायान्तु सर्वत्रैवाविभागसाम्यात् किं परत्रैव विशिंष्यादविभाग इति। तस्मादत्र वृत्त्युपसंहारविवक्षायां वागवृत्तिः पूर्वमुपसंह्रियते, मनोवृत्तावस्थितायामित्यर्थः। कस्मात् दर्शनात्, दृश्यते हि वाग्वृत्तेः पूर्वमुपसंहारो मनोवृत्तौ विद्यमानायां न तु वाच एव वृत्तिमत्या मनस्युपसंहारः केनचिदपि द्रष्टुं शक्यते। ननु श्रुतिसामर्थ्याद्वाच एवायं मनस्यप्ययो युक्त इत्युक्तं। नेत्याह, अतत्प्रकृतित्वात्। यस्य हि यत उत्पत्तिस्तस्य तत्र लयो न्याय्यो मृदीव शरावस्य। न च मनसो वागुत्पद्यत इति किञ्चन प्रमाणमस्ति। वृत्त्युद्भवाभिभवौ त्वप्रकृतिसमाश्रयावपि दृश्येते। पार्थिवेभ्यो हीन्धनेभ्यस्तैजसस्याग्नेर्वृत्तिरुद्भवति अप्सु

व्युत्पत्तिभ्यां करणतद्वृत्त्योर्लयभानात् संशयः, पूर्वपक्षे करणानां स्वरूपलयात् मृतमात्रस्य मुक्तिः, सिद्धान्ते तु संसारसिद्धिः। अनुपादाने मनसि वाचस्तत्त्वलयायोगेन व्यापारमात्रोपशमादिति विवेकः। सूत्रे-वृत्तिपदाध्याहारः कथमिति शङ्क्यते। कथमिति। उत्तरत्र हि सूत्रकृत् तत्त्वविद इन्द्रियाणां स्वरूपलयं वक्ष्यति तद्बलादिहाध्याहार उचितः अज्ञस्याऽपि इन्द्रियलयसाम्ये वक्ष्यमाणविशेषोक्त्ययोगादिति समाध्यर्थः। प्रकृतावेव विकारलय इति न्यायविरुद्धार्थं श्रुतिरपि न ब्रूते इति सिद्धान्तयति। अतत्प्रकृतित्वादिति। न्यायस्य निरवकाशत्वा-

चोपशाम्यति। कथं तर्ह्यस्मिन् पक्षे शब्दो वाङ्मनसि सम्पद्यत इत्यत आह, शब्दाच्चेति। शब्दोऽप्यस्मिन् पक्षेऽवकल्पते, वृत्तिवृत्तिमतोरभेदोपचारादित्यर्थः॥

अत एव च सर्वाण्यनु॥२॥

'तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः' इत्यत्राविशेषेण सर्वेषामेवेन्द्रियाणां मनसि सम्पत्तिः श्रूयते, तत्राप्यत एव वाच इव चक्षुरादीनामपि सवृत्तिके मनस्यवस्थिते वृत्तिलोपदर्शनात् तत्त्वप्रलयासम्भवाच्छब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनुवर्तन्ते। सर्वेषां करणानां मनस्युपसंहाराविशेषे सति वाचः पृथग्ग्रहणं वाङ्मनसि सम्पद्यत इत्युदाहरणानुरोधेन॥

तन्मनः प्राण उत्तरात्॥३॥

समधिगतमेतत् 'वाङ्मनसि सम्पद्यते' इत्यत्र वृत्तिसम्पत्तिविवक्षेति। अथ यदुत्तरं वाक्यं 'मनः प्राणः' इति किम-

---

द्रढीयस्त्वं शब्दस्य वृत्तिर्वागिति व्युत्पत्त्या लक्षणया वा सावकाशत्वमिति द्योतयितुं शब्दाच्चेत्युक्तम्॥

वाच्युक्तं न्यायं चक्षुरादिष्वतिदिशति, अत एवेति। उपशान्तदेहोष्मा तस्मादुत्क्रमणादूर्ध्वं पुनर्भवं प्रतिपद्यत इति श्रुत्यर्थः। इन्द्रियशब्दस्य श्रुतिस्थस्य वृत्तिपरतयोपपत्तेः सर्वेन्द्रियवृत्तिलयश्चेदिष्टस्तर्हि वाङ्मनसि इति पृथक् सूत्रं किमर्थमित्यत आह। सर्वेषां करणानामिति॥

तन्मनः प्राण उत्तरात्। वाक्यक्रमादर्थक्रमाच्चाधिकरणक्रमः श्रुति-

त्रापि वृत्तिसम्पत्तिरेव विवक्षिता उत वृत्तिमत्सम्पत्तिरिति विचिकित्सायां वृत्तिमत्सम्पत्तिरेवाचेति प्राप्तं, श्रुत्यनुग्रहात् तत्प्रकृतित्वोपपत्तेश्च। तथा हि 'अन्नमयं हि सोम्य मन आपोमयः प्राण' इत्यन्नयोनि मन आमनन्ति अब्योनिञ्च प्राणमापश्चान्नमसृजन्त' इति श्रुतिः। अतश्च यन्मनः प्राणे प्रलीयते अन्नमेव तदप्सु प्रलीयते अन्नं हि मन आपश्च प्राणः प्रकृतिविकाराभेदादित्येवं प्राप्ते ब्रूमः। तदप्यात्मगृहीतबाह्येन्द्रियवृत्ति मनो वृत्तिद्वारेणैव प्राणे प्रलीयत इत्युत्तराद् वाक्यादवगन्तव्यं। तथा हि सुषुप्सोर्मुमूर्षोश्च प्राणवृत्तौ परिस्पन्दात्मिकायामवस्थितायां मनोवृत्तीनामुपशमो दृश्यते। न च मनसः स्वरूपाप्ययः प्राणे सम्भवति, अतत्प्रकृतित्वात्। ननु दर्शितं मनसः प्राणप्रकृतित्वं। नैतत् सारं, नह्येदृशेन प्राणालिकेन तत्प्रकृतित्वेन मनः प्राणे सम्पत्तुमर्हति। एवमपि ह्यन्ने मनः सम्पद्येत अप्सु चान्नं अप्स्वेव च प्राणः। न ह्येतस्मिन्नपि पक्षे प्राणभावपरिणताभ्योऽद्भ्यो मनो जायत इति किञ्चन प्रमाणमस्ति। तस्मान्न मनसः प्राणे स्वरूपाप्ययः। वृ-

---

न्यायाभ्यां संशयपूर्वं प्रबलन्यायविरोधाद्दागति श्रुतेर्बाधः कृतः, इह त्वबात्मकप्राणस्य अन्नात्मकमनःप्रकृतित्वेन प्रकृतौ विकारलय इति न्यायानुग्रहात् मननश्रुतिर्बाध्येति पूर्वपक्षफलं पूर्ववत्, सिद्धान्तस्त्वबन्नयोः प्रकृतिविकृतिभावेऽपि न तद्विकारयोः प्राणमनसोस्तद्भावो हिमघटयोरपि तद्भावप्रसङ्गादतो न्यायविरोधात् पूर्ववत् श्रुतिर्बाध्येति विवेकः। आत्मगृहीता बाह्येन्द्रियवृत्तयो येन तत्तया लीनेन्द्रियवृत्तिकं मनोऽपि वृत्तिलयेनैव प्राणे लीयत इत्यर्थः। एवमपीति। प्रा-

त्यपर्ययेऽपि शब्दोऽवकल्पते वृत्तिवृत्तिमतोरभेदोपचारादिति दर्शितं ॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

स्थितमेतद्यस्य यतो नोत्पत्तिस्तस्य तस्मिन् वृत्तिलयो न स्वरूपलय इति, इदमिदानीं प्राणस्तेजसीत्यत्र चिन्त्यते, किं यथाश्रुति प्राणस्य तेजस्येव वृत्त्युपसंहारः किं वा देहेन्द्रिय-पञ्जराध्यक्षे जीवे इति। तत्र श्रुतेरनतिशङ्क्यत्वात् प्राणस्य तेजस्येव सम्पत्तिः स्यात् अश्रुतकल्पनाया अन्याय्यत्वादित्येवं प्राप्ते प्रतिपद्यते, सोऽध्यक्ष इति। स प्रकृतः प्राणोऽध्यक्षेऽविद्याकर्म-पूर्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते तत्प्रधाना प्राणवृत्ति-र्भवति इत्यर्थः। कुतः तदुपगमादिभ्यः। एवमेवेममात्मान-मन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्द्धोच्छ्वासी भवति इति हि श्रुत्यन्तरमध्यक्षोपगामिनः सर्वान् प्राणानविशेषेण दर्शयति। विशेषेण च 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इति पञ्च-

---

शस्याब्विकारत्वपक्षेऽपि इत्यर्थः। तस्मादिति प्राणस्य साक्षान्मनः-प्रकृतिकत्वाभावान्मनःशब्दो वृत्तिं लक्षयतीत्यर्थः ॥

सोऽध्यक्षे तदुपगमादिभ्यः। उक्तन्यायसिद्धं प्राणस्याऽपि वृत्तिलयमुप-जीव्य 'प्राणस्तेजसि' इति श्रुतेरुपगमादिश्रुतेश्च संशयमुक्त्वा जीवे लयं विनापि उपगमादिसम्भव इति पूर्वपक्षयति। स्थितमित्यादिना। अत्र तेजःशब्दस्य मुख्यत्वं, सिद्धान्ते तु भूतोपहितजीवलक्षकत्वमिति मत्वा-सूत्रं योजयति। स प्रकृत इत्यादिना। ज्ञानकर्मवासनोपाधिक इत्यर्थः। तं जीवं प्रति प्राणानामुपगमनानुगमनावस्थानश्रुतिभ्य इति हेत्वर्थः। यथा याचेच्छावन्तं राजानं भृत्या उपगच्छन्त्येवमेव परलोकं जिग-

वृत्तेः प्राणस्याध्यक्षानुगामितां दर्शयति, तदनुवृत्तितां चेतरेषां प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति इति। 'सविज्ञानो भवति' इति चाध्यक्षस्यान्तर्विज्ञानवत्त्वप्रदर्शनेन तस्मिन्नपीतकरणग्रामस्य प्राणस्यावस्थानं गमयति। ननु 'प्राणस्तेजसि' इति श्रूयते कथं प्राणोऽध्यक्ष इत्यधिकावापः क्रियते। नैष दोषः। अध्यक्षप्रधानत्वादुत्क्रमणादिव्यवहारस्य श्रुत्यन्तरगतस्यापि च विशेषस्यापेक्षणीयत्वात्। कथं तर्हि प्राणस्तेजसि इति श्रुतिरित्यत आह॥

*भूतेष्वतः श्रुतेः॥५॥

स प्राणसंयुक्तोऽध्यक्षः तेजःसहचरितेषु भूतेषु देहबीजभूतेषु सूक्ष्मेष्ववतिष्ठते इत्यवगन्तव्यं 'प्राणस्तेजसि' इत्यतः श्रुतेः। ननु चेयं श्रुतिः प्राणस्य तेजसि स्थितिं दर्शयति न प्राणसंयुक्तस्या-

---

मिथुं जीवं सर्वे प्राणा आभिमुख्येनायान्तीत्युपगमः श्रुतः, तमुत्क्रान्तमित्यनुगमनं श्रुतं। जीवे प्राणावस्थानश्रुतिमाह। 'सविज्ञान इति। जीवस्य प्राप्तव्यफलावगमाय हि विज्ञानसाहित्यश्रुत्या मुख्यप्राणसहितकरणानां जीवे स्थितिर्भातीत्यर्थः। यद्यपि प्राणस्य तेजस्यव्यवधानेन लयः श्रुतस्तथाप्युभयश्रुत्यनुग्रहाय प्राणो जीवे लीयते, जीवद्वारा च तदुपाधिषु तेजआदिभूतेषु इति श्रुत्यर्थः। स्फुटीकरणार्थसूत्रं गृह्णाति। कथं तर्हि इति। न च लयं विनापि जीवं प्रत्युपगमादिसम्भवात् तेजःश्रुतिर्मुख्याऽस्त्विति वाच्यं, जीवं प्रत्यागत्य प्राणस्य निर्व्यापारत्वेन स्थितेरेवात्र लयत्वादिति भावः॥

भूतेषु। जीवस्थितिः किंबलाद्व्याख्यायत इत्याशङ्क्य 'सोऽध्यक्षे' [वे० सू०४।२।४] इति सूत्रोदाहृतश्रुतिबलादित्याह। नन्वित्यादिना।

---

* भूतेषु तच्छ्रुतेरिति मु०।

ध्यक्षस्य। नैष दोषः। सोऽध्यक्ष इत्यध्यक्षस्याप्यन्तराल उपसङ्ख्या-तत्वात्। योऽपि हि स्रुघ्नान्मथुरां गत्वा मथुरायाः पाटलि-पुत्रं व्रजति सोऽपि स्रुघ्नात् पाटलिपुत्रं यातीति शक्यते वदितुं। तस्मात् प्राणस्तेजसि इति प्राणसंयुक्तस्याऽध्यक्षस्यैवैतत्तेजःसह-चरितेषु भूतेष्ववस्थानं। कथं तेजःसहचरितेषु भूतेष्वित्युच्यते। यावतैकमेव तेजः श्रूयते प्राणस्तेजसि इत्यत आह॥

नैकस्मिन् दर्शयतो हि॥ ६॥

नैकस्मिन्नेव तेजसि शरीरान्तरप्रेप्सावेलायां जीवोऽवति-ष्ठते कार्यस्य शरीरस्यानेकात्मकत्वदर्शनात्। दर्शयतश्चैतमर्थं प्रश्नप्रतिवचने 'आपः पुरुषवचसः' इति। तद्व्याख्यातं 'त्र्यात्मक-त्वात्तु भूयस्त्वात्' इत्यत्र[वे॰सू॰]। श्रुतिस्मृती चैतमर्थं दर्शयतः। श्रुतिः 'पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयः' इत्याद्या। स्मृतिरपि-

'अण्व्यो मात्रा विनाशिन्यो दशार्धानान्तु याः स्मृताः।
ताभिः सार्धमिदं सर्वं सम्भवत्यनुपूर्वशः'॥[मनु०१।२७]

इत्याद्या। ननु चोपसंहृतेषु वागादिषु करणेषु शरीरान्तर-

प्राणस्य जीवद्वारा भूतप्राप्तौ दृष्टान्तमाह। योऽपि हीति। स्थूलदेहा-रम्भाय पञ्चीकृतभूतान्यावश्यकानीति रंहत्यधिकरणे व्याख्यातं॥

अण्व्यः सूक्ष्माः, मीयन्त इति मात्राः परिच्छिन्नाः, प्रागुक्तादि-नाशिन्यः, दशार्धानां पञ्चानां भूतानां सूक्ष्मभागा इति यावत्। जीवस्य भूताश्रयत्वं कर्माश्रयत्वश्रुतिविरुद्धमित्याशङ्क्य कर्मनिमित्त-त्वेनाश्रयः, भूतानि तु देहोपादानत्वेनेत्युभयमविरुद्धमित्याह। ननु चेत्यादिना। तौ याज्ञवल्क्योक्तभागौ यज्जीवाधारमूचतुस्तत्कर्मेति

प्रेप्सावेलायां 'कामयमानो वा काममानो वा पुरुषो भवति' इत्युपक्रम्य श्रुत्यन्तरं कर्माश्रयतां निरूपयति 'तौ ह यदूचतुः कर्म हैव तदूचतुः अथ ह यत् प्रशशंसतुः कर्म हैव तत् प्रशशंसतुः' इति। तत्रोच्यते। तत्र कर्मप्रयुक्तस्य ग्रहातिग्रहसंज्ञकस्येन्द्रियविषयात्मकस्य बन्धनस्य प्रवृत्तिरिति कर्माश्रयतोक्ता, इह पुनर्भूतोपादानाद्देहान्तरोत्पत्तिरिति भूताश्रयत्वमुक्तम्। प्रशंसाशब्दादपि तत्र प्राधान्यमात्रं कर्मणः प्रदर्शितं नत्वाश्रयान्तरं निवारितं तस्मादविरोधः॥

समाना चासृत्युपक्रमादमृतत्वञ्चानुपोष्य॥ ७॥

सेयमुत्क्रान्तिः किं विद्वदविदुषोः समाना किं वा विशेषवति इति। विशयानानां विशेषवति इति तावत् प्राप्तं। भूताश्रयविशिष्टा ह्येषा पुनर्भवाय च भूतान्याश्रीयन्ते, न च विदुषः पुनर्भवः सम्भवति, 'अमृतत्वं हि विद्वानश्नुते' इति श्रुतिः। तस्मादविदुष एवैषोत्क्रान्तिः। ननु विद्याप्रकरणे समाम्नानात् विदुष एवैषा भवेत्। न, स्वापादिवत् यथा-

---

श्रुतेर्वचनं, एवं बाह्येन्द्रियाणां मनसि प्रथमं वृत्तिलयलाभात् ततो मनोवृत्तेः प्राणे लयः प्राणवृत्तेर्भूतोपहितजीवे लयः इत्युत्क्रान्तिक्रमव्यवस्थोक्ता॥

सा च सर्वप्राणिषु तुल्येत्याह। समाना चानुपोष्य। पुरुषस्य प्रयतो वाङ्मनसि इत्यविशेषश्रुतेर्विद्ययाऽमृतमश्नुत इति श्रुतेश्च संशयमाह। सेयमिति। विशयानानां सन्दिहानानामित्यर्थः। पूर्वपक्षे सगुणब्रह्मविदसम्बन्धित्वमुत्क्रान्तेर्विशेषः साध्यते। ततोऽनुत्क्रान्त

प्राणानुकीर्तनात्। यथाहि 'यत्रैतत्पुरुषः स्वपिति नाम अशिशिषति नाम पिपासति नाम' इति च सर्वप्राणिसाधारणा एव स्वापादयोऽनुकीर्त्यन्ते, विद्याप्रकरणेऽपि प्रतिपिपादयिषितवस्तुप्रतिपादनानुगुण्येन, न तु विदुषो विशेषवन्तो विधित्स्यन्ते, एवमियमप्युत्क्रान्तिर्महाजनगतैवानुकीर्त्यते, यस्यां परस्यां देवतायां पुरुषस्य प्रयतस्तेजः सम्पद्यते स आत्मा तत्त्वमसि इति प्रतिपादयितुं, प्रतिषिद्धा चैषा विदुषः। तस्मादविदुष एवैषेत्येवं प्राप्ते ब्रूमः। समाना चैषोत्क्रान्तिः वाङ्मनसि इत्याद्या विद्वदविदुषोरासृत्युपक्रमात् भवितुमर्हति, अविशेषश्रवणात्। अविद्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवितुं संसरति, विद्वांस्तु ज्ञानप्रकाशितं मोक्षं नाडीद्वारमाश्रयते तदेतदासृत्युपक्रमादित्युक्तम्। नन्वमृतत्वं विदुषा प्राप्तव्यं न च तद्देशान्तरायत्तं तत्र कुतो भूताश्रयत्वं सृत्युपक्रमो वेति। अत्रोच्यते, अनुपोष्य चेदम्, अदग्ध्वाऽत्यन्तमविद्यादीन् क्लेशानऽपरविद्यासामर्थ्यादापेक्षिक-

---

उपासको मुक्तिमश्नुत इति फलं, सिद्धान्ते तूत्क्रान्तो ब्रह्मलोकभागीति फलभेदः। पूर्वपक्षमाक्षिप्य समाधत्ते। ननु विद्येत्यादिना। विद्ययाऽमृतमिति श्रुतिर्निर्गुणविषया परा न तस्य प्राणा उत्क्रामन्तीति प्रतिषेधोऽपि तद्विषयः। अतः सगुणविदोऽप्यज्ञस्येवोत्क्रान्तिरिति सिद्धान्तयति। एवमिति। सृतिर्मार्गस्तस्योपक्रमोऽर्चिःप्राप्तिस्ततः प्राक्तना उत्क्रान्तिस्तुल्या तत उपासको मूर्द्धन्यनाडीद्वाराऽर्चिरादिमार्गं प्राप्नोति नान्य इति विशेषः। यत्तु दहरोपासकस्यामृतत्वं श्रुतं 'तयोर्द्धमायन्नमृतत्वमेति' इति तदापेक्षिकमेव न मुख्यं 'यं कामं कामयते सोऽस्य

मम्टतत्वं प्रेप्सते, सम्भवति तत्र सृत्युपक्रमो भूताश्रयत्वञ्च। न हि निराश्रयाणां प्राणानां गतिरुपपद्यते। तस्माददोषः॥

तदापीतेः संसारव्यपदेशात्॥ ८॥

'तेजः परस्यां देवतायाम्' इत्यत्र प्रकरणसामर्थ्यात्,'तद्यथा प्रकृतं तेजः साध्यचं सप्राणं सकरणग्रामं भूतान्तरसहितं प्रयतः पुंसः परस्यां देवतायां सम्पद्यत' इत्येतदुक्तं भवति। कीदृशी पुनरियं सम्पत्तिः स्यादिति चिन्त्यते। तत्रात्यन्तिक एव तावत् स्वरूपप्रविलय इति प्राप्तं, तत्प्रकृतित्वोपपत्तेः। सर्वस्य हि जनिमतो वस्तुजातस्य प्रकृतिः परा देवतेति प्रतिष्ठापितं, तस्मादात्यन्तिकोयमविभागापत्तिरित्येवं प्राप्ते ब्रूमः। तत्तेज-आदि भूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतमापीतेरासंसारमोक्षात् सम्यग्ज्ञाननिमित्तादवतिष्ठते।

'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।

स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतं'॥ [भग०]

इत्यादि संसारव्यपदेशात्। अन्यथा हि सर्वः प्रायणसमय एवो-पाधिप्रत्यस्तमयादत्यन्तं ब्रह्म सम्पद्येत, तत्र विधिशास्त्रं चान-

---

सङ्कल्पादेव समुत्तिष्ठति' इति भोगश्रवणादित्याह। अनुपोष्य चेद-मिति। उषदाह इति धातोरिदं रूपम्॥

तदापीतेः। पूर्वोदाहृतोत्क्रान्तिवाक्यशेषं व्याख्याय लिङ्गाश्रयपञ्च-भूतानां किमात्यन्तिको ब्रह्मणि लयः उतानात्यन्तिक इति, लयस्यो-भयथा दर्शनात् संशयमाह। कीदृशी पुनरियमिति। पूर्वत्रापेक्षिकं अमृतत्वमित्युक्तं तदयुक्तं इत्याक्षेपात् सङ्गतिः, पूर्वपक्षेऽमृतमात्रस्य

र्थकं स्यात्, विद्याशास्त्रञ्च। मिथ्याज्ञाननिमित्तस्य बन्धो न सम्यग्ज्ञानादृते विस्रंसितुमर्हति। तस्मात् तत्प्रकृतिलेऽपि सुषुप्तिप्रलयवत् बीजभावावशेषैवैषा सत्सम्पत्तिः॥

सूक्ष्मं *प्रमाणतश्च तथोपलब्धेः॥ ९॥

तच्चेतरभूतसहितं तेजो जीवस्यास्माच्छरीरात् प्रवसत आश्रयभूतं स्वरूपतः परिमाणतश्च सूक्ष्मं भवितुमर्हति। तथा हि नाडीनिष्क्रमणश्रवणादिभ्योऽस्य सौक्ष्म्यमुपलभ्यते। तत्र तनुत्वात् सञ्चारोपपत्तिः स्वच्छत्वाच्चाप्रतीघातोपपत्तिः। अत एव च देहान्निर्गच्छन् पार्श्वस्थैर्नोपलभ्यते॥

नोपमर्देनातः॥ १०॥

अत एव च सूक्ष्मत्वान्नास्य स्थूलशरीरस्योपमर्देन दाहादिनिमित्तेनेतरत् सूक्ष्मशरीरमुपमृद्यते॥

अस्यैव चोपपत्तेरेष ऊष्मा॥ ११॥

अस्यैव च सूक्ष्मशरीरस्यैष ऊष्मा यमेतस्मिन् जीवच्छरीरे संस्पर्शेनोष्णिमानं विजानन्ति। तथाहि मृतावस्थायामवस्थि-

---

मुक्तिसिद्धिः, सिद्धान्ते तु कर्मविद्याशास्त्रबलात् सावशेषलयसिद्धिरिति विवेकः॥

ननु लिङ्गात्मकस्य तेजसः कथं सूक्ष्मतमनाडीद्वारा गतिः कुतो वा केनचिन्मूर्त्तेन प्रतिघातो नास्ति कुतो वा न दृश्यत इत्यत आह। सूक्ष्ममिति।

प्रमाणसौक्ष्म्याद्गतिरनुद्भूतस्पर्शरूपवत्त्वात्स्वच्छत्वाच्चाप्रतिघातानुपलब्धिरित्यर्थः॥

---

* प्रमाणतस्त्र्येति वर्ध०।

तेऽपि देहे विद्यमानेष्वपि च रूपादिषु देहगुणेषु नोष्मोपलभ्यते जीवदवस्थायामेव तूपलभ्यते इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तव्यपाश्रय एवैष उष्मेति। तथा च श्रुतिः 'उष्ण एव जीविष्यञ्छीतो मरिष्यन्' इति॥

प्रतिषेधादिति चेन्न शारीरात्॥ १२॥

'अमृतत्वञ्चानुपोष्य' इत्यतो विशेषणादात्यन्तिकेऽमृतत्वे गत्युत्क्रान्त्योरभावोऽभ्युपगतः, तत्राऽपि केनचित्कारणेनोत्क्रान्तिमाशङ्क्य प्रतिषेधति 'अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' इति। अतः परविद्याविषयात् प्रतिषेधात् न परब्रह्मविदो देहात् प्राणानामुत्क्रान्तिरस्ति इति चेन्नेत्युच्यते। यतः शारीरादात्मन एष उत्क्रान्तिप्रतिषेधः प्राणानां न शरीरात्, कथमवगम्यते 'न तस्मात् प्राणा उत्क्रामन्ति' इति, शाखान्तरे पञ्चमीप्रयोगात्। सम्बन्धसामान्यविषया हि षष्ठी शाखान्तरगतया पञ्चम्या सम्बन्धविशेषे व्यवस्थाप्यते। तस्मा-

---

लिङ्गसद्भावे चोष्मलिङ्गकानुमानमाह। अस्यैव चेति॥

प्रतिषेधादिति चेन्न शारीरात्। पूर्वमनुपोष्येतिपदेन दग्धाशेषक्लेशस्य निर्गुणज्ञानिन उत्क्रान्त्याद्यभावः सूचितस्तस्याचाक्षिप्य समाधानाद्यवहितेनास्य सङ्गतिरित्याह। अमृतत्वं चेति। सकामस्य संसारोक्त्यनन्तरं निष्कामस्य मुक्तिप्रकरणार्थोऽथशब्दः, आत्मकामत्वात्। पूर्णानन्दात्मवित्त्वादाप्तकामः प्राप्तपरमानन्दः अतो निष्कामः अनभिव्यक्तान्तरवासनात्मककामशून्यस्तस्मादकामः व्यक्तवहिष्कामरहितः

दिति च प्राधान्यादभ्युदयनिःश्रेयसाधिकृतो देही सम्बध्यते न देहः। 'न तस्मादुच्चिक्रमिषोर्जीवात् प्राणा उत्क्रामन्ति सहैव तेन भवन्ति' इत्यर्थः। सप्राणस्य च प्रवसतो भवत्युत्क्रान्तिर्देहादित्येवं प्राप्ते प्रत्युच्यते॥

स्पष्टो ह्येकेषां॥१३॥

नैतदस्ति यदुक्तं परब्रह्मविदोऽपि देहादस्त्युत्क्रान्तिः प्रतिषेधस्य देह्यपादानत्वादिति। यतो देहापादान एवोत्क्रान्तिप्रतिषेध एकेषां समाम्नातृणां स्पष्ट उपलभ्यते। तथा ह्यार्तभागप्रश्ने 'यत्रायं पुरुषो म्रियते तदस्मात् प्राणाः उत्क्रामन्त्याहोस्विन्नेति' इत्यत्र 'नेति होवाच याज्ञवल्क्यः' इत्युत्क्रान्तिपक्षं परिगृह्य न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु मृत इत्यस्यामाशङ्कायामत्रैव समवलीयन्त इति प्रविलयं प्राणानां प्रतिज्ञाय तत्सिद्धये 'स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते' इति सशब्दपरामृष्टस्य प्रकृतस्योत्क्रान्त्यवधेरुच्छ्वयनादीनि समामनन्ति। देहस्य

ईदृशो योऽकामयमानस्तस्येत्यन्वयः। ज्ञानिन उत्क्रान्तिरस्ति न वेति पञ्चमीषष्ठीश्रुतिभ्यां सन्देहे सिद्धान्तिशङ्कानिरासपूर्वकं पूर्वपक्षयति। नेत्यादिना॥

काण्वश्रुतौ तावत् तस्येति सर्वनाम्ना प्रकृतं ज्ञानिनं परामृश्य सम्बन्धसामान्यमुक्तं तत्र माध्यन्दिनशाखायां तस्मादित्यपादानत्वरूपविशेष उक्तो ग्राह्यस्तथा च जीवात् प्राणोत्क्रान्तिप्रतिषेधो भाति न देहात् तच्छब्देन देहस्यानुक्तेस्तस्मात् ज्ञानिनोऽप्युत्क्रान्तिरस्ति इति ज्ञानवैयर्थ्यमिति पूर्वपक्षफलं, सिद्धान्ते तत्सार्थक्यमाह। स्पष्टो हीति। अत्र पुरुषशब्दवाच्ये देह एवास्मादित्युत्क्रान्त्यवधिरुच्यते। सशब्दपरामृष्टस्य प्रकृतस्य पुरुषस्योच्छ्वयनादिधर्मकस्य जीवत्वायोगादि-

चैतानि स्युर्न देहिनः, तत्सामान्यात् 'न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते' इत्यत्राप्यभेदोपचारेण देहापादानस्यैवोत्क्रमणस्य प्रतिषेधो यद्यपि प्राधान्यं देहिन इति व्याख्येयं येषां पञ्चमीपाठः। येषान्तु षष्ठीपाठस्तेषां विद्वत्सम्बन्धिन्युत्क्रान्तिः प्रतिषिध्यत इति प्राप्तोत्क्रान्तिप्रतिषेधार्थत्वादस्य वाक्यस्य देहापादानैव सा प्रतिषिद्धा भवति देहादुत्क्रान्तिः प्राप्ता न देहिनः। अपि च 'चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्येवमविद्वद्विषयेषु सप्रपञ्चमुत्क्रमणं संसारगमनञ्च दर्शयित्वा 'इति नु कामयमानः' इत्युपसंहृत्याऽविद्वत्कथां 'अथाकामयमानः' इति व्यपदिश्य विद्वांसं यदि तद्विषयेऽप्युत्क्रान्तिमेव प्रापयेदसमञ्जस एव व्यपदेशः स्यात्। तस्मादविद्वद्विषये प्राप्तयोर्गत्युत्क्रान्त्योर्विद्वद्विषये प्रति-

---

त्यर्थः। उच्छ्वयति बाह्यवायुपूरणादर्द्धते, आध्मायति आर्द्रभेरीवच्छब्दं करोतीत्यर्थः। येषां पञ्चमीपाठस्तेषां यद्यपि देहिनः प्राधान्यं तथापि देहदेहिनोरभेदात् तस्मादिति देहं परामृश्य तदपादान एवोत्क्रान्तिप्रतिषेध इति व्याख्येयं। तत्सामान्यादुक्तश्रुत्यास्य पाठस्यैकार्थत्वादिति योजना। इदानीं काण्वपाठस्यानुगुण्यमाह। येषान्तु षष्ठीपाठ इति सम्बन्धविशेषाकाङ्क्षायां भोक्ता प्राणानां भोगोपकरणत्वविशेषोऽत्रैव प्राणमयो मनोमयः इति पूर्वश्रुत्युक्तो ग्राह्यः न शाखान्तरस्थमपादानत्वं ग्राह्यं. जीवादुत्क्रान्तेरप्राप्तयोः प्रतिषेधायोगादतो विद्वत्सम्बन्धिप्राणानां उत्क्रान्त्यपादानापेक्षायाञ्चक्षुष्टो वा मूर्ध्नो वेत्युक्तदेहप्रदेशा एव ग्राह्याः तथाचायमर्थः तस्य विदुषो भोगोपकरणात्मकाः प्राणाः देहप्रदेशेभ्यो नोत्क्रामन्ति इति, एवञ्च प्राप्तोत्क्रान्तिनिषेधार्थत्वं

षेध इत्येवमेव व्याख्येयं व्यपदेशार्थवत्त्वाय। न च ब्रह्मविदः सर्वगतब्रह्मात्मभूतस्य प्रक्षीणकामकर्मण उत्क्रान्तिर्गतिर्वोपपद्यते निमित्ताभावात्। 'अत्र ब्रह्म समश्नुते' इति चैवंजातीयकाः श्रुतयो गत्युत्क्रान्त्योरभावं सूचयन्ति॥

स्मर्यते च॥१४॥

स्मर्यतेऽपि च महाभारते गत्युत्क्रान्त्योरभावः।

'सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः।
देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः'॥ इति।

ननु गतिरपि ब्रह्मविदः स्मर्यते 'शुकः किल वैयासकिर्मुमुक्षुरादित्यमण्डलमभिप्रतस्थे पित्रा चानुगम्याहूतो भो इति प्रतिशुश्राव' इति। न, सशरीरस्यैवायं योगबलेन विशिष्टदेशप्राप्तिपूर्वकः शरीरोत्सर्ग इति द्रष्टव्यं, सर्वभूतदृश्यत्वाद्युपन्यासात्, न ह्यशरीरं गच्छन्तं सर्वभूतानि द्रष्टुं शक्नुयुः। तथा च तत्रैवोपसंहृतम्।

'शुकस्तु मारुताच्छीघ्रां गतिं कृत्वाऽन्तरिक्षगः।
दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवत्'॥ इति।

वाक्यस्येति सर्वं चतुरस्रं। अपि चेति स्पष्टार्थं। सम्यगात्मभावेन भूतानि पश्यतः अपदस्य प्राप्यपदरहितस्य पदैषिणो देवा अपि मार्गे मुह्यन्ति मार्गं न जानन्ति तदभावादिति स्मृतियोजना। स्मृत्यन्तरविरोधं शङ्कते। ननु गतिरपीति। सगुणविद्याबलेनैषा गतिरिति परिहरति। सशरीरस्येति। ननु तर्हि 'तयोर्द्ध्वमायन्नमृतत्वमेति', 'स एवैनान् ब्रह्म गमयति' इत्यादिश्रुतीनां का गतिस्तत्राह। गतीति॥

तस्मादभावः परब्रह्मविदो गत्युत्क्रान्त्योः। गतिश्रुतीनान्तु विषयमुपरिष्टाद्व्याख्यास्यामः ॥

तानि परे तथा ह्याह ॥ १५ ॥

तानि पुनः प्राणशब्दोदितानीन्द्रियाणि भूतानि च परब्रह्मविदस्तस्मिन्नेव परस्मिन्नात्मनि प्रलीयन्ते। कस्मात्, तथा ह्याह श्रुतिः, 'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्याऽस्तं गच्छन्ति' इति। ननु 'गताः कलाः पञ्चदश प्रतिष्ठाः' इति विद्वद्विषयैवापरा श्रुतिः परस्मादात्मनोऽन्यत्राऽपि कलानां प्रलयमाह स्म। न, सा खलु व्यवहारापेक्षा पार्थिवाद्याः कलाः पृथिव्यादीरेव स्वप्रकृतीरपियन्ति इति। इतरा तु विद्वत्प्रतिपत्त्यपेक्षा कृत्स्नं कलाजातं परब्रह्मविदो ब्रह्मैव सम्पद्यत इति। तस्माददोषः ॥

तानि परे तथा ह्याह। पूर्वत्र गतिनिषेधेन विद्वत्कलानां प्राणादीनामत्रैव लय उक्तः तमुपजीव्य स किं तत्तत्कलाप्रकृतिषु पृथिव्यादिषु स्यादुत परमात्मनीति श्रुतिद्वयदर्शनात् संशयः कार्यः। तत्र साक्षात् प्रकृतौ विकारलय इति न्यायानुगृहीतया 'गताः कलाः' इति श्रुत्या पूर्वपक्षमग्रे वदन्नादौ सिद्धान्तमाह। तानीति। यथा नद्यः समुद्रं प्राप्य लीयन्ते एवमेवास्य परितः सर्वत्र ब्रह्मद्रष्टुरिमाः प्राणश्रद्धाद्याः पुरुषायणाः पुरुषे कल्पिताः पुरुषमेव स्वेयं प्राप्य लयं गच्छन्ति इत्यर्थः। मनःप्राणयोरेकीकरणेन कलानां पञ्चदशत्वं। प्रतिष्ठा इति द्वितीयाबहुवचनं। स्वस्य प्रकृतीः पृथिव्याद्याः इत्यर्थः। वस्तुगत्या विद्वत्दृष्ट्या परमात्मनि कलालयेऽपि लोकदृष्ट्या प्रतिष्ठासु लयोक्तिरविरुद्धा, तथा च कलास्वप्रकृतिषु विलाप्य ताभिः सह पुरुषे लीयन्ते इति श्रुतिद्वयतात्पर्यं ॥

अविभागो वचनात् ॥ १६ ॥

स पुनर्विदुषः कलाप्रलयः किमितरेषामिव सावशेषो भवत्याहोस्विन्निरवशेष इति । तत्र प्रलयसामान्यात्प्रसक्तायां सावशेषतायां ब्रवीति अविभागापत्तिरेवेति। कुतः, वचनात्। तथा हि कलाप्रलयमुक्त्वा वक्ति 'भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति' इति। अविद्यानिमित्तानाञ्च कलानां न विद्यानिमित्ते प्रलये सावशेषतोपपत्तिः। तस्मादविभाग एवेति॥

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥

समाप्ता प्रासङ्गिकी परविद्यागता चिन्ता, सम्प्रति त्वपरविद्याविषयामेव चिन्तामनुवर्तयति। समाना चासृत्युपक्रमाद्विद्वदविदुषोरुत्क्रान्तिरित्युक्तं तमिदानीं सृत्युपक्रमं दर्शयति।

अविभागो वचनात्। उक्तलयमुपजीव्य लयस्य द्वेधादर्शनात् संशयमाह। स पुनरिति। मुक्तयसिद्धिस्तत्सिद्धिश्चेत्युभयत्र फलं, अवशेषो मूलकारणे शक्त्यात्मना स्थितिः पुनर्जन्मयोग्यतेति यावत्। विमतः कलालयः सावशेषः कलालयत्वात्र सुषुप्तिवदिति पूर्वपक्षः। विमतो निरवशेषः विद्याकृतत्वात् रज्ज्वां विद्यया सर्पलयवदिति युक्त्युपेतश्रुत्या सिद्धान्तयति। ब्रवीतीति। नामरूपे शक्त्यात्मके अपि भिद्येते इत्यर्थः॥

तदोकोऽग्रज्वलनं। सृतेर्मार्गस्योपक्रमो नाडीप्रवेशनियमस्तं वक्तुं सूत्रभागव्याख्याद्वारा अधिकरणविषयमाह। तस्येति। स मुमुक्षु-

'तस्योपसंहृतवागादिकलापस्योच्चिक्रमिषतो विज्ञानात्मन ओक आयतनं हृदयं स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति' [कौ०उ०] इति श्रुतेः। तदग्रज्वलनं, तत्पूर्विका चक्षुरादिस्थानापादाना चोत्क्रान्तिः श्रूयते 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्द्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः' इति। सा किमनियमेनैव विद्वदविदुषोर्भवति अथास्ति कश्चिद्विदुषो विशेषनियम इति विचिकित्सायां श्रुत्यविशेषादनियमप्राप्तावाचष्टे। समानेऽपि हि विद्वदविदुषोर्हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारत्वे च मूर्द्धस्थानादेव विद्वान् निष्क्रामति स्थानान्तरेभ्यस्त्वितरे। कुतः विद्यासामर्थ्यात्। यदि विद्वानपीतरवद्यतः कुतश्चिद्देहदेशादुत्क्रामेन्नैवोत्कृष्टं लोकं लभेत तत्रानर्थिकैव विद्या स्यात्, तच्छेषगत्यनुस्मृतियोगाच्च। विद्याशेषभूता च मूर्द्धन्यनाडीसम्बद्धा गतिरनुशीलयितव्या विद्याविशेषेषु विहिता तामभ्यस्यंस्तयैव प्रतिष्ठत इति युक्तम्। तस्माद्धृदयालयेन ब्रह्मणा

तेजोमात्रा इन्द्रियाणि तस्य हृदयस्याग्रं नाडीमुखं तस्य ज्वलनं भाविफलस्फुरणं प्रद्योतनाख्यस्त्वनुस्थो वेत्यनियमश्रुतेस्तयोर्द्धमायन्निति विशेषश्रुतेश्च संशयः, किमुपासकोऽप्यनुपासकवत् येन केनचिद्द्वारेण निर्गच्छति उत मूर्द्धन्यनाड्यैवेति, अत्र पूर्वपक्षे विद्याङ्गतानिष्प्रयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति विवेकः। वचनादविभागवदनियम इति प्राप्ते सिद्धान्तयति। आचष्ट इति। येन केनचिन्मार्गेण निर्गतस्याऽपि ब्रह्मलोकप्राप्तौ विद्याशेषत्वेन मार्गानुस्मृतिविधेः केवलादृष्टार्थत्वं स्यादतोऽन्यद्वं स्मृतेनैव मार्गेण गमनं युक्तमिति भावः। शार्द्दं ब्रह्म विष्वङ् नानाविधा अन्या नाड्यो अन्येषामित्यर्थः। सुषुम्ना-

समुपासितेनानुगृहीतस्तद्भावमापन्नो विद्वान् मूर्द्धन्ययैव शताधिकया शतादतिरिक्तया एकशततमया नाड्या निष्क्रामति इतराभिरितरे। तथा हि हार्दविद्यां प्रकृत्य समामनन्ति,

'शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका।
तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति'॥ इति।

रश्म्यनुसारी॥ १८॥

अस्ति *"दहरोऽस्मिन्नन्तराकाश' इति हार्दविद्या 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इत्युपक्रम्य विहिता। तत्प्रक्रियायां 'अथ या एता हृदयस्य नाड्यः' इत्युपक्रम्य सप्रपञ्चं नाडीरश्मिसम्बन्धमुक्त्वोक्तं 'अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमते' इति। पुनश्चोक्तं 'तयोर्द्ध्वमायन्नमृतत्वमेति' इति। तस्मात् शताधिकया नाड्या निष्क्रामन् रश्म्यनुसारी निष्क्रामतीति गम्यते, तत् किमविशेषेणैवाहनि रात्रौ वा म्रियमाणस्य रश्म्यनुसारित्वमाहोस्विदहन्येवेति

ख्या नाडी हृदयात् निर्गता दक्षिणतालुकण्ठाधस्तननासिकामध्यभित्तिद्वारा ब्रह्मरन्ध्रं प्राप्ता सूर्यरश्मिभिरेकीकृता ब्रह्मलोकमार्ग उपासकस्येति स्थितम्॥

रश्म्यनुसारी। प्रकरणशोधनपूर्वकमुपासकस्य रश्म्यनुसारित्वं विषयमाह। अस्तीत्यादिना। अथ प्रारब्धान्ते एतदुत्क्रमणं यथा स्यादथ तदा एतैरेव नाडीसम्बन्धैर्रश्मिभिरुत्क्रामतीत्यर्थः। अत्र सम्बन्धस्य कालविशेषाश्रवणाद्रात्रौ रश्म्यभावाच्च संशयमाह। तत्किमिति॥ पूर्वोक्तनाडीसम्बद्धरश्मीनामत्रोपजीव्यत्वात् सङ्गतिः। पूर्वपक्षे रात्रौ

* दहरोऽस्मिन्नन्तराकाश इति वर्ध० नास्ति।

संशये सत्यविशेषश्रवणादविशेषेणैव तावद्रश्म्यनुसारीति प्रति-
ज्ञायते ॥

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वात् दर्शयति च ॥ १९ ॥

अस्त्यहनि नाडीरश्मिसम्बन्ध इत्यहनि मृतस्य स्याद्रश्म्यनुसारित्वं रात्रौ तु प्रेतस्य न स्यात्, नाडीरश्मिसम्बन्धविच्छेदादिति चेत्, न, नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात्, यावद्देहभावी हि शिराकिरणसम्पर्कः। दर्शयति चैतमर्थं श्रुतिः 'अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तामुष्मिन्नादित्ये सृप्ताः' इति। निदाघसमये च निशास्वपि किरणानुवृत्तिरुपलभ्यते, प्रतापादिकार्यदर्शनात्। स्तोकानुवृत्तेस्तु दुर्लक्ष्यत्वमृतत्तररजनीषु शैशिरेष्विव दुर्दिनेषु। 'अहरेवैतद्रात्रौ विदधाति' इति चैतदेव दर्शयति। यदि च रात्रौ प्रेतो विनैव रश्म्यनुसारेणोर्द्ध्वमा-

---

मृतस्य रश्मिप्राप्त्यर्थं सूर्योदयप्रतीक्षाऽस्ति, सिद्धान्ते नास्तीति मत्वा सिद्धान्तं प्रतिजानीते। अविशेषेणेति ॥

पूर्वपक्षबीजमुपन्यस्य दूषयति। निशीत्यादिना। शिरा नाड्यः प्रजायन्ते विस्तृता भवन्ति सृप्ताः सम्बद्धाः। श्रुतसम्बन्धस्य रात्रौ सत्त्वे युक्तिमाह। निदाघेति। तर्हि हेमन्तादिरात्रिष्वोष्ण्योपलब्धिः स्यादित्यत आह। स्तोकेति। सविता रात्रावप्यहर्दधातीति धारणाभिधानं लोकरश्म्यनुवृत्त्यभिप्रायमेवेत्यर्थः। किञ्च यदि रात्रौ मृतस्य रश्मियोगं विनैवोर्द्ध्वगतिः स्यात् तदा रश्मिश्रुतेर्दिवामृतविषयतया सङ्कोचः स्यादूर्द्ध्वगत्यभावे च विद्यायामप्रवृत्तिः स्यात्।

क्रमेत रश्म्यनुसारानर्थक्यं भवेत्। नह्येतद्विशिष्याधीयते यो दिवा प्रैति स रश्मीनपेक्ष्योर्द्ध्वमाक्रमते यस्तु रात्रौ सोऽनपेक्ष्यैवेति। अथ तु विद्वानपि रात्रिप्रायणाऽपराधमात्रेण नोर्द्ध्वमाक्रमेत पाक्षिकफला विद्येति अप्रवृत्तिरेव तस्यां स्यात्, मृत्युकालानियमात्। अथापि रात्रावुपरतोऽहरागममुदीक्षेत। अहरागमेऽप्यस्य कदाचिदरश्मिसम्बन्धार्हं शरीरं स्यात्, पावकादिसम्पर्कात्। 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति' इति च श्रुतिरनुदीक्षां दर्शयति। तस्मादविशेषेणैवेदं रात्रिन्दिवं रश्म्यनुसारित्वं॥

अतश्चायनेऽपि दक्षिणे॥ २०॥

*अत एवोदीक्षानुपपत्तेः, अपाक्षिकफलत्वाच्च विद्याया अनियतकालत्वाच्च मृत्योर्दक्षिणायनेऽपि म्रियमाणो विद्वान् प्राप्नोत्येव विद्याफलम्। उत्तरायणमरणप्राशस्त्यप्रसिद्धेर्भीष्मस्य च प्रतीक्षादर्शनात् 'आपूर्य्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्' इति च श्रुतेरपेक्षितव्यमुत्तरायणमितीमामा-

---

न च प्रतीक्ष्ययोर्द्ध्वगतिरिति वाच्यं, रश्म्युदयात् प्रागदेहदाहे प्रतीक्षावैयर्थ्यापातादप्रतीक्षाश्रुतिविरोधाच्च। तस्मात् यदा कदाचित् मृतस्य रश्मिप्राप्त्या झटिति ब्रह्मलोकप्राप्तिरिति सिद्धम्॥

एवं दक्षिणायणे मृतो विद्वान् विद्याफलमाप्नोति न वेति विद्याया नित्यवत्फलश्रुतेरुत्तरायणप्राशस्त्यशास्त्राच्च सन्देहे पूर्वोक्तहेतूनतिदिशति। अतश्चायनेऽपि दक्षिणे। पूर्वपक्षमाशङ्क्यापनुदति।

---

* अत एव चापेक्षानुपेति वर्भ० का०।

शङ्कामनेन सूत्रेणापनुदति। प्राशस्त्यप्रसिद्धिरविद्वद्विषया। भीष्मस्य तूत्तरायणप्रतिपालनमाचारपरिपालनार्थं पितृप्रसादलब्धस्वच्छन्दमृत्युताख्यापनार्थञ्च। श्रुतेस्त्वर्थं वक्ष्यति 'आतिवाहिकास्तल्लिङ्गात्' इति। ननु च-

'यत्र काले त्वनावृत्तिमावृत्तिञ्चैव योगिनः।

प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ'॥ इति-

प्राधान्येनोपक्रम्याऽहरादिकालविशेषः स्मृतावनावृत्तये नियतः, कथं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायादिति। अत्रोच्यते॥

योगिनः प्रति च स्मर्यते स्मार्ते चैते॥२१॥

योगिनः प्रति चायमहरादिकालविनियोगोऽनावृत्तये स्मर्यते। स्मार्ते चैते योगसाङ्ख्ये न श्रौते। अतो विषयभेदात् प्रमाणविशेषाच्च नास्य स्मार्तस्य कालविनियोगस्य श्रौतेषु विज्ञानेष्ववतारः। ननु-

---

उत्तरायणेत्यादिना। अज्ञानामुत्तरायणे देवान्मरणञ्चेत् प्रशस्तमित्यभिज्ञाभिवन्दनरूपाचारपरिपालनार्थं भीष्मस्य प्रतीक्षान् षण्मासानिति श्रुतिस्तूत्तरायणदेवतापरेति वक्ष्यते। तथा च देवतायाः सदा सत्त्वात् विद्यया दक्षिणायनकालेऽपि तत्प्राप्तिरविरुद्धेति भावः। स्मृतिबलात्-कालप्राधान्यं शङ्कते। ननु चेति॥

श्रौतदहराद्युपासकस्यास्माभिः कालानपेक्षोक्ता, स्मार्तयोगिनान्तु कालापेक्षा स्मृता बुध्यत इत्यविरोधमाह। योगिन इति। योगी दहराद्युपासक एव स्मृत्युक्तः किं न स्यादित्यत आह। स्मार्ते चेति। भगवदाराधनबुद्ध्याऽनुष्ठितं कर्म योगः 'अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स सन्न्यासी च योगी च' इति स्मृतेर्धारणापूर्वकोऽकर्ट-

'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायनं।
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं'॥[मनु०] इति च श्रौतावेव देवयानपितृयाणौ प्रत्यभिज्ञायेते स्मृतावपीति। उच्यते। 'तं कालं वक्ष्यामि' इति स्मृतौ कालप्रतिज्ञानात् विरोधमाशङ्क्यायं परिहार उक्तः। यदा पुनः स्मृतावपि अग्न्याद्या देवता एवातिवाहिक्यो गृह्यन्ते तदा न कश्चिद्विरोध इति॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छङ्करभगवत्-पादकृतौ चतुर्थाध्यायस्य द्वितीयः पादः॥

त्वानुभवः साक्ष्यं, 'इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्' इति स्मृतेः। ननु श्रुतिस्मृत्योर्भिन्नार्थत्वमयुक्तं प्रत्यभिज्ञाविरोधादिति शङ्कते। नन्वग्निरिति। कालाग्रहिणं प्रति भिन्नार्थत्वमुक्तं। यदि तु श्रौतार्थ-प्रत्यभिज्ञया कालशब्दो देवतापरस्तर्ह्येकार्थ्यमेवेति समाधेयर्थः। तस्मात् विद्यासामर्थ्यात् सर्वदैव दिष्टंगतस्य उपासकस्य फलप्राप्तिरिति सिद्धम्॥ * ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दकृतौ श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्थाध्यायस्य द्वितीयः पादः॥ ० ॥

ओम् परमात्मने नमः ।



अर्चिरादिना तत्प्रथितेः ॥ १ ॥

आसृत्युपक्रमात् समानोत्क्रान्तिरित्युक्तं । सृतिस्तु श्रुत्यन्तरेष्वनेकधा श्रूयते । नाडी रश्मिसम्बन्धेनैका 'अथैतैरेव रश्मिभिरूर्द्ध आक्रमते' इति । अर्चिरादिकैका *'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहः' इति । 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति' इत्यन्या । 'यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति' इत्यपरा । 'सूर्यद्वारेण ते विरजाः प्रयान्ति' इति चापरा । तत्र संशयः, किं परस्परं भिन्ना एताः सृतयः किंवैकैवानेकविशेषणेति । तत्र प्राप्तं तावद्भिन्ना एवैताः सृतय इति, भिन्नप्रकरणस्थित-

---

ॐ ब्रह्मणे नमः ।

एवं उत्क्रान्तिं निरूप्य तत्साध्यं मार्गं गन्तव्यञ्च निरूपयितुं पादमारभते । अर्चिरादिना तत्प्रथितेः । वृत्तानुवादपूर्वकमाद्याधिकरणस्य विषयं मार्गमाह । आसृतीति । विरजा विरजसः निष्पापा इत्यर्थः । श्रुतिविप्रतिपत्त्या संशयः । पूर्वं यदा कदाचिन्मृतस्यापि फलप्राप्तिरुक्ता तद्वत् येन केनचिन्मार्गेण गतिरिति पूर्वपक्षफलं विकल्पः, सिद्धान्ते मार्गैक्यमिति विवेकः । उपासनाभेदात् तच्छेषत्वेन ध्येयानां मार्गाणां भेदः, एवकाराच्च । किञ्च मार्गभेदे सत्यमादयं मार्गस्त्वरया प्रापक

---

* तेऽर्चिरभीति वर्ध० का० ।

त्वाद्भिन्नोपासनशेषत्वाच्च। अपि च 'अथैतैरेव रश्मिभिः' इत्यवधारणमर्चिराद्यपेक्षायामुपरुध्येत, त्वरावचनञ्च पीड्येत 'स यावत् क्षिप्येन्मनस्तावदादित्यङ्गच्छति' इति। तस्मादन्योन्यभिन्ना एवैते पन्थान इत्येवं प्राप्तेऽभिदध्महे। अर्चिरादिनेति। सर्वो ब्रह्म प्रेप्सुरर्चिरादिनैवाध्वना रंहतीति प्रतिजानीमहे। कुतः, तत्प्रथितेः। प्रथितो ह्येष मार्गः सर्वेषां विदुषां। तथा हि पञ्चाग्निविद्याप्रकरणे 'ये चामी अरण्ये श्रद्धां सत्यमुपासते' इति विद्यान्तरशीलिनामप्यर्चिरादिका सृतिः श्राव्यते। स्यादेतत् यासु विद्यासु न काचिद्गतिरुच्यते तास्वेवेयमर्चिरादिकोपतिष्ठतां, यासु त्वन्यान्या श्राव्यते तासु किमर्चिराद्याश्रयणमिति। अत्रोच्यते, भवेदेतदेवं यद्यत्यन्तभिन्ना एवैताः सृतयः स्युः, एकैव त्वेषा सृतिरनेकविशेषणा ब्रह्मलोकप्रतिपादनी क्वचित् केनचिद्विशेषणेनोपलक्षितेति वदामः, सर्वत्रैकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्यभावोपपत्तेः। प्रकरणभेदेऽपि तु विद्यैकत्वे भवतीतरेतरविशेषणोपसंहारवद्गतिविशेषणानामप्युपसंहारः।

इति युक्तं न मार्गैक्य इत्यर्थः। उपासनाभेदेऽप्युपास्यब्रह्मैक्यवत् मार्गैक्यं अविरुद्धमिति सिद्धान्तयति। एवमिति। तस्य मार्गस्य प्रसिद्धत्वादिति हेत्वर्थः। ये चेत्यविशेषश्रुतिरश्रुतगतिविद्याविषयेति मार्गभेदं शङ्कते। स्यादेतदिति। एकस्यैव मार्गस्यानेकान्यग्न्यादीनि विशेषणानीत्युक्तो लाघवात् न मार्गभेदः प्रत्यभिज्ञानाच्चेति समाधत्ते। गन्तव्यैक्यं विवृणोति। तथा हीति। परावतो दीर्घायुषो हिरण्यगर्भस्य, परा दीर्घाः समाः संवत्सरा वसन्ति कार्ये ब्रह्मणो या जितिः सर्वत्र जयः व्युष्टिर्व्याप्तिः तां लभत इत्यर्थः। एवं गन्तव्यैक्यवत् प्रत्यभिज्ञाया मार्गैक्य-

विद्याभेदेऽपि गत्येकदेशप्रत्यभिज्ञानादन्यत्राभेदाच्च गत्यभेद एव। तथाहि 'ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तस्मिन् वसति शाश्वतीः समाः, सा या ब्रह्मणो जितिर्या व्युष्टिस्तां जितिं जयति तां व्युष्टिं व्यश्नुते, तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्द-न्ति'इति [कौ०उ०] च तत्र तत्र तदेवैकं फलं ब्रह्मलोकप्राप्तिल-क्षणं प्रदर्श्यते। यत्त्वेतैरेवेत्यवधारणमर्चिराद्याश्रयणेन स्यादिति। नैष दोषः, रश्मिप्राप्तिपरत्वादस्य। न ह्येक एव शब्दो रश्मींश्च प्रापयितुमर्हति, अर्चिरादींश्च व्यावर्त्तयितुं। तस्माद्रश्मिसम्बन्ध एवायमवधार्यते इति द्रष्टव्यं। त्वरावचनं त्वर्चिराद्यपेक्षाया-मपि क्षैप्र्यार्थत्वान्नोपरुध्यते यथा निमिषमात्रेणात्रागम्यत इति। अपिच 'अथैतयोः पथोर्न कतरेण च नेति मार्गद्वयभ्रष्टानां कष्टं तृतीयं स्थानमाचक्षाणा पितृयाणव्यतिरिक्तमेकमेव देव-यानमर्चिरादिपर्वाणं पन्थानं प्रथयति। भूयांसि चार्चिरा-दिश्रुतौ मार्गपर्वाणि, अल्पीयांसि त्वन्यत्र, भूयसाञ्चानुगुण्ये-नाल्पीयसाञ्च नयनं न्याय्यमित्यतोऽपि अर्चिरादिना तत्-प्रथितेरित्युक्तं॥

निश्चयात् प्रकरणभेदोऽप्रयोजक इत्युक्तं सम्प्रत्येवकारे त्वरावचनयो-र्गतिमाह। यत्त्वित्यादिना। रात्रौ स्फुटरश्म्यभावात् विदुषो रश्म्ययो-गप्राप्तौ तन्निरासार्थं एवकारो नान्यव्यावृत्त्यर्थः। यथा लौकिकमार्गे विलम्बस्तथा अर्चिरादौ नेति त्वरावचनोपपत्तिरित्यर्थः। मार्गैक्ये लिङ्गमाह। अपि चेति। शुभमार्गबाहुल्ये तृतीयस्थानोक्तिर्न स्या-दिति भावः। उत्तरमार्गैक्येऽप्यर्चिरादिनेति विशेषणे को हेतुरित्यत आह। भूयांसीति॥

वायुमब्दादविशेषविशेषाभ्यां ॥ २ ॥

केन पुनः सन्निवेशविशेषेण गतिविशेषाणामितरेतरविशेषणविशेष्यभाव इति तदेतत् सुहृद्भूत्वाऽऽचार्यो ग्रथयति। 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकं' इति [१।३] कौषितकिनां देवयानः पन्थाः पद्यते। तत्रार्चिरग्निलोकशब्दौ तावदेकार्थौ ज्वलनवचनत्वादिति नात्र सन्निवेशक्रमः कश्चिदन्वेष्टव्यः, वायुस्त्वर्चिरादिवर्त्मन्यश्रुतः कतमस्मिन् स्थाने सन्निवेशयितव्य इति। उच्यते, 'तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यम्'[कौ०उ०]इत्यत्र संवत्सरात् पराञ्चमादित्यादर्वाञ्चं वायुमभिसम्भवन्ति, कस्मात् अविशेषविशेषाभ्यां। तथाहि 'स वायुलोकम्' इत्यत्राविशेषोपदिष्टस्य वायोः श्रुत्यन्तरे विशेषोपदेशो दृश्यते 'यदा वै पुरुषोऽस्माल्लो-

---

उक्तं मार्गस्यैक्यमुपजीव्य पूर्वक्रममाह। वायुमब्दात्। अर्चिरादिस्वस्मादयमनन्तर इति क्रमेण विशेष्यभाव उच्यते इत्यधिकरणस्य तात्पर्यमुक्त्वा विषयमाह। स एतमिति। अत्राग्न्यनन्तरं पठितो वायुर्विषयः। स किं अर्चिरात्मकाग्नेरनन्तर उत संवत्सरात् पर इति पाठाद्वक्ष्यमाणविशेषश्रुतेश्च संशये सिद्धान्तमेवोपक्रमते। उच्यत इति। पुरुषः उपासकोऽस्माल्लोकाद्देहात् प्रैति निर्गच्छति तस्मै प्राप्ताय पुरुषाय स वायुस्तत्र स्वात्मनि विजिहीते छिद्रं करोति, तेन वायुदत्तेन रथचक्रच्छिद्रतुल्येन द्वारेणोर्द्ध्वमादित्यं गच्छति इति श्रुत्यर्थः। इदानीं

कात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खण्डेन स ऊर्ध्वं आक्रमते स आदित्यमागच्छति' इति [कौ०उ०]। एतस्मादादित्याद्वायोः पूर्वत्वदर्शनाद्विशेषादब्दादित्ययोरन्तराले वायुर्निवेशयितव्यः। कस्मात् पुनरग्नेः परत्वदर्शनाद्विशेषादर्चिषोऽनन्तरं वायुर्न निवेश्यते। नैषोऽस्ति विशेष इति वदामः। नन्दाहृता श्रुतिः 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकम्' इति। उच्यते, केवलोऽत्र पाठः पौर्वापर्येणावस्थितो नात्र क्रमवचनः कश्चिच्छब्दोऽस्ति। पदार्थोपदर्शनमात्रं ह्यत्र क्रियते 'एतञ्चैतञ्च स गच्छति' इति। इतरत्र पुनर्वायुप्रत्तेन रथचक्रमात्रेण छिद्रेणोर्द्ध्वं आक्रम्यादित्यमागच्छतीत्यवगम्यते क्रमः। तस्मात् सूक्तमविशेषविशेषाभ्यामिति। वाजसनेयिनस्तु 'मासेभ्यो देवलोकं देवलोकादादित्यं' इति समामनन्ति, तत्रादित्यानन्तर्याय देवलोकाद्वायुमभिसम्भवेयुः। वायुमब्दादिति तु छान्दोग्यश्रुत्यपेक्षयोक्तं। छान्दोग्यवाजसनेयकयोस्त्वेकत्र देवलोको न विद्यते परत्र संवत्सरः,

---

पूर्वपक्षमाह। कस्मात् पुनरिति। पाठबलादर्चिषोऽनन्तरो वायुरित्यर्थः। कौषीतकिनां पाठमात्रं, न क्रमविशेषवाची कश्चिच्छब्दोऽस्ति। काण्वानान्तु तेनेत्यूर्द्ध इति च शब्दाभ्यां क्रमनिश्चयात् पाठबाध इति सिद्धान्तार्थः। अस्त्वर्चिरादिमार्गे छान्दोग्यस्थे संवत्सरपाठयोरब्दात् परत्वं, वाजिश्रुतिस्थे तु संवत्सरस्याश्रुतेः कथमब्दात् परो वायुरित्यत आह। वाजेति। तर्हि देवलोकाद्वायुमिति सूत्रं स्यादित्यत आह। वायुमब्दादिति स्थिति। संवत्सरस्य मासावयवित्वात् मासानन्तर्यं संवत्सरात् परो देवलोकस्ततः परो वायुर्वायोः पर आदित्य इति श्रुतिद्वये क्रमो-

तत्र श्रुतिद्वयप्रत्ययादुभावप्युभयत्र ग्रथितव्यौ, तत्रापि माससम्बन्धात् संवत्सरः पूर्वः पश्चिमो देवलोक इति विवेक्तव्यं ॥

तडितोऽधिवरुणः सम्बन्धात् ॥ ३ ॥

'आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं' इत्यस्या विद्युत उपरिष्टात् वरुणलोकमित्ययं वरुणः सम्बध्यते। अस्ति हि सम्बन्धो विद्युद्वरुणयोः। 'यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषाः जीमूतोदरेषु प्रनृत्यन्ति अथापः प्रपतन्ति विद्योतते स्तनयति वर्षिष्यति वा' इति च ब्राह्मणं। अपाञ्चाधिपतिर्वरुण इति श्रुतिस्मृतिप्रसिद्धिः। वरुणाच्चाधीन्द्रप्रजापती स्थानान्तराभावात् पाठसामर्थ्याच्चागन्तुकत्वादपि वरुणादीनामन्त एव निवेशः। वैशेषिकस्थानाभावात् विद्युच्चान्त्याऽर्चिरादौ वर्त्मनि ॥

निष्पन्नः। तेनेति तृतीयाश्रुत्या वायोरादित्यपूर्वत्वावगमादिति, सूत्रे तु वायुपदं देवलोकपूर्वकवायुपरमिति स्थितं ॥

एवं कौषीतकिभिरग्न्यनन्तरं पठितस्य वायोः स्थानमुक्त्वा वाय्वनन्तरं पठितस्य वरुणस्यार्चिरादिमार्गे स्थानमाह। तडितोऽधिवरुणः सम्बन्धात्। पठितो वरुणादिमार्गपर्वत्वेन सम्बध्यते न वेति सन्देहेऽर्चिषोऽहरित्यादि पञ्चम्याऽर्चिरादीनां क्रमेण मार्गपर्वतया विरुद्धत्वाद्वायोरिव स्थानविशेषश्रुत्यभावादलब्धस्थानो वरुणादिर्न सम्बध्यत इति सिद्धान्तमाह। आदित्यादिति। अपां विद्युत्कार्यत्वेन सम्बन्धे मानमाह। विद्योतत इति। वरुणस्याब्द्वारा विद्युत्सम्बन्धादागन्तुकानामन्ते निवेश इति न्यायाच्च विद्युदानन्तर्ये सति यथापाठमिन्द्रप्रजापत्योः क्रम इत्यर्थः ॥

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

तेष्वेवार्चिरादिषु संशयः, किमेतानि मार्गचिह्नान्युत भोगभूमयोऽथवा नेतारो गन्तॄणामिति। तत्र मार्गलक्षणभूता अर्चिरादय इति तावत् प्राप्तं, तत्स्वरूपत्वादुपदेशस्य। यथा हि कश्चिल्लोके ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते गच्छेतस्त्वममुं गिरिं ततो न्यग्रोधं ततो नदीं ततो ग्रामं ततो नगरं वा प्राप्स्यसि इति। एवमिहाप्यर्चिषोऽहरह्न आपूर्यमाणपक्षमित्याह। अथ वा भोगभूमय एता इति प्राप्तं। तथा हि लोकशब्देनाग्न्यादीनुपबध्नाति 'अग्निलोकमागच्छति' इत्यादि। लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते 'मनुष्यलोकः पितृलोको देवलोकः' इति च। तथा च ब्राह्मणं 'अहोरात्रेषु तेषु लोकेषु सज्जन्ते' इत्यादि। तस्मान्नातिवाहिका अर्चिरादयः। अचेतनत्वादपि एतेषामातिवाहिकत्वानुपपत्तिः। चेतना हि लोके राजनियुक्ताः पुरुषाः दुर्गेषु मार्गेष्वतिवाह्यानतिवाहयन्ति इत्येवं प्राप्ते ब्रूमः। आतिवाहिका एवैते भवि-

---

एवमर्चिरादीनां क्रमं निरूप्य स्वरूपं निरूपयति। आतिवाहिकास्तल्लिङ्गात्। चिह्ननिर्देशसाम्यात् लोकशब्दान्नेतृत्वलिङ्गाच्च संशयः। आद्यपक्षद्वयं पूर्वपक्षः अर्चिरादयो विद्युदन्ताश्चेतना नेतारस्तामानवपुरुषेण नेत्रा सह पठितत्वादिति सिद्धान्तयति। एवमित्यादिना। यथाश्रुत्यमानवस्यास्तु नेतृत्वं नार्चिरादीनामिति शङ्कते। तद्वचनमिति। पुरुषस्यामानवत्वं नेतृत्वञ्चेत्युभयपरत्वे वाक्यभेदः स्यादतोऽर्चिरादिपदैर्नेतार एव मानवाः प्रकृताः प्रकरणबलात् विद्युदनन्तरं मानवस्य नेतुः

तुमर्हन्ति। कुतः तल्लिङ्गात्। तथा हि 'चन्द्रमसो विद्युतं तत् पुरुषोऽमानवः स एतान् ब्रह्म गमयति' इति लिङ्गवद्गमयितृत्वं दर्शयति। *यावद्वचनं वाचनिकमिति न्यायात्, तद्वचनं तद्विषयमेवोपक्षीणमिति चेत्, न, प्राप्तमानवत्वनिवृत्तिमात्रपरत्वाद्विशेषणस्य। यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्तास्ते च मानवास्ततो युक्तं तन्निवृत्त्यर्थं पुरुषविशेषणममानव इति। ननु लिङ्गमात्रमगमकं न्यायाभावात्। नैष दोषः॥

उभयव्यामोहात् तत्सिद्धेः॥ ५॥

ये तावदर्चिरादिमार्गगास्ते देहवियोगात् संपिण्डितकरणग्रामा इत्यस्वतन्त्राः अर्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यं इत्यतोऽर्चिराद्यभिमानिनश्चेतनादेवताविवक्षा अतियात्रायां नियुक्ता इति गम्यते। लोकेऽपि हि मत्तमूर्च्छितादयः संपिण्डितकरणग्रामाः परप्रयुक्तवर्त्मानो भवन्ति। अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः। न हि रात्रौ प्रेतस्याहःस्वरूपाभिसम्भव उपपद्यते। न च प्रतिपालनमस्ति इत्युक्तमधस्तात्। ध्रुवत्वात् देवतात्मनां नायं दोषो भवति।

प्राप्तौ प्रकरणप्राप्तनेतृत्वानुवादेनामानवत्वमनेकमेव प्रतिपाद्यत इति वक्तव्यमित्याह। नेति। नेतृप्रकरणानङ्गीकारे मानवः पुरुषो गमयतीति वाक्यं भिद्येत अमानवत्वं नेतृत्वस्याप्यप्राप्तेरिति भावः। नेतृत्वानुवादलिङ्गस्यानुग्राहकन्यायपरं सूत्रं गृह्णाति। नन्विति॥

यद्यनेतारोऽचेतना एवार्चिरादयः तर्हि मार्गतद्गन्त्रोरुभयोरपि व्यामोहादज्ञत्वादूर्ध्वगतिर्न स्यादतः स्वयं प्रलयसून्यश्चेतनान्तरेण नेय

* यावदित्यादि न्यायादित्यन्तं वर्ध० पु० नास्ति।

अर्चिरादिशब्दता चैषामर्चिराद्यभिमानादुपपद्यते। 'अर्चिषोऽहः' इत्यादिनिर्देशस्त्वातिवाहिकत्वेऽपि न विरुध्यते। अर्चिषा हेतुनाऽहरभिसम्भवन्ति अह्ना हेतुनाऽऽपूर्यमाणपक्षमिति। तथा च लोकप्रसिद्धेष्वप्यातियात्रिकेष्वेवंजातीयक उपदेशो दृश्यते गच्छ त्वमितो बलवर्माणं ततो जयसिंहं ततः कृष्णगुप्तं इति। अपि चोपक्रमे 'तेऽर्चिषमभिसम्भवन्ति' इति सम्बन्धमात्रमुक्तं न सम्बन्धविशेषः कश्चित्। उपसंहारे तु 'स एतान् ब्रह्म गमयति' इति सम्बन्धविशेषोऽतिवाह्यातिवाहकलक्षण उक्तः, तेन स एवोपक्रमेऽपीति निर्धार्यते। संपिण्डितकरणग्रामत्वादेव च गन्तॄणां न तत्र भोगसम्भवः। लोकशब्दस्तु अनुपभुञ्जानेष्वपि गन्तृषु गमयितुं शक्यते अन्येषां तल्लोकवासिनां भोगभूमित्वात्। अतोऽग्निस्वामिकं लोकं प्राप्तोऽग्निनाऽतिवाह्यते वायुस्वामिकं लोकं प्राप्तो वायुनेति योजयितव्यं। कथं पुनरातिवाहिकत्वपक्षे वरुणादिषु तत्सम्भवः, विद्युतो ह्यधिवरुणादय उपक्षिप्ताः। विद्युतस्त्वानन्तरमाब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतमित्यत उत्तरं पठति॥

इति लौकिकन्यायानुग्रहानुसिद्धेर्नेतृत्वसिद्धेश्चक्तलिङ्गन्यायोपेतमिति सूत्रार्थः। पूर्वपक्षद्वयं दूषयति। अनवस्थितत्वादित्यादिना। अर्चिरहरादीनामस्थिरत्वाद्राच्यादौ मृतस्य प्रतीक्षा नास्तीत्युक्तत्वाच्च न मार्गचिह्नत्वं भोग्यत्वं वा, देवतात्वे त्वस्थिरत्वदोषो नास्तीत्यर्थः। यत्तूपदेशस्वारस्याच्चिह्नत्वं भातीति तत्राह। अर्चिषोऽहरिति। चिह्नत्वनेतृत्वसंशयाच्च वाक्यशेषान्निर्णय इत्याह। अपि चेति। यदुक्तं लोकशब्दाद्भोग्यत्वमिति तन्नेत्याह। संपिण्डितेति। सूत्रान्तरं गृह्णाति। कथं पुनरिति॥

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

ततो विद्युदभिसम्भवनादूर्द्धं, विद्युदनन्तरवर्त्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्ति इत्यवगन्तव्यं, 'तान् वैद्युतान् पुरुषोऽमानवः' 'स एतान् ब्रह्मलोकं गमयति' इति तस्यैव गमयितृत्वश्रुतेः। वरुणादयस्तु तस्यैवाप्रतिबन्धकरणेन साहाय्यानुष्ठानेन वा केनचिदनुग्राहकाः इत्यवगन्तव्यम्। तस्मात् सूक्तमातिवाहिका देवतात्मानोऽर्च्चिरादयः इति ॥

कार्य्यं वादरिरस्य गत्युपपत्तेः ॥ ७ ॥

'स एतान् ब्रह्म गमयति' इत्यत्र विचिकित्स्यते, किं कार्य्यमपरं ब्रह्म गमयति आहोस्वित् परमेवाविकृतं मुख्यं ब्रह्मेति। कुतः संशयः, ब्रह्मशब्दप्रयोगात् गतिश्रुतेश्च। तत्र कार्य्यमेव सगुणमपरं ब्रह्म नयत्येतानमानवः पुरुषः इति वादरिराचार्य्यो मन्यते। कुतः अस्य गत्युपपत्तेः। अस्य हि कार्य्यब्रह्मणो गन्तव्यत्वमुपपद्यते प्रदेशत्वात्, न तु परस्मिन् ब्रह्मणि गन्तृत्वं

अमानवो विद्युल्लोकमागतो वैद्युतस्तेनेत्यर्थः। श्रुतौ तु वैद्युतास्तोकादित्यर्थः। श्रुत्या वरुणादीनां नेतृत्वाभावेऽप्यनुग्राहकत्वेन मार्गान्तर्भाव इति भावः ॥

एवं मार्गं निरूप्य गन्तव्यं चिन्तयति। कार्य्यं वादरिरस्य गत्युपपत्तेः। परब्रह्म गन्तव्यमिति पूर्वपक्षे मार्गस्य मुक्त्यर्थता कार्य्यब्रह्मेति सिद्धान्ते भोगार्थतेति मत्वा प्रथमं सिद्धान्तमाह। तत्र कार्य्यमेवेति। सर्वगत-

गन्तव्यत्वं गतिर्वाऽवकल्पते सर्वगतत्वात् प्रत्यगात्मत्वाच्च गन्तृणां ॥

६

विशेषितत्वाच्च ॥ ८ ॥

'ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति' इति श्रुत्यन्तरे विशेषितत्वात् कार्यब्रह्मविषयैव गतिरित्यवगम्यते। न हि बहुवचनेन विशेषणं परस्मिन् ब्रह्मण्यवकल्पते। कार्ये त्ववस्थाभेदोपपत्तेः सम्भवति बहुवचनं। लोकश्रुतिरपि विकारगोचरायामेव सन्निवेशविशिष्टायां भोगभूमावाञ्जसी, गौणी त्वन्यत्र 'ब्रह्मैव लोक एष सम्राट्' इत्यादिषु। अधिकरणाधिकर्तव्यनिर्देशोऽपि परस्मिन् ब्रह्मणि नाञ्जसः स्यात्, तस्मात् कार्यविषयमेवेदं नयनम्। ननु कार्यविषयेऽपि ब्रह्मशब्दो नोपपद्यते समस्तस्य हि जगतो जन्मादिकारणं ब्रह्मेति प्रतिष्ठापितमित्यत्रोच्यते ॥

* सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥

स्यापि प्रदेशान्तरविशिष्टत्वेनाकाशस्य गन्तव्यत्वं दृष्टं, ब्रह्मणस्तु प्रत्यक्त्वान्न कथमपि गन्तव्यतेत्यर्थः ॥

ब्रह्मलोकेष्विति बहुवचनलोकशब्दाधारसप्तमीश्रुतिभिर्गन्तव्यस्य परस्माद्व्यावृत्तत्वाच्च न परं गन्तव्यमित्याह। विशेषितत्वाच्चेति। परब्रह्मणि भोग्यत्वोपचाराद्गौणी लोकश्रुतिरित्यर्थः। नपुंसकब्रह्मशब्देन कारणवाचिना कार्यं लक्ष्यते गन्तव्यत्वन्यायोपेतबहुवचनाद्यनेकश्रुत्यनुग्रहाय न चामावृत्तिलिङ्गात् परस्य गन्तव्यता, क्रममुक्त्या लिङ्गस्यान्यथासिद्धेरिति भावः ॥

[* सामीप्यादिति, कार्यात्यय इति च सूत्रद्वयं स्पष्टत्वान्न व्याख्यातं ॥]

तुशब्द आशङ्काव्यावृत्त्यर्थः। परब्रह्मसामीप्यादपरस्य ब्रह्मणस्तस्मिन्नपि ब्रह्मशब्दप्रयोगो न विरुध्यते। परमेव हि ब्रह्म विशुद्धोपाधिसम्बन्धात् क्वचित् कैश्चिद्विकारधर्म्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमिति स्थितिः। ननु कार्यप्राप्तावनावृत्तिश्रवणं लभ्यते। न हि परस्मात् ब्रह्मणोऽन्यत्र क्वचित् नित्यता सम्भवति। दर्शयति च देवयानेन पथा प्रस्थितानामनावृत्तिं 'एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते' इति। 'तेषामिह न पुनरावृत्तिरस्ति तयोर्द्ध्वमायन्नमृतत्वमेतीति' चेति। अत्र ब्रूमः॥

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्॥ १०॥

कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तस्तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परं पदं प्रतिपद्यन्त इति। इत्थं क्रममुक्तिरनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या। न ह्यञ्जसैव गतिपूर्विका परप्राप्तिः सम्भवति इत्युपपादितम्॥

स्मृतेश्च॥ ११॥

स्मृतिरप्येतमर्थमनुजानाति—

प्रतिसञ्चरो महाप्रलयः, तस्मिन् प्राप्ते परस्य हिरण्यगर्भस्यान्ते सह्मष्टिलिङ्गशरीररूपविकारावसाने ब्रह्मलोकनिवासिनः कृतात्मानः

'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे।

परस्यान्ते कृतात्मानः प्रविशन्ति परं पदं' ॥ इति।

तस्मात् कार्यब्रह्मविषया गतिः श्रूयत इति सिद्धान्तः। कः पुनः पूर्वपक्षमाशङ्क्यायं सिद्धान्तः प्रतिष्ठापितः 'कार्यं वादरिः' इत्यादिनेति, स इदानीं सूत्रैरेवोपप्रदर्श्यते।

परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

जैमिनिस्त्वाचार्यः 'स एतान् ब्रह्म गमयति' इत्यत्र परमेव ब्रह्म प्रापयति इति मन्यते। कुतः मुख्यत्वात्। परं हि ब्रह्म ब्रह्मशब्दस्य मुख्यमालम्बनं गौणमपरं। मुख्यगौणयोश्च मुख्ये संप्रत्ययो भवति ॥

दर्शनाच्च ॥ १३ ॥

'तयोर्द्ध्वमायन्नमृतत्वमेति' इति च गतिपूर्वकं अमृतत्वं दर्शयति। अमृतत्वञ्च परस्मिन् ब्रह्मण्युपपद्यते न कार्ये, विनाशित्वात् कार्यस्य। 'अथ यत्रान्यत् पश्यति तदल्पं तन्मर्त्यम्' इति वचनात्। परविषयैव चैषा गतिः कठवल्लीषु पद्यते, न हि

शुद्धधियस्तत्रोत्पन्नसम्यग्धियः सर्वे ब्रह्मणा मुच्यमानेन सह परं पदं प्रविशन्तीति योजना। एवं सिद्धान्तमुक्त्वा तेन निरस्तपूर्वपक्षमाह। कः पुनरित्यादिना ॥

दहरविद्यायां कठवल्लीषु परब्रह्मप्रकरणे च तयोर्द्ध्वमायन्निति गतिर्दर्शिता ॥

एवं ब्रह्मश्रुत्यमृतत्वलिङ्गाभ्यां प्रकरणाच्च परविषया गतिरित्युक्तं,

तत्र विद्यान्तरप्रक्रमोऽस्ति 'अन्यत्र धर्मादन्यत्राधर्मात्' इति परस्यैव ब्रह्मणः प्रक्रान्तत्वात्॥

न च कार्ये प्रतिपत्त्यभिसन्धिः॥ १४॥

अपि च 'प्रजापतेः सभां वेश्म प्रपद्ये' इति, नायं कार्यविषयः प्रतिपत्त्यभिसन्धिः। 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति कार्यविलक्षणस्य परस्यैव ब्रह्मणः प्रकृतत्वात् 'यशोऽहं भवामि ब्राह्मणानाम्' इति च सर्वात्मत्वेनोपक्रमात् 'न तस्य प्रतिमास्ति यस्य नाम महद्यशः' इति च परस्यैव ब्रह्मणो यशोनामत्वप्रसिद्धेः। सा चेयं वेश्मप्रतिपत्तिर्गतिपूर्विका या हार्दविद्यायामुदिता 'तदपराजिता पूर्ब्रह्मणः प्रभुविमितं हिरण्मयम्' इत्यत्र। पदेरपि च गत्यर्थत्वान्मार्गापेक्षताऽवसीयते। तस्मात् परब्रह्मविषया गतिश्रुतय इति पक्षान्तरं। तावेतौ द्वौ पक्षावाचार्येण सूचितौ। गत्युपपत्त्यादिभिरेकः, मुख्यत्वादिभिरपरः। तत्र गत्युपपत्त्यादयः प्रभवन्ति मुख्यत्वादीनाभासयितुं

संप्रति प्रजापतेः सभां वेश्म प्राप्नुयामिति उपासकस्य मरणकाले कार्यप्राप्तिसङ्कल्पश्रुतेर्न परं गन्तव्यमिति शङ्कां निरस्यति। न च कार्ये इति। परस्य प्रकृतत्वात् यशःपदस्य परमात्मनामत्वप्रसिद्धा यशःपदेनात्मोक्तिर्यश आत्मा ब्राह्मणानामहं भवामि, तथा राज्ञां यशो विशां यश इति सार्वात्म्यलिङ्गाच्च परप्राप्तिसङ्कल्प एवायमित्यर्थः। अस्तु वेश्मप्रतिपत्तीच्छा परब्रह्मविषया तथापि सा कथं गतिपूर्विका स्यादित्यत आह। सा चेति। तत्र ब्रह्मलोके विद्याविहीनैव पराजिता पूरस्ति ब्रह्मणो हिरण्यगर्भस्य तेनैव प्रभुना विमितं निर्मितं हिरण्मयं वेश्मास्ति तत् प्रतिपद्यते।

न तु मुख्यत्वादयो गत्युपपत्त्यादीन् इत्याद्य एव सिद्धान्तो व्याख्यातः, द्वितीयस्तु पूर्वः पक्षः। नह्यसत्यपि सम्भवे मुख्यस्यैवार्थस्य ग्रहणमिति कश्चिदाज्ञापयिता विद्यते। परविद्याप्रकरणेऽपि च तत्स्तुत्यर्थं विद्यान्तराश्रयगत्यनुकीर्तनमुपपद्यते 'विष्वङ्ङन्या उत्क्रमणे भवन्ति' इतिवत्।'प्रजापतेः सभां वेश्म प्रतिपद्ये' इति तु पूर्ववाक्यविच्छेदेन कार्येऽपि प्रतिपत्त्यभिसन्धिर्न विरुध्यते। सगुणेऽपि ब्रह्मणि च सर्वात्मत्वकीर्तनं 'सर्वकर्मा सर्वकामः' इत्यादिवत् कल्पते। तस्मादपरविषया एव गतिश्रुतयः। केचित् पुनः पूर्वाणि पूर्वपक्षसूत्राणि भवन्ति उत्तराणि सिद्धान्तसूत्राणीत्येतां व्यवस्थामनुरुध्यमानाः परविषया एव गतिश्रुतीः प्रतिष्ठापयन्ति। तदनुपपन्नं, गन्तव्यत्वानुपपत्तेर्ब्रह्मणः, 'यत् सर्वगतं सर्वान्तरं सर्वात्मकञ्च परं ब्रह्म' 'आकाशवत् सर्व-

---

विद्वानिति दहरविद्यायां गतिपूर्विका वेश्मप्राप्तिरुक्ता तेन परब्रह्मण्यपि वेश्मप्रतिपत्तिशब्दसामान्याद्गतिपूर्वकत्वं तस्याः सिध्यतीत्यर्थः। किञ्च पद गताविति धातुपाठात् वेश्म प्रपद्ये इत्यत्र मार्गापेक्षा भातीत्याह। पदेरपीति। पूर्वपक्षमुपसंहरति। तस्मादिति। आद्य एव सिद्धान्तपक्ष इति अङ्गीकर्त्तुमुपक्रमते। ताविति। ब्रह्मशब्दमुख्यत्वादिहेतूनामाभासत्वं स्फुटयति। न हीति। गन्तव्यत्वस्य ब्रह्मलोकेष्विति बहुवचनादेः सङ्कल्पादेव गन्धादिदिव्यभोगश्रुतेश्च परब्रह्मण्यसम्भवान्मुख्यार्थत्याग इत्यर्थः। यद्यप्येतद्वै सत्यकाम परञ्चापरञ्च ब्रह्मेत्यादिश्रुतिषु प्रयोगसाम्याद् ब्रह्मशब्द उभयत्र रूढतया मुख्य एव तथापि पूर्णे परस्मिन्नवयवार्थनिरतिशयमहत्त्वस्य लाभादपरब्रह्मण्यमुख्य इत्यङ्गीकृतमिति मन्तव्यं। यदुक्तं कठवल्लीषु प्रकरणबलादिति परविषयेति तत्राह। परेति। यथा विद्यासंबन्धसुषुम्ना

गतस्य नित्यः' 'यत्साक्षादपरोक्षाद्ब्रह्म' 'य आत्मा सर्वान्तरः' 'आत्मैवेदं सर्वं ब्रह्मैवेदं विश्वं वरिष्ठम्' इत्यादिश्रुतिनिर्धारितविशेषं, तस्य गन्तव्यता न कदाचिदप्युपपद्यते। न हि गतमेव गम्येत, अन्यो ह्यन्यद्गच्छति इति प्रसिद्धं लोके। ननु लोके गतस्याऽपि गन्तव्यता देशान्तरविशिष्टस्य दृष्टा, यथा पृथिवीस्थ एव पृथिवीं देशान्तरद्वारेण गच्छति तथाऽनन्यत्वेऽपि बालस्य कालान्तरविशिष्टं वार्द्धक्यं स्वात्मभूतमेव गन्तव्यं दृष्टं, तद्वत् ब्रह्मणोऽपि सर्वशक्त्युपेतत्वात् कथञ्चित् गन्तव्यता स्यादिति। न, प्रतिषिद्धसर्वविशेषत्वाद्ब्रह्मणः। 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' 'अस्थूलमनण्वह्रस्वमजमदीर्घं' 'स बाह्याभ्यन्तरो ह्यजः' 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म' 'स एष नेति नेति' इत्यादिश्रुतिस्मृतिन्यायेभ्यो न देशकालादिविशेषयोगः परमात्मनः कल्पयितुं शक्यते, येन भूप्रदेशवयोऽवस्थान्यायेनास्य गन्तव्यता स्यात्। भूवयसोस्तु प्रदेशावस्थादिविशेषयोगादुपपद्यते देशकाल-

---

स्तुत्यर्थं तदसम्बन्धेनाप्यन्तरकीर्तनं। तथा परविद्यास्तुत्यर्थं तत्प्रकरणेऽप्यपरविद्याश्रय इति कीर्तनं युज्यते, गतिं विनापि हि परविद्या निरतिशयफला तस्यान्त्वपरविद्याफलगतिसाध्यमन्तर्भवति इति स्तुतिलाभादित्यर्थः। यदप्युक्तं प्राप्तिसङ्कल्पोऽपि प्रवृत्तपरविषय इति तन्नेत्याह। प्रजापतेरिति। प्रजापतिसभावेश्मश्रुतिभिस्तत्सङ्घातकवाक्येन च प्रकरणं बाध्यं, यशोऽहमिति सार्वात्म्यं तूपासनार्थमपरब्रह्मण्यपि युज्यत इत्यर्थः। स्वपक्षमुक्त्वा परमतं दूषयति। केचिदित्यादिना। सर्वगतस्य स्वात्मभूतस्यापि ब्रह्मणः संसारदेशात् देशा-

विशिष्टा गन्तव्यता। जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेत्। न, विशेषनिराकरणश्रुतीनामनन्यार्थत्वात्। उत्पत्त्यादिश्रुतीनामपि समानमनन्यार्थत्वमिति चेत्। न, तासामेकत्वप्रतिपादनपरत्वात्। मृदादिदृष्टान्तैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयच्छास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति। कस्मात् पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशेषत्वं न पुनरितरशेषत्वमितरासामिति। उच्यते, विशेषनिराकरणश्रुतीनां निराकाङ्क्षार्थत्वात्। न ह्यात्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः कश्चिदाकाङ्क्षोपजायते पुरुषार्थसमाप्तिबुद्ध्युत्पत्तेः। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' 'अभयं वै जनक प्राप्तोऽसि' 'विद्वान् न बिभेति कुतश्च न' 'एतं ह वाव न तपति किमहं साधु नाकरवं

न्तरेण तत्कालात् कालान्तरेण विशिष्टतया गन्तव्यं स्यादिति पृथिवीवयोदृष्टान्ताभ्यां शङ्कते। नन्विति। यत्वं विनैव प्राप्तत्वमनन्यत्वं, अवस्थातद्वतोरभेदात् स्वात्मभूतत्वं। ननु युक्तं भूवयसोः प्राप्तयोरपि देशान्तरकालान्तरविशिष्टत्वेन गन्तव्यं तयोर्गन्तृभिन्नत्वात्, ब्रह्मणस्तु गन्तृभिन्नस्य कथं गन्तव्यत्वं तत्राह। सर्वशक्ति इति। या प्राप्ता भूः सा गन्तव्या यच्च गन्तव्यं देशान्तरं तत्त्वप्राप्तं इति कुतः प्राप्तस्य गन्तव्यता वयसोऽपि कालान्तरेऽभिव्यक्तिमात्रं नागन्तव्यत्वमिति वस्तुगतिः, अङ्गीकृत्य विशिष्टभूवयसोर्गन्तव्यतां परब्रह्मणो देशकालवैशिष्ट्याभावात् कथञ्चिदपि गन्तव्यतेत्याह। नेत्यादिना। अनादिमत् परं ब्रह्म इत्याद्या स्मृतिर्दृश्यविशेषस्य दृशि कल्पितत्वाद् दृगात्मनो निर्विशेषितेति न्यायः। सगुणमिव ब्रह्म सूत्रात्मापेक्षया परं गन्तव्यं, निर्विशेषन्तु नास्त्येवेति शङ्कते। जगदुत्पत्तीति। किं निर्विशेषस्यासत्त्वं माना-

किमहं पापमकरवम्' इत्यादिश्रुतिभ्यः। तथैव च विदुषां तुष्ट्यनुभवादिदर्शनात् विकारानृताभिसन्ध्यपवादाच्च 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति। अतो न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगन्तुं शक्यं। नैवमुत्पत्त्यादिश्रुतीनां निराकाङ्क्षार्थत्वप्रतिपादनसामर्थ्यमस्ति, प्रत्यक्षन्तु तासामन्यार्थत्वं समनुगम्यते। तथा हि 'तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यति' इत्युपन्यस्योदर्के सत एव एकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म' इति च। एवमुत्पत्त्यादिश्रुतीनामैकात्म्यावगमपरत्वात् नानेकशक्तियोगो ब्रह्मणः, अतश्च गन्तव्यत्वानुपपत्तिः। 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' इति च परस्मिन् ब्रह्मणि गतिं निवारयति। तद्व्याख्यातं 'स्पष्टो ह्येकेषाम्' इत्यत्र। गतिकल्पनायाञ्च गन्ता जीवो गन्तव्यस्य ब्रह्मणोऽवयवो विकारोऽन्यो वा ततः स्यात् अत्यन्ततादात्म्ये गमनानुपपत्तेः। यद्येवं ततः किं स्यात्। उच्यते यद्येकदेशस्तेनैकदेशिनो नित्यप्राप्तत्वात् न पुनर्ब्रह्मगमनमुपपद्यते।

भावात् सविशेषश्रुतिविरोधाद्वा नाद्य इत्याह। नेति। द्वितीयं शङ्कते। उत्पत्त्यादीति। सविशेषश्रुतीनां निर्विशेषश्रुतिशेषत्वात् न विरोध इत्याह। नेति। निर्विशेषश्रुतीनामेव सविशेषत्वं किं न स्यादित्याह। कस्मादिति। तासां स्वार्थे फलवत्त्वेन निराकाङ्क्षत्वात् शेषिता विशेषश्रुतीनां त्वफलत्वात् निषेध्यविशेषसमर्पणादिद्वारेण शेषत्वं फलवत् सन्निधावफलं तदङ्गमिति न्यायादित्याह। उच्यत इत्यादिना। स

एकदेशैकदेशित्वकल्पना च ब्रह्मणोऽनुपपन्ना, निरवयवत्वप्रसिद्धेः। विकारपक्षेऽप्येतत्तुल्यं, विकारेणापि विकारिणो नित्यप्राप्तत्वात्। न हि घटो मृदात्मतां परित्यज्यावतिष्ठते, परित्यागेऽभावप्राप्तेः। विकारावयवपक्षयोश्च तद्वतः स्थिरत्वात् ब्रह्मणः संसारगमनमप्यनवक्लृप्तं। अथान्य एव जीवो ब्रह्मणः सोऽणुर्व्यापी मध्यमपरिमाणो वा भवितुमर्हति। व्यापित्वे गमनानुपपत्तिः। मध्यमपरिमाणत्वे चानित्यत्वप्रसङ्गः। अणुत्वेऽपि कृत्स्नशरीरवेदनानुपपत्तिः। प्रतिषिद्धे चाणुत्वमध्यमपरिमाणत्वे विस्तरेण पुरस्तात्। परस्माच्चान्यत्वे जीवस्य 'तत्त्वमसि' इत्यादिशास्त्रबाधप्रसङ्गः। विकारावयवपक्षयोरपि समानो दोषः। विकारावयवयोस्तद्वतोऽनन्यत्वाददोष इति चेत्। न, मुख्यैकत्वानुपपत्तेः। सर्वेषु चैतेषु पक्षेष्वनिर्मोक्षप्रसङ्गः संसार्यात्मत्वानिवृत्तेः। निवृत्तौ वा स्वरूपनाशप्रसङ्गः ब्रह्मात्मत्वानभ्युपगमात्। यत्तु कैश्चिज्जल्प्यते नित्यनैमित्तिकानि कर्माण्यनुष्ठीयन्ते प्रत्यवायानुत्पत्तये, काम्यानि प्रतिषिद्धानि च परिह्रियन्ते स्वर्गनरकानवाप्तये, सांप्रतदेहोपभोग्यानि च

केवलं न्यायात् शेषता किन्तु श्रुत्याऽपीत्याह। प्रत्यक्षन्त्विति। तत्र मूलकारणे ब्रह्मण्येतत् शुङ्गं जगदात्मकं कार्यमुत्पन्नमित्युपक्रम्य तेन शुङ्गेन सन्मूलमन्विच्छेत्युपसंहारे सत एव ज्ञेयत्वमुक्तं छान्दोग्ये तथा तैत्तिरीयकेऽपि जगज्जन्माद्यनुवादेन ब्रह्मण एव ज्ञेयत्वं दर्शितमतः सृष्टिश्रुतीनां श्रुत्यैव निर्विशेषधीशेषता भातीत्यर्थः। एवं ब्रह्मणो निर्विशेषत्वात् न गन्तव्यमिति फलितमाह। एवमिति। स्पष्टनिषेधाच्च परस्य न गन्तव्यतत्याह। न तस्येति। एवं गन्तव्यालोचनया गतिं निरस्य

कर्माण्युपभोगेनैव क्षप्यन्त इति, अतो वर्तमानदेहपातादूर्ध्वं देहान्तरप्रतिसन्धानकारणाभावात् स्वरूपावस्थानलक्षणं कैवल्यं विनापि ब्रह्मात्मतयैवंवृत्तस्य सेत्स्यति इति। तदसत्, प्रमाणाभावात्। न ह्येतत् शास्त्रेण केनचित् प्रतिपादितं, मोक्षार्थी इत्थं समाचरेत् इति। स्वमनीषया त्वेतत् तर्कितं यस्मात् कर्मनिमित्तः संसारस्तस्मात् निमित्ताभावात् न भविष्यति इति। न चैतत् तर्कयितुं शक्यते निमित्ताभावस्य दुर्ज्ञानत्वात्। बहूनि कर्माणि जात्यन्तरसञ्चितानि इष्टानिष्टविपाकान्येकैकस्य जन्तोः सम्भाव्यन्ते तेषां विरुद्धफलानां युगपदुपभोगासम्भवात् कानिचिल्लब्धावसराणीदं जन्म निर्मिमते कानिचित्तु देशकालनिमित्तप्रतीक्षाण्यासत इत्यतस्तेषामवशिष्टानां सांप्रतेनोपभोगेन क्षपणासम्भवात् न यथावर्णितचरितस्यापि वर्तमानदेहपाते देहान्तरनिमित्ताभावः शक्यते निश्चेतुं कर्मशेषसद्भावसिद्धिश्च। 'तद्य इह रमणीयचरणाः ततः शेषेण' इत्यादिश्रुतिस्मृतिभ्यः। स्यादेतत् नित्यनैमित्तिकानि

गन्त्रालोचनयापि निरस्यति। गतिकल्पनायां चेत्यादिना। भेदाभेदेन द्वौ कल्पावत्यन्तभेदस्तृतीयः कल्पः। नन्वत्यन्ताभेदकल्पः किमिति नोक्तस्तत्राह। अत्यन्तेति। कल्पत्रये किं दूषणमिति पृच्छति। यद्येवमिति। कल्पद्वयेऽपि दोषान्तरमाह। विकारावयवपक्षयोश्चेति। विकारावयवरूपजीवविशिष्टस्य ब्रह्मणः स्थिरत्वात् जीवानां गत्यागती न स्यातां। न ह्यचलातिस्थूलपाषाणस्थयोर्मण्डूकपाषाणावयवयोश्चलनमस्ति इत्यर्थः। अस्माकन्त्वज्ञानात् कल्पितोपाधिभिर्गत्यागतिविभ्रम इति भावः। तृतीयकल्पमनूद्य विकल्प्य दूषयति। अथेत्यादिना। अभेदश्रुतिविरोध-

तेषां क्षेपकाणि भविष्यन्ति इति। नन्न, विरोधाभावात्। सति हि विरोधे क्षेप्यक्षेपकभावो भवति न च जन्मान्तरसञ्चितानां सुकृतानां नित्यनैमित्तिकैरस्ति विरोधः, शुद्धिरूपत्वाविशेषात्। दुरितानां त्वशुद्धिरूपत्वात् सति हि विरोधे भवतु क्षेपणं। न तु तावता देहान्तरनिमित्ताभावसिद्धिः। सुकृतनिमित्तत्वोपपत्तेः दुरितस्याप्यशेषक्षपणानवगमात्। न च नित्यनैमित्तिकानुष्ठानात् प्रत्यवायानुत्पत्तिमात्रं न पुनः फलान्तरोत्पत्तिरिति प्रमाणमस्ति फलान्तरस्याप्यनुनिष्पादिनः सम्भवात्। स्मरति ह्यापस्तम्बः। तद्यथा 'आम्रे फलार्थे निर्मिते छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते' इति। न चासति सम्यग्दर्शने सर्वात्मना काम्यप्रतिषिद्धवर्जनं जन्मप्रायणान्तराले केनचित् प्रतिज्ञातुं शक्यं, सुनिपुणानामपि सूक्ष्मापराधदर्शनात्। संशयितव्यं तु भवति तथापि निमित्ताभावस्य दुर्ज्ञानत्वमेव। न चानभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे कर्तृत्वभोक्तृत्वस्वभावस्यात्मनः कैवल्यमाकाङ्क्षितुं शक्यं अग्न्यौष्ण्यवत् स्वभावस्यापरिहार्यत्वात्। स्या-

---

रूपो दोषो मम नास्ति इति भेदवाद्याह। विकारावयवयोरिति। भिन्नयोरभेदो मुख्यो न युक्तो विरोधादिति परिहरति। नेति। किञ्च पक्षत्रयमप्ययुक्तं संसारित्वस्य तात्त्विकजीवभावस्य नाशः जीवस्वरूपनाशप्रसङ्गात्। न चास्माभिरिव त्वया ब्रह्मात्मत्वं जीवस्य तात्त्विकरूपमङ्गीकृतं यदस्य संसारनाशोऽपि न स्यादित्याह। सर्वेष्विति। ननु किं ब्रह्मत्वेन संसाराभावः किल मोक्षः स च कर्माभावमात्रेण सेत्स्यति इति कर्मजडानां मतमुद्भाव्य निरस्यति। यस्त्वित्यादिना। तदिति

देतत्, कर्तृत्वभोक्तृत्वं कार्यमनर्थो न तच्छक्तिः तेन शक्त्यवस्थानेऽपि कार्यपरिहारादुपपन्नो मोक्ष इति। तच्च न शक्तिः, *तद्भावे कार्यप्रसवस्य दुर्निवारत्वात्। तथापि स्यात् न केवला शक्तिः कार्यमारभतेऽनपेक्ष्यान्यानि निमित्तान्यत एकाकिनी सा स्थितापि नापराध्यति इति। तच्च न, निमित्तानामपि शक्तिलक्षणेन सम्बन्धेन नित्यसम्बद्धत्वात्। तस्मात् कर्तृत्वभोक्तृत्वस्वभावे सत्यात्मन्यसत्यां विद्यागम्यायां ब्रह्मात्मतायां न कथञ्चन मोक्षप्रत्याशाऽस्ति। श्रुतिश्च 'नान्यः पन्था विद्यतेऽयनाय' इति ज्ञानादन्यं मोक्षमार्गं वारयति। परस्मादनन्यत्वेऽपि जीवस्य सर्वव्यवहारलोपप्रसङ्गः, प्रत्यक्षादिप्रमाणाप्रवृत्तेरिति चेत्। न, प्राक्प्रबोधात् स्वप्नव्यवहारवत् तदुपपत्तेः। शास्त्रञ्च 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादिनाऽप्रबुद्धविषये प्रत्यक्षादिव्यवहारमुक्त्वा पुनः प्रबुद्धविषये 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादिना तदभावं दर्शयति। तदेवं परब्रह्मविदो गन्तव्यादिविज्ञानस्य बाधितत्वात् न कथञ्चन गतिरुपपादयितुं शक्या। किंविषयाः पुनर्गतिश्रुतय इति।

एवं वृत्तं, मोक्षहेतुरित्यस्मिन् अर्थे मानाभावादित्यर्थः। तर्क एव मानमित्यत आह। न चैतत् तर्कयितुमिति। ननु तथाप्येतत् तर्कमात्रमेकस्मिन् जन्मन्यनेकविरुद्धफलानां कर्मणां भोगायोगादवशिष्टं कर्म जन्मान्तरस्य निमित्तमित्याशङ्क्य तन्मानमाह। कर्मशेषसद्भावसिद्धिश्चेति। सन्त्वनारब्धफलानि पुण्यपापानि तेषां नित्याद्यनुष्ठानेन क्षयात् न जन्मान्तरमिति शङ्कते। स्यादेतदिति। पुण्येन पुण्यस्य न नाशः अविरोधादन्यथाऽतिप्रसङ्गात् पापस्यापि सर्वात्मना

* सद्भावे इति वर्ध०।

उच्यते। सगुणविद्याविषया भविष्यन्ति। तथा हि क्वचित् पञ्चाग्निविद्यां प्रकृत्य गतिरुच्यते क्वचित् पर्यङ्कविद्यां क्वचित् वैश्वानरविद्यां। यत्रापि ब्रह्म प्रकृत्य गतिरुच्यते 'यथा प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' इति 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इति तत्रापि च वामनीत्वादिभिः सत्यकामादिभिश्च गुणैः सगुणस्यैवोपास्यत्वात् सम्भवति गतिः, न क्वचित् परब्रह्मविषया गतिः श्राव्यते। तद्यथा गतिप्रतिषेधः श्रावितः 'न तस्य प्राणा उत्क्रामन्ति' इति 'ब्रह्मविदाप्नोति परम्' इत्यादिषु तु सत्यप्याप्नोतेर्गत्यर्थत्वे वर्णिते न न्यायेन देशान्तरप्राप्त्य सम्भवात् स्वरूपप्रतिपत्तिरेवेयमविद्याध्यारोपितनामरूपप्रपञ्चप्रविलयापेक्षयाऽभिधीयते। 'ब्रह्मैव सन् ब्रह्माप्येति' इत्यादि च द्रष्टव्यम्। अपि च परविषया गतिर्व्याख्यायमाना प्ररोचनाय वा स्यादनुचिन्तनाय वा, तत्र प्ररोचनं तावत् ब्रह्म-

---

पुण्यनाशत्वे मानं नास्तीति सञ्चितपुण्यपापाभ्यां जन्मान्तरं दुर्वारमित्याह। तन्नेत्यादिना। क्रियमाणमित्यादिनापि जन्म स्यात्, कर्मणा पितृलोक इत्यविशेषश्रुतेः, स्मृतेश्चेत्याह। न च नित्येति। प्रत्यवायनिरासार्थं नित्याद्याचारे सत्यनु पश्चात् फलान्तरं निष्पद्यत इत्यत्र दृष्टान्तः। तत् यथेति निमित्ते आरोपिते सति इत्यर्थः। तथापि काम्यादिकर्मसत्तानिश्चयो नास्तित आह। संशयितव्यन्त्विति। ज्ञानं विना देहपाते मोक्ष एवेति निश्चयालाभात् त्वत्पक्षे हतिरिति भावः। ब्रह्मभिन्नस्य जीवस्य कर्तृत्वादिस्वभावस्य मोक्षस्यापि न युक्तेत्याह। न चेति। कर्तृत्वादिरूपं कार्यं न स्वभावः किन्तु तच्छक्तिरिति शङ्कते। स्यादेतदिति। कार्यगम्यायाः शक्तेः कार्यस्यासत्यतानुत्पादे सत्त्वमयुक्तं अतः शक्तिसत्त्वे तद्विषयस्य कार्यस्यादृष्टदेशकालादिनिमित्तानाश्चात्मनां शक्तिद्वारा नि-

विदो न गत्युक्त्या क्रियते स्वसंवेद्येनैवाव्यवहितेन विद्यासमर्पितेन स्वास्थ्येन तत्सिद्धेः। न च नित्यसिद्धनिःश्रेयसनिवेदनस्यासाध्यफलस्य विज्ञानस्य गत्यनुचिन्तने काचिदप्यपेक्षोपपद्यते, तस्मादपरविषयैव गतिः। तत्र परापरब्रह्मविवेकानवधारणेनापरस्मिन् ब्रह्मणि प्रवर्तमाना गतिश्रुतयः परस्मिन्नध्यारोप्यन्ते। किं द्वे ब्रह्मणी परमपरञ्चेति। बाढं द्वे। 'एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारः' इत्यादिदर्शनात्। किं पुनः परं ब्रह्म किमपरं इति। उच्यते। यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधेनास्थूलादिशब्दैर्ब्रह्म व्यपदिश्यते तत्परं। तदेव यत्र नामरूपादिविशेषेण केनचित् विशिष्टमुपासनायोपदिश्यते 'मनोमयः प्राणशरीरो भारूपः' इत्यादिशब्दैस्तदपरं। नन्वेवं सत्यद्वितीयश्रुतिरुपरुध्येत। न, अविद्याकृतनामरूपोपाधिकतया परिहृतत्वात्। तस्य त्वपरब्रह्मोपासनस्य तत्सन्निधौ श्रूयमाणं 'स यदि पितृलोककामो भवति' इत्यादिजगदैश्वर्यलक्षणं संसारगोचरमेव फलं भवति, अनिवर्तितत्वादविद्यायाः। तस्य च देश-

त्यसम्बन्धत्वान्मोक्षो न स्यादिति परिहरति। तत्रेत्यादिना। मोक्षसिद्ध्यर्थं जीवस्य ब्रह्मत्वाङ्गीकारे संसारानपपत्तिमाशङ्क्याज्ञानादुपपत्तिमसकृदुक्तां स्मारयति। परस्मादित्यादिना। प्रासङ्गिकं परिहृत्य परम्भं प्रकृतमुपसंहरति। तदेवमिति। ननु परविद्यायामप्याप्नोतिपदेन गतिः श्रुतेत्यत आह। ब्रह्मविदाप्नोतीति। वैफल्याच्च गतेर्न परविषयत्वमित्याह। अपि चेति। अनुचिन्तनपक्षं प्रत्याह। न च नित्यसिद्धेति। कथं तर्हि क्वचित् परविषयत्वं गतेरुक्तमित्याशङ्क्य भ्रान्त्येत्याह। तत्र परापरेति। प्रश्नपूर्वकं *निवेदनस्यासाध्यफलस्य

* निवेदनस्येत्यादिः अनवधारणेनेत्यन्तः पाठः व०ं० पु० नास्ति।

विशेषावबद्धत्वात् तत्प्राप्त्यर्थं गमनमविरुद्धम्। सर्वगतत्वेऽपि चात्मन आकाशस्येव घटादिगमने बुद्ध्याद्युपाधिगमने गमनप्रसिद्धिरित्यवादिष्म 'तद्गुणसारत्वात्'(ब्र०सू०) इत्यत्र। तस्मात् 'कार्यं बादरिः' इत्येष एव पक्षः स्थितः। 'परं जैमिनिः'(ब्र०सू०) इति च पक्षान्तर*प्रतिपादनमात्रप्रदर्शनं प्रज्ञाविकाशनायेति द्रष्टव्यम्॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च ॥ १५ ॥

स्थितमेतत् कार्यविषया गतिर्न परविषयेति। इदमिदानीं सन्दिह्यते, किं सर्वान् विकारालम्बनानविशेषेणैवामानवः पुरुषः प्रापयति ब्रह्मलोकमुत कांश्चिदेवेति। किं तावत् प्राप्तं सर्वेषामेवैषां विदुषामन्यत्र परस्मात् ब्रह्मणो गतिः स्यात्। तथा हि 'अनियमः सर्वासाम्' इत्यत्राविशेषेणैवैषा विद्यान्तरेष्ववतारितेत्येवं प्राप्ते प्रत्याह। अप्रतीकालम्बनानिति। प्रती-

---

गत्यनुचिन्तने काचिदपेक्षोपपद्येत तस्मादपरविषया गतिः। तत्र परापरब्रह्मविवेकानवधारणे परापरब्रह्मविभागं वदन्नपरब्रह्मणि गतेरर्थवत्त्वमाह। किं द्वे इत्यादिना। व्यापिनो जीवस्य कथं गतिस्तत्राह। सर्वगतत्वेऽपीति॥

एवं गन्तव्यं निरूप्य गन्तॄन्निर्धारयति। अप्रतीकेति॥ 'स एवैनान् ब्रह्म गमयति' इत्यविशेषश्रुतेः तत्क्रतुन्यायाच्च संशयमाह। इदमिति। अनियमाधिकरणे तत्त्वविदोऽन्यत्र सर्वोपासकानां मार्गोपसंहार उक्तः, इदानीमप्रतीकोपासकानामेव मार्गो न सर्वेषां विकारोपासकानामित्युभयथा भावोक्तौ पूर्वोक्तविरोधः स्यात्, तस्मादुपासकमात्रस्योत्तरमार्गसिद्धिरिति पूर्वपक्षफलं, सि-

---

* प्रतिभागेति वर्ध० का०।

कालम्बनान् वर्जयित्वा सर्वानन्यान् विकारालम्बनान्नयति ब्रह्मलोकमिति बादरायणाचार्यो मन्यते। न ह्येवमुभयथा-भावाभ्युपगमे कश्चित् दोषोऽस्ति। अनियमन्यायस्य प्रतीकव्य-तिरिक्तेष्वप्युपासनेषूपपत्तेः। तत्क्रतुश्चास्योभयथाभावस्य सम-र्थको हेतुर्द्रष्टव्यः। यो हि ब्रह्मक्रतुः स ब्राह्ममैश्वर्यमासीदे-दिति श्लिष्यते 'तं यथा यथोपासते तदेव भवन्ति' इति श्रुतेः। न तु प्रतीकेषु ब्रह्मक्रतुत्वमस्ति प्रतीकप्रधानत्वादुपासनस्य। नन्वब्रह्मक्रतुमानपि ब्रह्म गच्छतीति श्रूयते, यथा पञ्चाग्नि-विद्यायां 'स एनान् ब्रह्म गमयति' इति। भवतु यत्रैवमाहत्य-वाद उपलभ्यते तदभावे औत्सर्गिकेन तत्क्रतुन्यायेन ब्रह्म-क्रतूनामेव तत्प्राप्तिर्नेतरेषामिति मन्यते॥

विशेषञ्च दर्शयति॥ १६॥

नामादिषु प्रतीकोपासनेषु पूर्वस्मात् पूर्वस्मात् फलविशेषमु-त्तरस्मिनुत्तरस्मिन्नुपासने दर्शयति 'यावन्नाम्नो गतं तत्रास्य यथा-

---

द्धान्ते तूभयथाभावसिद्धिः। अदोषादिति सूत्रे पदच्छेदः, अवि-रोधादित्यर्थः। अनियमः सर्वेषामिति सूत्रे सर्वशब्दस्य प्रतीकोपास-कान्यपरत्वादिति भावः। यद्यपि प्रतीकध्यायिनां पितृयाणतृतीय-स्थानयोरप्रवेशादर्चिरादिमार्गो वाच्यस्तथापि तेषां विद्युत्पर्यन्तमेव गमनमस्तु न ब्रह्मप्राप्तिर्ब्रह्मक्रतुत्वाभावात्। यो यत् ध्यायति स तत्प्रा-प्नोति इति हि तत्क्रतुन्यायः श्रुतिमूलः, प्रतीकेषु च नामादिषु ध्येयेषु ब्रह्मणो गुणत्वात्, न ब्रह्मध्यायित्वमस्ति। अस्य च न्यायस्य पञ्चाग्निविद्यायामाहत्यवादात् प्रत्यक्षवचनाद्बाध इष्ट इति सूत्र-भाष्यार्थः॥

कामचारो भवति वाग्वाव नाम्नो भूयसी यावद्वाचो गतं तत्रास्य यथाकामचारो भवति मनो वाव वाचो भूयः' इत्यादिना। स चायं फलविशेषः प्रतीकतन्त्रत्वादुपासनानामुपपद्यते, ब्रह्मतन्त्रत्वे तु ब्रह्मणोऽविशिष्टत्वात् कथं फलविशेषः स्यात्। तस्मान्न प्रतीकालम्बनानामितरैस्तुल्यफलत्वमिति॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छङ्करभगवत्पादकृतौ चतुर्थाध्यायस्य तृतीयः पादः॥ * ॥

किञ्च प्रतीकतारतम्येन फलतारतम्यश्रुतेर्न प्रतीकध्यायिनां ब्रह्मप्राप्तिरित्याह। विशेषञ्चेति। तस्मादसति वचने ब्रह्मध्यायिन एव ब्रह्मगन्तार इति सिद्धम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दभगवत्पादकृतौ भाष्यरत्नप्रभायां चतुर्थाध्यायस्य तृतीयः पादः॥ ※ ॥

ॐ परमात्मने नमः।



सम्पद्याविर्भावः स्वेनशब्दात्॥ १॥

'एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रूयते। तत्र संशयः, किं देवलोकाद्युपभोगस्थानेष्विवागन्तुकेन केनचिद्विशेषेणाभिनिष्पद्यते आहोस्विदात्ममात्रेणेति। किन्तावत् प्राप्तं स्थानान्तरेष्विवागन्तुकेन केनचिद्रूपेणाभिनिष्पत्तिः स्यात्, मोक्षस्यापि फलत्वप्रसिद्धेः, अभिनिष्पद्यत इति चोत्पत्तिपर्य्यायत्वात्। स्वरूपमात्रेण चेदभिनिष्पत्तिः पूर्वास्ववस्थासु स्वरूपानपायाद्विभाव्येत। तस्माद्विशेषेण केनचिदभिनिष्पद्यत इत्येवं प्राप्ते ब्रूमः, केवलेनैवात्मनाविर्भवति न धर्मान्तरेणेति।

ॐ ब्रह्मणे नमः।

पूर्वपादे ब्रह्मोपासकानां कार्यब्रह्मप्राप्तिरुक्ता, सम्प्रति तेषामैश्वर्यविशेषं ब्राह्मलौकिकं पादस्योत्तरार्द्धेन प्रपञ्चयिष्यन्नादावभ्यर्हितपरविद्याप्राप्तं निर्विशेषब्रह्मभावमाह। सम्पद्याविर्भावः स्वेनशब्दात्। निर्गुणविद्याफलवाक्यमुदाहृत्य स्वशब्दस्य स्वीयागन्तुकरूपस्वात्मरूपवाचित्वाभ्यां संशयमाह। एवमिति। पूर्वपक्षे मोक्षस्य स्वर्गादविशेषः, सिद्धान्ते विशेष इति फलं, तत्र मोक्ष आगन्तुकः फलत्वात् स्वर्गवदिति

कुतः स्वेन रूपेणाभिनिष्पद्यते इति, स्वशब्दात्, अन्यथा हि स्वशब्देन विशेषणमनवक्लृप्तं स्यात्। नन्वात्मीयाभिप्रायः स्वशब्दो भविष्यति। न, तस्यावचनीयत्वात्। येनैव हि केनचिद्रूपेणाभिनिष्पद्यते तस्यैवात्मीयत्वापत्तेः स्वेनेति विशेषणमनर्थकं स्यात्। आत्मवचनतायान्तु अर्थवत् केवलेनैवात्मरूपेणाभिनिष्पद्यते नागन्तुकेनापररूपेणापीति। कः पुनर्विशेषः पूर्व्वास्ववस्थास्विह च स्वरूपानपायसाम्ये सति इत्यत आह॥

मुक्तः प्रतिज्ञानात्॥२॥

योऽत्राभिनिष्पद्यत इत्युक्तः स पूर्व्वबन्धविनिर्मुक्तः शुद्धेनैवात्मनाऽवतिष्ठते पूर्व्वत्रान्धो भवत्यपि रोदितीव विनाशमेवापीतो भवतीति च अवस्थात्रयकलुषितेनात्मना इत्ययं विशेषः, कथं पुनरवगम्यते मुक्तोऽयमिदानीं भवतीति। प्रतिज्ञानादित्याह। तथाहि 'एतन्त्वेव ते भूयोऽनुव्याख्यास्यामि' इत्यवस्थात्रयदोषविहीनमात्मानं व्याख्येयत्वेन प्रतिज्ञाय 'अ-

---

न्यायोपेतयाऽभिनिष्पत्तिश्रुत्या पूर्वपक्षमाह। किमित्यादिना। स्वशब्दश्रुतिबाधितो न्यायः अभिनिष्पत्तिश्च साक्षात्कारवृत्त्यभिप्रायो बन्धध्वंस जन्मनोपचारिक्येवेति मत्वा सिद्धान्तयति। एवमिति। मोक्षस्य फलत्वेन प्रागागन्तुकत्वनिरासार्थः स्वशब्द इति युक्तं स्वीयवाचित्वेऽनर्थकानुवादः स्यादित्यर्थः। सूत्रान्तरं गृह्णाति। कः पुनरिति॥

जागरिते ह्यान्ध्यादिदेहधर्मवान् भवति स्वप्ने तु हत इव केन चित्। अपि च पुत्रादिनाशाद्रोदितीव भवति, सुषुप्तौ तु विशेषाज्ञानाद्वि-

शरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति चोपन्यस्य 'स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' इति चोपसंहरति। तथाऽऽख्यायिकोपक्रमेऽपि 'य आत्माऽपहतपाप्मा' इत्यादिमुक्तात्मविषयमेव प्रतिज्ञानं। फलसिद्धिरपि मोक्षस्य बन्धननिवृत्तिमात्रापेक्षा नापूर्वोपजनापेक्षा। यदप्यभिनिष्पद्यत इति उत्पत्तिपर्यायत्वं तदपि पूर्ववस्थापेक्षं, यथा रोगनिवृत्तावरोगोऽभिनिष्पद्यत इति तद्वत्। तस्माददोषः॥

आत्मा प्रकरणात्॥ ३॥

कथं पुनर्मुक्त इत्युच्यते 'यावता परं ज्योतिरुपसम्पद्य' इति कार्यगोचरमेवैनं श्रावयति। ज्योतिःशब्दस्य भौतिकज्योतिषि रूढत्वात्। न चानतिवृत्तो विकारविषयात् कश्चिद्विमुक्तो भवितुमर्हति विकारस्यार्तत्वप्रसिद्धेरिति। नैष दोषः। यत आत्मैवात्र ज्योतिःशब्देनाविद्यते प्रकरणात्। 'य आत्माऽपहतपाप्मा विरजो विमृत्युः' इति प्रकृते परस्मिन्नात्मनि नाकस्मात् भौतिकं ज्योतिः शक्यं ग्रहीतुं, प्रकृतहान्यप्रकृतप्रक्रियाप्रसङ्गात्। ज्योतिःशब्दस्यात्मन्यपि दृश्यते 'तद्देवा ज्योतिषां ज्योतिः' इति। प्रपञ्चितश्चैतत् 'ज्योतिर्दर्शनात्' (ब्र०सू०) इत्यत्र॥

नष्ट इवेति, बन्धदशायां कलुषितात्मना तिष्ठति, मोक्षे तु विगलिताखिलदुःखः परितः प्रद्योतमानपूर्णानन्दात्मनावतिष्ठत इति महान् विशेष इत्यर्थः। कार्यगोचरमिति कार्यप्राप्तमित्यर्थः॥

कार्यं प्राप्तोऽपि मुक्तः किं न स्यादित्यत आह। न चानतिवृत्त इति॥

अविभागेन दृष्टत्वात् ॥ ४ ॥

परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते यः स किं परस्मादात्मनः पृथगेव भवति उताविभागेनैवावतिष्ठत इति वीक्षायां 'स तत्र पर्येति' इत्यधिकरणाधिकर्तव्यनिर्देशात् 'ज्योतिरुपसम्पद्य' इति च कर्तृकर्मनिर्देशाद्भेदेनैवावस्थानमिति यस्य मतिस्तं व्युत्पादयति । अविभक्त एव परेणात्मना मुक्तोऽवतिष्ठते । कुतः दृष्टत्वात् । तथा हि 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'यत्र नान्यत् पश्यति' 'न तु तत् द्वितीयमस्ति' 'ततोऽन्यद्विभक्तं यत् पश्येत्' इत्येवमादीनि वाक्यान्यविभागेनैव परमात्मानं दर्शयन्ति । यथादर्शनमेव च फलं युक्तं तत्क्रतुन्यायात् । 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति' 'एवं मुनेर्विजानतः' 'आत्मा भवति गौतम' इति चैवमादीनि *मुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयन्ति नदीसमुद्रादिनिदर्शनानि च । भेदनिर्देशस्त्वभेदेऽप्युपचर्यते । 'स भगवः कस्मिन् प्रतिष्ठितः' इति 'स्वे महिम्नि' इति 'आत्मरतिरात्मक्रीडः' इति चैवमादिदर्शनात् ॥

अविभागेन दृष्टत्वात् । स्वरूपस्थितमुक्तमुपजीव्य वादिविवादात् ब्रह्मभेदाभेदसंशये सत्यत्यन्तभेदं पूर्वपक्षमुक्त्वा सिद्धान्तमाह । यस्येति ॥

---

* मुक्तिस्वरूपेति वर्ध० का० ।

ब्राह्मेण जैमिनिरुपन्यासा-
दिभ्यः ॥ ५ ॥

स्थितमेतत् 'स्वेन रूपेण' इत्यत्रात्ममात्रस्वरूपेणाभिनिष्पद्यते नागन्तुकेनापररूपेणेति। अधुना तु तद्विशेषबुभुत्सायामभिधीयते। स्वमस्य रूपं ब्राह्ममपहतपाप्मत्वादि सत्यसङ्कल्पत्वावसानं तथा सर्वज्ञत्वं सर्वेश्वरत्वञ्च तेन स्वेन रूपेणाभिनिष्पद्यत इति जैमिनिराचार्यो मन्यते। कुतः, उपन्यासादिभ्यस्तथात्वावगमात्। तथा हि 'एष आत्मापहतपाप्मा' इत्यादिना 'सत्यकामः सत्यसङ्कल्पः' इत्येवमन्तेनोपन्यासेनैवमात्मकतामात्मनो बोधयति। तथा 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' इत्यैश्वर्यरूपमावेदयति। 'तस्य सर्वेषु लोकेषु कामचारो भवति' इति च 'सर्वज्ञः सर्वेश्वरः' इत्यादिव्यपदेशाश्चैवमुपपन्ना भविष्यन्ति इति ॥

ब्राह्मेण जैमिनिः। उक्तं ब्रह्मस्वरूपमुपजीव्य स किं सत्येन सर्वज्ञत्वादिधर्मेण युक्तस्तिष्ठति उत धर्मस्य शशशृङ्गवदत्यन्तासत्त्वात् चिन्मात्रात्मना तिष्ठति किं वा वस्तुतश्चिन्मात्रोऽपि जीवान्तरव्यवहारदृष्ट्या कल्पितसर्वज्ञत्वादिमानिति मुनिविप्रतिपत्तेः संशये सत्याद्यं पूर्वपक्षमाह। अधुनेत्यादिना। तत्तत्पक्षसिद्धिरेव फलं द्रष्टव्यं। सोऽन्वेष्टव्यः इति विध्यर्थ उद्देशः, य आत्मेत्यादिरुपन्यासशब्दार्थः। आदिपदात् विधिव्यपदेशग्रहः। तत्राज्ञातज्ञापको विधिस्तमाह। तथा स तत्रेति। सर्वज्ञ इत्यादिस्तु व्यपदेशोऽयं हि नोद्देशः विध्यभावान्नापि विधिः सिद्धवन्निर्देशादित्यर्थः ॥

चिति तन्मात्रेण तदात्मकत्वादित्यौ-
डुलोमिः ॥ ६ ।

यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते तथापि शब्दविकल्पजा एवैते, पाप्मादिनिवृत्तिमात्रं हि तत्र गम्यते, चैतन्यमेव त्वस्यात्मनः स्वरूपमिति तन्मात्रेण स्वरूपेणाभिनिष्पत्तिर्युक्ता। तथा च श्रुतिः 'एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनः' इत्येवंजातीयकानुगृहीता भविष्यति। सत्यकामत्वादयस्तु यद्यपि वस्तुस्वरूपेणैव धर्मा उच्यन्ते सत्याः कामा अस्येति तथाप्युपाधिसम्बन्धाधीनत्वात् तेषां न चैतन्यवत् स्वरूपत्वसम्भवः अनेकाकारत्वप्रतिषेधात्। प्रतिषिद्धं हि ब्रह्मणोऽनेकाकारत्वं 'न स्थानतोऽपि परस्योभयलिङ्गम्' [ब्र० सू०] इत्यत्र। अत एव च जक्षणादिसङ्कीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थमात्मरतिरित्यादिवत्। न हि मुख्यान्येव रतिक्रीडामिथुनान्यात्मनिमित्तानि शक्यन्ते वर्णयितुं, द्वितीयविषयत्वात् तेषां। तस्मात् निरस्ताशेषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मनाऽभिनिष्पद्यत इत्यौडुलोमिराचार्यो मन्यते॥

सत्यत्वादिधर्माणां सत्यत्वं दूषयत्यत्यन्तासत्यपक्षमाह। चितीति तन्मात्रेणेति। चितिश्चैतन्यं, शब्दज्ञानात् यो विकल्पोऽसन्प्रत्ययस्तज्जाः अत्यन्तमसन्त इति यावत्। अस्त्वभावधर्माणामसत्त्वं भावधर्माणान्तु सत्त्वमित्याशङ्क्य तेषामप्यौपाधिकत्वात् असत्त्वमित्याह। सत्यकामेति। चिन्मात्रे मुक्ते जक्षणादिश्रुतिः कथं तत्राह। अत एव चेति। सर्वधर्मनिषेधादेवेत्यर्थः॥

एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्युपगमेऽपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं बादरायण आचार्यो मन्यते ॥

सङ्कल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

हार्दविद्यायां श्रूयते 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादि। तत्र संशयः किं सङ्कल्प एव केवलः पित्रादिसमुत्थानहेतुरुत निमित्ता-

---

धर्माणां सत्यत्वमन्यन्तासत्यत्वञ्चेति पक्षद्वयमुक्तम्। अद्वैतश्रुतीनां सर्वज्ञत्वादिश्रुतिव्यवहारयोश्च बाधापातादतस्तृतीयपक्षः श्रेयानिति सिद्धान्तयति। एवमपीति। अत्र केचित् मुह्यन्ति अखण्डचिन्मात्रज्ञानात् मुक्तस्याज्ञानाभावात् कुत आज्ञानिकधर्मयोग इति, ते इत्थं बोधनीयाः, ये ईश्वरधर्मास्त एव चिदात्मनि मुक्ते जीवान्तरैर्व्यवह्रियन्ते इति। न च मूलाविद्यैक्यात् तन्नाशे कुतो जीवान्तरमिति वाच्यं, न वयं तन्नाशे जीवान्तरे व्यवहारं ब्रूमः किन्तु तदंशनाशेनांशान्तरव्याप्तात्मकशरीरद्वयाभिमानिनो मुक्तावंशान्तरोपाधिका जीवा व्यवहर्तार इति वदामः। तर्हि नानाविद्यापक्ष एव कुतो नाद्रीयते जीवभेदस्यावश्यकत्वादिति चेत्, न। प्रकृतिनानात्वं प्रतिजीवं प्रपञ्चभेद इत्याद्यप्रामाणिकानेकार्थगौरवादिति सर्ववृद्धसम्मत एकविद्यापक्ष एव श्रेयान्, अंशभेदेन च बन्धमुक्तिर्व्यवस्थितेति सङ्क्षेपः॥

एवं परविद्याफलमुक्तमिदानीं अपरविद्याफलं प्रपञ्चयति। सङ्कल्पादेव तु तच्छ्रुतेः। एवकारस्य योगान्ययोगव्यवच्छेदसाधारणात्

न्तरसहित इति। तत्र सत्यपि सङ्कल्पादेवेति श्रवणे लोकवत् निमित्तान्तरापेक्षा युक्ता। यथा लोकेऽस्मदादीनां सङ्कल्पात् गमनादिभ्यश्च हेतुभ्यः पित्रादिसम्पत्तिर्भवत्येवं मुक्तस्यापि स्यात् एवं दृष्टविपरीतं न कल्पितं भविष्यति। सङ्कल्पादेवेति तु राज्ञ इव सङ्कल्पितार्थसिद्धिकरीं साधनान्तरसामग्रीं सुलभामपेक्ष्योच्यते। न च सङ्कल्पमात्रसमुत्थानाः पित्रादयो मनोरथविजृम्भितवच्चञ्चलत्वात् पुष्कलं भोगं समर्पयितुं पर्य्याप्नुयुरित्येवं प्राप्ते ब्रूमः। सङ्कल्पादेव तु केवलात् पित्रादिसमुत्थानमिति। कुतः, तच्छ्रुतेः। 'सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादिका हि श्रुतिर्निमित्तान्तरापेक्षायां पीड्येत। निमित्तान्तरमपि तु यदि सङ्कल्पानुविधाय्येव स्यात्, भवतु, न तु प्रयत्नान्तरसम्पाद्यं निमित्तान्तरमिष्यते। प्राक् तत्सम्पत्तेर्वन्ध्यसङ्कल्पत्वप्रसङ्गात्। न च श्रुतिगम्येऽर्थे लोकवदिति सामान्यतो दृष्टं क्रमते। सङ्कल्पबलादेव चैषां यावत् प्रयोजनं स्थैर्य्योपपत्तिः प्राकृतसङ्कल्पविलक्षणत्वान्मुक्तसङ्कल्पस्य ॥

इति प्राप्ते इत्यन्वयः, ब्रह्मलोकं गतस्योपासकस्य सङ्कल्पो यत्नान्तरसापेक्षः, भोगसामग्रीसङ्कल्पत्वादस्मदादिसङ्कल्पवत्। न चैवकारविरोधः सङ्कल्पेन सामग्र्याद्ययोगव्यवच्छेदेन सालभ्यार्थत्वात्, यत्नानङ्गीकारे भोगपुष्ट्यसिद्धिश्चेति पूर्वपक्षार्थः। अत्र लोकदृष्टानुसरणं फलं, सिद्धान्ते तु विद्याबलेन सङ्कल्पस्यैव भोगपुष्टिकरत्वसिद्धिरिति भेदः। किञ्च यदि भोगसङ्कल्पानन्तरमपि यत्नान्तरसाध्यनिमित्तापेक्षा स्यात् तर्हि निमित्तप्राप्तेः प्राक् जातसङ्कल्पस्य वन्ध्यत्वं स्यात् भोगविलम्बात् ततः सत्यसङ्कल्पश्रुतेर्न यत्नान्तरापेक्षेत्याह। निमित्तान्तरमपि त्विति ॥

अत एव चानन्याधिपतिः ॥ ९ ॥

अत एव चावन्ध्यसङ्कल्पत्वादनन्याधिपतिर्विद्वान् भवति, नास्यान्योऽधिपतिर्भवति इत्यर्थः। न हि प्राकृतोऽपि सङ्कल्पयन्नन्यस्वामिकत्वमात्मनः सत्यां गतौ सङ्कल्पयति। श्रुतिश्चैतत् दर्शयति 'अथ य इह आत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवति' इति ॥

अभावं बादरिराह ह्येवं ॥ १० ॥

'सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यतः श्रुतेर्मनस्तावत् सङ्कल्पसाधनं सिद्धं, शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्यस्य विदुषः सन्ति न सन्तीति समीक्ष्यते। तत्र बादरिस्तावदाचार्यः शरीरस्येन्द्रियाणाञ्चाभावं महीयमानस्य विदुषो मन्यते। कस्मात्, एवं ह्याहाम्नायः 'मनसैतान् कामान् पश्यन् रमते ब्रह्मलोके' इति। यदि मनसा शरीरेन्द्रियैश्च विहरेत् मनसेति विशेषणं न स्यात्। तस्मादभावः शरीरेन्द्रियाणां मोक्षे ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिराचार्यो मनोवच्छरीरस्यापि सेन्द्रियस्य भावं मुक्तं

नन्वीश्वराधीनस्य विदुषः कथं सङ्कल्पमात्रात् भोगसिद्धिस्तत्राह। अत एवेति। ईश्वरधर्म एव विदुषाविर्भूत इति न सङ्कल्पभङ्ग इति भावः ॥

एवकारवत् मनसेतिविशेषणेनान्ययोगव्यवच्छेदात् देहाद्यभाव इति पूर्वपक्षयति। अभावं बादरिराह ह्येवं। अत्रापि वादिविवादात्

प्रति मन्यते, यतः 'स एकधा भवति त्रिधा भवति' इत्यादिना-ऽनेकधाभावविकल्पमामनन्ति। न ह्यनेकविधता विना शरीरभे-देनाञ्जसी स्यात्। यद्यपि निर्गुणायां भूमविद्यायामयमनेकधा-भावे विकल्पः पठ्यते तथापि विद्यमानमेवेदं सगुणावस्थायामैश्वर्यं भूमविद्यास्तुतये सङ्कीर्त्यत इत्यतः सगुणविद्याफलभावेनो-पतिष्ठत इत्युच्यते॥

द्वादशाहवदुभयविधं बादरायणोऽतः॥ १२॥

बादरायणः पुनराचार्योऽत एवोभयलिङ्गश्रुतिदर्शनादु-भयविधत्वं साधु मन्यते, यदा सशरीरतां सङ्कल्पयति तदा सशरीरो भवति यदि त्वशरीरतान्तदा अशरीर इति। सत्य-सङ्कल्पत्वात् सङ्कल्पवैचित्र्याच्च। द्वादशाहवत्, यथा द्वादशाहः सत्रमहीनश्च भवति उभयलिङ्गश्रुतिदर्शनात् एवमिद-मपीति॥

तन्वभावे सन्ध्यवदुपपद्यते॥ १३॥

यदा तु सेन्द्रियस्य शरीरस्याभावस्तदा यथा सन्ध्ये स्थाने

संशयः, तत्र देहादयो न सन्त्येव सदा सन्त्येवेति च पक्षद्वयं पूर्वपक्षः, कालभेदेनेच्छया सन्ति न सन्ति चेति सिद्धान्तपक्षो द्रष्टव्यः, फलन्तु तत्तच्छ्रुतेर्मुख्यत्वमिति विवेकः॥१०॥११॥

द्वादशाहवदिति। य एवंविद्वांसः सत्रमुपयन्ति इत्युपायिचोदनाग-म्यत्वश्रुतेर्द्वादशाहस्य सत्रत्वं, त आसतेति चोपयन्तीति वाचोदितत्वं

शरीरेन्द्रियविषयेष्वविद्यमानेष्वप्युपलब्धिमात्रा एव पित्रादिकामा भवन्त्येवं मोक्षेऽपि स्युः, एवं तदुपपद्यते ॥

भावे जाग्रद्वत् ॥ १४ ॥

भावे पुनस्तनोर्यथा जागरिते विद्यमाना एव पित्रादिकामा भवन्त्येवं मुक्तस्याप्युपपद्यन्ते ॥

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

'भावं जैमिनिर्विकल्पामननात्' [ब्र०सू०] इत्यत्र सशरीरत्वं मुक्तस्योक्तं तत्र त्रिधाभावादिष्वनेकशरीरसर्गे किं निरात्मकानि शरीराणि दारुयन्त्रवत् सृज्यन्ते किंवा सात्मकानि अस्मदादि शरीरवदिति भवति वीक्षा। तत्रात्ममनसोर्भेदानुपपत्तेरेकेण शरीरेण योगादितराणि निरात्मकानीत्येवं प्राप्ते प्रतिपद्यते, प्रदीपवदावेश इति। यथा प्रदीप एकोऽनेकप्रदीपभावमापद्यते

सत्त्वलक्षणमिति स्थितं, तथा द्वादशाहेन प्रजाकामं याजयेदिति यजतिचोदनादर्शनात् नियतकर्तृकत्वावगमेन द्विरात्रादिवदहीनत्वस्य-त्यर्थः॥ १२ ॥ १३ ॥ १४ ॥

प्रदीपवदावेशः। सङ्कल्पमात्रात् निर्मितदेहानुपजीव्य तेषूभययथादर्शनात् संशयमाह। भावमिति। अनादिलिङ्गशरीरस्यैकस्मिन्नेव शरीरे भावात् निर्मितानेकदेहेषु भोगासिद्धिः पूर्वपक्षफलं, सिद्धान्ते तत्सिद्धिरिति मत्वा सूत्रं व्याचष्टे। यथेत्यादिना। स एकधा त्रिधा पञ्चधेत्यादिश्रुत्या विदुष एवानेकधाभाव उक्तः विद्वांस्तु नादेहो नापि चिन्मात्रः लिङ्गोपहितात्मा न च तस्य लिङ्गभेदं विनाऽनेकत्वं सम्भवति। अतः श्रुतिबलादेकस्यैवानादिलिङ्गस्य लोकदेहेषु प्रवेशेन भेद एष्टव्यः।

विकारशक्तियोगात् एवमेकोऽपि सन् विद्वानैश्वर्ययोगादनेकभावमापद्य सर्वाणि शरीराण्याविशति। कुतः, तथाहि दर्शयति शास्त्रमेकस्यानेकभावं, 'स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा' इत्यादि। नैतद्दारुयन्त्रोपमाभ्युपगमेऽवकल्पते नापि जीवान्तरावेशे। न च निरात्मकानां शरीराणां प्रवृत्तिः सम्भवति। यत्त्वात्ममनसोर्भेदानुपपत्तेरनेकशरीरयोगासम्भव इति। नैष दोषः, एकमनोऽनुवृत्तीनि समनस्कान्येवापराणि शरीराणि सत्यसङ्कल्पत्वात् स्रक्ष्यति, सृष्टेषु च तेषूपाधिभेदादात्मनोऽपि भेदेनाधिष्ठातृत्वं योक्ष्यते। एषैव च योगशास्त्रेषु योगिनामनेकशरीरयोगप्रक्रिया, कथं पुनर्मुक्तस्यानेकश-

---

यद्यपि मूलप्रदीपस्य वर्त्यन्तरेषूत्पन्नदीपानां चात्यन्तभेदोऽस्ति लिङ्गस्य तु देहभेदकृतो भेदो न स्वतः, स्वतो लिङ्गभेदेन तदुपहितजीवभेदात् अनुसन्धानानुपपत्तेः, आगन्तुकानेकसृष्टावसत्कार्यवादापाताच्च, तथापि प्रदीपत्वजात्यैक्येन व्यक्त्यैक्यारोपात् दृष्टान्तदार्ष्टान्तिकयोः साम्यं द्रष्टव्यं तथा च यथा प्रदीपोऽनेकवर्तिषु प्रविशति एवं विद्यायोगबलात् विद्या तु लिङ्गस्य व्यापित्वादनेकदेहेषु युगपदावेश इति सूत्रार्थः। विदुषोऽनेकधात्वं श्रुतमन्यथा न घटते इत्याह। नैतदिति। इतश्च सात्मकत्वमित्याह। न च निरात्मकानामिति। यदनादि मन एकदेहस्थं तदनुसारीणि देहान्तरस्थानि मनांसि भवन्ति तदव, स्थानां तन्नियम्यत्वसम्भवादित्यत्र योगशास्त्रसम्मतिमाह। एषैवेति। निर्माणचित्तान्यस्मितामात्रात् प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषामिति भगवत्पतञ्जलिना सूचितं। योगिनोऽभिमानमात्रान्निर्माणचित्तानि निर्माणदेहेषु भवन्ति, तेषां नियामकमनादिचित्तमित्यर्थः। उत्तरसूत्रव्यावर्त्यशङ्कामाह। कथं पुनरिति। सलिलवत् सलिलः, स्वच्छ इत्यर्थः॥

रीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यते यावता 'तत् केन कं विजानीयात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् सलिल एको द्रष्टा द्वैतो भवति' इत्येवंजातीयका श्रुतिर्विशेषविज्ञानं वारयतीत्यत उत्तरं पठति॥

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

स्वाप्ययः सुषुप्तं, 'स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते' इति श्रुतेः। सम्पत्तिः कैवल्यं, 'ब्रह्मैव सन् ब्रह्माप्येति' इति श्रुतेः। तयोरन्यतरामवस्थामपेक्ष्यैतद्विशेषसंज्ञाभाववचनं क्वचित् सुषुप्तावस्थामपेक्ष्योच्यते क्वचित् कैवल्यावस्थां। कथमवगम्यते, यतस्तत्रैव तदधिकारवशादाविष्कृतं, 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति यत्र त्वस्य सर्वमात्मैवाभूत् यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति' इत्यादि श्रुतिभ्यः। सगुणविद्याविपाकस्थानन्त्वेतत् स्वर्गादिवदवस्थान्तरं यत्रैतदैश्वर्यमुपवर्ण्यते तस्माददोषः॥

न तु तद्द्वितीयमस्तीति क्वचित् सुषुप्तिमधिकृत्योक्तं 'तत् केन कम्' इत्यादि क्वचिन्मुक्तिं प्रकृत्योक्तं, एवं विशेषज्ञानाभाववचनं सुषुप्तिमुक्त्यन्यतमापेक्षं सगुणोपासकस्य भोगोक्तौ न विरुध्यते भिन्नविषयत्वादित्याह। स्वाप्ययेति। तत्रैव श्रुतौ, तदधिकारवशात् सुषुप्त्यादिप्रकरणबलात्, उक्तवचनानामन्यतरापेक्षत्वमाविष्कृतं, हि यतः स्वतोऽवगम्यत इत्यर्थः। अत्र समुत्थानादिवाक्यं मुक्तिविषयं यत्र सुप्त इति सुप्तिविषयमिति विभागः॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७॥

ये सगुणब्रह्मोपासनात् सहैव मनसेश्वरसायुज्यं व्रजन्ति किन्तेषां निरवग्रहमैश्वर्यं भवत्याहोस्वित् सावग्रहमिति संशयः। किन्तावत् प्राप्तं निरङ्कुशमेवैषामैश्वर्यं भवितुमर्हति, 'आप्नोति स्वाराज्यं' 'सर्वेऽस्मै देवा बलिमावहन्ति' 'तेषां सर्वेषु लोकेषु कामचारो भवति' इत्यादिश्रुतिभ्यः। इत्येवं प्राप्ते पठति। जगद्व्यापारवर्जमिति। जगदुत्पत्त्यादिव्यापारं वर्जयित्वाऽन्यदणिमाद्यात्मकमैश्वर्यं मुक्तानाम्भवितुमर्हति, जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य। कुतः, तस्य तत्र प्रकृतत्वादसन्निहितत्वाच्चेतरेषां। पर एव हीश्वरो जगद्व्यापारेऽधिकृतः तमेव प्रकृत्योत्पत्त्याद्युपदेशान्नित्यशब्दनिबन्धनत्वाच्च। तदन्वेषणविजिज्ञासनपूर्वकमितरेषामादिमदैश्वर्यं श्रूयते, तेनासन्निहितास्ते जगद्व्यापारे। समनस्कत्वादेव चैषामनैकमत्ये कस्यचित् स्थित्यभिप्रायः कस्यचित् संहाराभिप्राय इत्येवंविरोधोऽपि कदा-

---

जगद्व्यापारवर्जं। सङ्कल्पादेवेत्यादिनोक्तैश्वर्यस्य जगत्सृष्ट्यादिव्यतिरिक्तविषयत्वेनात्रापवादात् सङ्गतिः, उभयथा दर्शनात् संशयः। ईश्वरनानात्वं पूर्वपक्षफलं, सिद्धान्ते तु विद्यायोगिनामीश्वरनियम्यत्वादेकस्य नित्यसिद्धस्येश्वरस्यैव जगत्कर्तृत्वसिद्धिरिति विवेकः। प्रलयात् सर्गसमये यस्येच्छापूर्वं कर्तृत्वं श्रुतौ प्रकृतं तस्यैव नियन्तृत्वादिर्जगद्व्यापारः। नह्युपासकानां देहं विनेच्छा सम्भवति। किञ्चेश्वरस्य नित्यसिद्धत्वात् शब्दकसमधिगम्यत्वाज्जगत्स्रष्टृत्वं युक्तं, न तु तत्प्रसादलब्धसिद्धीनां जीवानामित्याह। नित्यशब्दनिबन्धनत्वाच्चेति। किञ्च

चित् स्यात्। अथ कस्यचित् सङ्कल्पमन्वन्यस्य सङ्कल्प इत्यविरोधः समर्थ्येत, ततः परमेश्वराहततन्त्वमेवेतरेषामिति व्यवतिष्ठते॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः॥ १८॥

अथ यदुक्तं 'आप्नोति स्वाराज्यम्' इत्यादिप्रत्यक्षोपदेशान्निरवग्रहमैश्वर्य्यं विदुषां न्याय्यमिति तत् परिहर्त्तव्यं, अत्रोच्यते। नायं दोषः, आधिकारिकमण्डलस्थोक्तेः। आधिकारिको यः सवितृमण्डलादिषु विशेषायतनेषु व्यवस्थितः परमेश्वरस्तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते यत् कारणमनन्तरं आप्नोति मनसस्पतिमित्याह। यो हि सर्वमनसां पतिः पूर्वसिद्ध ईश्वरस्तं प्राप्नोति। एतदुक्तं भवति, तदनुसारेण चानन्तरं वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह। एवमन्यत्रापि यथासम्भवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्य्यं योजयितव्यं॥

विदुषां समप्राधान्ये मिथो विरोधः, एकं प्रत्यन्येषां गुणत्वे लोक एवेश्वर इत्याह। समनस्कत्वादिति॥

अधिकारे नियोजयत्यादित्यादीनित्याधिकारिकः, स चासौ मण्डलस्थश्च तस्य प्राप्त्युक्तेरित्यर्थः। मनसस्पतिः सूर्यमण्डलान्तःस्थः परमात्मा 'तत् सवितुर्वरेण्यं धियो यो नः प्रचोदयात्' इति श्रुतेः। तथा च यदि पूर्वं निरङ्कुशं स्वाराज्यमुक्तं स्यात् तर्हि ईश्वरस्याग्रे प्राप्यतां न ब्रूयादतो भोगे स्वाराज्यं न जगज्जन्मादिष्विति भावः। वाक्पतित्वादिकमपीश्वराधीनमित्याह। तदनुसारेणेति। उक्तन्यायं कामचारादिवाक्येष्वतिदिशति। एवमिति॥

विकारावर्त्ति च तथा हि स्थितिमाह ॥ १९ ॥

विकारावर्त्यपि च नित्यमुक्तं पारमेश्वरं रूपं न केवलं विकारमात्रगोचरं सवितृमण्डलाद्यधिष्ठानं। तथा ह्यस्य द्विरूपां स्थितिमाहाम्नायः 'तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इत्येवमादिः। न च तन्निर्विकारं रूपमितरालम्बनाः प्राप्नुवन्तीति शक्यं वक्तुं, अतत्क्रतुत्वात्तेषां। अतश्च यथैव द्विरूपे परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठते एवं सगुणेऽपि निरवग्रहमैश्वर्यमनवाप्य सावग्रह एवावतिष्ठत इति द्रष्टव्यं॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

दर्शयतश्च विकारावर्त्तित्वं परस्य ज्योतिषः श्रुतिस्मृती 'न तत्र सूर्य्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः' इति, 'न तद्भासयते सूर्य्यो न शशाङ्को न पावकः' इति च। तदेवं विकारावर्त्तित्वं परस्य ज्योतिषः प्रसिद्धमित्यभिप्रायः॥

जगद्व्यापारः [illegible]सकप्राप्यः तदुपास्यनिष्ठत्वात् सङ्कल्पसिद्ध्यादिवदित्याशङ्क्योपास्यस्य निर्गुणस्वरूपे व्यभिचारमाह। विकारावर्त्ति चेति॥

निर्गुणस्वरूपे प्रमाणमाह। दर्शयतश्चेति। यथा ज्ञानाभावान्निर्गुणं न प्राप्तं तथा ध्यानाभावाज्जगत्स्रष्टृत्वादि न प्राप्यते। ध्यानाभावश्च विध्यभावादिति भावः॥

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

इतश्च न निरङ्कुशं विकारालम्बनानामैश्वर्यं यस्माद्भोगमात्रमेषामनादिसिद्धेनेश्वरेण समानमिति श्रूयते 'तमाहापो वै खलु मीयन्ते लोकोऽसौ' इति, 'स यथैतां देवतां सर्वाणि भूतान्यवन्त्येवं हैवंविदं सर्वाणि भूतान्यवन्ति तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति' इत्यादिभेदव्यपदेशलिङ्गेभ्यः। नन्वेवं सति सातिशयत्वादन्तवत्त्वमैश्वर्यस्य स्यात्ततश्चैषामावृत्तिः प्रसज्येतेत्यत उत्तरं भगवान् बादरायणाचार्यः पठति ॥

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं शास्त्रोक्तविशेषणं गच्छन्ति, यस्मिन्नरश्च ह वै ण्यश्चार्ण-

---

तमुपासकं ब्रह्मलोकगतमाह हिरण्यगर्भः 'मया खल्विमा आपो अमृतरूपा मीयन्ते भुज्यन्ते न चाप्यसौ लोकोऽमृतोदकलक्षणः' इत्यर्थः। श्रुत्यन्तरमाह। स यथेति। भोगसाम्ये स दृष्टान्तो यथेत्यर्थः। तेनो इत्युशब्दोऽप्यर्थः। सलोकतामपीत्यन्वयः। सायुज्यं समानदेहत्वं क्रमेण मुक्तिर्वा। शास्त्रसमाप्तिं सूचयन् सूत्रकारं पूजयति। भगवानिति। भगवत्त्वं सर्वज्ञत्वं। सूत्रद्वारा शिष्याणां [illegible] आचारे स्थापनात् आचार्यत्वं। बादरायणपदेन बदरिकाश्रमवासि[illegible] नित्यसर्वज्ञस्य परमगुरोर्नारायणस्य प्रसादद्योतनात्तत्प्रणीतशास्त्रं निरवद्यतामुद्योतयति ॥

सगुणविद्यायाः सातिशयफलत्वेऽपि ततो निर्गुणविद्ययाऽनावृत्तिरित्याह। अनावृत्तिः शब्दादनावृत्तिः शब्दात्। ये ब्रह्मलोकं गच्छन्ति ते तं

वाँ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरम्मदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता पूर्ब्रह्मणो यस्मिंश्च प्रभुविमितं हिरण्मयं वेश्म यश्चानेकधामन्त्रार्थवादादिप्रदेशेषु प्रपञ्च्यते तं ते प्राप्य न चन्द्रलोकादिवत् वियुक्तभोगा आवर्त्तन्ते। कुतः, 'तयोर्द्ध्वमायन्नमृतत्वं' इति, 'तेषां न पुनरावृत्तिः' 'एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्तन्ते' 'ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्त्तते' इत्यादिशब्देभ्यः। अन्तवत्त्वेऽपि त्वैश्वर्य्यस्य यथाऽनावृत्तिस्तथा वर्णितं 'कार्यात्यये तदध्यक्षेण सहातःपरम्' [ब्र०सू०] इत्यत्र। सम्यग्दर्शनविध्वस्ततमसान्तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः। त-

प्राप्य नावर्तन्ते इति सम्बन्धः। लोकं विशिनष्टि। यस्मिन्निति। इतोऽस्मात् पृथिवीलोकात् तृतीयस्यां दिवि यो ब्रह्मलोकस्तस्मिन्नर इति ण्य इति चार्णवतुल्यौ सुधाहृदावित्यर्थः। ऐरमन्नमयं, मदीयं मदकरं सरः, सोमसवनः अमृतवर्षी, यद्यपि तेषामिह न पुनरावृत्तिरिमं मानवमिति च श्रुतिष्विहेममितिविशेषणादस्मिन् कल्पे ब्रह्मलोकगतानां कल्पान्तरे आवृत्तिर्भाति, तथापीश्वरोपास्तिं विना पञ्चाग्निविद्याश्रमेधदृढब्रह्मचर्यादिसाधनैर्ये गतास्तेषां तत्त्वज्ञाननियमाभावादावृत्तिः स्यात्, ये तु दहरादीश्वरोपास्त्या गतास्तेषां सगुणविद्याफलक्षयेऽपि निरवग्रहेश्वरानुग्रहाल्लब्धात्मज्ञानान्मुक्तिरिति नियम इत्यभिप्रेत्याह। अन्तवत्त्वेऽपि त्विति। नन्वत्र सूत्रकृता सगुणविदामेवानावृत्तिश्चेत् उक्ता न निर्गुणविदां तत्र को हेतुरित्याशङ्क्य तेषामावृत्तिशङ्काभावादित्याह। सम्यगिति। तदाश्रयणेनेति गुणविदामावृत्तिप्राप्तौ सम्यग्दर्शनाश्रयणेनैवानावृत्तिः साधिता, अतः स्वत एव सम्यग्दर्शिनामावृत्तिशङ्का नेति किमु वाच्यमित्यर्थः। यत्राध्यायसमाप्तिस्तत्र पदमात्रस्याभ्यासो दर्शितः, इह सूत्रस्यैवाभ्यासात् शास्त्रसमाप्तिर्द्योत्यत इत्याह। अनावृत्तिः शब्दादिति। एवं समन्वयोक्त्या ब्रह्मात्मैक्यस्य वेदान्तप्रमाणकत्वमवधारयितुं

दाश्रयणेनैव हि सगुणशरणानामप्यनावृत्तिसिद्धिरिति। अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं दर्शयति॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमत्परमहंसपरिव्राजकाचार्य्य श्रीमद्गोविन्दभगवत्पूज्यपादशिष्य श्रीमच्छङ्करभगवत्पूज्यपादकृतौ चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः।

समाप्तमिदं ब्रह्ममीमांसाशास्त्रं शङ्करभाष्ययुतम्।

वाक्यार्थज्ञाने स्मृतितर्कादिसर्वप्रकारविरोधः परिहृतः, साधनसम्पत्तिश्च दर्शिता, तस्माद्विवेकादिसाधनसम्पन्नस्य श्रवणाद्यावृत्तिनिरस्तसमस्तप्रतिबन्धस्याखण्डात्मसंबोधात् समूलबन्धध्वंसे सत्याविर्भूतनिष्कलङ्कानन्तस्वप्रकाशचिदानन्दात्मनावस्थानमिति सिद्धं॥

नानाविधग्रन्थजातं वीक्ष्य सम्यग्यथामति।
शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे॥
अन्तर्यामी जगत्साक्षी सर्वकर्त्ता रघूद्वहः।
अतोऽत्र दोषोऽशङ्क्यः स्यादेष ह्येवेतिशासनात्॥
वक्षस्यस्त्रोऽस्य पार्श्वे करतलयुगले कौस्तुभाभां दयाश्च,
सीतां कोदण्डदीक्षामभयवरयुतां वीक्ष्य रामाङ्गसङ्गः।
स्वस्याः क्व स्यादितीयं हृदि कृतमनना भाष्यरत्नप्रभाऽऽर्या,
स्वात्मानन्दैकलब्ध्या रघुवरचरणाम्भोजयुग्मं प्रपन्ना॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोपालसरस्वतीपूज्यपादशिष्य श्रीगोविन्दानन्दभगवत्कृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः॥

समाप्तश्चायं ग्रन्थः।

BIBLIOTHECA INDICA:

A COLLECTION OF ORIENTAL WORKS,

PUBLISHED UNDER THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

SANSKRIT WORKS IN PROGRESS*

IN THE OLD SERIES.

The LALITA VISTARA, or Memoirs of the Life and Doctrines of SÁKYA SINHA. Edited by Bábu RÁJENDRALÁLA MITRA. Already published, Fasciculi I. II. III. IV. and V. Nos. 51, 73, 143, 144 and 145.

The Prákrita Grammar of Kramadís'wara. Edited by Bábu RÁJENDRALÁLA MITRA.

The VEDÁNTA SU'TRAS. Commenced by DR. RÖER, and continued by Pandita Rámanáráyana Vidyáratna. Published, Fasciculi I. II. III. IV. V. VI. VII. VIII. IX. X. and XI., Nos. 64, 89, 172, 174, 178, 184, 186, 194, 195, 198 and 199.

The TAITTIRÍYA SANHITÁ of the Black Yajur Veda. Edited by Dr. E. RÖER, and E. B. COWELL, M. A. Published, Fasciculi I. II. III. IV. V. VI. VII. VIII. IX. X. XI. XII. XIII. XIV. XV. XVI. and XVII. Nos. 92, 117, 119, 122, 131, 133, 134, 137, 149, 157, 160, 161, 166, 171, 180, 185 and 193.

The TAITTIRÍYA BRÁHMANA of the Black Yajur Veda. Edited by Bábu RÁJENDRALÁLA MITRA. Published, Fasciculi I. II. III. IV. V. VI. VII. VIII. IX. X. XI. XII. XIII. XIV. XV. XVI. XVII. and XVIII., Nos. 125, 126, 147, 150, 151, 152, 153, 154, 155, 175, 176, 188, 189, 190, 191, 192, 196 and 197.

An English Translation of the SÁHITYA DARPANA by DR. BALLANTYNE.

* For a list of the Persian and Arabic works in progress, see No. 130 of the Bibliotheca Indica.

SANSKRIT WORKS PUBLISHED,

IN THE OLD SERIES.

	Former Price.	*Reduced Price.*
The first two Lectures of the Sanhitá of the Rig Véda, with the Commentary of Mádhava Áchárya, and an English translation of the text. Edited by Dr E. Röer, Nos. 1 to 4, ...	4 0 0	2 [illegible]
The Brihad Áranyaka Upanishad, with the Commentary of S'ankara Áchárya, and the Gloss of Ánanda Giri. Edited by Dr. E. Röer, Nos. 5 to 13, 16 and 18, ...	11 0 0	6 1[illegible]
An English Translation of the above Upanishad and Commentary. Nos. 27, 38 and 135,.....................	3 0 0	1 14 [illegible]
The Chhándogya Upanishad, with the Commentary of S'ankara Áchárya, and the Gloss of Ánanda Giri. Edited by Dr. E. Röer, Nos. 14, 15, 17, 20, 23 and 25, ...	6 0 0	3 12 [illegible]
An English translation of the Chhándogya Upanishad of the Sáma Veda, by Bábu Rájendralála Mitra. Fasciculi I. and II. Nos. 78 and 181, ...	0 0 0	1 4 [illegible]
The Taittiríya, Aitaréya and S'wetás'watara Upanishads with Commentary, &c. Nos. 22, 33, and 34, ...	3 0 0	1 14 [illegible]
The I's'a, Kéna, Katha, Pras'na, Mundaka, and Mándukya Upanishads, with Commentary, &c. Edited by Dr. E. Röer, Nos. 24, 26, 28, 29, 30 and 31,.............. ...	6 0 0	3 12 [illegible]
The Taittiríya, Aitareya, S'wetás'watara, Kena, I's'á, Katha, Pras'na, Mundaka and Mándukya Upanishads. Translated from the Original Sanskrit, by Dr. E. Röer, Nos. 41 and 50, ...	2 0 0	1 4 0
Division of the Categories of the Nyáya Philosophy, with a Commentary and an English Translation, by Dr. E. Röer, Nos. 32 and 35,...........................	2 0 0	1 4 0
The Sáhitya-Darpana, or Mirror of Composition, by Viswanátha Kavirája, edited by Dr. E. Röer, Nos. 36, 37, 53, 54 and 55, ...	5 0 0	4 0 0
The Chaitanya Chandrodaya Nátaka of Kavikarnapura, Edited by Bábu Rájendralál Mitra, Nos. 47, 48 and 80, ...	3 0 0	1 14 0
The Uttara Naishadha Charita, by S'rí Harsha, with the Commentary of Náráyana. Edited by Dr. E. Röer, Nos. 39, 40, 42, 45, 46, 52, 67, 72, 87, 90, 120, 123 and 124, ...	12 0 0	[illegible] 8 0
The Sánkhya-Pravachana-Bháshya. Edited by Fitz-Edward Hall, A. M., and to be translated by J. R. Ballantyne, LL. D. Nos. 94, 97 and 141, ...	0 0 0	1 1[illegible]
The Sarvadars'ana Sangraha; or an Epitome of the different systems of Indian Philosophy. By Mádhaváchárya, Edited by Pandita I's'warachandra Vidyáságara. Nos. 63 and 142, ...	0 0 0	1 [illegible]
The Súrya-siddhánta, with its Commentary the Gúdhárthaprakás'aka. Edited by FitzEdward Hall, A. M. Nos. 79, 105, 115 and 146,................................	0 0 0	2 [illegible]
The Tale of Vásavadattá, by Subandhu, with its Commentary entitled Darpana. Edited by FitzEdward Hall, A. M. Nos. 116, 130, 148	0 0 0	[illegible]
The Elements of Polity, by Kámandakí. Edited by Bábu Rájendralála Mitra. Nos. 19 and 179,................	0 0 0	1 [illegible]
The Márkandeya Purána. Edited by the Rev. K. M. Bannerjea. Fasciculi [illegible] V. VI. and VII. Nos. 114, 12[illegible]	4 0 0	0 [illegible]



